868	PM2863	,, ,,	,,	,,	,,	Gr

8				9	10	11
39×3	19	8	75	C	Old	
18×12	2	16	21	,,	,,	‡
43×3.3	46	6	102	,,	,,	* Medical Hall Press, Benares, 1905. See *BMC*, IV, 663. ‡
33×18	74	13	54	,,	Good	‡
32×13	124	8	36	,,	Old	
42×2.7	27	5	92	,,	,,	* VSL 23, 1906. ‡
44×3.3	74	7	70	,,	,,	See *NCC*, I, p. 202a. ‡
38×3.3	90	6	65	Inc. (Br. Ch. 23)	,,	* Ed. Sitaramasastri, Masulipattanam, 1914 (Te.). See *BMC*, IV, 996. ‡
47×3.2	44	7	80	Inc.	,,	† My, I, p. 544. ‡
43×3.6	36	8	108	,,	,,	‡
26×22.4	168	11	35	C	Good	* Brahmavidya Press, Chidambaram, 1887 (Gr.); Advaitamanjari Series 7, Kumbakonam, 1895. See *NCC*, I, p. 199b. ‡
32×10	120	14	50	,,	Da	

1	2	3	4	5	6	7
869	66033	,, —Śivatattvaviveka (cont.)	Appayadīkṣita	Appayadīkṣita	PL	Gr
870	66037	,,	,,	,,	,,	,,
871	TR784	Śikhariṇīmālā-vyākhyā —Śivatattvaviveka *	,,		P	D
872	PM3071	,,	,,		,,	Gr
873	PM3072	,,	,,		,,	,,
874	66752	Śivakarṇāmṛta *	,,		PL	Te & Gr
875	PM2957	,,	,,		P	Gr
876	66780	,,	,,		PL	Te
877	69366	,,	,,		,,	Gr
878	69430	,,	,,		,,	,,
879	71718	,,	,,		,,	Te & Gr
880	68805	Śivajñānabodha *			,,	Gr
881	68464	,,			,,	,,
882	74312	,,			,,	,,

8				9	10	11
39×4	70	8	62	Inc.	Old	
36×4.4	50	11	70	,,	,,	
21×17	8	14	16	,,	Good	* See No. 867 above.
30.3×11	5	15	50	,,	Old	
,,	6	13	,,	,,	,,	
43×3	45	5	62	C	,,	* V. R. Sastri, Madras, 1882 (Gr.); V. V. Press, Srirangam, 1913. See *NCC*, I, p. 199b. ‡
34×10	30	12	50	,,	Da	
38×3	41	6	80	Inc.	Old	
40×3	25	,,	72	,,	,,	
37×3	44	,,	58	C	Good	
43.2×2.8	26	10	88	,,	Old	
40×4	1	8	78	,,	,,	* Often printed and translated. See *BMC*, IV, 26. K. S. Mudaliar, Madras, 1888; PNS 29, 1907; Dharmapuram Adhinam, Trichy, 1945, with English trans. and notes. ‡
35×4	,,	11	70	,,	,,	
18×3.5	6	7	30	,,	,,	

1	2	3	4	5	6	7
883	66769	Śivajñanabodha with Tamil meaning			PL	Gr & Ta
884	68461	,,			,,	,,
885 E	68462	Śivajñānabodha-vyākhyā *	Śivāgrayogin		,,	Gr
886 E	,,	,,			,,	,,
887 E	68464	,,			,,	,,
888 E	TR286	Śivadarpaṇa	Brahmavidyā-dhvarīndra		P	D
889 E	71471	Śivayogasāra	Jñānaprakāśā-cārya		PL	Gr
890	TR287	Śivādvaitanirṇaya *	Appayadīkṣita		P	D
891	75551	,,	,,		PL	Mal
892 E	PM854	Śivotkarṣaprakāśa	Bālakṛṣṇabhaṭṭa		P	D
893 E	75252	Śivotkarṣaratnākara	,,		PL	Gr
894 E	75552	Śaivaparibhāṣā-mañjarī	Nigamajñāna-deva		,,	,,
895 E	66794	Śaivasiddhānta-saṃgraha			,,	,,

8				9	10	11
24×3.3	4	10	34	C	Old	
26×3.8	2	,,	54	Inc.	,,	
44×3.5	7	8	70	,,	,,	* Sarada Vilasa Press, (Kumbakonam) Madras, 1921 (Gr.).
,,	11	6	,,	,,	,,	Different from the above.
35×4	10	11	,,	C	,,	,, ,,
21×17	613	14	18	,,	Good	† MG, R. 2545; My, I, p. 545. ‡
24×5	39	18	55	,,	Old	‡
21×17	110	14	16	,,	Good	* Madras University, 1929. This edition is based on these two MSS. among others. ‡
27×4	97	7	58	Inc.	,,	
28×12	29	10	45	C	,,	† Tj, 8203; Bikaner 6677. ‡
28×5	56	,,	54	Inc.	,,	‡
32×5	34	12	72	C	,,	‡
37×3.5	41	8	62	Inc.	Old	‡

1	2	3	4	5	6	7
896 E	69647	Śaivārthalaharī	Śrīnivāsa		PL	Te & Gr
897 E	TR784	Śrutisūktimālā (Caturvedatātparya-saṃgraha) *	Haradattācārya		P	D
898	PM2894	,,	,,		,,	Gr
899	PM2893	,,	,,		,,	,,
900 E	72429	Śrutisūktimālā-vyākhyā —Tattvaprakāśikā *	Śivaliṅga-bhūpati		PL	Gr & Na
901	66190	,, ,,	,,		,,	Gr
902	66192	,, ,,	,,		,,	Te
903	72428	,, ,,	,,		,,	,,
904 E	TR285	Siddhāntaprakāśikā (Śaivasiddhānta-dīpikā) *	Sarvātma-śaṃbhu		P	D
905	66867	,,	,,		PL	Te
906 E	TR605	Siddhāntasārāvali *	Trilocanaśivā-cārya		P	D
907 E	75282	,,	,,		PL	Gr

8				9	10	11
43×3.6	3	6	75	C	Old	‡
21×17	23	14	14	,,	Good	* South India Saiva Siddhanta Works Publishing Society, Tinnevelly, 1925. ‡
19×12.2	6	27	32	Inc.	,,	
32.2×10.4	11	12	50	C	Old	
40×3.6	66	9	58	,,	,,	* Pub. with the text in the above-mentioned ed.
41×3.5	137	7	86	Inc.	Good	Also contains text.
42×3	12	,,	,,	,,	Old	
38.4×3.7	17	6	90	,,	,,	
20.5×16	24	10	20	C	Good	* VSL 38, 1909. ‡
36×3.3	10	8	90	,,	Old	
21×17	37	14	16	,,	Good	* K. S. Mudaliar, Madras,1888 (Gr.) with Tamil comm. and trans.; Sri Kashinatha Granthamala 7, Mysore, 1930 (Kan.) with Kannada comm. ‡
44×3.2	21	6	82	,,	Old	

1	2	3	4	5	6	7
908 E	TR606	Siddhāntasārāvali with comm.	Trilocanaśivā-cārya	Anantaśivācārya	P	D
909	75282	,,	,,	,,	PL	Gr
910 E	71471	,,	,,	Sadāśivācārya	,,	,,
911	73838	,,	,,	,,	,,	,,

8				9	10	11
21 ×16.4	408	14	16	C	Good	† *NCC*, I, p. 140b.
44 ×3.2	110	6	82	Inc.	Old	
24 ×5	76	18	55	,,	,,	‡
30 ×4	127	10	58	,,	,,	

VEDĀNTA:

ANUBHAVĀDVAITA

1	2	3	4	5	6	7
912 E	TR1189	Anubhavādvaita-siddhāntarahasya	Appayācārya		P	Gr
913 E	TR290	Anubhūtimīmāṃsā-vṛtti			,,	D
914	TR1188	,,			,,	Mal
915	TR1174	,,			,,	D
916	PM859	Anubhūtimīmāṃsā-sūtra *	Appayācārya		,,	,,
917	PM860	,,	,,		,,	Gr
918	TR289	,,	,,		,,	D
919 E	,,	Anubhūtimīmāṃsā-sūtrabhāṣya	,,		,,	,,
920 E	,,	Anubhūtimīmāṃsā-sūtravivaraṇa	,,		,,	,,
921 E	TR292	Ekaśloka with comm.	,,	Appayācārya	,,	,,
922	TR1190	,,	,,	,,	,,	Gr
923	TR1189	Karmasvarūpa-nirṇaya	,,		,,	,,
924 E	TR1191	Jīvanmuktivicāra	,,		,,	,,

8				9	10	11
20×16	1	30	16	C	Old	See *NCC*, I, p. 194a, entered as *Anubhavādvaitasiddhāntasāra*. ‡
21.5×17	67	15	17	,,	Good	Also contains Sūtra-s. See *NCC*, I, p. 158a. ‡
19×15	35	20	14	,,	Old	
33×25	21	23	16	,,	Good	Transcript of the above.
9×6.6	448	2	8	,,	,,	* Vani Vilasam Press, Tinnevelly, 1897 (Gr.). See *NCC*, I, p. 194a.
16.4×12	7	24	15	Inc. (Ch. 1, 2)	,,	
21×17	23	13	16	C	,,	
,,	882	,,	,,	,,	,,	† *NCC*, I, p. 158a. ‡
,,	104	,,	,,	,,	,,	
,,	3	14	,,	,,	,,	† *NCC*, I, p. 194a, mentioned as *Anubhavādvaitaikaślokī*. ‡
20×16	1	28	20	,,	Old	
,,	,,	30	16	,,	,,	See *NCC*, I, p. 194b.
19.3×18	14	27	28	Inc.	,,	‡

1	2	3	4	5	6	7
925 E	68354	Daśakoṭi	Appayācārya		PL	Gr
926 E	TR293	Pakṣasaṃgraha with comm.	,,	Appayācārya	P	D
927	TR1193	,,	,,	,,	,,	Gr
928 E	TR294	Pañcarahasya with comm.	,,	,,	,,	D
929	TR1193	,,	,,	,,	,,	Gr
930 E	TR295	Brahmatattvabodha with comm.	,,	,,	,,	,,
931	TR1193	,,	,,	,,	,,	,,
932 E	68364	Brahmasūtrabhāṣya	,,		PL	,,
933 E	73140	,,	,,		,,	,,
934 E	71895	Brahmasūtrabhāṣya-śodhinī	,,		,,	,,
935 E	72166	Muktidvayādarśa with comm. —Praṇavarahasya	,,	,,	,,	,,
936 E	TR1186	Muktisopāna-nirṇaya *			P	Mal
937 E	TR293	Mokṣasāra			,,	D

8				9	10	11
47.2×3.6	9	7	80	Inc.	Good	See *NCC*, I, p. 194b. ‡
24.3×17	87	14	16	C	,,	See *NCC*, I, p. 194b. ‡
20×15	36	25	,,	,,	Old	
20.3×17	209	16	,,	,,	Good	See *NCC*, I, p. 194b. ‡
20×15	87	25	,,	,,	Old	
20.3×17	152	14	,,	,,	Good	See *NCC*, I, p. 194b. ‡
20×15	68	25	,,	,,	Old	
55×5	72	13	118	Inc. (Br. III. 1)	,,	‡
46.3×4	120	14	105	Inc. (From 1.1.5 to the end)	,,	
41×4	23	8	72	Inc.	,,	See *NCC*, I, p. 195a, under *Bhāṣya-śodhanī*.
46×4.3	4	11	90	C	,,	† *NCC*, I, p. 195a. ‡
21×16.4	3	24	16	,,	,,	* *Sūtasaṃhitā*, IV. 23. 9 *seq.* ASS 25, 1893, pp. 527 ff. ‡
20.3×17	4	14	,,	,,	Good	† *NCC*, I, p. 195a. ‡

1	2	3	4	5	6	7
938	TR1193	Mokṣasāra (cont.)	Appayācārya		P	Gr
939 E	TR293	Mokṣasāravivaraṇa	,,		,,	D
940 E	TR296.3	Yogasāra	,,		,,	,,
941 E	TR296.1,2	,, with comm.	,,	Appayācārya	,,	,,
942	PM3069	,, ,,	,,	,,	,,	Gr
943 E	TR856	Śrutisiddhānta-mālikā	,,		,,	D
944 E	69929	Saptaślokī with comm.	,,	,,	PL	Gr
945 E	TR1192	Sarvavedānta-svarasārthadīpikā	,,		P	,,
946 E	TR297	Sākṣyaṣṭaka with comm.	,,	,,	,,	D
947	66335	,,	,,	,,	PL	Gr
948 E	PM865	Hariharabrahma-sāmarasya with comm.	,,	,,	P	,,

8				9	10	11
20×15	2	25	16	C	Old	
20.3×17	3	14	,,	,,	Good	† *NCC*, I, p. 195a.
20.5×16	178	15	8	,,	,,	† *NCC*, I, p. 195a. ‡
,,	656	,,	20	,,	,,	
22×19	250	27	36	,,	Old	
21×17	19	14	18	,,	Good	*NCC*, I, p. 195a. ‡
39×3.3	13	9	72	Inc.	Old	*NCC*, I, p. 195b. ‡
20×16	10	27	16	,,	,,	*NCC*, I, p. 195b. ‡
21×17	17	14	,,	C	Good	*NCC*, I, p. 195b. ‡
37×3.2	9	8	68	,,	Old	
20×12.3	17	36	20	Inc. (verses 27-44)	Good	† *NCC*, I, p. 195b. ‡

VEDĀNTA:

PRATYABHIJÑĀDVAITA

1	2	3	4	5	6	7
949	PM855	Īśvarapratyabhijñā-sūtravimarśinī *	Abhinavagupta		P	D
950	68857	Paramārthasāra-saṃgraha (Paramārthasāra) *	,,		PL	Gr
951	TR846	Parāpañcāśikā (Anuttaraparāpañcā-śikā) *	Ādyanātha		P	D
952	66534	,,	,,		PL	Te
953	67455	,,	,,		,,	,,
954	67595	,,	,,		,,	,,
955	,,	Parāprāveśikā *	Nāgānanda		,,	,,
956	72582	,,	,,		,,	,,
957 E	67595	Parāprāveśikā-vyākhyā —Svarūpavimarśinī	Cidātmānanda		,,	,,
958	72582	,,	,,		,,	,,
959	66525	Pratyabhijñāhṛdaya-sūtra *	Kṣemarāja		,,	,,

8				9	10	11
29.3×18	10	30	18	Inc.	Good	* Ed. with English trans. and notes by L. D. Barnett, *JRAS*, London, 1910. KSTS 22, 1918; 33, 1921. See *NCC*, I, p. 224b. ‡
39×3	4	7	70	,,	Old	* KSTS 7, 1916. See *NCC*, I, p. 225a. ‡
21×17	,,	14	16	C	Good	* KSTS 14, 1918. ‡
38.3×3.5	3	7	68	,,	Old	
45×4	2	9	90	,,	,,	
44×4	3	7	70	,,	,,	
,,	4	,,	,,	,,	,,	* KSTS 15, 1918. ÷
39×4	3	8	78	,,	,,	
44×4	11	7	70	Inc.	,,	† MG, R. 2159. ‡
,,	7	8	,,	,,	,,	
44×4.4	2	10	72	C	,,	* KSTS 3, 1911; ALS 18, 1938 with English trans. ‡

1	2	3	4	5	6	7
960	66525	Pratyabhijñāhṛdaya-sūtra with Vṛtti *	Kṣemarāja	Kṣemarāja	PL	Te
961	68962	,,	,,	,,	,,	,,
962	69102	Mahārthamañjarī *	Maheśvarā-nanda		,,	Gr
963	71981	,,	,,		,,	,,
964 E	71990	Maharthamañjarī-vyākhyā —Parimala *	,,		,,	,,
965	69587	,,	,,		,,	Te
966 E	72866	,,	,,		,,	Gr
967 E	69102	Virūpākṣapañcā-śikā *	Virūpākṣanātha		,,	,,
968	67595	,,	,,		,,	Te
969	TR1187	Virūpākṣapañcāśikā-vyākhyā *	Vidyācakra-vartin		P	Gr
970	66534	Śivadṛṣṭi *	Somānanda		PL	Te
971	67455	,,	,,		,,	,,
972	PM857	Śivasūtra *	Vasugupta		P	Gr

8				9	10	11
44×4.4	11	10	72	C	Old	* Pub. with the text in both the eds. mentioned above.
37×3	18	5	50	Inc.	,,	
40×3.7	7	10	70	C	Good	* KSTS 11, 1918. TSS 66, 1919. ‡
37×4	,,	9	60	,,	Old	
34×3.6	93	8	65	,,	,, (1878)	* TSS 66, 1919. ‡
42×3.3	50	9	86	Inc.	Old	
37×3.8	115	8	50	C	Good	
40×3.7	4	10	70	,,	Old	* TSS 9, 1910. ‡
44×4	3	7	,,	,,	,,	
20.4×17	22	25	22	,,	Good	* TSS 9, 1910. ‡
38.3×3.5	29	7	68	Inc.	Old	* KSTS 54, 1934. ‡
45×4	13	9	90	,,	,,	
26×16	2	14	32	C	Good	* KSTS 1, 1911. ‡

1	2	3	4	5	6	7
973 E	PM857	Śivasūtravārttika			P	Gr
974	66534	,, *	Varadarāja		PL	Te
975	67455	,,	,,		,,	,,
976	TR288	,,	,,		P	D
977	PM925	Śivasūtravimarśinī *	Kṣemarāja		,,	,,
978	PM858	,,	,,		,,	Sh

8				9	10	11
26×16	5	14	32	C	Good	‡
38.3×3.5	18	7	68	Inc.	Old	* KSTS 43, 1925. ‡
45×4	13	9	90	,,	,,	
21×17	82	14	16	,,	Good	
17×11.5	58	16	14	C	Old	* KSTS 1, 1911. Trans. P. T. Shrinivas Iyengar, *Indian Thought*, Allahabad, 1912.
19×16	88	10	15	,,	,,	

APPENDIX

VEDĀNTA: VIŚIṢṬĀDVAITA

1

Śrī Rāmānuja, the famous exponent of Viśiṣṭādvaita Vedānta, was born in a village near Kanchipuram in A.D. 1017 and had his preliminary education under Yādavaprakāśa of Kanchi, a strong advocate of the Bhedābheda doctrine of Advaita Vedānta. For further details of Rāmānuja's life and works, see *HIP*, vol. 3, pp.100-13 and the *Rāmānuja-campū*, Madras Govt. Oriental MSS. Series 6, 1942.

In the *Śrībhāṣya*, he quotes Bodhāyana's *Vṛtti*, Brahmanandin's (Ṭaṅka's) *Vākya* and Dramiḍācārya's *bhāṣya* on the *Vākya* and Īśvarakṛṣṇa's *Sāṃkhyasaptati*, besides passages from Purāṇa-s and Pāñcarātra Saṃhitā-s. He also indirectly refers to Maṇḍanamiśra's *Brahmasiddhi*, Bhartṛhari's *Vākyapadīya*, Prakāśātman's *Pañcapādikāvivaraṇa* and Vimuktātman's *Iṣṭasiddhi*.

12

ब्रह्मसूत्रभाष्यम्—भगवद्रामानुजकृतम्

Two extra leaves in the beginning contain the following verses:

वरदगुरुवेंकटेशौ रामानुजवरदविष्णुचित्तार्यान् ।
कुरुकेश्वरभाष्यकृतौ नामामि नाथेन यामुनं व्यासम् ॥
यतीन्द्रकृतभाष्यार्था यद्वयाख्यानेन दर्शिताः ।
वरं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम् ॥
अविस्तृताः सुगम्भीरा रामानुजमुनेर्गिरः ।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ॥
यो नित्य + प्रपद्ये ।
पुत्रीकृतो भाष्यकृता स्वयं यः शठारिसूक्तेर्विवृतिं व्यधत्त ।
तत्प्रेमतः प्राप्य तदीयभाष्यं वन्दामहे तं कुरुकेश्वरार्यम् ॥
श्रीविष्णुचित्तपदपङ्कजसंगमाय चेतो मम स्पृहयते किमतः परेण ।
नो चेन्ममापि यतिशेखरभारतीनां भावः कथं भवितुमर्हति वाग्विधेयः ॥

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥
शुद्धं श्रीरङ्गराजाह्वयगुरुतिलकं श्रीमदात्रेयगोत्रं
श्रेयोहेतुं नतानां वरदगुरुवरावासतच्छास्त्रजालम् ।
वेदान्ताचार्यवर्यं कृतसकलरहस्तत्त्वमन्त्रादिदानं
वन्दे रामानुजार्यं गुरुकुलतिलकं वादिहंसाम्बुवाहम् ॥
श्रीमान्+हृदि ।
श्रीलक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥
वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं भक्त्या भजामि परवादिभयंकरार्यम् ॥
शमदमादिगुणैकनिकेतनं चरमपर्वणि निश्चलचेतसम् ।
यतिवराङ्घ्रिसरोरुहषट्पदं समरपुंगवसद्गुरुमाश्रये ॥
कौशिकश्रीनिवासार्यतनयं विनयोज्ज्वलम् ।
वात्सल्यादिगुणावासं वन्दे वरददेशिकम् ॥
श्रीमद्वरवराचार्यवरदाचार्ययोर्दृशा ।
अवाप्तोभयवेदान्तमाश्रये वरदं गुरुम् ॥
हारीतवेंकटाचार्यसूनुं वात्सल्यसागरम् ।
विद्याविनयसंपन्नं लक्ष्मणार्यमहं भजे ॥
श्रीरामानुजदेशिके गुणनिधौ न्यस्तात्मरक्षाभरं
तस्मात् संगरपुंगवादपि गुरोर्लब्धागमान्तद्वयम् ।
शान्तिक्षान्तिमुखैरनन्यसुलभैः सद्भिर्गुणैर्भूषितं
सेवेऽहं कुशिकान्ववायतिलकं श्रीदेवराजं गुरुम् ॥
श्रीकौशिकान्वयवरप्रदवर्यसूनुं तत्पादपद्मविनिवेशितसर्वभारम् ।
तल्लब्धवेदमकुटीयुगलार्थसारं श्रीश्रीनिवासगुरुमन्वहमाश्रयामः ॥
श्रीमत्कौशिकवंशमौक्तिकमणिश्रीश्रीनिवासात्मजं
तत्पादाम्बुजयुग्मसेवनबलावासागमान्तद्वयम् ।
श्रीभाष्यामृतवाहिनीमधुरिमासेवावबद्धस्पृहं
वन्देऽहं करुणासुधाजलनिधिं श्रीमच्छरण्यं गुरुम् ॥
श्रीमत्कौशिकवंशवारिधिविधुं श्रीमच्छरण्यात्मजं
तद्दीक्षातसमस्तवेदमकुटीभावोल्लसन्मानसम् ।
श्रीवासार्यपदाम्बुजातयुगलीविन्यस्तरक्षाभरं
श्रीश्रीवासगुरूत्तमं गुणनिधिं सेवे सदानन्यधीः ॥

वरदार्यगुरोः सूनुं कौशिकान्वयभूषणम् ।
श्रीवासलब्धभाष्यादिं शरण्यार्यमहं भजे ॥

19

A well-known, elaborate commentary on the *Śrībhāṣya*, which not only explains Rāmānuja's views but also refutes those of other commentators on the *Brahmasūtra-s* like Śaṃkara, Bhāskara and Yādavaprakāśa. It quotes the *Ślokavārttika*, the *Bṛhatī*, the *Ṛjuvimalā*, the *Prakaraṇapañcikā*, the *Tattvaśuddhi*, the *Bhāmatī*, etc. The author lived about the end of the 13th century A.D. He was the son of Vāgvijayibhaṭṭa, grandson of Śrīrāmabhaṭṭa, great-grandson of Śrīvatsāṅkamiśra and pupil of Vātsya Varadācārya alias Naḍādūr Ammāl, the author of the *Tattvasāra*.

23

ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका

Adds the following extra verses in the last page:

गुरवे वरदार्याय कुर्वीमहि नमस्क्रियाम् ।
यत्पादाम्भोज . . . . . संपदम् ॥
श्रीमते व्यासविदुषे यतीन्द्राङ्घ्रिरजोजुषे ।
नमः कारुण्यवपुषे मायावादतमोमुषे ॥
व्यासार्यचरणाम्भोजयुगलं शरणं भजे ।
यद्गिरां परिणाहस्य फलं नो भाष्यवेदनम् ॥
राघवार्यपदाम्भोजयुगलं शरणं भजे ।
यद्दिव्यसूक्त्या वेदान्तदीपिका मे स्थिरीकृता ।
श्रीराघवगुरोः पादयुगलं शरणं वृणे ।
यत्पादयुगलध्याना . . . . . ॥

30

ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका

Reads the following verse in the fly-leaf:

श्रीमद्वधूलतनयान्वयशीतभानुं श्रीमन्तमण्णयगुरूत्तमलब्धबोधम् ।
श्रीवेंकटार्यतनयं श्रितपारिजातं श्रीकृष्णदेशिकमहं शरणं प्रपद्ये ॥

31

ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रदीपिका

A short commentary on the *Śrībhāṣya* by the author of the more elaborate *Śrutaprakāśikā*.

Beginning:

वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥
वरदं द्विरदाद्रिशेखरं कमलाया दयितं दयानिधिम् ।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम् ॥
वेदान्तसूत्रभाष्यार्थमाचार्योपासनाच्छ्रुतम् ।
तद्विरा दीपिकेवाहं दर्शयिष्ये यथामति ॥

आरिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थमिष्टदेवतोपासनालक्षणमङ्गलं श्रुत्या कुर्वन्नार्थं प्रतिपाद्यं संक्षेपतः श्रोतृबुद्धिसमाधित्सया दर्शयति—अखिलेति। प्रथमपादेन प्रथमद्विकसंक्षेपः। द्वितीयेन तूत्तरस्य। भवतीति भुवनं कार्यजातम्। कतिपयकारणचतुर्मुखव्यावृत्त्यर्थमखिलशब्दः। प्रायिकत्वव्यावृत्त्यर्थं सकलेत्यनुक्तिः।

End:

इति सर्वं समञ्जसमिति। सर्वशब्देन भेदश्रुत्यभेदश्रुतिघटकश्रुतिरूपगुणादिविधिनिषेधवाक्य-प्रत्यक्षादिप्रमाणसमुदाहृतश्रुतिस्मृतीतिहासपुराणवचनतदनुग्राहकतर्कजातं विवक्षितम्। इतिशब्देनाखिलभुवनेत्याद्युक्ताशेषार्थपरामर्शः। तेषां सर्वेषामनया दिशा सामञ्जस्यं द्रष्टव्यम्। एतद्विरुद्धमानतर्कपरिहारश्चोक्तया दिशा नेयः। मितगम्भीरे भाष्ये सर्वं गर्भितमनुसंधेयम्। तदवगाहमानैः स्वपक्षस्थापनपरपक्षप्रतिक्षेपौ सुकरावित्येतदभिप्रायेण सर्वं समञ्जसमित्युक्तम्।

Colophon:

इति हरितकुलतिलकवाग्विजयिसूरिसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदाचार्यपादसेवासमधिगतभगवद्रामानुजविरचितशारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुतप्रदीपिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः। समाप्तमिदं शास्त्रम्।

33

ब्रह्मसूत्रभाष्यव्याख्या—नयप्रकाशिका

The author was the son of Adhvaranāyikā and Nātha alias Raṅganātha of the Ātreya family, and the younger brother of Hastyadrinātha.

and the elder brother of Varadarāja and Rāmabhadra. His other works are: the *Bhāṣyabhāvaprabodha*, the *Nayadyumaṇi* and the *Mumukṣūpāyasaṃgraha*. He must have lived towards the last part of the 12th century, (for further details see introduction to the *Nayadyumaṇi*, edited by V. Krishnamacharya and T. Viraraghavacharya, MGOS 141, 1956).

Beginning:

श्रीमदात्रेयनाथार्यान् गुरून् नः परमान् गुरून् ।
श्रीरामप्रमुखान् वन्दे श्रीमद्रामानुजं मुनिम् ॥
कृष्णद्वैपायनं व्यासं साङ्गाम्नायप्रवर्तकम् ।
सर्वज्ञमञ्जनासूनुं जानकीनायकप्रियम् ॥
जननीं जगतां लक्ष्मीं गरुडध्वजवल्लभाम् ।
नियन्तारमशेषाणां जीवानामचितामपि ॥
श्रियः पतिं हयग्रीवं कल्याणगुणसागरम् ।
निर्मलं चापि जगतां कारणं कमलेक्षणम् ॥
प्रणम्य लक्ष्मणार्यस्य भाष्ये त्रय्यन्तगोचरे ।
गम्भीरेऽतिनिगूढानां नयानां तु प्रकाशने ॥
प्रयत्नः क्रियते बुद्ध्या तत्प्रसादसमुत्थया ।
यथाश्रुतं यथाशक्ति मेघनादारिणा मया ॥
आचार्याणां निबन्धेषु प्राचां प्रौढेषु सत्स्वपि ।
विवृतौ भाष्यशब्दानां यतस्तेषामुपक्षयः ॥
भाष्यस्यापि च सूत्राणां पाठगत्यनुधावनात् ।
शङ्कोत्तरत्वात् तेषां च पूर्वराद्धान्तपक्षयोः ॥
व्यामिश्रत्वादुपन्यासो मन्दधीभिर्न भाव्यते ।
तेषामप्यतिसंकोचाद्दीपग्रन्थेऽपि कृत्स्नशः ॥
नोपन्यासः कृतस्तस्मात् तत्प्रवृत्तौ प्रयोजनम् ।
वेदमार्गानुसारीति जनोऽयं तु कलावपि ॥
दुष्टोक्तावप्यनुग्राह्यो दोषज्ञैरपि पण्डितैः ।
हन्त सूक्ष्मदृशोऽप्यात्मगुणान् मेरुसमुन्नतान् ॥
परदोषांश्च निर्वैरा ये न पश्यन्त्यपि स्फुटान् ।
महान्तस्ते प्रहृष्यन्ति मदुक्त्या स्वल्पयापि हि ॥

On fo. 3:

प्रणम्य प्राञ्जलिर्याचे भूयोऽप्यस्य निरीक्षणम् ।
प्रणिपातप्रसन्ना हि साधवोऽभीष्टदायिनः ॥

ग्रन्थस्योपक्रमे निर्विघ्नपरिसमाप्त्यर्थं प्रचयगमनार्थं च स्वाभीष्टपरदेवतानुस्मृतिरूपां भक्तिं शब्दात् प्रार्थयमाना भाष्यकृतः शिष्यबुद्धिसमाधानायार्थात् शास्त्रप्रतिपाद्यार्थं संगृह्णन्ति—अखिलेति श्लोकेन ।

End:

एतत्पादस्याद्येऽधिकरणे परं ब्रह्मोपसन्नस्य स्वरूपस्यैवाविर्भाव इत्युक्तम् । द्वितीये मुक्तस्य ब्रह्मणोऽनुभवः स्वान्तरात्मतयैवेत्युक्तम् । तृतीये मुक्तात्मन आविर्भाव्यस्वरूपनिर्णयः कृतः । चतुर्थे तस्य स्वेष्टभोगप्राप्तेः स्वसंकल्पमात्रसिद्धित्वमुक्तम् । पञ्चमे तस्य देहसद्भावासद्भावयोरिच्छाधीनत्वमुक्तम् । षष्ठे तदैश्वर्यस्य परमात्मगुणानुभवमात्रविषयत्वमित्येतत्सर्वं निरवद्यत्वेन सर्वत्र प्रसिद्धम् ।

श्रीलक्ष्मणार्यो जयताद्यतीन्द्रः खिलीकृतं यः खलयुक्तिगुल्मैः ।
दात्रैः समीचीननयाभिधानैराम्नायमार्गं सुगमं चकार ॥
यत्सर्वत्रप्रसिद्धेतिसूत्रभाष्ये कृता वृतिः ।
परप्रेरणयैवाद्य सर्वत्रासौ प्रसिध्यति ॥
यस्यातिप्रथितः पिताद्रिकुलजो नाथाह्वयो भूतले
ख्याता चाध्वरनाथिकेति जननी हस्त्यद्रिनाथाह्वयः ।
ज्येष्ठः श्रेष्ठगुणोऽनुजो वरदराट् श्रीरामभद्रानुज-
स्तेनाकारि नयप्रकाशकमिदं नाम्नेन्द्रजिद्वैरिणा ॥

Colophon:

इति श्रीमदात्रेयनाथसूरिसूनुना मेघनादारिनाम्ना विरचितायां नयप्रकाशिकायां चतुर्थाध्याय-चतुर्थपादे जगद्व्यापारवर्जाधिकरणं षष्ठं समाप्तम् । चतुर्थपादश्च समाप्तः । समाप्तश्चतुर्थोऽध्यायः । समाप्तश्चायं ग्रन्थः ।

34

ब्रह्मसूत्रभाष्यव्याख्या—भाष्यभावप्रबोधनम्

Beginning:

अध्ययनवत एव तद्ग्रहणविधानात् अन्यतस्तद्ग्रहणनिवृत्तिः फलितेति भावः । अक्षरराशि-ग्रहणेनेत्युक्तेः तद्विधेरपूर्वपरत्वमर्थज्ञानपर्यन्तत्वं च निरस्तम्; अपूर्वस्य वाक्यार्थज्ञानस्य वा अध्ययन-शब्दावाच्यत्वादिति भावः । ग्रहणस्य विधेय . . . . फलम् । तथापि साध्यत्वपर . . वस्तुतः साध्यत्वस्यैव विधित्वाभिमतेः । तच्चोत्तरत्र व्यज्यते । आचार्योच्चारणानूच्चारणरूपस्याध्ययनस्य साध्य-त्वेऽपि ग्रहणरूपफलापेक्षयाध्ययनेऽपि करणनिर्देशः । ग्रहणे फलं तु अध्ययनसंस्कार्यस्वाध्यायविनि-योगापेक्षया कल्प्यत इति भावः ।

End:

उपासात्रैविध्यादिति हेतूक्तिस्तत्परिहारपरा, इत्यभिप्रायादाह—एतदिति । अधिकरणार्थमुपसंहरति—अत इति ।

Colophon:

इति श्रीमदात्रेयनाथसूरिसूनुमेघनादारिविरचिते श्रीभगवद्रामानुजीयोत्तरमीमांसाभाष्यभावप्रबोधने प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ।

35

A well-known and most authoritative commentary on the *Śrībhāṣya*. The versatile author wrote more than 120 works in Sanskrit and Tamil. For details of his life and works see *HIP*, vol. 3, pp. 119-25. Among his Vedānta works special mention may be made of the *Tattvamuktākalāpa*, the *Sarvārthasiddhi*, the *Adhikaraṇasārāvali*, the *Śatadūṣaṇī* and the *Paramatabhaṅga*. All available MSS. and books of this commentary break off in the middle of the 1st Adhikaraṇa of the 1st Pāda of the Ist Adhyāya. The author mentions a rare work, Vāmana's commentary on the *Dramiḍabhāṣya*. He identifies Bodhāyana with Upavarṣa.

36

ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वटीका

Reads the following verse in the beginning:

श्रीमद्वङ्गयतीन्द्रस्य पदाब्जे परमं धनम् ।
अकिंचनानामस्माकं भजतां ध्यायतां सदा ।

37

ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वमार्तण्डः

This is a discourse and critical study on Rāmānuja's *Śrībhāṣya*. It is also called the *Candrikākhaṇḍana* as it refutes the *Tātparyacandrikā* of the Dvaita teacher Vyāsatīrtha. The author was the son of Śrīnivāsatātācārya, younger brother of Aṇṇayācārya of the Bukkapaṭṭaṇam family, and pupil of

Kauṇḍinya Śrīnivāsācārya. He was patronized by Bahiri Cinna Veṅkaṭa, a petty chief of Surapuram of Āndhradeśa in the 18th century A.D. Details about the author's family can be had from V. Raghavan, *JAHRS*, vol. 13, pp. 11-33 and the introduction to the *Vedāntakārikāvali* (ALS 75).

Beginning:

निर्व्याजकृपया श्रीमद्रामानुजमुनीश्वरः ।
मदारम्भं कलयतादञ्जसा सप्रयोजनम् ॥
जगज्जन्मस्थेमाप्ययनियमनामेयमहिमा
नतत्राताभीतिप्रदमृदुलकारुण्यपटिमा ।
त्रयीशृङ्गाभङ्गप्रगुणगुणसर्वस्वगरिमा
रमानेता चेतःपदमिदमुपैतु प्रतिपदम् ॥
त्रयीमर्यां दुग्धमदुग्ध यो मुनिः पयस्विनीं सूत्रमिषादशेषतः ।
विपच्य चातच्य विमथ्य यो ददौ तदर्थगव्यं प्रणमामि तावुभौ ॥
त्रयीशिखरपद्धतिं परदुरुद्धतेरुद्धर-
न्नपार्थपरकत्थनान्यपि कदर्थयन्नर्थतः ।
समस्तपदगाथिना समुदगाथि यो व्यास इ-
त्यमुं जितकुदर्शनं हृदि सुदर्शनं भावये ॥
पुरा सुरारेरुददीधरत् त्रयीं स्वयं हयास्यः स तदर्थतस्करान् ।
निराकरिष्णुः समभूद्यदाकृतिः कृती मतिं मे सुकृती दिशेदसौ ॥
अद्वैतशुष्कतरुदुष्करहव्यवाहमन्द्वन्द्वविद्वदवतंसममंसतान्ये ।
शेषाविशेषमपि यं ज्ञपयन्त्यशेषास्तं **वेंकटाध्वरिण**मिद्धगुणं प्रणौमि ॥
समुन्नयन्नार्यमतं विनिर्णयन् विघूर्णयन् दुर्नयभाञ्जि चूर्णयन् ।
समस्ततन्त्रेष्वसमः स्तुतस्तु यस्त**मण्णयार्यं** गुरुवर्यमाश्रये
यत्पादपङ्कजपरागपरागतैना यो नाम कश्चन विपश्चिदिनत्वमेति ।
तन्त्रस्वतन्त्रममलं **कमलानिवास**ता**तार्य**मार्यजनधुर्यममुं श्रयेय ॥
यस्मात् परस्मादिव भावनीयादध्यैषि भाष्यं सकलैरदूष्यम् ।
पूर्वेण तन्त्रेण समं समस्तं तं **श्रीनिवासाध्वरिणं** वृणीय ॥
अग्रजचरणानुग्रहजाग्रदशेषप्रशस्तशास्त्रगतिः ।
श्रुत्यन्तभाष्यदूषणकृत्यानधुना धुनोमि तानबुधान् ॥
श्रीमद्भाष्यमदूष्यं हरिणा गुरुणापि सूत्रकर्त्रा वा ।
दूषयतामतिमान्द्यं मतिमान्द्यं कृतिमुखेन कथयामि ॥
भाष्यार्थमर्थयन्ते सर्वेऽखर्वेण चेतसा सुधियः ।
जानन्ति हन्त किं ते शान्तस्वान्तान् विना मदीयगुरून् ॥

सुदर्शनाचार्यविदर्शिताध्वनां कियान् भवेद् ध्वान्तविधूनने श्रमः ।
तथापि दोषातिगभाष्यभास्वतः स्वतः प्रकाशाय यते कृतेर्मुखात् ॥
भाष्यार्णवमवतीर्णो विस्तीर्णं यदवदं **नयद्युमणौ** ।
संक्षिप्य तत्परोक्तीर्विक्षिप्य करोमि तोषणं विदुषाम् ॥
सिद्धान्तपद्धतिश्रद्धानिर्दिधारयिषावशात् ।
स्खलितं गलितं वापि सन्तो ह्लन्त्वमत्सराः ॥

इह खलु परमकारुणिको भगवान् बादरायणो भवभयभञ्जनोद्दिधीर्षया त्रयीं व्याचिख्यासुस्तत्र पूर्वभागार्थनिर्धारणाय निजान्तेवासिनं जैमिनिं नियुज्य तदुत्तरभागतत्त्वार्थनिर्दिधारयिषया स्वयमेव शारीरकं शास्त्रं निरूपयितुं प्रववृते । तस्य प्रमेयार्थप्रतिज्ञापरमिदमादिमं सूत्रम्—अथातो ब्रह्मजिज्ञासा । अत्रायमथशब्द आनन्तर्ये भवति । अतःशब्दो वृत्तस्य हेतुभाव इति श्रीमद्भाष्यम् । अस्यायमभिप्रायः ।

The following colophon is found at the end of the 1st Pāda of the 1st Adhyāya:

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्र**श्रीनिवास**तातार्यनन्दनेन **लक्ष्म्यम्बा**गर्भविविक्तशुक्ति-मुक्तामणिना **कौण्डिन्यश्रीनिवासदीक्षित**कटाक्षवीक्षाशिक्षितमीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजा-**ण्णयदीक्षित**ानुग्रहगृहीतचतुस्तन्त्रनियन्त्रितमानसेन **श्रीनिवास**विदुषा विरचिते **तत्त्वमार्ताण्डे** प्रथमस्याध्यायस्य प्रथमः पादः ।

End:

अनुकृतिशब्दस्य सादृश्ये प्रसिद्धतया तस्य पश्चात्कृतिमात्रपरत्वस्यासंभवात्; अनवस्थिते-रसंभवाच्चेत्यत्रास्मान् प्रति समुदायप्रसिद्धिभङ्ग वदत इह तद्विस्मरणायोगाच्च; कृतिशब्दस्य प्रयत्नार्थकस्य भानार्थकत्वायोगाच्च; अनुकरणस्यादित्यादिवृत्तेरात्मावृत्तितया असिद्धेश्च । तदनु-कृतस्वप्रकाशत्वं तु न प्रतीयते । तस्येत्यस्य वाक्यप्रत्यभिज्ञापकत्वं वदतां सूत्रे तस्यान्वयः कथमिति त एव प्रष्टव्याः । अनुभानादित्यनूक्तिश्चाननुगुणा । व्यापारान्तरस्यापि ग्रहणाय कृतिग्रहण-मित्युक्त्याच्छावाकोदाहरणं धृत्यननुगुणम् ; अपि च स्मर्यत इत्यनेन पौनरुक्त्यग्रस्तं चेति दिक् । तस्मात् पूर्वाधिकरणशेषत्वेन पूर्वोक्तव्याख्यानमेव समीचीनम् ।

विषमविषयग्रासव्यासक्तिमप्यवमत्य हृ-
दहरकुहरे दीव्यन् देवो दयेत निजाश्रितान् ।
असहनजनश्रेणिं न्यक्कृत्य कृत्यपराङ्मरान्
वहति **बहिरीचिन्नश्रीवेंकटक्षिति**पो यथा ॥

तत्त्वमार्ताण्डे दहराधिकरणं समाप्तम् ।

40

ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वमार्तण्डः

The second leaf reads the following verses:

कौसल्याजननं क्रतुघ्नहननं सीताकरोत्पीडनं
पट्टारम्भणमम्बिकानिरसनं कान्तारसंचारणम् ।
जानक्या हरणं प्लवंगमपतेः सख्यं कपिप्रेषणं
सेतूल्लङ्घनमक्षतातनिधनं ह्येतद्धि रामायणम् ॥
आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनं
द्यूते श्रीहरणं वने प्रवसनं मत्स्याल्ये वर्तनम् ।
लीलागोग्रहणं रणोपकरणं संधिक्रियाजृम्भणं
पश्चाद्भीष्मसुयोधनादिनिधनं ह्येतन्महाभारतम् ॥
आदौ देवकिदेविगर्भजननं गोपीगृहे वर्धनं
मायाजीवितपूतनापहरणं गोवर्धनोद्धारणम् ।
कंसोच्छेदनकौरवादिनिधनं कुन्तीसुतापालनं
ह्येतद्भागवतं पुराणमुदितं श्रीकृष्णलीलामृतम् ॥

42

ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वमार्तण्डः

Beginning:

अशेषचिदचिद्वस्तुरक्षादीक्षैकलक्षणम् ।
समस्तसद्गुणावासं श्रीनिवासमुपास्महे ॥
ब्रह्मायोगव्यवच्छेदः प्रथमे पाद ईरितः ।
अन्ययोगव्यवच्छेदश्चिपाद्यामधुनोच्यते ॥

अस्तु ब्रह्मणः सर्वजगत्कारणत्वम् ; तत् क्वचित् जीवस्यापि स्यात् ।

End:

उभयवादिसंमतवाक्यानां सर्वेषां समम् । अर्थैक्यं तु नात्मवाक्येऽपि; अभिमान्यभिमान-परतया विलक्षणार्थत्वात् । किंच न तव मते एतादृशषष्ठीनिर्देशो गमकः । भेदस्य

43

ब्रह्मसूत्रभाष्यव्याख्या—लघुभावप्रकाशिका

Beginning:

वन्दे वाञ्छितलाभाय कुन्देन्दुधवलस्मितम् ।
मन्देतरघनप्रख्यं तं देवममराधिपम् ॥
. . . . निरस्तनिखिलाहितः ।
तं श्रीनिवासतातार्यगुरुवर्यमहं भजे ॥
श्रुतप्रकाशिकाप्रोक्तपदवाक्यार्थपद्धतीः ।
संगृह्य लिख्यते सेयं लघुभावप्रकाशिका ॥

इह खलु भगवान् रामानुजमुनिः सकलजनानुग्रहाय बोधायनादिपूर्वाचार्यमत . . . . . शास्त्रं व्याचिख्यासुस्तदर्थतत्त्वनिर्णयस्य भक्त्या त्वनन्यया शक्य इति प्रमाणवशेन भगवद्भक्ति-साध्यत्वं मन्यमानः प्रारिप्सितभाष्यग्रन्थस्याविघ्नपरिसमाप्तये . . भक्तिप्रार्थनारूपं मङ्गलमाचरति—अखिलेत्यादिना ।

End:

अहं निर्दुःखं सुखी स्यामिति हि प्रतीतिः । तस्य पुरुषार्थवतो नाशः कथं पुरुषार्थः पुरुषार्थान्तरं वा कथमर्थयितुस्तस्याभावे पुरुषार्थो भवेत् इत्यादि बहुतरं प्रपञ्चितं श्रुतप्रकाशिकायां तत्रैव द्रष्टव्यम् ।

Colophon:

इति लघुभावप्रकाशिकाव्याख्यायां श्रीमद्भाष्यटीकायां चतुःसूत्री ।

44

ब्रह्मसूत्रभाष्यव्याख्या—सुबोधिनी

In the introductory stanzas the anonymous commentator salutes Vādikesari Ramyajāmātṛmuni, Rāmānujamuni and his son and pupil Vādikesari Veṅkaṭācārya. The commentary is said to have been written under the direction of Veṅkaṭācārya mentioned above. The *Śrutaprakāśikā* and its commentary the *Gurubhāvaprakāsikā* are mentioned.

Beginning:

जयतु जयतु नित्यं श्रीनिवासो वृषाद्रौ जयतु जयतु नित्यं भाष्यकृद्भूतपुर्याम् ।
जयतु जयतु नित्यं सर्वतन्त्रस्वतन्त्रो जयतु जयतु नित्यं वादिकण्ठीरवार्यः ॥
माऽभूषि . . . . . ।

वादिकण्ठीरवाचार्यनप्ता वरगुणान्वितः ।
रम्यजामातृनामासौ वर्धतां यतिशेखरः ॥
श्रीरङ्गजयकेतुश्रीरामानुजजयध्वजम् ।
नताज्ञानतमःसूर्यं रामानुजमुनिं भजे ॥
श्रीरामावरलब्धबोधमनघं तत्पादपद्माश्रितं
तत्सूनुं शठजिन्मुनीन्द्ररचितग्रन्थार्थनिर्वाहकम् ।
श्रीमद्वादिमृगेन्द्रवंशतिलकं वेदान्तविद्यागुरुं
श्री . . . . . तनूभवं श्रीवेंकटार्यं भजे ॥
तेन संचोदितः कुर्वे व्याख्यां भाष्यार्थबोधिनीम् ।
पूर्वार्याभिमतानर्थानाहृत्यैव न तु स्वतः ॥
श्रुतप्रकाशिका . . . गुर्वीं भावप्रकाशिकाम् ।
संगृह्य सुखबोधाय श्रीभाष्यार्थो विलिख्यते ॥
श्रीभाष्यस्य यतीट्कृतस्य सुलभाम्नाय्यन्तवाचा . .
व्याख्याः प्रौढधियां सुदर्शननगेट्विष्णवादिभिः . . . . . ।
बोधार्थं मितधीजुषामपि मया व्याख्या कृता श्रीपति-
र्वेंद्यः स्वाद्यतिराट्सुदर्शननगेडीशाश्च रक्षन्तु नः ॥
श्रीरामानुजयोगिसूक्तिविलसद्बुद्धेर्ममाप . . . . . .
. . . समक्षमुज्ज्वलधियामद्वैतिनां वा शतम् ।
वादे जेतुमथाद्रियध्वमुरुधीभाजां तु किं नो दिशो-
दार्याणां हि गिरस्तथा . . . . . ॥

इह खलु श्रीमान् कारुणिको भवतप्तजनभागधेयेन भूमावतीर्णो . . . . परपर्यायप्रमाणाधीन-प्रमेयनिश्चयानां सर्वेषां पुरुषार्थानामुपादित्सितजिहासितेष्टानिष्टतत्साधनानाम् ।

End:

प्रकरणे तपसा चीयते ब्रह्मेत्यत्र ब्रह्मपदस्य परमात्मपरत्वेऽपि, यस्य ज्ञानमयं तपः, तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत इत्यत्र

45

ब्रह्मसूत्रभाष्यटिप्पणी

A short gloss on the *Śrībhāṣya*. The author belonged to the Vaṅgipuram family and was popularly known as Vigraham Deśikācārya. He was the pupil of Aṇṇayācārya of Nāvalpākkam village, North Arcot Dt. He lived about A.D. 1850.

Beginning:

वङ्गीशवंशजनुषा श्रीदेशिकाभिधानजुषा ।
अधिभाष्यमधिगतार्थाः कथ्यन्ते श्रीमदण्णयार्योक्ताः ॥

अखिलजगदनुजिघृक्षुराचार्यः प्राचार्यनियमनप्रारिप्सितशारीरकभाष्यपरिसमाप्तिप्रत्यर्थिप्रत्यूह-व्यूहप्रशमनप्रचयगमनप्रयोजनमनुष्ठितं मङ्गलं ग्रन्थतो निबध्नाति—अखिलेत्यादिना । परस्मिन् ब्रह्मणि, य एनं विदुरमृतास्ते भवन्तीत्युपक्रान्तसंश्रयणीयतोपयोगित्वेन सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जयनयन् देव एकः इति श्रुत्या ज्ञात्वा मां शान्तिमृच्छतीति वक्ष्यमाणसंश्रयणीयताप्रयोजकत्वेन सर्वलोकमहेश्वरं सुहृदं सर्वभूतानामिति स्मृत्या चोक्तं कनकगिरिलोष्टशकलयोः अव्यभिचारेण परिक्लृप्तपरस्परापेक्षाकं परत्वं सौलभ्यं च लीलान्तेन दीक्षान्तेन च प्रार्थनीयभक्तिविषयताप्रयोजकत्वेन प्रतिपाद्यन्ते ।

End:

अत एव शब्देन्दुशेखरे विशेषणं विशेष्येणेत्यत्रान्यतरोपादानेन सिद्धे उभयोपादानं किमर्थ-मित्याक्षिप्य जातिसंज्ञयोः गुणक्रियाभ्यां समभिव्याहारे विशेष्यतैवेत्युक्तम् । न च पुरु सुनोति

46

ब्रह्मसूत्रभाष्यसारार्थसंग्रहः

A metrical summary of the principles contained in the *Śrībhāṣya*. The author, who belonged to the Śrīvatsa family, was the son and pupil of Śrīśailārya. The work contains 130 verses.

Beginning:

वेदान्तद्वयसारार्थान् संगृह्य परिपाल्य यः ।
पात्रेभ्यः प्रददौ वात्स्यश्रीशैलेशं तमाश्रये ॥ १ ॥
स्वशेषाशेषतत्त्वाय नियन्त्रे निर्मलात्मने ।
सर्गस्थित्यन्तलीलाय श्रीमते विष्णवे नमः ॥ २ ॥
यत्सूक्तिः सुधियां सूते कर्मब्रह्मविवेचनम् ।
रामानुजमुनेस्तस्य वन्देमहि पदाम्बुजम् ॥ ३ ॥
नमस्कृत्यास्मदाचार्यतदाचार्यानुक्रमात् ।
श्रुतः श्रीभाष्यसारार्थः संग्रहेण प्रकाश्यते ॥ ४ ॥
पौर्वापर्यं समुचितं कर्मब्रह्मविचारयोः ।
विषयैक्यफलैक्याभ्यामैकशास्त्र्यसमर्थनात् ॥ ५ ॥

वेदार्थ एको विषय एकं तन्निर्णयः फलम् ।
अवान्तरार्थभेदस्तु कर्म ब्रह्म च काण्डयोः ॥ ६ ॥

End:

गुरुप्रसादसंप्राप्तभाष्यसारेण निर्मिते ।
सारार्थसंग्रहेऽध्यायः पूर्णः पूर्णफलोज्ज्वलः ॥ १३० ॥

Colophon:

इति श्रीवत्सकुलतिलकश्रीवत्साङ्कश्रीनिवासकृतिषु सारार्थसंग्रहः संपूर्णः ।

श्रीवत्सान्वयजीवातुं श्रीशैलार्यतनूद्भवम् ।
श्रीनिवासगुरुं वन्दे श्रीभाष्यामृतसागरम् ॥

47

ब्रह्मसूत्रभाष्यसिद्धान्तसारः

The work gives the Siddhānta-s (final conclusions) of each of the Adhikaraṇa-s of the *Śribhāṣya*. The author was the son and pupil of Raṅganāthadeśika, who was the son of Raṅganātha and the pupil of Lakṣmīpatideśika.

Beginning:

अतो विचित्रचेतनाचेतनात्मकप्रपञ्चरूपेण बहु स्यामिति ईक्षणक्षमः पुरुषोत्तमः श्रीमन्नारायण एव जिज्ञास्य इति सिद्धम् । आनन्दमयोऽभ्यासात् । आनन्दमयाधिकरणे—ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता ।

Colophon of the 1st Pāda:

इति श्रीलक्ष्मीपतिदेशिकगुरुचरणारविन्दमकरन्दमधुव्रतस्य श्रीमद्रामानुजविरचितश्रीभाष्यप्रबन्धप्रवचनैकधुरंधरस्य श्रीरङ्गनाथकुमारस्य श्रीरङ्गनाथदेशिकस्यात्यन्तसौम्यशीतलकृपाकटाक्षसुधाप्रवाहपात्रेण तच्छ्रीमत्सीमन्तकुमारेण श्रीभाष्यश्रीरङ्गाचार्येण संगृहीते श्रीभाष्यसिद्धान्तसारे प्रथमस्याध्यायस्य प्रथमः पादः ।

End:

पञ्चाग्निविद्यानिष्ठानां परब्रह्मोपासकानां चार्चिरादिगतिश्रवणात् प्रतीकालम्बनव्यतिरिक्तं नयतीति स्वमतमुपन्यस्तम् । एतदुक्तं भवति । अचिन्मिश्रं केवलं वा चिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते तान् न नयति; अपितु परं ब्रह्म उपासीनान्

49

ब्रह्मसूत्रभाष्याधिकरणार्थसंग्रहः

Beginning:

भाष्योक्ताधिकरणार्थः ससूत्रविवरणः सुखग्रहणाय संग्रहेणोपन्यस्यते। तत्र प्रथमे पादे प्रधानपुरुषावेव जगज्जन्मादिकारणतया वेदान्ताः प्रतिपादयन्तीत्याशङ्क्य सर्वज्ञं सत्यसंकल्पमनवद्यं समस्तकल्याणगुणाकरं ब्रह्मैव जगत्कारणतया प्रतिपादयन्तीत्युक्तम्।

End:

उत्तरेण द्वयेन ब्रह्मोपासनप्रकारस्तत्फलभूतमोक्षस्वरूपं च चिन्त्यते। तत्र तृतीयस्य प्रथमे पादे ब्रह्मोपासनस्य

50

A short discourse on the *Śrībhāṣya*. The author, who lived in the middle of the 16th century, (cf. *JSVOI*, vol. 3, pp. 117 ff.) was also known as Doḍḍayācārya in Telugu; his Dīkṣā name was Rāmānujadāsa. He was the son and pupil of Vādhūla Śrīnivāsācārya, the author of the *Śrutaprakāśikāvyākhyā Tūlikā* and a disciple of Samarapuṅgavācārya of the Vādhūla family. He belonged to the village of Colasiṃhapuram or Ghaṭikācala, i.e. Sholingur near Madras. He was a contemporary of Raṅgarāmānuja, Appayadīkṣita and Pañcamatabhañjana Tātācārya. His other works are the *Śatadūṣaṇīvyākhyā Caṇḍamāruta*, the *Advaitavidyāvijaya*, the *Brahmavidyāvijaya*, the *Gurūpasadanavijaya*, the *Parikaravijaya*, the *Sadvidyāvijaya*, the *Vijayollāsa*, the *Pārāśaryavijaya*, the *Ācāryaviṃśati*, the *Dvādaśaprāsaviṃśati*, the *Vedāntadeśikavaibhavaprakāśikā* and the *Upaniṣanmaṅgalābharaṇa*.

51

ब्रह्मसूत्रभाष्यसंग्रहटिप्पणम्

The work contains brief notes on some selected passages of the *Śrībhāṣya*.

Beginning:

नारयणस्तावत् मत्स्याद्यवतारेण लोकरक्षणं कृत्वा इतरसिद्धान्तिभिः वेदसिद्धान्तबाधे सति रामानुजमुनिरूपेण स्वयमेवावतारं कृत्वा श्रीभाष्यं करोति। यतिपतिस्तावत् न ख्यातिलाभपूजार्थं

ग्रन्थे प्रवर्तते । किंतु कृपया इतरसिद्धान्तानुद्वास्य स्वस्यानन्तरकालमपि दुर्वादिनिरासार्थं ग्रन्थरूपेण यामुनाचार्यनियोगेन च भाष्यं करोति ।

End:

अध्रुवैः अध्रुवफलकैः कर्मभिरित्यर्थः । कर्मसमुच्चितादिति । स्वामिसंमतकर्मणो भक्तावुपयोगः ॥ यावदस्य साधनद्वित्वं

56

श्रुतप्रकाशिकासंग्रहः

Beginning:

वरदं द्विरदाद्रीशं श्रीनिधिं करूणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥

अखिलेति । आदिपदेनान्तःप्रवेशनियमनादि । . . . .. ज्ञानं शेमुषी । सुधेव वच इत्युपमित-समासः । वचःशब्देन तात्पर्यं . . . बह्वृचो मतयः । बहूनां मतयो वा । तासां परस्परव्याघातेन ताभिः समीचीनार्थव्याघातेन वा . . . . सुमनसः सारासारविवेकज्ञाः । अत्र पूर्वाचार्या इति द्रमिडभाष्य-कारादय उच्यन्ते । सूत्रेति । सूत्रपदानां प्रकृतिप्रत्ययविभागानुगुणं वदामः । न तु स्वोत्प्रेक्षा . . . ।

End:

इहामृतत्वम् अघाश्लेषविनाशरूपम् । निषिद्धोक्रान्तिश्चापादना . . तद्विषयश्रुतिभ्यां तयोर्ध्वमिति श्रुतेरविरोधात् विदुषोऽप्युत्क्रान्ति

58

श्रुतप्रकाशिकासंग्रहः

Another summary of the *Śrutaprakāśikā* of Sudarśanācārya. The author was the son of Tātadeśika of the family of Śrīśailapūrṇa, one of the teachers of Rāmānuja.

Beginning:

वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥
बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् ।
येनाव्याहतसंकल्पं वस्तु लक्ष्मीधरं विदुः ॥

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

End:

उक्तार्थबाधकत्वेन ये प्रमाणतर्काः परैः प्रयुक्ताः, तेषां सर्वेषां परिहारोऽत्रास्त्येव । एतदनन्तर्भूतार्थो नास्ति । तस्मादुक्तप्रकारेण बाधकप्रमाणतर्कपरिहारश्चानुसंधेय इत्यभिप्रायेणेति सर्वं समञ्जसमित्युक्तम् ।

Colophon:

इति श्रीशैलपूर्णकुलतिलकावतारततादेशिकसूनुना श्रीनिवाससूरिणा संगृहीते श्रुतप्रकाशिकासंग्रहे चतुर्थस्याध्यायस्य चतुर्थः पादः ।

59

श्रुतप्रकाशिकाव्याख्या—भावप्रकाशिका

The commentator (16th century) was the pupil of Pañcamatabhañjana Tātācārya and his disciple Vātsya Anantācārya. He was a contemporary of Vādhūla Mahācārya and Appayadīkṣita. His other works, besides commentaries on the Upaniṣad-s, are the *Mūlabhāvaprakāśikā*, the *Viṣayavākyadīpikā*, the *Nyāyasiddhāñjanavyākhyā*, the *Śārīrakaśāstrārthadīpikā*, the *Rāmānujasiddhāntasāra* and the *Bhagavadviṣaya* (in Sanskrit). For other details about the author see *JSVOI*, vol. 2, p. 187 f.

Beginning:

अतसीपुष्पसच्छायमञ्चितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं प्रचयगमनार्थं च स्वाचार्यस्य वरदगुरोरिष्टदेवतारूपं हस्तिगिरीश्वरं भगवन्तं वरदप्रणतार्तिहरनामभ्यां प्रख्यापितेष्टप्राप्त्यनिष्टपरिहारलक्षणपुरुषार्थदातृभावमत एव शरण्यं स्मरणमुपगच्छति—वरदं द्विरदाद्रीशमिति । द्विरदाद्रीशमित्यनेन सौलभ्यमुक्तम् ।

End:

ब्रह्मविदाप्नोतीत्यस्यानन्तस्थिरफलब्रह्मप्रा . . . . . अनन्तस्थिरफलत्वमात्रप्रतिपादनपरत्वमयुक्तमित्यस्वरसादाह—यद्वानन्तस्थिरेति । विषयस्य दर्शितत्वादिति । ब्रह्मरूपस्येत्यर्थः । ततश्च . . . . . दिति भावः । समुच्चयो युक्त इति । अत्र केचित्

60

श्रुतप्रकाशिकाव्याख्या—तूलिका

This work is referred to in the *Gurubhāvaprakāśikā* of Lakṣmaṇācārya, son of Śuddhasattvācārya. The author who was the father of Mahācārya (see No. 50 above) was also called Mahācārya and Periyappadeśika in Tamil.

Beginning:

परिहरति—अवान्तरसंगतिमाहेति । कथं तदयुक्तमिति । भाष्ये वेदान्तवेद्यत्वायुक्तत्वं प्रतिज्ञाय तदुपपादनाय वाक्यप्रतिपाद्यत्वाभाव उपपाद्यत इत्याशङ्क्याह—सामान्येन शब्दप्रतिपाद्यत्वे सिद्ध इति । हेत्वभिप्रायेण योनिशब्दप्रयोगसंभव इति । उपादानकारणवाचिना योनिशब्देन तद्वतं हेतुत्वं लक्ष्यत इति भावः । अत्यन्तातीन्द्रियत्वेनेति भाष्ये प्रत्यक्षादीत्यादिशब्दोपात्तानुमानविषयत्वेऽप्यत्यन्तातीन्द्रियत्वस्य हेतुत्वं स्वरसतः प्रतीयत इति तदनुरोधेनात्यन्तातीन्द्रियपदम् ।

Colophon at the end of the 1st Pāda of the 1st Adhyāya (fo. 42):

इति श्रीमद्वाधूलसमरपुंगवाचार्यकृपासमधिगतश्रुतप्रकाशिकातात्पर्यविज्ञानेन महाचार्यापरनामधेयेन वाधूलश्रीनिवासेन विरचितायां श्रुतप्रकाशिकातूलिकायां प्रथमस्याध्यायस्य प्रथमः पादः ।

End:

स्वर्गस्य लोकस्य द्वारपान् वेदेत्यन्तेन प्राणापानव्यानसमान . . . . . तानां चक्षुःश्रोत्रवाङ्मनोवायूनां . . . णामादित्यचन्द्राग्निपर्जन्या . . . . पासनं विधाय अथ यदतः परो दिवो ज्योतिरित्याद्युच्यते । गायत्री वा इदं सर्वमित्यादिना ।

A paper MS. available in the Madras Govt. Oriental MSS. Library (R. No. 16) reads the following as the beginning of the work:

वन्देऽहं वेंकटाधीशं वात्सल्यादिगुणाकरम् ।
वारिजासनया सार्धं वाञ्छितार्थप्रदं नृणाम् ॥
श्रुतप्रकाशिकां श्रुत्वा सम्यक् समरपुंगवात् ।
वाधूलश्रीनिवासेन क्रियते तूलिका मया ॥
स्खलितं तु यदज्ञानादत्र लेखकदोषतः ।
तत्समाधाय विद्वद्भिर्ग्राह्येयं वीतमत्सरैः ॥

वाग्विजयिसूनुः सुदर्शननामा भट्टार्यवर्यः श्रीमच्छारीरकभाष्यं व्याचिख्यासुः प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थमिष्टदेवतोपासनात्मकं मङ्गलमाचरति—वरदमिति ।

63

श्रुतप्रकाशिकाव्याख्या—गुरुभावप्रकाशिका

The MS. does not mention the author's name. However, from MG, D. 4970 he is known to be Lakṣmaṇācārya, the son of Śuddhasattvācārya, a descendant of Śuddhasattva Veṅkaṭācārya (see No. 196 below). The author describes himself as the 18th descendant of Govinda, the cousin of Rāmānuja. He refers to two other commentaries on the *Śrutaprakāśikā*: the *Gurutattvaprakāśikā* of Campakeśācārya and the *Tūlikā* of Vādhūla Śrīnivāsācārya. His other works are: the *Atharvaśikhāvilāsa*, the *Gāyatryarthaśatadūṣaṇī*, the *Rahasyatrayamīmāṃsābhāṣya* and the *Vedāhamitimantrārtha*.

Beginning:

कौशिकश्रीशुद्धसत्त्वदेशिकेन्द्रसुतः सुधीः।
कुरूते चरमाध्यायगुरुभावप्रकाशिकाम् ॥

आवृत्तिरसकृदुपदेशात्। तृतीय इत्यादिभाष्यस्य विषयादिपरत्वाभावेऽपि वृत्तवर्तिष्यमाणस्वरूपमात्रप्रतिपादकत्वेऽपि संगतिपरतया साफल्यमित्याह—अध्यायेति। विद्यायास्तृतीयपादमात्रे निरूपणात् कथमध्यायार्थत्वमिति शङ्कापरिहारकं साधनैः सहेति भाष्यं विवृणोति—तृतीय इत्यादिना।

End:

इदं च सामान्यरूपेण धात्वावृत्तिविवक्षायां विशेषरूपेण प्रत्ययावृत्तिविवक्षायां चानुसंधेयम्।

64

श्रुतप्रकाशिकाव्याख्या—तात्पर्यदीपिका

The anonymous commentator refers to Vedāntadeśika's *Tattvaṭīkā* and Śuddhasattva Lakṣmaṇācārya's *Gurubhāvaprakāśikā*. He belongs to Pillai Lokācārya's school.

Beginning:

श्रीनिधिं केशवं नत्वा ध्यात्वा गुरुपरंपराम्।
श्रुतप्रकाशिकोक्तीनां कुर्वे तात्पर्यदीपिकाम् ॥

श्रीरङ्गेशदिव्याज्ञालब्धव्यासापरनामा सुदर्शनगुरुः श्रीभाष्यं व्याचिख्यासुः प्रारिप्सितविघ्नपरिसमाप्तिप्रचयगमनार्थं परमपुरुषं वशीकुर्वन् सिद्धसाध्योपायोपेयात्मकं शास्त्रार्थं संगृह्णाति—

वरदमिति। द्विरदाद्रीशमित्यनेन सौलभ्यमुक्तम्; वरदः सर्वभूतानामद्यापि परिदृश्यते इति प्रसिद्धत्वात्। श्रीनिधिमिति पुरुषकारान्वयः;

वरदं द्विरदाद्रिशेखरं कमलाया दयितं दयानिधिम्।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम्॥

इत्यत्राचार्यैरेवात्रत्यश्रीनिधिशब्दार्थस्य कमलाया दयितमित्यनेन ज्ञापितत्वात्।

End of the first vol.:

अन्ययोगव्यवच्छेदस्य स्वीकारः स्यादित्यनेन तथेतः प्रेत्य भवतीति वाक्यवैयर्थ्यं, तथैव भवतीत्यवधारणव्यत्यासकल्पनं, तथैव प्राप्नोतीति भाष्यसूक्तिव्यत्यासकल्पनं, व्यतिरेकस्तद्भावभावित्वादिति सौत्रहेत्वनुपपत्तिः, सूत्रभाष्ययोः तत्कतुन्यायेनापहतपाप्मत्वाद्युपासनसमर्थनानुपपत्तिश्चेति दूषणपञ्चकमभिप्रेतम्। शिष्टं श्रीगुरुभावप्रकाशिकायां स्पष्टम्।

Beginning of the second vol.:

तच्च दर्शनसमानाकारत्वं च। न तु ज्ञानत्वादिकमिति भावः। ननु ऐन्द्रियिकत्वमेवात्र दर्शनसमानाकारताप्रयोजकमस्तु लाघवादित्याशङ्कते—न चैतदिति।

End of the third vol.:

अनूद्येत्यादि। अधिकारिविशेषणतया सिद्धवदनूद्येत्यर्थः। उपदिशति विदधाति। इदमुपलक्षणम्—सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेति शास्त्रजन्यब्रह्मज्ञान

73

ब्रह्मसूत्रवृत्तिः—वेदान्तदीपः

Śrī Rāmānuja's *Vedāntadīpa* has been hitherto known as a purely prose work. But the present MS.—a rare one—also contains some verses of which the prose passages are explanations. Probably both the verses and prose passages were written by the same author. The method of writing first brief verses and then explaining them in prose passages was very common in olden days as noticed in the *Siddhitraya*, the *Brahmasiddhi*, the *Iṣṭasiddhi*, etc.

Beginning:

तस्मादितीरितमिति। अध्यासरूपबन्धादयः पुरुषस्य न सन्ति चेत्, कस्तस्योपकारः? एवमन्योन्यविरुद्धाभाषणादसमञ्जसम्।

सू. महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ।

संगतिविषयसंशयानाह—

अणुकारणवादः किं युक्तिमूलो न संशयः ।

इति । किं कणादाभ्युपगतपरमाणुकारणवादः समीचीनयुक्तिमूलः ? उत नेति संशयः । समीचीनयुक्तिमूल इति पूर्वः पक्षः—

अंशानामत्र संयोगात् तदुत्पत्तिप्रदर्शनात् ।
प्राचुर्यादल्पभावेन तारतम्यं तु युज्यते ॥
अंशाल्पत्वस्य काष्ठा स्यात् सिध्यन्ति परमाणवः ।
अदृष्टसचिवास्ते तदारभन्ते क्रमाज्जगत् ॥

इति । अवयवसंयोगादवयव्युत्पत्तिदर्शनादवयवाल्पत्वप्राचुर्याभ्यां सर्षपमहीधरवैषम्यदर्शनाच्चावयवाल्पत्वकाष्ठावश्याभ्युपगमनीयेति परमाणुसिद्धिः । ते चतुर्विधाः परमाणवो विपाकदशापन्नक्षेत्रज्ञादृष्टसचिवाः परमेश्वराधिष्ठिता द्व्यणुकादिक्रमेण जगदारभन्त इति । राद्धान्तस्तु—

पार्श्वैः संयुज्यमानास्ते कार्यमुत्पादयन्ति तत् ।
अणूनां च तथात्वेन न क्वचित् कारणस्थितिः ॥

इति । अवयवाः स्वकीयैः षड्भिः पार्श्वैः संयुज्यमाना महान्तमवयविनमुत्पादयन्तीति परमाणूनामपि तथैवोत्पादकत्वमभ्युपेतव्यम् । तथा सति परमाणवोऽपि सांशाः स्वकीयैरवयवैः, ते च स्वकीयैरिति न क्वचित् कारणव्यवस्थितिः । सूत्रार्थमाह—

अदृष्टकारितं कर्म चाणूनामाद्यमुच्यते ।
विकल्प्य दूषितं तच्च सदोत्पादकभावतः ॥
प्रसङ्गात् कर्मणादीनां संयोगाभाव ईरितः ।
अनन्तानां विपाकोऽपि नैकस्यारम्भको भवेत् ।
असिद्धेरनुमानेन स्वेच्छया नियमो न हि ॥

इति । महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् । असमञ्जसमिति वर्तते । वाशब्दश्चार्थे । ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां महद्दीर्घवत् द्व्यणुकव्यणुकोत्पत्तिवत् अन्यच्च तदभ्युपगतं सर्वमसमञ्जसम् ।

End:

सू. अधिष्ठानानुपपत्तेश्च ।

शरीरिणः कुलालादेरधिष्ठातृत्वदर्शनात् ।
अशरीरस्य कृष्णस्य तदभावादसंगतम् ॥

इति। अनुमेयेश्वरवशाभ्युपगमेन हि प्रधानस्याधिष्ठानमीश्वरस्योच्यते। सशरीरस्यैव कुलालादेरधिष्ठानदर्शनादशरीरस्येश्वरस्य प्रधानाधिष्ठानानुपपत्तेश्चासमञ्जसम्। सशरीरत्वाभ्युपगमेऽपि तच्छरीरस्य सावयवस्य नित्यत्वेऽनित्यत्वे च दोषः पूर्वोक्त इत्यभिप्रायः।

सू. कारणवच्चेन्न भोगादिभ्यः।

स्वशरीराद्यधिष्ठानं जीवस्य हि यथा भवेत्।
न तथास्य शरीरित्वं तत्स्वभावप्रसङ्गतः॥

इति। क्षेत्रज्ञस्य स्वकरणकलेबराद्यधिष्ठानवदुपपद्यत इति चेत्, न; पुण्यापुण्यरूपकर्मनिमित्तत्वात् क्षेत्रज्ञाधिष्ठानस्येश्वरस्यापि तद्वत्तया तत्फलभोगादिनिखिलतत्स्वभावप्रसक्तेः।

सू. अन्तवत्त्वमसर्वज्ञता वा।

पुण्यादिम

76

ब्रह्मसूत्रार्थसंग्रहः

This work gives the purport of the *Brahmasūtra-s* according to Rāmānuja. The author calls himself a devotee of the god Hayagrīva.

Beginning:

प्रणौमि श्रीहयग्रीवं प्रणतामरपादपम्।
प्रजापशुपती यस्य प्रसादेन जगत्पती॥
श्रीशठारिगुरुं नत्वा तदनुग्रहलब्धधीः।
करोति शठजिद्योगी ब्रह्मसूत्रार्थसंग्रहम्॥

अथातो ब्रह्मजिज्ञासा।

विधिनाधीतवेदानां पूर्वं कर्मावबोधतः।
पश्राद्वेदान्तवेद्यस्य जिज्ञासा ब्रह्मणो भवेत्॥

जन्माद्यस्य यतः।

अस्याशेषप्रपञ्चस्य जन्मस्थितिलया यतः।
सर्वज्ञं सर्वशक्तं तद्ब्रह्म ज्ञेयं मुमुक्षुभिः॥

शास्त्रयोनित्वात्।

अशेषवेदकर्तृत्वाज्जडजीवविलक्षणम्।
तद्ब्रह्म वेददीपेन भासते नानुमानतः॥

End:

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

इमं मानवमावर्तं नावर्तन्त इति श्रुतेः ।
च्युतिर्नेत्याह मुक्तानां भगवान् बादरायणः ॥
शठारिसूरिविहिते ब्रह्मसूत्रार्थसंग्रहे ।
तुरीयाध्यायचरणस्तुरीयो याति पूर्णताम् ॥
नीरे क्षीरं विवेक्तुं प्रभवति सहसा हंस एवापरे तु
प्रायः कीलालदुग्धाश्रयचषकसमुदायमात्रं विधातुम् ।
तत्त्वेन ब्रह्मसूत्रेष्वपि सदसती वस्तुनी वक्तुमीष्टे
बोद्धुं चाम्नायभावं निखिलमपि हयग्रीव एवाद्वितीयः ॥

Colophon:

इति श्रीहयग्रीवाश्रयश्रीशठकोपमुनेः कृतौ ब्रह्मसूत्रार्थसंग्रहे चतुर्थस्याध्यायस्य चतुर्थः पादः ।

77

ब्रह्मसूत्रवृत्तिः

Beginning:

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

त्रिपदमिदं सूत्रम् । अथ कर्मज्ञानानन्तरम् । अतः कर्मज्ञानस्य वृत्तत्वाद्धेतोः । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा, ब्रह्मज्ञानेच्छा, ब्रह्म ज्ञातव्यमित्यर्थः ॥ १ ॥

जन्माद्यस्य यतः ॥ २ ॥

त्रिपदं सूत्रम् । अस्य जगतः जन्मादि सृष्ट्यादि । आदिशब्देन पालनसंहारौ । सृष्टिस्थिति-प्रलया इत्यर्थः । यतः यस्मात् ब्रह्मणः इदं प्रपञ्चस्य सृष्ट्यादिकं प्रवर्तते, तदेव जिज्ञास्यमित्युक्तं भवति ॥ २ ॥

End:

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

परमपुरुषं प्राप्तस्य मुक्तस्य अनावृत्तिः पुनरावृत्तिः पुनः संसारप्रवृत्तिरागमनं नास्ति । कुतः शब्दात् । स खल्वेवं वर्तयन्नित्यादि, न च पुनरावर्तते न च पुनरावर्तत इत्यादिश्रुतेः, मामुपेत्येत्यादि-स्मृतेश्चेत्यर्थः ।

Colophon:

इति शारीरकसूत्रव्याख्याने चतुर्थाध्यायस्य चतुर्थः पादः ।

The date of copying of the original MS. of which this is a transcript:

भवाख्यवत्सरे मासे श्रावणे द्वादशीतिथौ ।
इन्दुवासरसंयुक्ते लिखिता सूत्रवृत्तिका ॥

78

अखण्डार्थभङ्गः

A refutation of the Advaitic view that Upaniṣadic passages such as *satyaṃ jñānam*, etc. teach that Brahman is attributeless. The author argues that an object without any attribute cannot be denoted by words. The work is not identical with the third section of Mahācārya's *Advaitavidyāvijaya* as given in *NCC*, I, p. 15a. From a reference made herein to another work of this author, the *Rāmānujanavaratnamālikā* (see No. 438 below), he can be identified as Dharmapurīśa of the Ātreya family. In that work, he salutes Ātreya Rāmānujācārya, the famous teacher of Vedāntadeśika, as one of his ancestors. Dharmapurīśa was the son of Jagannāthācārya and the pupil of Nṛsiṃhācārya (the author's paternal uncle) and Śrī Raṅgarājādhvarin (the author's elder brother).

Beginning:

अखण्डवाक्यार्थत्वाद्यसंगतम् । तथाहि—

सत्यज्ञानादिकं वाक्यं विशिष्टार्थपरं ध्रुवम् ।
प्रमाणत्वादग्निहोत्रवाक्यवत् सविकल्पवत् ॥
किंच लक्षणवाक्यत्वाद् गौः साखादिमतीतिवत् ।
मतुप्प्रत्ययथयोगाच्च संबन्धपरतात्र हि ॥
आद्यब्रह्मविदित्यादिवाक्यावगतवस्तुनि ।
जाताकाङ्क्षोत्तरत्वाच्च नाखण्डार्थपरं हि तत् ॥
प्रश्नादनतिरिक्तार्थं नोत्तरं भवति ध्रुवम् ।
अन्यथा प्रश्न एव स्यादुत्तरं तद्यथा भवेत् ॥
किंचात्र ब्रह्मशब्दोऽपि ह्याख्यातो यौगिकः श्रुतौ ।
नाखण्डार्थो यदन्येषु सखण्डार्थत्वमक्षतम् ॥

End:

अन्यच्च यदुक्तं दीपिकायां तत् सर्वमुक्तदूषणाक्रान्तमेवेति न पृथगनूद्य दूषितमिति सर्वं समञ्जसम् । तस्मादखिलहेयप्रत्यनीकस्यानन्तकल्याणगुणाकरस्य भगवतः

79

अणुत्वचुलकम्

A short treatise which seeks to prove that the Goddess Lakṣmī is *aṇu* (atomic) in nature. There are two schools of Viśiṣṭādvaita differing slightly from each other on certain points. The one headed by Vedāntadeśika holds that Lakṣmī is *vibhu* (all-pervading) like Viṣṇu. The other, following Pillai Lokācārya, holds that Lakṣmī is *aṇu* like individual souls.

भूमानीलापतिर्योऽसावीश्वरः समुदाहृतः ।
निरुपाधीश्वरत्वं तु वासुदेवे प्रतिष्ठितम् ॥

इत्यादिना भगवत एवेश्वरत्वम्, लक्ष्म्यास्तु जीवत्वमित्यवगम्यते । ईशितव्याद्विभाजकलक्ष्मीवाल्लभ्येत्यादिना श्रियो जीवत्वं च भट्टपराशरपादैरुक्तम् । जीवत्वं भगवद्भिन्नचेतनत्वं, सेश्वरत्वं वा । ईश्वरत्वं तु अनन्यनैसर्गिकशेषित्वम् । तच्च भगवत एव । अत्र च श्रियः स्वरूपपरिमाणविषये राडसि बृहती, यथा मया जगद्व्याप्तं स्वरूपेण स्वभावतः, इत्यादेर्महत्त्वपरसामान्यविशेषवचनवर्गद्वयस्य, बालाग्रशतभागस्य, अज्यायांसोऽपरे सर्वे ज्यायानेकः परो मतः, श्रियं च मत्कलां सूक्ष्माम्, अहं नारायणी सूक्ष्मा इत्यादेस्तदणुत्वबोधकसामान्यविशेषवचनवर्गद्वयस्य च मिथो विरोधे अन्यतरसंकोचस्यावश्यकतया कस्य संकोच इति विमर्शे बृहतीशब्द एव स्वरूपातिरिक्तबृहत्त्वपरतया संकोचकल्पनमुचितम् ।

End:

एतेन विभुत्वबाधकयुक्तीनां कालात्ययापदेश इति निरस्तम्, युक्तिभिः विभुत्वाबाधनात् । शास्त्रेण हि तदसिद्धिः अणुत्वसिद्धिश्चोच्यते । यथा उत्क्रान्त्युपासनश्रुत्या इन्द्रियानन्त्यं कार्यद्वारानीतम्, एवं सूक्ष्मत्वविग्रहव्याप्तिश्रुत्या व्याप्तिवचनं न महत्त्वपरम् । किंतु विग्रहव्याप्तिपरमिति निश्चीयते ।

Colophon:

इत्यणुत्वचुलकम् ।

80

अणुत्वसमर्थनम्

Beginning:

नवजलदनिभा स्वभावहृद्या कलितकलापिकलापनीलनीला ।
यदुतिलककिशोरचारुमूर्तिर्मरतकभूरिव दूर्वया विभाति ॥

उद्धृता विष्णुना लक्ष्मीरिति श्रुत्या श्रियो भगवदुद्धृतत्वावगमात् तस्य च परिच्छिन्नत्वेन विनानुपपत्तेरुत्क्रान्तिश्रुत्यर्थापत्त्यैवोद्धृतत्वश्रुत्यर्थापत्त्या श्रियोऽणुत्वसिद्धिः। न चोद्धृतत्वश्रुतिरन्यथा नेतुं शक्या, अतिप्रसङ्गात्। किंच स्वशब्देन श्रियोऽणुत्वमवगम्यते—श्रियं च मत्कलां सूक्ष्माम्, अहं नारायणी सूक्ष्मेत्यादौ। उन्मानं च श्रियोऽवगम्यते—

विष्णुमाहात्म्यलेशस्य विभक्तस्य च कोटिधा।
पुनः सहस्रधा तस्य पुनश्चापि सहस्रधा।
नैकांशसममाहात्म्या श्रीः शेषब्रह्मशंकरा॥

इति।

End:

श्रियो विभुत्वेऽणुत्वे वा व्याप्तिः स्वरूपतो गुणतो वा। ब्रह्मरूपिणीं विभ्वीमित्यर्थः। ब्रह्मस्वरूपनिरूपिकामिति वेत्यादिस्वारस्येनायमेव तात्पर्यदीपिकाभिमतः पक्ष इति ज्ञायते। ऐच्छिकस्यानैच्छिकस्य वा शेषत्वस्येवात्रापि पूर्वनिर्दिष्टस्य पूर्वपक्षत्वमुत्तरनिर्दिष्टस्य सिद्धान्तत्वं चोचितम्। अत एव चास्य चरमोपन्यासोऽनुवादत्वं चोपपन्नम्। एतेन अपक्षपातिप्रमाणेत्यादितो विभुत्वपक्ष एव तात्पर्यदीपिकाकृताभिमत इति निरस्तम्। सैषा विभ्व्यपि जीव इति शब्दतोऽपि सयूथ्यैकदेशिग्रन्थप्रत्यभिज्ञानेन तत्पक्षोपन्यासतयापि तदुपपत्तेरित्यलमधिकेन।

Colophon:

वीरराघवदासेन वाधूलान्वयजन्मना।
वरदार्याङ्घ्रिसक्तेन विवृतोऽणुत्वनिश्चयः॥
वरदार्याङ्घ्रिसक्तेन वाधूलान्वयजन्मना।
विवृतोऽणुत्वनिष्कर्षो वीरराघवसूरिणा॥

81

अणोरणीयान्श्रुत्यर्थविचारः

A discussion on the passage *aṇor aṇīyān*, etc. of the *Taittirīyopaniṣad*, propounding the subtleness of Brahman.

Beginning:

अणोरणीयानिति वाक्यं विषयीकृत्य चिन्त्यते। किमिदं ब्रह्मण औपाधिकाणुत्वपरम्, आहोस्वित् प्रतिघातानर्हत्वपरम्, यद्वा स्वाभाविकाणुत्वपरमेवेति। स्वाभाविकाणुत्वपरत्वे श्रुतप्रकाशिका विरुध्यते, नेति। तदर्थं चिन्त्यते। भाष्यश्रुतप्रकाशिके सातिशयाणुत्वमहत्त्वयोर्विरोधाभिप्रायिके, उत नेति। तदर्थं प्रकृताणीयस्त्वे उपाधिः संभवति, नेति। स्वाभाविकाणुत्वपरत्वे वेदार्थसंग्रहगीताभाष्यादिकं विरुध्यत इति चिन्तान्तरम्। तदर्थं सूक्ष्मशब्दस्य प्रतिघातानर्हत्व एव स्वारस्यम्, उताणीयस्त्वेऽपीति।

यदा अणुत्वे स्वारस्यं तदा सूक्ष्मदिपदैः विवृतमणीयःपदं प्रतिघातानर्हत्वपरमेवेति । वेदार्थसंग्रहादि-विरोधात् न स्वाभाविकाणुत्वपरमिति प्रतिघातानर्हपरत्वमेव ।

End:

गीताभाष्येऽपि अणीयांसमिति पदं प्रस्तुत्य सूक्ष्मपरमिति व्याख्यानात् । सूक्ष्मशब्दश्च प्रति-घातानर्हत्वे स्वरसः । भाष्येऽपि सर्वत्रप्रसिद्धाधिकरणे आकाशात्मा आकाशवत् सूक्ष्मस्वरूप इत्युक्तम् । न ह्यत्र सूक्ष्मपदमणुत्वपरम्, असंभवात् । अत एव विषयवाक्यदीपिकायां सर्वगतं सर्वमन्तः प्रवि-श्यावस्थितं सुसूक्ष्ममित्युक्तम् । अन्यथा सूक्ष्मत्वस्याणुत्वरूपत्वे सर्वगतत्वहेनुत्वानुपपत्तेः । तदुक्तम्— व्यापित्वमिति फलतीति ।

A fly-leaf added in the beginning contains a few lines discussing the meaning of certain terms used in the *Śrutaprakāśikā* in the अर्भकौकस्त्वाधि-करण.

82

अथर्वशिखाविलासः

A treatise which seeks to prove that the *Atharvaśikhopaniṣad* establishes the supremacy of Viṣṇu.

Beginning:

श्रीशुद्धसत्त्वगुरुणा कलितात्यद्भुताकृतिम् ।
वेंकटेशं कुलधनं श्रीभूगुरुयुतं भजे ॥
श्रीमान् रामानुजाचार्यः कौशिको देशिकोत्तमात् ।
शुद्धसत्त्वाचार्यनाम्नो लब्धभाग्यफलोदयः ॥
श्रीमता नञ्जराजेन वीरराजतनूभुवा ।
श्रीकृष्णराजसेनानीदेवराजानुजन्मना ॥
प्राक्तनानेकजन्मार्जितभाग्यपाकानुपातिना ।
तत्त्वज्ञानाभिलाषेण संततात्रान्तचेतसा ॥
सर्वसद्वृन्दसंमान्यबहुमानपुरःसरम् ।
समाहूतः स्थापितश्च सुखं श्रीरङ्गपट्टणे ॥
सत्यपूर्वं तेन पृष्टस्तत्त्वं वक्तव्यमित्यथ ।
श्रीकृष्णराजभूपालानुयुक्तश्च पुनः पुनः ।
विदुषां वावदूकानां विशदप्रतिपत्तये ।
ब्रूतेऽथर्वशिखान्यायान् विष्णुध्येयत्वसाधकान् ॥

विस्तारयाम्यहमथर्वशिखाविलासं
प्रस्ताविते विजयकौस्तुभयोः क्रमेण ।
ग्रस्तान्यदेवपरताभ्रमगन्धमन्त-
र्ध्वान्तैः प्रतारितमहाप्रभुमोहशान्त्यै ॥

तत्र तावत् वाक्यतर्करूपसीमांसा वेदेन श्रवणरूपशब्दज्ञाने जननीये परिकर इति साध्यते ।

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥

इत्यादिभिः मीमांसा तथावगम्यते । उक्तं च भट्टाचार्यैः—

धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥

इति । वेदकरणकधर्मप्रमितिभाव्यकभावनायां तात्पर्यज्ञानरूपोपकरणपरिपूर्तिसंपादकमीमांसोपयोग-समर्थनं न्यायचतुष्टयमिदं प्रकरणम् ।

Vol. II, page 409, colophon:

इति श्रीमदथर्वशिखाविलासे प्रथमः खण्डः समाप्तः ।

End:

पूर्वपक्षस्याकाशधृतेरित्येतावतापि निवृत्तेः । आकाशशब्दस्याकाशादेव समुत्पद्यन्त इत्या

84

अथशब्दार्थविचारः

This is a discussion on the import of the word *atha* in the *Brahmasūtra* (I. 1. 1) as interpreted in the *Śrībhāsya*. The author was the son of Rāmānujācārya of Sriperumbudur, near Madras.

Beginning:

इह खलु भगवद्भाष्यकारैः शारीरकमीमांसाभाष्ये अथातो ब्रह्मजिज्ञासेति प्राथमिकसूत्रगतातः-शब्दार्थविवरणवेलायां कर्मविचारस्य ब्रह्मविचारं प्रति हेतुत्वमभिहितम्—अत्रायमथशब्द आनन्तर्ये

भवति । अतः शब्दो वृत्तस्य हेतुभावे । अधीतसाङ्गसशिरस्कवेदस्य अधिगताल्पास्थिरफलकेवलकर्म-ज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनीति । अत्र कर्माल्पास्थिरफलत्व-निर्णयसहितब्रह्मज्ञानानन्तस्थिरफलत्वापातप्रतीतिः कर्मविचारस्य ब्रह्मविचारं प्रति हेतुतया अभिप्रेता, अद्वारहेतुत्वस्य बाधितत्वात् । अयं चाभिप्रायः व्यासाचार्यैः श्रुतप्रकाशिकायां विवृतः ।

End:

एवंच कर्मविचारेण कस्यापि कर्मफलानित्यत्वनिर्णयासिद्धया विशिष्टप्रतीतौ विशेषणांशेऽपि तस्यानुपयोगेन विशिष्टप्रतीतेर्न तद्द्वारत्वमिति तद्द्वारेण कर्मविचारस्य ब्रह्मविचारं प्रति हेतुत्वोप-पादनं श्रीभाष्यश्रुतप्रकाशिकयोः कथमिवोपपद्यत इति परैरपरिशीलितोऽयमाक्षेपः ।

85

अथशब्दार्थविचारः

Adds the following stanzas in the beginning:

हयमुखपदाम्भोजद्वन्द्वार्चनैकपरायणो
यतिपतिकृतश्रीमद्भाष्यार्थचिन्तनतत्परः ।
शठरिपुगुरुर्विद्वद्रामानुजार्यसुतः सुधीः
समलिखदिहाक्षेपं सन्तः समादधतां मुदा ॥
काणादे वापि तन्त्रे न खलु परिचयो गौतमीयेऽपि तन्त्रे
भाट्टे प्राभाकरे वा तदपि भगवतो भाष्यकारस्य सूक्तिः ।
हृद्रङ्गे स्वीयदिव्यानवधिकदयया चित्रनृत्तं विधत्ते
विद्वद्रामानुजार्ये रचितवति कृपां श्रीमहाचार्यनुन्ने ॥
श्रीमद्भाष्यं सटीकं वकुलधरमुनिप्रोक्तदिव्यप्रबन्ध-
व्याख्यामन्यद्रहस्यं सकलमपि महाचार्यनुन्नोऽन्वगृह्णात् ।
विद्वान् रामानुजार्यो हरितकुलमहाम्भोनिधेः पूर्णचन्द्रः
पुत्रे मय्यार्द्रचित्तः सततपठितशास्त्रान्तरग्रन्थकन्थे ॥
न काणादे तन्त्रे न च परिचयो गौतमकृते
न भाट्टे वा तन्त्रे न गुरुकलिते वापि गहने ।
तथापि श्रीरामावरजमुनिवक्त्राब्जकलिता
स्रवन्ती भाष्याख्या मधुमयझरीं पाययति नः ॥
सोऽहं श्रीभाष्यटीकाप्रवचनमसकृच्छ्रीमहाभूतपुर्यां
कुर्वन् श्रीभाष्यकारप्रथमनियमितं तन्मुखोल्लासहेतुम् ।
तत्र श्रीयादवाद्रेस्तटभुवि वसतिस्तैः समाज्ञापिता यां
स्मृत्वा प्रस्थाय नारायणपदकमलद्वन्द्वसेवामकार्षम् ॥

तत्रावासं वितन्वन् कतिचन दिवसान् शिङ्गराचार्यमुख्यै-
राहूतो राजकीये सदसि सुविदितैः श्रीमहीशूरपुर्याम् ।
अब्दद्वन्द्वं प्रतिष्ठापित इह चागन्तुकामस्ततस्तै-
र्युक्तं संमानितश्च द्रुतगतिरगमं भूतपुर्याह्वयं तत् ॥
तत्र श्रुत्युत्तमाङ्गोपपदकपरकालाभिधाः संयमीन्द्रा
वंशं विद्यां च वृत्तं जगति सुविदितं सम्यगालोच्य हृष्टाः ।
तत्तद्वृत्तान्तसंभाषणसमसमयं श्रावयामासुरेतान्
सार्वज्ञ्यौदार्यमुख्यान् नृहरिगतगुणान् हन्त तेषां स्मरामि ॥
श्रीमत्सार्वज्ञ्यसंदर्शनकुतुकबलाद् भाष्यटीकोक्तिकार-
व्यासाचार्योक्तकर्मावगतिपरब्रह्मधीहेतुभावे ।
आक्षेपं पत्ररूढं रचितवति मयि प्रीतिमाधाय लेख्यः
पत्रे श्रीभाष्यकाराद्यभिमतिविषयः सूरिहृद्यः समाधिः ॥
श्रीमद्रामानुजार्यान्वयसमुदयतः प्राप्तविज्ञानभूम्नो
विद्वद्रामानुजार्यात् स्वपितुरधिगतख्यातवेदान्तयुग्मः ।
ख्यातो विद्वान् शठारिर्गुरुरिति जगति प्रौढसंदर्भगर्भं
व्यालेखीत् पद्यजातं तदखिलमवेत्यैव तुष्यन्तु सन्तः ॥
कार्यकारणभावो यः कर्मब्रह्मविचारणे ।
श्रीभाष्यादावभिहितस्तत्राक्षेपो विलिख्यते ॥
यद्यप्यत्र समाधानमस्त्येवात्र तथापि तत् ।
श्रीमन्नृसिंहसार्वज्ञ्यदर्शनार्थं न लिख्यते ॥
श्रीरामानुजसिद्धान्तविनिर्धारणधूर्वहैः ।
अनुग्राह्यं समाधानमस्याक्षेपस्य सांप्रतम् ॥

86

अथशब्दार्थविचारः

Beginning:

कर्मविचारानन्तर्यमथशब्दार्थः श्रीमत्प्रथमसूत्रभाष्ये वर्णितः । तत्र चाकारणादानन्तर्योक्ते-र्वैयर्थ्येन कर्मविचारस्य वर्तिष्यमाणब्रह्मविचारहेतुत्व एव तदानन्तर्यं तस्य वक्तव्यमिति तस्य तद्धेतुत्वेन भाव्यम् । तच्च न साक्षात्, अनुपलम्भात् अनुपपत्तेश्च । नापि प्रणाड्या । सा हि दृष्टा, अदृष्टा वा । न तावत् दृष्टा, अनुपलम्भात् । नाप्यदृष्टा, मानाभावात् । तत्र कर्मास्थिरफलत्वनिर्णयसहित-ब्रह्मज्ञानानन्तरस्थिरफलत्वापातप्रतीतिद्वारा कर्मविचारो ब्रह्मविचारहेतुरिति न युक्तम्, तस्याः द्वारत्वा-संभवात् ।

End:

तथाच कर्मविचारस्य कर्माल्पास्थिरफलत्वनिर्णयेऽनुपयुक्ततया तद्विशिष्टब्रह्मज्ञानानन्तस्थिर-फलापातप्रतीतेः न तद्द्वारत्वमिति तादृशापातप्रतीतिद्वारेण न कर्मविचारस्य ब्रह्मविचारहेतुत्वमिति तदन्वितस्वार्थपरस्याथशब्दस्य कर्मविचारानन्तर्यार्थत्वमशक्यं वर्णयितुमिति कथमिव तदवर्णयत् भगवान् भाष्यकार इति ।

87

अद्वैतकालानलः

This is a criticism of the Advaita philosophy of Śaṃkara. The author quotes for support Sudarśanabhaṭṭa, Vedāntadeśika and Mahācārya.

Beginning:

निर्विशेषब्रह्मणि वेदान्तानां समन्वयो न संभवति। निर्धारितैकप्रकार . . . निश्चयं प्रति एकधर्मिज्ञानाधीनविचारस्य जनकत्वात् विचारसध्रीचीनवेदान्तवाक्यजन्यज्ञानस्य निष्प्रकारकत्वानुपपत्तेः। ब्रह्मजिज्ञासासूत्रे अस्ति तावत् ब्रह्म नित्यशुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यत्वशुद्धत्वादयोऽर्थ इति सर्वज्ञत्वादिधर्मविशिष्टब्रह्मणो जिज्ञास्यत्वबोधकभाष्यानुपपत्तेश्च ।

End:

यदि सर्वज्ञत्वादिकमप्रसक्तं तर्हि प्रक्षालनाद्धीति न्यायेन अप्रसञ्जनमेव वरम् । तस्मात् न निषेधवाक्यैकवाक्यत्वसंभव इति महाचार्याः प्राहुः ।

88

अद्वैतविद्याविजयः

This is the fourth of the five *Vijaya-s* of the author, collectively called the *Vedāntavijaya*, the other four being the *Gurūpasadanavijaya*, the *Brahmavidyāvijaya*, the *Sadvidyāvijaya* and the *Vijayollāsa*. The work is divided into three chapters dealing with Prapañcamithyātvabhaṅga, Jīveśvaraikyabhaṅga and Akhaṇḍavākyārthabhaṅga.

Beginning:

द्वैतोपनिषदा सार्धं श्रुतयोऽद्वैतगोचराः ।
घटकश्रुतिसंयुक्ताः सद्विद्यामनुरुन्धते ॥

द्वैतश्रुतिभिः चिदचिदीश्वरभेदप्रतिपादनेन विशेषणविशेष्यभेदः प्रतिपाद्यते। षटकश्रुतिभिर्विशेषणविशेष्यवैशिष्टयम्। अद्वैतश्रुतिभिश्चैतदात्म्यमिदं सर्वमिति कृत्स्नस्यापि भगवदात्मकत्वप्रतिपादनेन सिद्धं विशिष्टाद्वैतं प्रतिपाद्यते। तथाहि द्वैतश्रुतयस्तावत् प्रश्नोपनिषदि पञ्चमे खण्डे यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परमपुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरः त्वचा विनिर्मुच्यते एवं हैव स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षत इति। जीव एवाचितः परः। तस्मात्परः परमपुरुषः। स समाभिरुन्नीयत इति मोक्षप्रदः प्रतिपाद्यते। नेतृणां नयनस्य धाम्नां ब्रह्मलोकस्य च स्वरसतो भेदावगमात्।

End:

यदुक्तं द्वितीये भेदे भेदत्वज्ञानं विना तद्विशिष्टज्ञानानुपपत्तिरिति, तत्र किं भेदभेदत्वज्ञानयोर्भेदभेदत्वविशिष्टज्ञानहेतुत्वम्।

91

अद्वैतविद्याविजयव्याख्या

Beginning:

कमलाकान्तकल्याणचरणारुणसारसे।
श्रेयसे भूयसे नित्यं निदधे मम मानसे॥
अल्पज्ञोऽप्यहमालम्ब्य शठवैरिगुरोः कृपाम्।
अद्वैतविद्याविजयव्याख्यामाख्यातुमारभे॥

संगतिं सूचयन् विजयार्थं श्रोतृबुद्धिसमाधित्सया संक्षिप्य प्रदर्शयति—द्वैतोपनिषदेति। द्वयोर्भावो द्विता। पृथक्त्वनिवेशित्वात् संख्यायास्तद्वाचिना शब्देन तस्य लक्षणा। भावान्तरमभाव इति पक्षेऽपि तदवृत्तिधर्मस्यैव तत्प्रतियोगिकभेदरूपत्वात्। व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वरूपविरुद्धधर्माध्यासाच्च न द्वित्वभेदयोरभेदः। द्वितैव द्वैतम्। स्वार्थे अण्। भेदसामान्यबोधकस्याप्येतस्य प्रकरणादीश्वरानुयोगिकचिदचित्प्रतियोगिकभेदोऽर्थः। द्वैतस्योपनिषत्। प्रतिपादकता षष्ठ्यर्थः। उपनिषच्छब्दो वेदशब्दवत् ग्रन्थविशेषे रूढोऽपि इह लक्षणया तद्घटकवाक्यपरः। न चोपनिषच्छब्दस्य सत्सूद्विषेत्यादिसूत्रविहितक्विप्प्रत्ययान्तस्याद्वारकभगवत्प्रतिपादकत्वरूपोपनिषण्णत्वप्रवृत्तिनिमित्तकतया ब्रह्मज्ञानसंपादनद्वारा अविद्यावसादयितृत्वप्रवृत्तिनिमित्तकतया वा एकैकमपि वाक्यं शक्यमिति शक्यते वक्तुम्; एकैकवाक्याध्येतरि अनेनोपनिषदधीतेति प्रयोगादर्शनात्। इत्युपनिषदित्येकवचनानुपपत्तेश्च।

End:

कर्तुरहमर्थात् जीवस्य भेद इत्याह—सूत्रकारोऽपीति। बृहदारण्यके षष्ठप्रपाठके कतम आत्मेति पृष्टेन याज्ञवल्क्येन योऽयं विज्ञानमयः प्राणेष्वित्युपक्रम्य भूयानात्मविषयः प्रपञ्चः कृतः। किं स संदर्भः संसारिस्वरूपमात्रप्रतिपादनपरः; उत संसारिणमनूद्य तस्यासंसारिब्रह्मस्वरूपताप्रतिपादनपर इति चि

94

अधिकरणसारावलिः

This is a metrical summary of each of the Adhikaraṇa-s of the *Brahma-sūtra-s* as explained in the *Śrībhāṣya*.

Post-colophon reading:

मनसि करणग्रामं प्राणे मनः पुरुषे च तं
झटिति घटयन् भूतेष्वेनं परे च तमात्मनि ।
स्वविदविदुषोरित्थं साधारणे सरणेर्मुखे
नयति परतो नाडीभेदैर्यथोचितमीश्वरः ॥
प्रमाथिकन्याप्रथमे दिनेऽस्मिन् लिलेख कण्ठीरवसोमपीथी ।
सारावलिं सूत्रततेः समन्ताद्वात्स्यः सदा सेवितवैष्णवाङ्घ्रिः ॥
प्रमादान्नेत्रचाञ्चल्यादन्यबुद्धेस्त्वरागतेः ।
अबद्धमलिखं चेत् तत् क्षन्तव्यं साधु सज्जनैः ॥
पुत्र्यां हि दोषा बहवो माता दुष्टा यदि स्वयम् ।
यतो मातृगुणा पुत्री लोके भवति पश्यत ॥

सूत्राणि ५४५; अधिकरणानि १५६ ।

96

अधिकरणसारावलिः

Post-colophon reading:

वन्दे श्रीशं श्रियं तां तमखिलपृतनानायकं तं शठारिं
नाथं पद्माक्षरामौ गुरुवरमपि तं यामुनं भाष्यकारम् ।
कूरेशं विष्णुचित्तं गुरुमपि वरदं वादिहंसाम्बुवाहं
श्रीमद्वेदान्तसूरिं गुरुमपि रघुनाथार्यमन्यान् गुरूंश्च ॥
कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेंकटेशाय वेदान्तगुरवे नमः ॥

101

अधिकारसंग्रहश्लोकाः

This is a collection of Sanskrit stanzas found in the beginning and end of each chapter of Vedāntadeśika's *Rahasyatrayasāra*, a well-known Tamil work on Śrīvaiṣṇava religion and philosophy in 32 chapters.

Beginning:

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः ।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन-
श्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः ॥ १ ॥
एते मह्यमपोढमन्मथशरोन्माथाय नाथादय-
स्त्रय्यन्तप्रतिनन्दनीयविविधोदन्ताः स्वदन्तामिह ।
श्रद्धातव्यशरण्यदम्पतिदयादिव्यापगाव्यापकाः
स्पर्धाविप्लवविप्रलम्भपदवीवैदेशिका देशिकाः ॥ २ ॥
हृद्या हृत्पद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोष-
क्षिप्तप्रत्यर्थिदन्तिर्जयति बहुगुणा पङ्क्तिरस्मद्गुरूणाम् ।
दिक्सौधाबद्धजैत्रध्वजपटपवनस्फातिनिर्धूततत्त-
त्सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्तनीका ॥ ३ ॥
पठत रहस्यत्रयसारादुद्धृतमधिकारसंग्रहं सुधियः ।
जननपदवीगतागतजङ्घालत्वं जिहासन्तः ॥ ४ ॥
मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः
कलुषमतिरविन्दन् किंकरत्वाधिराज्यम् ।
विधिपरिणतिभेदाद्वीक्षितस्तेन काले
गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम् ॥ ५ ॥
कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचि-
न्मुक्तैश्वर्यान्तसंपन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥ ६ ॥

End:

निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनं
निर्धूतेतरपारतन्त्र्यनिरया नीताः सुखं वासराः ।
अङ्गीकृत्य सतां प्रसत्तिमसतां गर्वोऽपि निर्वापितः
शेषायुष्यपि शेषिदम्पतिदयादीक्षामुदीक्षामहे ॥ ६८ ॥
आस्तिक्यवान्निशितबुद्धिरनभ्यसूयुः सत्संप्रदायपरिशुद्धमनाः सदर्थी ।
संकेतभीतिरहितः सतृणेष्वसक्तः सद्वर्तनीमनुविधास्यति शाश्वतीं नः ॥ ६९ ॥

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु रहस्यत्रयसाराधिकारसंग्रहे निगमनाधिकारो द्वात्रिंशः ।

Contains the following chapters:

१. उपोद्घाताधिकारः, २. सारनिष्कर्षाधिकारः, ३. प्रधानप्रतितन्त्राधिकारः, ४. अर्थपञ्चकाधिकारः, ५. तत्त्वत्रयचिन्तनाधिकारः, ६. परदेवतापारमार्थ्याधिकारः, ७. मुमुक्षुत्वाधिकारः, ८. अधिकारिविभागाधिकारः, ९. उपायविभागाधिकारः, १०. प्रपत्तियोग्याधिकारः, ११. परिकरविभागाधिकारः, १२. साङ्गप्रपदनाधिकारः, १३. कृतकृत्याधिकारः, १४. स्वनिष्ठाभिज्ञानाधिकारः, १५. उत्तरकृत्याधिकारः, १६. पुरुषार्थकाष्ठाधिकारः, १७. शास्त्रीयनियमनाधिकारः, १८. अपराधपरिहाराधिकारः, १९. स्थानविशेषाधिकारः, २०. निर्याणाधिकारः, २१. गतिविशेषाधिकारः, २२. परिपूर्णब्रह्मानुभवाधिकारः, २३. सिद्धोपायशोधनाधिकारः, २४. साध्योपायशोधनाधिकारः, २५. प्रभावव्यवस्थाधिकारः, २६. प्रभावरक्षाधिकारः, २७. मूलमन्त्राधिकारः, २८. द्वयमन्त्राधिकारः, २९. चरमश्लोकाधिकारः, ३०. आचार्यकृत्याधिकारः, ३१. शिष्यकृत्याधिकारः, ३२. निगमनाधिकारः.

110

अधिकारसंग्रहश्लोकव्याख्या

Beginning:

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
आ भगवत्तः प्रथितामनघामाचार्यसंततिं वन्दे ।
मनसि मम यत्प्रसादाद्वसति रहस्यत्रयस्य सारोऽयम् ॥

इह खलु भगवान् कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः श्रीमान् वेंकटनाथार्यः वेदान्ताचार्यवर्यः रहस्यत्रयसारार्थाधिकारसंग्रहेण शिष्यबुद्धिसमाधानं कुर्वन् आदौ आचार्यवर्यप्रणामरूपमङ्गलव्याजेन स्वरूपयाथात्म्यज्ञानं प्रार्थयते—प्रपदनेति । विद्याभेदे प्रपदनमये, पृथगुपायत्वेन प्रमाणसिद्धे प्रपदन इत्यर्थः । स्वार्थे मयट् । तत्र प्रतिष्ठितचेतसः स्थिरचित्ताः । अनेन महाविश्वासः सूचितः । दयाधनाः कृपामात्रप्रसन्नाः; शिष्यानुवृत्तिनिरपेक्षा इत्यर्थः । शठरिपुशुकव्यासप्राचेतसादीनां निबन्धनेषु ग्रन्थेषु श्रमेण संततास्यासेन परिणतया, कर्मज्ञानयोरङ्गत्वात् भक्तेः शक्ताधिकारत्वाच्चानुपायतया प्रपत्तिरेवानुरूपोपाय इत्येवंविधबुद्ध्या परिपक्वया श्रद्धया शुद्धः निःसंशयः आशयः येषां ते तथोक्ताः, देशिका मम ज्ञानादिगुणरहितस्य प्रज्ञादायं प्रकृष्टं ज्ञानं, प्रज्ञा तत्त्वज्ञानं, पदे पदे प्रतिपदं संततमित्यर्थः । दिशन्तु ।

End:

अथ उक्तमेवार्थं विविच्य दर्शयति—आस्तिक्यवान् शास्त्रविश्वासशाली । निशितबुद्धिः श्रुतार्थधारणशक्तः, अनभ्यसूयुः गुणे दोषाविष्करणरहितः सता श्रुतिस्मृत्यविरोधिना संप्रदायेन परिशुद्धमनाः निःसंशयहृदयः । सदर्थी सद्भ्योऽर्थविशेषं जिज्ञासुः । संकेतभीतिरहितः सतृणेषु निःसारग्रन्थेषु असक्तः पुरुषः यः, सः शाश्वतीमविच्छिन्नसंप्रदायां सद्वर्तनीं सन्मार्गमनुविधास्यति इति सर्वं समञ्जसम् ।

113

अधिकारसंग्रहश्लोकव्याख्या

Beginning:

भगवन्तमिवानन्तकल्याणगुणसागरम् ।
वेदान्तदेशिकं नौमि वेंकटेशगुरूत्तमम् ॥

इह खलु भगवान् कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः श्रीमद्वेंकटनाथः वेदान्ताचार्यः परमकृपालुः तापत्रयाभिभूतसकलजनोज्जिजीवयिषया सत्संप्रदायप्राप्तं रहस्यार्थजालं प्रकाशयन् प्रारिप्सितप्रबन्धपरिसमाप्तिप्रचयगमनप्रयोजनमङ्गलाचरणेन गुरुपरम्परासारप्रबन्धं प्रकृत्य पश्चात् रहस्यत्रयसारप्रबन्धं प्रणीय बुभुत्सूनां सुग्रहार्थं साराधिकाराद्यन्तोक्तानि पद्यानि संजिघृक्षुः ।

End:

ग्रन्थकर्ता तु हयग्रीव एव । अत एवैतच्छ्लोकसमानार्थकद्राविडगाथायां वेल्लैप्परिमुखदेशिकरायू इत्यादिकायां तथैव प्रतीयत इति सर्वं समञ्जसम् ।

Colophon:

अधिकारसंग्रहव्याख्या संपूर्णा ।

114

अधिकारसंग्रहश्लोकव्याख्या

The commentator, who was of the Kauśikagotra refers to himself, in his *Rahasyatrayasāravyākhyā Sāradīpikā* (in Tamil), as the disciple of Vādhūla Śrīnivāsācārya alias Periyappadeśika, son of Devarājācārya. His spiritual teacher was Lakṣmaṇācārya of the Vādhūlagotra. His other works are: the *Nyāsaviṃśativyākhyā*, the *Nyāsatilakavyākhyā*, the *Nyāsadaśakavyākhyā*, the *Vedāntadeśikadinacaryā*, the *Vedāntadeśikavigrahadhyānapaddhati* and the *Rahasyatrayasāravyākhyā Sāradīpikā* (in Tamil). He must have flourished in the last part of the 16th century.

Beginning:

श्रुतिमौलिदेशिकगुरुर्मुदे सतामधिकारसंग्रहमिमं व्यरीरचत् ।
तमिह प्रसन्नकठिनं यथाश्रुतं विवृणोमि तस्य करुणावलम्बनः ॥

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्य इति श्रीरङ्गनाथदत्तापरनामधेयः श्रीमान् वेंकटनाथार्यः मुमुक्षुजनोज्जीवनाय तदपेक्षितसकलार्थपरिपूर्णरहस्यत्रयसाराख्यदिव्यप्रबन्धं प्रणीय तत्रोक्तद्वात्रिंशदधिकाराणामादावन्ते च तत्तदधिकरणार्थसंग्राहकं संस्कृतरूपं पद्यद्वयं निरमिमीत ।

भूयस्तानि पद्यानि समुद्धृत्य रहस्यत्रयसारपठनालसानामुपकारायाधिकारसंग्रहं नाम प्रबन्धं पृथक्त्वेन चकार ।

End:

स सर्वोऽपि शाश्वतीं नाथयामुनयतिवरादिपरंपरयानादिकालप्रवृत्तां नोऽस्माकं सद्वर्तनीं सन्मार्गमनुविधास्यति अनुसरिष्यति ।

Colophon:

इत्यधिकारसंग्रहव्याख्या समाप्ता ।

116

अधिकारसंग्रहश्लोकव्याख्या

Adds the following at the end:

इत्थं वेदान्तगुरुभिर्दर्शितस्य यथामति ।
संग्रहस्याधिकाराणां व्याख्योक्ता तत्प्रसादतः ॥
श्रीभाष्यश्रीनिवासेन कौशिकान्वयजन्मना ।
संग्रहस्याधिकाराणां व्याख्येयं साधु निर्मिता ॥
क्षपयितुं क्षमते क्षमिणां वरो धिषणया धिषणां धिषणस्य यः ।
भजतु मे धिषणा धिषणाश्रयं श्रुतिशिरोगुरुशेखरमन्वहम् ॥

119

अधिकारसंग्रहगाथाव्याख्या

This is a commentary on the Tamil stanzas composed by Vedāntadeśika at the end of each chapter of his *Rahasyatrayasāra*, summarizing the principles taught therein. This author is different from the one who wrote the *Adhikārasaṃgrahaślokavyākhyā* (No. 114 above) who belonged to the Kauśika family. Bhāradvāja Śrīnivāsācārya I was the pupil of Vādhūla Śrīnivāsācārya, the son of Devarājācārya. His son Śrīnivāsācārya II wrote the *Adhikārasaṃgrahagāthāvyākhyā*, the *Rahasyatrayasāravyākhyā Sāraprakāśikā* and the *Pādukāsahasravyākhyā Parīkṣā*. He was the pupil of his father Śrīnivāsācarya I, an elder contemporary of Appayadīkṣita (16th century A.D.)

Beginning:

अस्मत्तातमुखाननेकविबुधानाचार्यवर्यानसौ
प्रौढिम्ना कलयन् कथासु नृहरीन् प्रत्यर्थिदुर्दन्तिनाम् ।
श्रीवाधूलकुलाब्धिशीतकिरणः श्रीदेवराजात्मजः
श्रेयःसंततिमातनोतु जगतां श्रीश्रीनिवासो गुरुः ॥
भारद्वाजकुलाब्धीन्दुं श्रीनिवासगुरुं भजे ।
भाष्यचन्द्रिकया नित्यं प्रौढप्रज्ञाप्रदायिनम् ॥
द्रामिडीः कठिना गाथा रहस्यत्रयसारगाः ।
विवृणोति विशेषेण श्रीनिवासो बुधाग्रणीः ॥

अतिगहनवेदान्तानां तात्पर्यं दिव्यसूरिकृतप्रबन्धान् सार्थमधीत्य विशदं स्वेन निर्णीतमित्युक्ति-व्याजेन वक्ष्यमाणार्थानां सुदृढप्रमाणमूलत्वं महत्परिगृहीतत्वं सांप्रदायिकत्वं चाह—पोयुकैरित्यादि । यथापाठमेवान्वयः । पोयुकैशब्दः सरोवाची । मुनि मुनिः ।

End:

अस्य ग्रन्थस्य श्रीहयग्रीव एव कर्ता, न स्वयमिति भावः । कोळळ स्वीकाराय । तुणियिनुं निश्चयेऽपि । इकऴ्लुं त्यागेऽपि । एतत्प्रबन्धस्वीकारत्यागेऽपीत्यर्थः । कूरमतियर् 'तेष्वर्चिंतेष्वर्चितोऽहम्' 'यथावत्तेषु तुष्टेषु' 'यस्य ममापि वैरम्' इत्यादिशास्त्रार्थे प्रतिष्ठितत्वरूपसंपदलंकृतं मम मनः किंचिदपि न कुप्यतीत्यर्थः ।

Colophon:

इति भारद्वाजकुलतिलकस्य श्रीनिवासाचार्यपुत्रस्य श्रीनिवासस्य कृतिषु श्रीरहस्यत्रयसारगाथार्थवर्णनं समाप्तम् ।

123

अध्यात्मचिन्ता

This is a metrical work of 128 verses on the soul (*jīva*) as revealed in the three Rahasyamantra-s. The author (13th century) whose name before Saṃnyāsa was Varadācārya, was also called Vādikesari Alagiya-maṇavālajīyar. He was the pupil of Periyavāccānpillai alias Abhaya-pradasūri or Kṛṣṇapāda, the famous commentator on the Tamil *Nālāyira-prabandham*, and of his son Nayinārāccānpillai. His other works are

the *Tattvadīpa*, the *Tattvadīpasaṃgraha*, the *Gītāsāra*, the *Pannīrāyirappaḍi* and the *Pramāṇattiraṭṭu*.

Beginning:

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसंतारपोतकम् ॥
नमोऽस्त्वस्मद्गुरुभ्यश्च निखिलेभ्यो नमो नमः ।
परमेभ्यो गुरुभ्यश्च निखिलेभ्यो नमो नमः ॥
नमो रामानुजायेदं पूर्णाय महते नमः ।
यामुनाय मुनीन्द्राय नमः सर्वार्थवेदिने ॥
नमोऽस्तु राममिश्राय पुण्डरिकदृशे नमः ।
नाथाय मुनये नित्यं नमः परमयोगिने ॥
आद्याय कुलनाथाय नमोऽस्तु शठवैरिणे ।
नमः सेनाधिपतये ज्ञानयाथात्म्यदायिने ॥
श्रियै श्रीशानपार्थिन्यै जगन्मात्रे नमो नमः ।
श्रीधरायादिगुरवे नमो भूयो नमो नमः ॥
इत्थं संचिन्त्य मनसा शुभां गुरुपरंपराम् ।
अध्यात्मविषयां चिन्तां करोम्यात्मविशुद्धये ॥
आत्मा न देवो न नरो न तिर्यक् स्थावरो न च ।
न देहो नेन्द्रियं नैव मनः प्राणो न नापि धीः ॥
न जडो न विकारी च ज्ञानमात्रात्मको न च ।
स्वस्मै स्वयं प्रकाशः स्यादेकरूपस्वरूपभाक् ॥

End:

यावदात्मकमानन्दात् साम गायन् सहामरैः ।
आसिषीय श्रिया सार्धं भवन्तमभिनिर्विशन् ॥ १२६ ॥
इत्थं त्वत्संनिधौ वाचमुक्तां मम दयानिधे ।
सत्यां कुरुष्व दयया तथा तत्प्रतिपादनात् ॥ १२७ ॥
सौम्यजामातृमुनिना सम्यग्दृष्टामिमां सदा ।
चिन्तामध्यात्मविषयां परिचिन्वन् भवेत् सुखी ॥ १२८ ॥
अस्मद्विधपरित्राणप्रेमप्रद्राणमानसम् ।
वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ॥ १२९ ॥

Colophon:

इति श्रीमद्वादिकेसरिमिश्रविरचिताध्यात्मचिन्ता समाप्ता ।

127

अध्यात्मचिन्तामणिः

The commentator salutes Vātsya Varadaguru, a descendant of the sister's son of Śrī Rāmānuja, and also Vādhūla Śrīnivāsācārya and Yatīndrapravaṇamuni. As Vādhūla Śrīnivāsācarya was the teacher of Vādhūla Mahācārya (16th century), our author must have lived after the 16th century A.D.

Beginning of the commentary:

वन्दे वेदान्तकर्पूरवासितस्वान्तमन्वहम् ।
वाधूलकुलजीवातुं श्रीनिवासमहागुरुम् ॥
श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥
श्रीमद्रामानुजाचार्यस्वस्रीयकुलजन्मने ।
वात्स्यश्रीवरदार्याय रहस्यार्थविदे नमः ॥
सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसंतारपोतकम् ॥
अध्यात्मचिन्तामणिमात्मतत्त्वप्रकाशकं तत्त्वविदां च हृद्यम् ।
अभीष्टभावप्रदमात्मभर्तुः स्वरूपकान्त्यै विदधामि नित्यम् ॥

तत्र तावन्मन्त्रत्रयादिकं व्याख्यातुकामः सौम्यजामातृमुनिः तदुपदेष्टृणां गुरूणां परंपरां श्रुति-स्मृतिशिष्टाचारप्राप्तां वेदादौ प्रणवमिव मन्त्रादावनुसंधाय नमस्काररहितानाधुनिकान् स्वानुसंधान-व्याजेनानुशास्ति—नमोऽस्त्विति । स चाचार्यवंशो ज्ञेय आचार्याणामसावसाविति भगवत्तः इति श्रुतेः । परंपरामुपदिशेद्गुरूणां प्रथमं गुरुः इति स्मृतिः । गुरुपरंपरया परमगुरुं भगवन्तं प्रणम्य इति भाष्यकारैरपि नित्येऽभिहितम् ।

End:

मुनिनेति मननशीलत्वोक्त्या श्रुतिस्मृतीतिहासपुराणवैष्णवादिसर्वार्थमननशीलत्वं कथितम् । सम्यग्दृष्टमित्यनेन अन्यथाज्ञानविप्रलम्भादिदोषराहित्यमुच्यते । अध्यात्मविषयामिति प्रमेयस्यात्यन्तो-पादेयत्वमुच्यते । परिचिन्वन्निति अतिमनोहरविषयलाभात् पुनः पुनर्दर्शनेऽप्यतृप्तिवत् पुनः-पुनरावृत्तौ सुखतिशयो भवतीत्यर्थः ।

अस्मद्विधपरित्राणप्रेमप्रद्राणमानसम् ।
वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ॥
अध्यात्मचिन्ताव्याख्यानं चिन्तामणिमिवापरम् ।
व्यधाद्वरदराजाख्यो वेदान्तार्थावगोचरम् ॥

Colophon:

इति श्रीमद्वादिकेसरिमिश्रविरचिताध्यात्मचिन्ताव्यख्या श्रीमद्वरदाचार्यविरचिता समाप्ता ।

The scribe adds:

यद्यप्यशुद्धिबाहुल्यमुपलभ्येत कर्हिचित् ।
सन्तस्तत्क्षन्तुमर्हन्ति ग्रन्थदौर्लभ्यवेदिनः ॥

128

अध्यात्मचिन्तामणिः

The scribe adds:

अध्यात्मचिन्ताव्याख्यानं वरदाचार्यनिर्मितम् ।
व्यलिखच्छ्रीनिवासाख्यः श्रीसुन्दरगुरोः सुतः ॥

129

अपहतपाप्मत्वविचारः

This is an interpretation, according to the Viśiṣṭādvaita view, of the term *apahatapāpmatva* in the Upaniṣad-s as a characteristic of Brahman.

Beginning:

अनन्तविबुधेड्यं तमनन्तगुरुमाश्रये ।
मदीयहृत्तमश्छेदी यदीयन्यायभास्करः ॥
अत्र कश्चिद्भ्रुणः स्याच्चेत् पूर्वाचार्यमुखोद्गतः ।
दोषश्चेन्मामकीनोऽयं क्षम्यतां हृदयालुभिः ॥

श्रीभाष्ये 'संपद्याविर्भावः' इत्यधिकरणे अपहतपाप्मत्वादिकं स्वाभाविकमिति प्रतिपादितम् । तादृशापहतपाप्मत्वं नाम पापकर्मफलजननशक्तिप्रतिबन्धकत्वम् । यद्वा कर्माप्रयोज्यत्वावच्छिन्न-प्रतियोगिताकदुःखानुभवानुकूलशक्तिनिष्ठप्रतियोगिताकाभाववत्त्वम् । अथवा स्वरूपप्रयुक्तत्वावच्छिन्न-विषयतासंबन्धावच्छिन्नतादृशशक्तिनिष्ठप्रतियोगिताकाभाववत्त्वम् ।

End:

यथा स्वत उद्गारादिहेतुभूतरसशून्येऽम्लादौ ताम्रसंबन्धोपाधिना उद्गारहेतुभूतरसो जायते, तथा स्वतो निर्दुःखे आत्मनि देहसंबन्धरूपोपाधिवशात् दुःखादिकं जायते । एवमेव पाप्मापीति बद्धदशायां पापसद्भावेऽपि नापहतपाप्मत्वानुपपत्तिः ।

One extra leaf added at the end contains a few lines on the greatness of the *Tiruvāymoli*.

130

अभयप्रदानसारः

An anonymous Sanskrit rendering of the Tamil work *Abhayapradānasāra* of Vedāntadeśika expounding the greatness and significance of Prapatti with illustrations from the *Vālmīki Rāmāyaṇa*, the *Mahābhārata*, etc. Probably this was the work of Varadācārya, son of Vedāntadeśika.

Beginning:

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
जयत्याश्रितसंत्रासध्वान्तविध्वंसनोदयः ।
प्रभावान् सीतया देव्या परमव्योमभास्करः ॥
प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।
हस्तः श्रीरङ्गभर्तुर्मामव्यादभयमुद्रितः ॥
नमस्तस्मै कस्मैचन भवतु निष्किंचनजन-
स्वयंरक्षादीक्षासमधिकसमिन्धानयशसे ।
सुराधीशस्वैरक्षणकुपितशापायुधवधू-
दृषत्तादुर्जातप्रशमनपदाम्भोजरजसे ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

इत्युक्तप्रकारेण साधुपरित्राणाद्यर्थं परमपुरुषः सर्वेश्वरस्तावत् त्रेतायुगे चक्रवर्तिपुत्रत्वेनावतीर्णो बभूव । तस्मिन् काले श्रीवाल्मीकिमुनिर्भगवान् ब्रह्मपुत्रात् भगवतो नारदमहर्षेरेतदवतारवृत्तान्तं संक्षेपेण श्रुत्वा

म निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥
पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्तस्य प्रवृत्तो मे शोकः श्लोकत्वमागतः ।
मच्छन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती ॥

इति वाग्देवीवल्लभस्य चतुर्मुखस्य ब्रह्मणः प्रसादात् प्रादुर्भूतदिव्यसारस्वतो भूत्वा ।

End:

निरवधिकदयासौहार्दानुरागनिर्भरैर्वीक्षणैः श्रीवैकुण्ठनाथो मुक्तात्मानं पश्यन्निव तं निरीक्षमाणः करकपातेनेव शीतभूतो निरामय इतिवत् कुर्वन्नावभाषे । इतः परं वक्ष्यमाणमखिलं कार्यं विभीषणाभिलषितकैंकर्याभियुक्तमिति द्रष्टव्यं स्यात् ।

अपदिश्य वेंकटेशं स्वहस्तसंसक्ततूलिकातुल्यम् ।
अभयप्रदानसारं गुरुप्रसादः स्वयं व्यलिखत् ॥

Colophon:

इत्यभयप्रदानसारे प्राप्तिप्रकारप्रपञ्चो नाम दशमोऽधिकारः ।

अभयप्रदानसारः समाप्तः ।

Post-colophon reading:

राकान्ते रुद्धलङ्कोऽद्भुतकपिकदनो धूम्रदृग्वज्रदंष्ट्रौ
भङ्क्त्वा कम्पं प्रहस्तं दशमुखमकुटं कुम्भकर्णातिकायौ ।
ब्रह्मास्त्रच्छिन्नकुम्भादिकमथ मकराक्षं तु हत्वेन्द्रशत्रुं
जित्वा यत्नैस्त्रिभिस्तं सहबलमवधीद्रावणं रामभद्रः ॥
आपत्सखं त्वां शरणं प्रपद्ये तापत्रयेणाभिहतं जनं माम् ।
लोकत्रयाभिष्टुत मैथिलीश राम त्वमम्भोजदलाक्ष पाहि ॥
अभीतिमुद्रामरिशङ्खदण्डान् हस्तैर्वहन्नद्भुतरूपवेषः ।
हस्त्यद्रिशृङ्गे मम चान्तरङ्गे श्रीभूसखस्तिष्ठति देवराजः ॥

Contains the following chapters:

१. प्रबन्धावतारः, २. परतत्त्वोपबृंहणम्, ३. शरणागतितात्पर्यम्, ४. प्रकरणतात्पर्यम्, ५. शीलप्रकाशः, ६. शरण्यवैभवप्रकाशः, ७. प्रथमधर्मनिर्णयः, ८. शरणागतविशेषप्रकाशः, ९. शरण्यसंगमलाभः, १०. प्राप्तिप्रकाशः.

132

अभेदखण्डनम्

A refutation of the Advaitic view that there is no difference between the individual soul and Brahman and no such category as 'Difference'. Although the author's name is not found in the MS., from the one described next it may be presumed that he was Prativādibhayaṃkaram Aṇṇan Svāmin.

Beginning:

अत्र खलु कश्चित् चिरंतनसरस्वतीसीमन्तोदन्तानभिज्ञो भेदमहं खण्डयामीति जल्पति । तं प्रति पृच्छामः । किं करोषि वृथा जल्पं भेदमहं खण्डयामीति । तदिदं भेदखण्डनं स्वशिरःखण्डनं न जानीषे । कुतस्तदिति चेत्, भेदमहं खण्डयामीति खण्डनीयस्य खण्डयितृशिरसश्च भेदाभावेन भेदखण्डनस्य स्वशिरःखण्डनत्वापातात् ।

End:

तर्हि सोऽयं देवदत्त इत्यादौ कस्यचिदभेदस्यापि प्रत्यक्षसिद्धत्वात् सर्वोऽप्यभेदः शास्त्राविषयः स्यादिति तुल्यम् । तदुक्तं वरदाचार्यैः—

न द्वैतं प्रतिपादयन्त्युपनिषद्वाचः प्रसिद्धं हि तत्
किंत्वद्वैतमनन्यगोचरतया तद्वेद्यमास्थीयताम् ।
अप्राप्ते खलु शास्त्रमर्थवदिति व्यर्थः प्रयासो यतः
प्रख्यातादपरस्तु शास्त्रविषयो भेदस्त्वदद्वैतवत् ॥

इति सर्वमवदातम् ।

Colophon:

इत्यभेदखण्डनम् ।

The scribe of the original MS. of which this is a transcript, was Kandāḍai Deśika.

133

अभेदखण्डनम्

Reads the following verse in the beginning:

वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं भक्त्या भजामि परवादिभयंकरार्यम् ॥

134

अर्थपञ्चकनिरूपणम्

A Sanskritized metrical summary of the *Arthapañcaka* of Pillai Lokācārya on certain fundamental principles of Śrīvaiṣṇava religion concerning the nature of God, the nature of the soul, the means to the goal, the nature of the goal and obstacles on the path. The author offers salutation to Parāśarabhaṭṭa, Saumyajāmātṛmuni and Dayeśaguru, a descendant of the nephew of Śrī Rāmānuja.

Beginning:

श्रीभट्टयोगिनः शुद्धश्रीपादाब्जरतः सदा ।
हंसः कान्तोपयन्तास्मन्मानसे रमतां मुदा ॥ १ ॥

रामानुजार्यस्वस्रीयकुलदुग्धाब्धिकौस्तुभम् ।
श्रीदयेशगुरुं वन्दे श्रीवत्सान्वयभूषणम् ॥ २ ॥
प्रणम्य पङ्क्तिमार्याणामर्थानां पञ्चकं क्रमात् ।
ज्ञातव्यं मूलमन्त्रस्थं मुमुक्षूणां निरूप्यते ॥ ३ ॥
प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः ।
प्राप्युपायः फलं प्राप्तेस्तथा प्राप्तिविरोधि च ॥ ४ ॥
अशब्दस्पर्शरूपं यदरसं गन्धवर्जितम् ।
आनामरूपं निर्दुःखमानन्दैकरसं विभु ॥ ५ ॥

End:

अवधारणमाभ्यां तु सूचितं व्याकृतं बुधैः ।
प्रतिबन्धकरूपं तु यथामति निरूपितम् ॥ ७६ ॥
अर्चा तदीयशेषत्वं कृपा भगवतः परा ।
मुखोल्लासोऽहमादिश्च परादीनां परोऽवधिः ॥ ७७ ॥
इत्यर्थपञ्चकं गुप्तं रहस्ये सुदृशोद्धृतम् ।
गार्ग्यश्रीवेंकटार्येण ग्राह्यं दुर्गतिभीरुभिः ॥ ७८ ॥

Colophon:

इत्यर्थपञ्चकं समाप्तम् ।

The fly-leaf contains the following verses in praise of the fourfold incarnation of the Lord Viṣṇu according to the Pāñcarātra system.

श्रीभूमिनीलापतिमप्रमेयं शेषाशनाद्यैः श्रितपादपद्मम् ।
शेषासनस्थं परवासुदेवं श्रयामि वैकुण्ठपदं मुकुन्दम् ॥ १ ॥
आमोदलोकादिषु संनिविष्टान् संकर्षणादीनपि वासुदेवम् ।
व्यूहांशकं चाप्यवतारकन्दं क्षीराम्बुधौ शेषशयं च सेवे ॥ २ ॥
मत्स्यादिकान् कच्छपकोलरूपान् नृसिंहवर्ण्याकृतिरामरूपान् ।
श्रीकेशवादीनपि पद्मनाभमुख्यान् भजे वैभवरूपवर्गान् ॥ ३ ॥
ब्रह्माण्डकोशेऽखिलचेतनानामचेतनानां च बहिस्तथान्तः ।
नियन्तृभावेन सदा वसन्तं परं पुमांसं प्रणमामि विष्णुम् ॥ ४ ॥
श्रीरङ्गशेषाचलहस्तिशैलस्थानादिजु ग्रामनिकेतनेषु ।
भक्तावनायादिपुमांसमीड्यमर्चात्मनावस्थितमीशमीडे ॥ ५ ॥

Colophon:

इति परव्यूहादिचतुष्टयस्तोत्रम् ।

135

अर्थपञ्चकनिरूपणम्

Beginning:

अर्थपञ्चकं नाम स्वस्वरूपपरस्वरूपपुरुषार्थस्वरूपोपायस्वरूपविरोधिस्वरूपभेदम्। तत्र स्वस्वरूपमपि पञ्चविधम्—नित्यमुक्तबद्धकेवलमुमुक्षुभेदात्। परस्वरूपमपि पञ्चविधम्—परव्यूहविभवान्तर्याम्यर्चावतारभेदात्। पुरुषार्थस्वरूपमपि तथैव—धर्मार्थकामात्मानुभवभगवदनुभवभेदात्। उपायस्वरूपमपि पूर्ववदेव—कर्मज्ञानभक्तिप्रपत्त्याचार्याभिमानभेदात्। विरोधिस्वरूपं च प्राग्वत्—स्वरूपविरोधिपरत्वविरोधिपुरुषार्थविरोध्युपायविरोधिप्राप्तिविरोधिभेदात्।

End:

आकिंचन्यं नाम कर्मज्ञानभक्त्यनन्विततद्धेतुभूतात्मगुणानन्विततद्विपरीतवृत्तिकसर्वेश्वरोद्देशस्वपारतन्त्र्यानुसंधानपूर्वकस्थितिमत्त्वम्।

Then reads the following verses:

उपनिषदेकगम्यमुरुचारुसुकीर्तिगुणं
विविधविचित्रहेतिललितांशुलसद्बपुषम्।
अभिमतसाध्वसैकहरणं सुलभं भजतां
नृपशुपोषण . . मनो नितरां शशिभम्॥
स्त्रीपुंसयोर्भावनटौ मिथो यौ पूर्वस्तयोर्त्रीडतिरःपटेन।
चिरायते स्पष्टयितुं स्वरूपं परस्तु तन्नोत्सहतेऽनुमन्तुम्॥

136

अविद्याखण्डनम्

A criticism of the Advaitic doctrine that Avidyā associated with Brahman is the cause of the experience of difference between Brahman and the world.

Beginning:

किमज्ञानस्य निवर्तकं जीवब्रह्मैक्यगोचरज्ञानं वा, शुद्धब्रह्मस्वरूपं वा, जीवस्वरूपं वा? नाद्यः; अभेदज्ञानस्य वृत्तिज्ञानतया मिथ्यात्वेनानिवर्तकत्वात्। निवर्तकत्वेऽपि तस्य निवर्तकान्तराभावेन निःशेषनिवृत्त्ययोगात्। न द्वितीयः, शुद्धस्य निवर्तकत्वे तदाश्रयत्वानुपपत्तिप्रसङ्गात्, शुद्धत्वभङ्गप्रसङ्गाच्च। न तृतीयः, प्रत्यक्षविरोधापातात्। किंच निवर्तकज्ञानस्य किं निवर्तकम्? अविद्याध्वंस एव निवर्तकमिति चेत्; स किं ब्रह्मव्यतिरिक्तो वा, ब्रह्मैव वा। आद्येऽपि स किं मिथ्याभूतः, सत्यो वा।

न प्रथमः, मिथ्याभूतस्य निवर्तकत्वानुपपत्तेः। नेतरः, अभेदोच्छेदप्रसङ्गात्। न द्वितीयः, ब्रह्मणः सर्वकालप्रकाशत्वेनाविद्यायास्तत्कार्यभूतस्य प्रपञ्चस्यापि निवृत्तिर्न स्यात्।

End:

किंच इयमविद्यानिवृत्तिर्मिथ्या वा, सत्या वा। नाद्यः, अविद्याया उन्मज्जनप्रसङ्गात्। न द्वितीयः; सत्यत्वं च ब्रह्मान्यत्वेन वा, ब्रह्मत्वेन वा। आद्ये ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्वव्यघातः। अन्त्ये ब्रह्मणोऽनादित्वेन प्रपञ्चभ्रमो न स्यात्। न हि निवृत्तौ सत्यां निवर्त्यं तिष्ठतीति वक्तुं शक्यम्। इत्यलमतिदूषणायासेन।

Colophon:

इत्यविद्याखण्डनं संपूर्णम्।

137

अविद्याखण्डनम्

This is different from the above. Though the colophon seems to ascribe the authorship to Veṅkaṭanātha Vedāntadeśika, the work must have been written by Varadācārya, the son of Vedāntadeśika.

Beginning:

अविद्यायाः कोऽयमाश्रयः? किं ब्रह्म, किं वा जीवः। जीव इति चेन्न; जीवस्याविद्याकल्पितत्वेनान्योन्याश्रयप्रसङ्गात्। बीजाङ्कुरन्यायेन जीवभावाविद्ययोः प्रवाहानादित्वादविरोध इति चेत्, तदपि न; योगाचारमतसंकरप्रसङ्गात्। सोऽपि हि संतन्यमानमेव विज्ञानं जीवमभिलपति। अपिच प्रतिक्षणमपि जीवस्य नष्टत्वेन तदा तदा मोक्षोऽपि स्यात्। जीवभावनिवृत्तिरेव हि मोक्षः। तथापि जीवान्तरं वर्तिष्यत इति चेत्, किमनेन? पूर्वजीवस्य नष्टत्वात्। जीवसंतानो जीव इति चेन्न; अयमेव हि विज्ञानवादिनोऽपि पक्षः।

End:

अविद्यमानार्थप्रकाशनावश्यंभावात्। ब्रह्मणोऽनर्थाभावात् माया न दोष इति चेत्, तत्त्वतो जीवब्रह्मणोरेकत्वात् जीवानर्थकारिणी माया ब्रह्मानर्थकारिणीत्यनिवार्यम्। जीवस्य एकजीवगतानर्थः; ब्रह्मणस्त्वनन्तजीवगतानर्थ इति विशेषः।

Colophon:

इति निखिलकवितार्तिकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु अविद्याखण्डनं संपूर्णम्।

138

अविद्याखण्डनम्

Beginning:

सत्यस्तित्वे सदेयं स्यादसती नास्तितेति चेत् ।
कुतोऽनिर्वचनीयत्वमिति सत्यसतीयमाः ॥ १ ॥
ब्रह्म चेदाश्रयोऽस्याः स्याद्विवस्वांस्तमसस्तथा ।
न स्यात् सदाश्रयो नेयं सिध्येच्चेत् तदनाश्रया ॥ २ ॥
अनाद्यनन्ताहेतोर्नाविद्या भवतां व्रजेत् ।
यदमुक्तिर्न चेद्ध्वंसो नात्यन्तान्योन्यपूर्वकाः ॥ ३ ॥

End:

दृष्टान्तो विषमोऽयं स्यान्न ह्यत्र द्वौ जडौ मतौ ।
तत्र संप्रतिपन्नं स्यादजडं जडभासकम् ॥ १५ ॥
चितोऽन्या तन्निवृत्तिश्चेदद्वैतस्य क्षतिर्भवेत् ।
स्वरूपं चेत् सदा मुक्तिः स्यान्न स्यादसकृद्भवः ॥ १६ ॥
कारणात्मा जगद्धेतोर्मायोपाधिः सदेश्वरः ।
यः कृतस्तेन शुद्धस्याद्वैतस्य स्यात् क्षतिर्ध्रुवम् ॥ १७ ॥
प्रणव इत्यत एव दृढश्रुतेः परमपूर्षचितोरपि भिन्नता ।
सविकृतिश्रुतिसाम्यभियं श्रुतिर्न हि भज्येदथमुख्यतया क्षतैः ॥ १८ ॥
कालश्च

139

अष्टश्लोकी

In eight verses this work explains the secret meaning of the three mystic Mantra-s: Aṣṭākṣara, Dvaya and Caramaśloka. Verses 1-4 deal with Aṣṭākṣara, 5 and 6 with Dvaya, and 7 and 8 with Caramaśloka. The author was the son of Śrīvatsāṅkamiśra or Kūrattālvān as popularly known. His other works are the *Viṣṇusahasranāmabhāṣya*, the *Śrīguṇaratnakośa*, the *Śrī Raṅgarājastava* and the *Kriyādīpa*.

Beginning:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृ-
न्मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ।
उकारोऽनन्यार्हं नियमयति संबन्धमनयो-
स्त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत् ॥

End:

निश्चित्य त्वदधीनतां मयि सदा कर्माद्युपायान् हरे
कर्तुं त्यक्तुमपि प्रपत्तुमनलं सीदामि दुःखाकुलः ।
एतज्ज्ञानमुपेयुषो मम पुनः सर्वापराधक्षयं
कर्तासीति दृढोऽस्मि ते तु चरमं वाक्यं स्मरन् सारथेः ॥

Colophon:

इत्यष्टश्लोकी समाप्ता ।

Post-colophon reading:

श्रीरङ्गे रङ्गनाथः फणिपतिशयनो दक्षिणां वीक्षमाणः
ख्यातं शीतांशुतीर्थं प्रणवपरिणतं तद्विमानं तदीयम् ।
आद्यं व्यक्तं स्वयं च क्षणमपि शुभदं नायकी रङ्गपूर्वा
भूमिर्वैकुण्ठमेतज्जगति विजयते सह्यजे तु प्रसन्नः ॥
शार्ङ्गी कोमलनायिकासहचरः श्रीकुम्भकोणेऽद्भुते
नित्यं वेदविमानमत्र च सरस्तीर्थं च हेमाब्जिनी ।
तद्धाम्नोऽप्ययनद्वयेन नियतं द्वारद्वयं प्राङ्मुखः
प्रत्यक्षोऽभवदत्रये च मुनये शेषाङ्कशायी च यः ॥

145

अष्टश्लोकी सव्याख्या

The commentator was the son of Varadācārya of Śrīvatsagotra. He was the disciple of Govindarāja of Kauśikagotra who was the pupil of Śaṭhakopaguru. This Govindarāja seems to be identical with the famous commentator on the *Vālmīki-Rāmāyaṇa*.

Beginning:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

यः पार्थस्य कृते निरङ्कुशनिजस्वातन्त्र्यभूषायितं
सारथ्यं प्रथयांचकार धरणीभारावतारक्षमम् ।
मायामाश्रितवैरिणीं व्यघटयच्चक्रेण यः शाम्बरीं
दद्यादद्य दयापयोनिधिरसौ देवः शुभां शेमुषीम् ॥
श्रीशठरिपुगुरुकरुणालब्धत्र्यन्तयुग्मतत्त्वार्थः ।
श्रीमान् गोविन्दगुरुः कौशिकवंशाब्धिकौस्तुभो जयति ॥
तत्पदपङ्कजयुगलीसेवासंप्राप्तनिखिलनिगमान्तः ।
वितनोम्यष्टश्लोकीविवृतिं सौम्योपयन्तृदासोऽहम् ॥

श्रियः पतिः परमकारुणिको भगवान् सर्वेश्वरः,

वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः ।
आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैः सह ॥

इत्युक्तरीत्या वैकुण्ठाख्ये दिव्यलोके दिव्यमहामणिमण्टपे शेषपर्यङ्के श्रीभूमिनीलाभिः सह नित्यसूरिभिरनवरतपरिचर्यमाणचरणनलिनो जगत् सर्वमेकातपत्रयन्नासीनो नित्यसूरिवदेव सर्वेषामपि चेतनानां स्वकैंकर्यविशेषेण स्वगुणानुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपस्वचरणारविन्दनित्यकैंकर्याख्यपरमपुरुषार्थानुभवयोग्यतासद्भावेऽपि, अनादिमायया सुप्तः, अचिदविशेषितान् प्रलयसीमनि संचरतः करणकलेबरैर्घटयितुं दयमानमनाः, इत्युक्तरीत्या कतिपयान् जन्तून् मधूच्छिष्टमग्नसुवर्णबिन्दुवत् प्रलयसमये त्रिगुणात्मकप्रकृतिनिमग्नान् भोगमोक्षशून्यान् अचिदवशिष्टानवलोक्य दयार्द्रचित्तः सन् ।

End:

अत्र

संतन्यमानमपराधगणं विचिन्त्य त्रस्यामि हन्त भवतीं च विभावयामि ।
अह्राय मे वृषगिरीशदये जहीमामाशीविषग्रहणकेलिनिभामवस्थाम् ॥

इत्याद्यभियुक्तग्रन्थोऽनुसंधेयः । दृढोऽस्मीत्यनेन स्थितोऽस्मि गतसंदेहः इत्यर्जुनस्येव स्वात्मनो महाविश्वासः सूचितः ।

अथ पातकभीतस्त्वं सर्वभावेन भारत ।
विमुक्तान्यसमारम्भो नारायणपरो भव ॥
वृथैव भवतो याता भूयसी जन्मसंततिः ।
तस्यामन्यतमं जन्म संचिन्त्य शरणं व्रज ।
तस्मात् त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् ॥

इत्यादयश्चरमश्लोकसमानार्था ग्रन्थाश्चात्रानुसंधेयाः ।

Colophon:

इति श्रीमद्वत्सकुलतिलकवरदाचार्यसूनुना सौम्योपयन्तृसूरिणा विरचितायामष्टश्लोकीव्याख्यायां चरमश्लोकाधिकारस्तृतीयः ।

148

अष्टश्लोकी सव्याख्या

The commentator was the head of the Ahobalamaṭha in the 15th century A.D. He was a pupil of Ādivaṇ Saṭhakopa of Ahobalamaṭha. Other works of the commentator are the *Jijñāsāsūtrabhāṣyabhāvaprakāśikā*, *Ārādhanasaṃgrahakārikā*, *Puruṣakāramīmāṃsā*, *Nyāsaviṃśativyākhyā*, *Gītārthasaṃgrahavibhāga* and *Īśāvāsyopaniṣadbhāṣya*. Vedāntadeśika's *Rahasyatrayasāra* is mentioned.

Beginning:

स्वयं व्यक्तं रङ्गधाम्नि तल्पे वातूलतूलके ।
प्रादुर्भूतौ प्रपद्येऽहं दम्पती जगतां पती ॥
तत्त्वोपायपुमर्थानां व्यक्त्यै भट्टपराशरैः ।
अष्टश्लोकीं विरचितां व्याकरोमि यथामति ॥

परमकारुणिकैर्भगवद्भट्टपराशरैः शब्दादिविषयमोहमहार्णवनिमग्नानां संसारिणामुज्जीवनार्थं रहस्यत्रयस्य तत्त्वहितपुरुषार्थप्रतिपादकत्वप्रकारः श्रीमदष्टश्लोक्या प्रदर्शितः । यद्यपि वेदान्ताचार्यैः श्रीरहस्यत्रयसारादिषु तत्र तत्राष्टश्लोकीपदतात्पर्यं विप्रकीर्णं प्रतिपादितमिति तत्र वक्तव्यं नावशिष्यते, तथापि बुद्धिसौकर्यार्थं तदेव तात्पर्यमेकत्र लिख्यते । श्रीमदष्टाक्षरमन्त्रः द्वयं चरमश्लोकश्चेत्येतत् त्रयं रहस्यत्रयमुच्यते । तत्राद्यो मूलमन्त्रः समस्तवेदान्तप्रतिपाद्यानां तत्त्वोपायपुरुषार्थानां संग्रहेण प्रतिपादकः;

ऋचो यजूंषि सामानि तथैवाथर्वणानि च ।
सर्वमष्टाक्षरान्तःस्थं यच्चान्यदपि वाङ्मयम् ॥
छन्दो यजूंषि सामानि योऽधीतेऽसकृदञ्जसा ।
सकृदष्टाक्षरं जप्त्वा स तस्य फलमश्नुते ॥

इत्यादिस्मरणात् ।

End:

अत्र अकारार्थाय, ईशानां जगतां, मत्प्राप्त्यर्थतया इति त्रिभिः श्लोकैः संग्रहेण प्रदर्शितः ।

अष्टश्लोक्यां तृतीयोऽयं पञ्चमो यश्च सप्तमः ।
तेषां त्रयाणां तत्त्वेन प्राज्ञा जानन्ति वैभवम् ॥
इति पराशररचितामष्टश्लोकीमुदारगम्भीराम् ।
श्रीवत्साङ्कमुनीन्द्रः श्रुत्वा भक्त्या चकार तट्टीकाम् ॥
यदिह रहस्यं विवृतं यद्वा न्यूनं वचोऽधिकं यद्वा ।
कृपया तदिदं सर्वं देवः क्षमतां तथा महान्तोऽपि ॥

Colophon:

इति सर्वतन्त्रस्वतन्त्रस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीवत्साङ्कश्रीमन्नारायणमुनीन्द्रस्य कृतिषु रहस्यटीका संपूर्णा ।

150

अष्टश्लोकी सव्याख्या

Beginning:

सकलशास्त्रनिपुणः श्रीमद्भट्टाचार्यः सर्वशास्त्रतात्पर्यभूतं रहस्यत्रयार्थं निखिलचेतनोज्जिजीवयिषया श्लोकाष्टकेन संगृह्णाति । तस्यार्थो यथाश्रुतं यथासंप्रदायं यथामति प्रकाश्यते ।

अकारार्थो विष्णुः + इममर्थं समदिशत् ॥

प्रथमं द्वयरूपमन्त्रयाथार्थ्यप्रतिपादनपरमूलमन्त्रार्थः प्रकाश्यते । मूलमन्त्रश्च पदत्रयात्मकः । तत्र प्रथमपदभूतप्रणवः पदत्रयात्मकः । एवं पदविभागमभिप्रेत्य प्रथमपदस्याकारस्यार्थमाह— अकारार्थ इति ।

End:

श्लोकस्य वाक्यत्रयात्मकत्वात् चरमवाक्यं मा शुचः इत्यस्यार्थविवरणरूपम् । अनेन वात्सल्यादिकमुच्यते । ते इति मानससांनिध्याभिप्रायेण वा श्रीरङ्गनाथाभिप्रायेण वा संबुद्धिः । दृढोऽस्मीति स्व .

151

अष्टश्लोकीव्याख्या

The commentator mentions his name ambiguously as Vaiṣṇavadāsa, which was apparently his Dīkṣā name. But from the printed edition the author's name is known as Prativādibhayaṃkara Aṇṇan.

Beginning:

अखिलचिदचिदीशः श्रीनिवासो दयालुः
स्वपदकमलयुग्मप्रापकः संश्रितानाम् ।
निगमशिखरगम्यो नित्यमव्याजबन्धु-
र्विलसतु मम चित्ते वेंकटेशो मुकुन्दः ॥
प्रणम्य देशिकान् सर्वानष्टश्लोक्या यथाश्रुतम् ।
अर्थो वैष्णवदासेन बालबोधाय वर्ण्यते ॥

अथ परमकारुणिको भगवान् श्रीपराशरभट्टार्यः सकलचेतनोज्जीवनाय सर्ववेदसारतया स्वरूपोपायपुरुषार्थप्रतिपादकतया च सदा मुमुक्षुभिरनुसंधेयस्य रहस्यत्रयस्य संप्रदायपरंपराप्राप्तमर्थं दर्शयितुकामः स्वरूपज्ञानपूर्वकत्वादभीष्टोपायप्रवृत्तेः स्वरूपप्रतिपादनपरं सकलशास्त्ररुचिपरिगृहीतं श्रीमदष्टाक्षरमन्त्रमादौ विवृणोति चतुर्भिः श्लोकैः ; अथ द्वाभ्यां स्वरूपानुरूपोपायपुरुषार्थप्रतिपादनपरं मन्त्ररत्नम् ; ततो द्वाभ्यां द्वयविवरणरूपं चरमश्लोकम् ।

End:

दृढोऽस्मीति स्वनिष्ठाप्रदर्शनम् । प्रबन्धश्च निगमितः ।

मयेत्थं बालबोधार्थमष्टश्लोकी यथोचितम् ।
वर्णितार्था महात्मानः क्षन्तुमर्हथ साहसम् ॥

Colophon:

अष्टश्लोकीव्याख्या समाप्ता ।

153

अष्टश्लोकीव्याख्या

Beginning:

उदयश्च रक्षा च प्रलयश्च उदयरक्षाप्रलयाः ; जगतां लोकानामुदयरक्षाप्रलयाः जगदुदयरक्षाप्रलयाः ; तान् करोतीति जगदुदयरक्षाप्रलयकृत् ; जगदुत्पत्तिस्थितिसंहारकर्तेत्यर्थः । व्याप्नोतीति विष्णुः । विषॄल् व्याप्तावितिं धातुः । व्यापनशीलः श्रियः पतिरकारार्थः । अकारश्च अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु इति धातुनिष्पन्नः स्रष्टृत्वरक्षकत्वादिवाचकः । मकारस्यार्थो वाच्यो जीवः, नित्यमुक्तबद्धरूपत्रिविधचेतनो मकारार्थः ।

End:

सर्वधर्मानित्यादिचरमश्लोकार्थं स्मरन् अनुसंदधानः सन् पुनरेतत्पूर्वोक्तं ज्ञानं भगवदेकोपायत्वाध्यवसायरूपमुपेयुषः प्राप्तवतो मम सर्वापराधक्षयं सर्वे च ते अपराधाश्च तेषां तत्प्रतिबन्धकाना-

मांवेद्यादीनां पुण्यपापरूपपूर्वोत्तराघानां च क्षयमशेषविनाशरूपां निवृत्तिं कर्तासि करिष्यसीति दृढोऽस्मि। अवसादनिवृत्त्या निर्भरोऽस्मीत्यर्थः।

श्रीपराशरभट्टार्यः + श्रेयसे मेऽस्तु भूयसे ॥

154

The author was the son of Anantasūri of the Śeṣārya family.

157

अष्टश्लोकीव्याख्या

Beginning:

..... दयालब्धयतीन्द्रविषयक्रियः ।
भट्टार्यदृष्टां कोऽप्यष्टश्लोकीं विवृणुते यतिः ॥

इह खलु श्रीपराशरभट्टार्याः सकलचेतनोज्जीवनाय परमकारुणिकतया रहस्यत्रयार्थं संगृह्य श्लोकाष्टकेन प्रणीतवन्तः—अकारार्थ इत्यादिना। प्रथमश्लोकचतुष्टयेन मूलमन्त्रार्थः; अनन्तरश्लोकद्वयेन द्वयार्थः; ततः श्लोकद्वयेन चरमश्लोकार्थः प्रकाश्यत इति विभागः। ननु रहस्यत्रयमध्ये प्रथमं मूलमन्त्रार्थप्रकाशनं कथमिति चेत्, स्वरूपोपायपुरुषार्थेषु फलेच्छयोपायप्रवृत्तेः स्वरूपज्ञानमूलत्वात् प्रथमं स्वरूपज्ञानजनकमूलमन्त्रार्थः प्रकाश्यते। तदुक्तम्—

सप्रकारस्वरूपोक्तिसामर्थ्यान्मूलमन्त्रतः।
तत्र स्वरूपयाथात्म्यं वर्ण्यते तत्त्वदर्शिभिः ॥

इति। स च मूलमन्त्रः पदत्रयात्मकः।

End:

अत्र दृढोऽस्मीति वर्तमाननिर्देशेन तदनुसंधाननैव कालक्षेपः कर्तव्य इति विवक्षितम्। श्लोकस्य वाक्यत्रयात्मकत्वात् चरमं वाक्यं मा शुच इति वाक्यमित्यर्थः। सारथेरित्यनेन वात्सल्यसौलभ्याधिक्यमुच्यते। त इति मानससांनिध्याभिप्रायेण वा श्रीरङ्गनाथाभिप्रायेण वा संबुद्धिः। ओं व्यासाम्नायपयोधिकौस्तुभमित्यादि।

श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः।
एतद्देहावसाने मां त्वत्पादं प्रापय स्वयम् ॥

Colophon:

इति मन्त्रार्थदीपिका संपूर्णा।

159

अष्टादशभेदविचारः

This is a short treatise on the divergent views held by the followers of Vedāntadeśika and Pillai Lokācārya on eighteen points of the Viśiṣṭādvaita philosophy and Śrīvaiṣṇava religion. The author was the son of Śrīnivāsācārya of the Śrīvatsagotra.

Beginning:

अष्टाक्षरार्थविषये द्रमिडप्रबन्धव्याख्यातृभिर्गुरुभिरुक्तमिहार्थभेदम् ।
श्रीभाष्यमुख्ययतिभूमिपतिप्रबन्धव्याख्यातृभिश्च कथितं प्रविभज्य वक्ष्ये ॥
द्रमिडाचार्यदृष्टार्थं पूर्वं वक्ष्ये यथामति ।
संस्कृताचार्यदृष्टार्थं पश्चात् सद्भिर्नियोजितः ॥

अत्र पूर्वैः संगृहीतोऽयं श्लोकः—

भेदः स्वामिकृपाफलान्यगतिषु श्रीव्याप्त्युपायत्वयो-
स्तद्वात्सल्यदयानिरुक्तिवचसोर्न्यासे च तत्कर्तरि ।
धर्मत्यागविरोधयोः स्वविहिते न्यासाङ्गहेतुत्वयोः
प्रायश्चित्तविधौ तदीयभजनेऽणुव्याप्तिकैवल्ययोः ॥

अस्यार्थः—स्वामिकृपा च फलं चान्यगतिश्चेति द्वन्द्वः । तासु विषये भेदः । स्वामिनः कृपा निर्हेतुका साक्षात् पुरुषार्थहेतुः । श्रीमतो रक्षकस्य स्वामिनः सापेक्षत्वे तस्यावाप्तसमस्तकामत्वादिगुणभङ्गः प्रसज्येत ।

End:

अन्ये तु केवलात्मानुभववतां प्राकृतमण्डलतुल्यं स्थानम् । अतो नश्वरः केवलात्मानुभव इति वदन्ति । तेषामयमाशयः—स्वरूपानुरूपस्वात्ममात्रानुभवः सर्वबन्धविनिर्मुक्तसंसिद्धगुणाष्टकप्राप्य-प्राकृतगुणरहितशुद्धसत्त्वे कल्पयितुमयुक्तः । ब्रह्मात्मकस्वात्मोपासकः पञ्चाग्निविद्यानिष्ठः प्राकृतस्थाने कुत्रचित् स्थित्वा कंचित् कालं स्वात्मानमनुभूय तस्मादर्चिरादिमार्गेण वैकुण्ठं प्राप्य यथावस्थित-भगवदनुभवकैंकर्यं प्राप्नोति । अतः स्वानुभवो नश्वरः । एवं चानावृत्तिं वदता भाष्यकारवाक्येनापि न विरोधः । क्रूराधिपवाक्यस्याप्यावृत्तावेव तात्पर्यम् । एवं कल्पनं प्रमाणबलादेव ।

चतुर्विधा मम जना भक्ता एव हि ते स्मृताः ।
अहमेव गतिस्तेषां निराशीःकर्मकारिणाम् ॥

येऽपि शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ।
सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥

इति च्यवनधर्मत्वोक्त्या कैवल्यस्य नश्वरत्वमुक्तमिति सर्वं समञ्जसम् ।

द्विविधाचार्यदृष्टार्थरीतिरित्थं यथामति ।
वात्स्यश्रीरङ्गनाथेन दिङ्मात्रेण प्रदर्शिता ॥

Colophon:

इत्यष्टादशभेदविचारः समाप्तः ।

160

अष्टादशभेदविचारः

End:

द्विविधाचार्यदृष्टार्थरीतिरित्थं प्रकाशिता ।
महाचार्यपदाम्भोजाश्रितश्रीवाससूरिणा ॥

161

अष्टादशभेदविचारः

End:

द्विविधाचार्यदृष्टार्थरीतिरित्थं यथामति ।
वात्स्येन रङ्गनाथेन दिङ्मात्रेण प्रदर्शिता ॥

Colophon:

श्रीवत्सकुलतिलकश्रीनिवासार्यसूनोः श्रीरङ्गनाथस्य कृतिषु विवादार्थसंग्रहणं संपूर्णम् ।

162

अष्टादशभेदविचारः

Beginning:

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरंपराम् ॥
लोकाचार्याय गुरवे कृष्णपादस्य सूनवे ।
संसारभोगिसंदष्टजीवजीवातवे नमः ॥
नमः श्रीशैलनाथाय कुन्तीनगरजन्मने ।
प्रसादलब्धपरमप्राप्यकैंकर्यशालिने ॥

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥
श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

अत्र श्रीमन्नारायणचरणद्वन्द्वमेवोपायोपेयत्वेनाध्यवस्यन्तस्तत्प्रतिपादकरहस्यत्रयानुसंधानपराः पूर्वाचार्याः स्वानुभूतार्थदृढीकरणार्थं शिष्याणामाचार्यान्तरग्रन्थसंवादिस्वाचार्यग्रन्थावलोकनेनाश्वासजननार्थं कालक्षेपार्थं च रहस्यत्रयविषयानेव बहून् प्रबन्धान् निबबन्धुः । तेषु च तात्पर्यविषयीभूतप्रधानार्थैकमत्ये जाग्रत्यपि कियानप्यप्रधानार्थभेदो दृश्यते ।

End:

ननु दयायाः परदुःखप्रहाणेच्छारूपत्वे दुःखहानेरनवाप्तत्वेनावाप्तसमस्तकामत्वविरोधः ; परदुःखदुःखित्वे हेयप्रत्यनीकत्वविरोध इति चेत् ; न । इष्यमाणाया दुःखहानेश्चेतनगतत्वेन न भगवतः परिपूर्णत्वविरोधः । धर्माणां दोषत्वं गुणत्वं च लोकत एवावसेयम् । तत्र यस्तु परदुःखासहिष्णुः द्रुतचित्तो भवति, तस्मिन् गुणित्वव्यवहार एव, न दोषित्वव्यवहार इति सर्वं समञ्जसम् ।

165

आज्ञाकैंकर्यसिद्धान्तः

The work emphasizes the need to perform the Nityakarman-s (obligatory rites) with the conviction that they constitute service to God. The author's name is unknown.

Beginning:

अत्राज्ञासिद्धैकैंकर्यविषये किंचिदुच्यते—

श्रुतिस्मृत्युदितं कर्म त्वनुष्ठेयं तु नैत्यकम् ।
नैमित्तिकं च तत्तुल्यं काम्यं तु न कदाचन ॥
विष्ण्वर्चनतया कार्यं काम्यं नित्योपकारि च ।
श्रुतिस्मृती ममैवाज्ञा यस्तामुल्लङ्घ्य वर्तते ॥
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ।
मङ्गल्यसूत्रवस्त्रादीन् संरक्षति यथा वधूः ।
तथा प्रपन्नः शास्त्रीयपतिकैंकर्यपद्धतिम् ॥

End:

भगवद्भाष्यकारैरन्तिमदशायामन्तेवासिहस्तं गृहीत्वोत्थायार्घ्यप्रदानं कृतमिति संप्रदायात्, देवानृषीनित्यादिना नित्यग्रन्थे स्थापनात्, कदाचित् श्रीवत्सचिह्नमिश्रे संध्यावन्दनार्थमायति द्वाभ्यां श्रीवैष्णवाभ्यां पठ्यमानं दिव्यप्रबन्धध्वनिं श्रुत्वा विलम्बिते सहागच्छद्भिः श्रीवैष्णवैः कालोऽतिवर्तत इत्युक्ते, संध्यावैकल्यं प्रायश्चित्तापनोद्यं, भागवतवन्दनवैकल्यस्य प्रायश्चित्तं नास्ति, इत्येवोत्तरस्य दत्तत्वात्, या कर्मिणामधिकृतिरित्यत्र कर्मादिनिष्ठवत् स्वस्यापि तदधीनकर्तृत्वमस्तीत्युक्तत्वात् . . षु इति श्लोके त्वमेव शक्त्यादिकं विधेहीत्युक्तत्वात्, भट्टनाथस्य भगवत्समाराधनरूपाग्निहोत्रस्योपकरणोपनेत्री श्रीगोदेत्युक्तत्वात्,

गायत्रीजपपर्यन्तं मन्त्राचमनपूर्वकम्।
सान्ध्यं कर्माखिलं साधु समाप्य च यथाविधि ॥

166

आनन्दतारतम्यखण्डनम्

A criticism of the Dvaita doctrine that the bliss enjoyed by the liberated is of different kinds and degrees. The author (18th century) was of the Śrīśaila family, son of Śrīnivāsa Tātācārya of Surapuram, and pupil of Veṅkaṭācārya, his elder brother. For details see *JAHRS*, 13, pp. 11-33, and introduction to the *Vedāntakārikāvali*, ALS 75.

Beginning:

जिज्ञासोर्विषयः फलं च विपुलं यस्य स्वरूपं महत्
सत्यं ज्ञानमनन्तमङ्गलगुणं नित्यानवद्योन्नति।
तद्ब्रह्मेत्यभिधीयमानमनिदंपूर्वैर्वचोभिः परं
वस्त्वाविष्कुरुतां शुभानि कमलानित्यानुषक्तं मम ॥
वाणी जयति गुरूणां वेणी कृतकेतरोक्तिसुदतीनाम्।
नाणीयस्यहितेषु कृपाणी कथकेषु मुक्तिनिश्रेणी ॥
माध्वानामध्वानं शृणुत जडाश्रितमभव्यमध्वानम्।
माध्वीकामृतधारासाध्वीं गिरमाद्रियध्वमार्याणाम् ॥
अधिकरणविहरणदशास्वधिकरणैर्ददतु मद्गिरो मोदम्।
महतां यतिपतिघटितश्रुतिनयसंनहनगहनगम्भीराः ॥

इह खलु निगमशतशिखरमुखरिताखिलजगदवनभवनकदनमुखलीलादक्षिणः स्वेतरविलक्षणतैकलक्षणः श्रीवत्सलक्षणः परव्यूहरूपघटनप्रकटितपारमेष्ठ्योऽपि प्रणतजनभरणपरिणतकरुणा-

परिणाहलभ्यसौलभ्यः कपटतिमिकमठहरिमनुजाद्यवतरणेषु निगूढतमोऽपहनिजालोकमयशुभालोकस्य लोकस्य सकलजननयनमनोहारिभिर्विहारैरानन्दममन्दं कन्दलयन्नपि परमपुरुषार्थाभ्यर्थितार्थकृतार्थतैकपरायणो बादरायणात्मनावतीर्य स्वात्मयाथात्म्यानवबोधकृततिरोधिमपवर्गमनर्गलेन तदवबोधप्रतिष्ठापनेन नेदिष्ठं चिकीर्षुः अथातो ब्रह्मजिज्ञासेत्यादीनि सूत्राणि प्रणिनाय । तस्यैतस्यापवर्गस्य त्रिवर्गगततरतमताकृतदौर्गत्यदवीयसीं निसर्गसुन्दरतां निरूपयितुं प्रकरणमिदमारभ्यते ।

End:

किंच सर्वकर्मक्षये सति आनन्दवृद्धेरयत्नसिद्धतया मदुक्तरीत्या सिद्धेरपरोक्षज्ञानेनानुष्ठितं मुक्तकर्मादि मुक्तिगतदुरितक्षयार्थमेवेति दुष्कर्मवत्यपि काचिन्मुक्तिस्त्वया अङ्गीकार्या स्यादेव । तस्मान्न केनापि प्रमाणेन मुक्तानामानन्दतारतम्यं सिध्यतीति निष्कण्टकोऽयं घण्टापथः ।

Colophon:

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तप्रमुखविद्यानिधध्यायितहृदयकमलश्रीतातयार्यनन्दनस्य वेंकटाम्बागर्भशुक्तिमौक्तिकमणेः षड्दर्शिनीवल्लभसर्वतन्त्रस्वतन्त्रवाजपेययाजिस्वाग्रजवेंकटाचार्यचरणपरिचरणसेवालब्धसर्वशास्त्रस्य चतुर्विधकवितानिर्वाहशीलस्य पूर्वोत्तरमीमांसापारावारपारीणस्यान्वीक्षिकीव्याकरणशिक्षितमतेरण्णयाचार्यस्य कृतिषु मुक्तानामानन्दतारतम्यखण्डनं नाम प्रकरणं संपूर्णम् ।

169

आनन्दतारतम्यखण्डनम्

This is similar to the above. The work is said to offer 104 criticisms against the Mādhva view.

Beginning:

यच्चोक्तम्—किंच साम्यनिषेधश्रुतीनां संसारिपरत्वे संसारावस्थायां दुःखानुभवात् भगवत्साम्याप्रसक्त्या अप्रसक्तनिषेधप्रसङ्गात् । मुक्तपरत्वे तु साम्यश्रुत्यर्थापरिज्ञानेन प्राप्तस्य साम्यस्य निषेधे प्रसक्तनिषेधकत्वम् । अत एवेष्टापूर्तं मन्यमाना वरिष्ठमित्यादौ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रुत्यर्थापरिज्ञानेन प्राप्तस्य कर्मप्राधान्यस्य निषेधः स्वीक्रियते । यद्वा समयप्राप्तसाम्यं साम्यश्रुत्यानूद्य साम्यनिषेधः क्रियत इति वा स्यादिति । तदयुक्तम्—दुःखानुभवादित्यस्य साम्यनिषेधे हेतुतया निषेधकधर्ममादाय प्रसक्त्यसंभवोक्तौ प्रसक्तप्रतिषेधकथोच्छेदप्रसङ्गेन लोकोत्तरानन्दादिना ब्रह्मरुद्रादेर्भगवत्साम्यप्रसक्तौ समानाधिकरणविजातीयात्पत्वाद्यभिप्रायेण तन्निषेध इत्येव वक्तव्यत्वात् ।

End:

तस्मात्,

अकामेनैव भवता श्रोत्रियस्येति वाक्यतः ।
मुक्तानन्दस्यावरत्वं प्राचुर्यस्योपपत्तये ॥

देशाद्यैरल्पतारूपमङ्गीकार्यं न संशयः ।
आनन्दमयसूत्रस्य कर्तुर्व्यासस्य संमतम् ॥
तदित्थं दशदूषण्या श्रीभाष्योक्तिविरुद्धता ।
आनन्दतारतम्यं नेत्यस्मिन्पक्षे पराकृता ॥
इत्थं मुक्तौ तारतम्यं श्रौतमित्यत्र दर्शिता ।
रामानुजमुनेरिष्टा स्याच्चतुःशतदूषणी ॥

Colophon:

आनन्दतारतम्यखण्डनं संपूर्णम् ।

170

आश्रयानुपपत्तिः

This is a criticism of the Advaita view that Brahman is the substratum of Avidyā. According to the introductory verse, the author must be the son of Vedāntadeśika.

Beginning:

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

प्रत्यस्तमितभेदं विज्ञानैकरसं ब्रह्मानाद्यविद्यातिरोहितस्वान्तं भेदात्मकं प्रपञ्चं पश्यतीति मृषावादिनामाघोषः । तत्र च अनृतेन हि प्रत्यूढाः, तेषां सत्यानामनृतमपिधानमिति प्रमाणं चाहुः । तत्राचार्योक्तानुपपत्तिषु प्रथममाश्रयानुपपत्तिरुच्यते । अविद्याश्रयत्वं किं ब्रह्मणः, उत जीवस्य ? नान्त्यः, जीवस्याविद्याकल्पितत्वाङ्गीकारात् । अतोऽन्योन्याश्रयः । न च बीजाङ्कुरन्यायेन जीवाविद्ययोः प्रवाहानादित्वात् नान्योन्याश्रय इति वाच्यम्; बीजाङ्कुरयोराधाराधेयभावानभ्युपगमात्, योगाचारमतसांकर्याच्च । सोऽपि हि संतन्यमानं विज्ञानं जीवमभिधत्ते ।

End:

तस्मान्नित्यमुक्तस्य नित्यसर्वज्ञस्य ब्रह्मणोऽविद्याश्रयत्ववचनं दीपस्य तिमिराश्रयत्ववचनवत् अपहास्यम् ।

Colophon:

इत्याश्रयानुपपत्तिः ।

171

आश्रयानुपपत्तिविचारः

A discussion on a certain passage in the *Śrutaprakāśikā* in the context of proving the impossibility of the basis of Avidyā according to the Advaita philosophy.

Beginning:

अज्ञानाश्रयानुपपत्तिश्रुतप्रकाशिकायां ब्रह्मस्वरूपप्रकाशत्वे सतीति; स्वरूपविषयज्ञानत्वे सतीत्यर्थः। विशेषानवगमात्; विषयवैषम्याभावादित्यर्थः। ननु धर्मिभूतज्ञानस्य निर्विषयतायाः शतशो भाष्यादिषु दृष्टत्वात् தர்மபூதஞானஸ்ய விஷயித்வமேற்றம் इति श्रीमदाचार्यचरणैः रहस्यत्रयसारादौ प्रतिपादनाच्च ब्रह्मस्वरूपज्ञानमपि निर्विषयमेव। तत् कथमिह ब्रह्मात्मकज्ञानस्य स्वरूपविषयत्वप्रतिपादनम्? कथं वा तत्कृतः स्वरूपज्ञानप्रमाणज्ञानयोर्विषयवैषम्याभावश्च संगच्छत इति चेत्; उच्यते—अस्मन्मते हि ज्ञानाश्रयभूतं ज्ञानस्वरूपं निर्विषयं चात्मवस्तु प्रमाणोपपत्तिभ्यामभ्युपेतम्।

End:

अतो भ्रमनिवर्तकत्वकथनमभिप्रायवर्णनवेलायां संगतमेव। यद्वा प्रपञ्चप्रतिभासरूपभ्रमस्यापि अज्ञानत्वं विक्षेपरूपत्वादिति तथोक्तिः।

172

इतितुपञ्चम्यामितिश्रुत्यर्थविचारः

A short discussion on the *Chāndogyopaniṣad* passage, V. 9. 1.

Beginning:

पञ्चमाहुत्यनन्तरं पुरुषवचस्त्वं यासां ता एता आपः श्रद्धाशब्दवाच्या भूतान्तरसंसृष्टाः सूक्ष्मा आप इति 'इति तु पञ्चम्याम्' इत्यादिश्रुत्यभिप्रेतमिति भाष्यकारादीनां सर्वेषामभिमतम्। इदं तु चिन्तनीयम्—परमते किमेता आपोऽविनाभूता जीवेन सूक्ष्मलिङ्गशरीरादिशब्दिताः भूतसूक्ष्मांशाः, उतामिहोत्राहुतिसाधनीभूतद्रव्यसूक्ष्मांशा इति।

End:

भगवद्भाष्यकृतस्तु स्थूलशरीरान्निर्मथ्य गत्यर्थं संगृहीता एव भूतसूक्ष्मांशा द्युलोकादियोषित्पर्यन्तं पञ्चाग्निषु पञ्चधा परिणताः पुरुषवचसो भवन्तीति मन्यन्ते। तत्र न काचिदनुपपत्तिः।

173

ईक्षत्यधिकरणविचारः

This is a polemical discussion on *Brahmasūtra*, I. 1. 5: *Īkṣater nāśabdam*. For details regarding the author and his numerous polemical works, see *NCC*, I, p. 142b.

Beginning:

नत्वा श्रीशपदाब्जे स्तुत्वा पङ्क्तिं गुरूणां च ।
ईक्षतिनीतिविचारं तनुतेऽनन्तार्यदासोऽयम् ॥

पूर्वोत्तरद्विकभेदभिन्ने शारीरकशास्त्रे प्रथमद्विकेन प्रमेयत्वव्यापककार्यतानिरूपितकारणत्वस्य ब्रह्मलक्षणत्वमुपपाद्यत इति तादृशलक्षणत्वोपपादनपरत्वं पूर्वद्विकस्योपाधिः । तस्य लक्षणत्वोपपादनं चासंभवातिव्याप्तिशङ्कावारकतया कार्यतायां प्रमेयत्वव्यापकत्वोपपादनेन चेति द्वेधा भवति । तत्रासंभवातिव्याप्तिशङ्का श्रुतिविप्रतिपत्तिप्रयुक्ता वादिविप्रतिपत्तिप्रयुक्ता चेति द्विविधा ।

End:

लक्षणाबीजभूतान्वयानुपपत्त्यादेरभावात् ईक्षतिधातोर्न लक्षणा युक्तेत्येतावन्मात्रस्य तत्र विवक्षितत्वेऽपि चेतनवाचकात्मादिपदश्रुत्या सच्छब्दार्थस्य चेतनस्याविवक्षितत्वेन तादृशार्थबोधनाय श्रुतत्वाच्चेति सूत्रोपपत्तिरिति सर्वमवदातम् ।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

174

ईश्वरानुमानविचारः

This is a short treatise, based on the *Adhikaraṇacintāmaṇi* commentary on the *Adhikaraṇasārāvali* of Vedāntadeśika (verse 41), on the impossibility of proving the existence of God by mere inference as advocated by Naiyāyika-s, using the Mahāvidyā type of inference.

Beginning:

अधिकरणचिन्तामणौ विप्रतिपन्नं स्वस्वेतरवृत्तित्वानाक्रान्तसकर्तृकनिष्ठाधिकरणमिति महाविद्यावादिनः प्रसाधयन्ति इति वाक्यं वर्तते । तस्यार्थ उच्यते—महाविद्यारूपं प्रमेयत्वमिति प्रागुक्तम् ।

सकर्तृकेति । सकर्तृके निष्ठा सकर्तृकनिष्ठा । सप्तम्यर्थो निरूपितत्वं निष्ठापदार्थाधेयत्वान्वयी । तादृश्या निष्ठाया अधिकरणमिति साध्यनिर्देशः । प्रमेयत्वमिति पक्षनिर्देशो भाव्यः ।

End:

यद्वा घटत्वप्रमेयत्वान्यतरत्वादिकं हेतुः । इदानीं घटत्वादेरन्वयदृष्टान्तस्यापि सुलभत्वात् अन्वयव्यतिरेकित्वं बोध्यम् ।

175

ईश्वरीशब्दनिर्वचनम्

A polemical tract on the etymology of the word *Īśvarī*, denoting the goddess Lakṣmī, in support of Pillai Lokācārya's views.

Beginning:

अस्येशानादिसूक्तेरनुमृतिविरहे नेश्वरीमित्यसौ गी-
र्ब्रूते देवीं नियन्त्रीं स्वरसगतिहतेङर्त्यात्मकप्रत्ययस्य ।
तस्यां ह्येषा नियन्त्री विलसति जगतां विष्णुपत्नीत्वहेतो-
स्तस्यात्र श्रीपदोक्त्या नियमन उचिते बाहुलो ङीव् गुरूक्तः ॥
यद्वास्येशादिवाक्यं नियमनमवदद्विष्णुपत्नीत्वहेतो-
र्भूतानां स्वामिनीत्वं निपुणमभिदधावीश्वरीमित्यसौ वाक् ।
अश्नोतेरीश्वरीति प्रभवति वरटष्टित्त्वमूलेन ङीपा
स्वामिन्यां मानमेषा शठजिदुपनिषद्भाष्यकारैरभाषि ॥

तत्राद्यश्लोकस्यायमर्थः—अस्येशाना जगतो विष्णुपत्नीमित्यादिवाक्यमपर्यालोचयतः केवलम् ईश्वरीं सर्वभूतानामिति वाक्यं शृण्वतः प्रेक्षावत एवं विमर्शो जायते ।

End:

तस्मात् टित्वात् ङीप्प्रत्ययः । भवति चैवं वाक्यद्वयस्यापि सार्थक्यमिति द्रमिडोपनिषद्भाष्ये षष्ठशतकान्त्यदशकदशमगाथाव्याख्याने स्वामिनीत्वे इदं प्रमाणमित्यनुगृह्णन्ति तद्भाष्यकृत इति ।

176

उपदेशरत्नमाला

This is a Sanskrit version of the Tamil work *Upadeśaratnamālā* of Maṇavālamāmuni. The author was of the Vādhūla family and a pupil of Vādhūla Vīrarāghavācārya. He was popularly known as Mahābhāṣyam Appalācārya.

Beginning:

प्राक् श्रीगिरीट् स्वकथिताध्वमनोज्ञरीतेर्वक्तुर्हृतक्षतमुने रुचिरोपयन्तुः ।
स्वप्रेमतः सुकलितामुपदेशरत्नमालां स्वहृद्युपयतां शरणागतिर्नः ॥
श्रीशैलनायकगुरोरिह मामकस्य प्राप्तस्वनुग्रहवशादुपदेशमार्गम् ।
आलोच्य पश्चिमजनाभ्यसनाय वृत्ते क्वाप्याकलय्य कथयाम्युपदेशरूपम् ॥

End:

क्व श्रीवचो वरवरस्य मुनेः क्व चाहं मन्दस्तदर्थविवृतेरिह संस्कृतेन ।
यद्येवमप्यनवधिस्तदनुग्रहोऽसावेवं व्यवीवरदिमं निरुणद्धु कोऽत्र ॥
इत्थं वधूलकुलवीररघूद्वहार्यपादाब्जसेवनलसन्मतिरेष दासः ।
वाधूलदाशरथिनामधरो व्यवार्षं तत् सादरं विदधतां हृदये महान्तः ॥

177

उपदेशरत्नमाला

This is different from the work mentioned above, and deals with the Śaiva-Vaiṣṇava controversy and attempts to prove the supremacy of Nārāyaṇa.

Beginning:

यद्यपि भगवान्नारायणः पुरुषोत्तमः परं ब्रह्म परं ज्योतिः परं तत्त्वं परमात्मेत्यादिभिः शब्दैरभिधीयते सकलजगत्कारणं सत्संरक्षणायाजोऽपि जायते मुक्तप्राप्यश्चेति सत्संप्रदायः, तथापि शिवादय एव कासुचिच्छाखासु परत्वेन प्रतीयन्ते। एते कारणतया मुमुक्षुभिर्ध्येया इति केषांचित् मन्दमतीनां विप्रतिपत्तिर्जायेत। अतस्तद्व्युदासाय प्रवृत्तोऽयं ग्रन्थ इति प्रयोजनवानेवायमारम्भः। अयमिह पूर्वपक्षसंग्रहः—

सद्ब्रह्मेत्यादिशब्दानां विशेषे पर्यवस्थितिः ।
शिवादिशब्दिते न्याय्या न तु नारायणाह्वये ॥

End:

महादेवः सर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूवेति समाराधितात् परमपुरुषान्नारायणात् प्राप्तमहिमत्वं शिवस्य बहुशः श्रूयते। अस्य तु नारायणस्य तद्वैपरीत्यं श्रूयते। अतो नारायणः परमकारणं नेशानादिरिति सर्वं समञ्जसम्।

उपदेशरत्नमालामुपचितगुणोल्लासिविमलमुक्ताढ्याम् ।
श्रीनायकोपलाल्यां धारय हृदय प्रभावतीमेनाम् ॥

178

उपादानत्वविचारः

A discussion on the Upaniṣadic passage *sad eva saumya*, etc. refuting the material causality (*upādānatva*) of Brahman in connection with the evolution of the world and arguing that the relationship between Brahman and the world is one of soul and body. The author evidently means to criticize Raṅgarāmānuja's view on this point.

Beginning:

ब्रह्मणः साक्षाद्विकाराश्रयत्वाभावेऽपि परंपरया तदाश्रयत्वेन जगदुपादानत्वमिति। अत्रोच्यते—परंपरासंबन्धसत्त्वेऽपि तेन संबन्धेन तदाश्रयत्वे मानाभावः। न च बालो युवा जात इतिवत् सदेवेत्यादिकमेव तत्र मानमिति वाच्यम्, दृष्टान्तवैषम्यात्। जनिधातोस्तत्र श्रवणेन तस्योत्पत्त्यर्थकत्वात् तदन्यथानुपपत्त्या बालशब्दप्रवृत्तिनिमित्तबाल्यस्य परंपरयात्मन्यवगाहनं स्वीकृत्य परंपरया बाल्याश्रयस्य देवदत्तादेः युवानं स्वं प्रत्युपादानत्वं स्वीकृतम्। इह तु सत्तामात्रार्थकासधातुमात्रश्रवणात् प्रपञ्चवृत्त्यवस्थायाः ब्रह्मनिष्ठत्वकल्पकाभावात्।

End:

अत एवंभूतब्रह्मात्मकस्त्वमसीति उपसंहरति तत्त्वमित्यादिना। अतः सदेव सोम्येदमिति सामानाधिकरण्यस्य उपादानोपादेयपरत्वमसंभवदुक्तिकमेवेत्यास्तां विस्तरः।

ब्रह्मोपादानपरता सद्विद्यां स्पृशतीति यत्।
योषा स्त्र्यन्तरमायातीत्येतद्वाक्यं यथारसम्॥
तथैव नात्र संदेहो विद्वद्भिः कर्तुमर्हति।
इत्येवं शठकोपेन सदसि स्थापनं कृतम्॥

179

उपादानत्वसमर्थनम्

An attempt to prove that Brahman is both the material and the efficient cause of the world. This discussion is said to have taken place at Kumbakonam, evidently between the author and a Mādhva philosopher who does not accept the above.

Beginning:

वादो यः समभूच्छ्रीमत्कुम्भकोणमहापुरे।
उपादानत्वविषयः पत्रारूढः स तन्यते॥ १॥

विशिष्टाद्वैतं नः प्रथयति विशिष्टार्थलसितं
विशिष्टान्तर्मोदप्रजननमशेषश्रुतिहितम् ।
उपादानं ब्रह्म प्रभवति निमित्तं च तदिदं
बहु स्यामित्यादिश्रुतिततिरवादीदविशयम् ॥ २ ॥
स्फुटं कुर्वन् सूत्रं प्रकृतिपदसंयुक्तमनघो
मुनिः पाराशर्यो जयति तदनन्यत्वमिति च ।
तथा कार्यं हेतुर्भवति परमं ब्रह्म तदिति
स्फुटं पौराणोक्तिः कथयति समस्ताभ्युपगता ॥ ३ ॥

विशिष्टाद्वैतिनां जगतो निमित्तमुपादानं च ब्रह्मेति राद्धान्तः । अयमेव समीचीनः, श्रुतिस्मृति-सूत्राणां स्वारस्यात् ।

End:

अत्रेत्थं परैरभाणि—स्वतन्त्रसाधनत्वनिर्वचनं न भावत्कमाश्रयामः; अपितु स्वरूपस्थित्यादिषु निरपेक्षत्वं तत् । इदं च न श्रुत्यादिसमधिगम्यम् । अपितु जन्मादिसूत्रसिद्धम् । ततश्च न प्रकृतसूत्रवैयर्थ्यमिति । तत्रेत्थमुक्तमस्माभिः । कथं तज्जन्मादिसूत्रसिद्धम्? तच्चोपपादनीयम् । एवं हि जन्मादिसूत्रार्थः—अस्य जगतो यतः यस्मात् जन्मादि उत्पत्तिस्थित्यादिकं, तत् ब्रह्मेत्यवगन्तव्यमिति । कथमुक्तोऽर्थोऽत्रावसीयत इति । तत्र परैः 'भवत्वेतावत्; पश्चाद्विचारयिष्यामः' इत्युक्तम् ।

180

उपासनावृत्तिविचारः

This brief treatise stresses that meditation (*upāsanā*) on Brahman should be repeated again and again till perfection is reached and the material body relinquished. The unknown author salutes Śrīnivāsayati, probably of recent date.

Beginning:

संसारदावदहननिर्वापणपटीयसी ।
पातु मां करुणाधारा श्रीनिवासयतीशितुः ॥
करुणाजलधिर्जीयात् सोऽयं वेदान्तदेशिकः ।
प्रतिभावल्लरी यस्य ध्यानमात्राद्विजृम्भते ॥
सत्संप्रदायकतकेन विशुद्धधीभ्यः श्रीश्रीनिवासयतिधुर्यगुरूत्तमेभ्यः ।
सम्यक्च्छ्रुतं बहुविदामपि पण्डितानां दुर्बोधमर्थमिह कंचिदुदीरयामि ॥

ब्रह्मविदां प्रारब्धवशात् जन्मान्तरं प्राप्तवतामुपासनमावर्तनीयं न वेति विप्रतिपत्तौ प्रमाणाभावान्नावर्तनीयमिति प्राप्ते, उच्यते—प्रायणान्तमोंकारमभिध्यायीतेति श्रुत्या परमपदप्रयाणपर्यन्तावृत्तेः विधीयमानतया जन्मान्तरेऽप्यावर्तनीयमेवोपासनमिति ।

End:

इत्थमुपासितुरिति कारिकाविरोधोद्भावनमपि परास्तम् ; विरोधपरिहारयोः पक्षद्वयेऽपि साम्यात्, सम्यङ् निरूपणे विरोधाभावाच्चेत्यलं विस्तरेण ।

तुषारधरणीधरस्फुरदुदग्रकोटीतटीनिरर्गलगलज्झरीविबुधवाहिनीविभ्रमाः ।
ममापि हृदयंगमाः कुमतिगर्वसर्वंकषा जयन्तु सुतरां चिरं श्रुतिशिरोगुरोः सूक्तयः ॥
यद्भारतीप्रवाहेणोन्मूलिताः कुमतिद्रुमाः ।
तस्मै रामानुजायास्तु यतीन्द्राय नमो नमः ॥

181

ओंकारवादार्थः

A discussion contesting the Mādhva view that Praṇava constitutes a part of the *Brahmasūtra-s*. The work is different from a similarly entitled work by Surapuram Śrīnivāsācārya, which is also called *Nayamaṇikalikā* (291 below). About the author, see 475 below.

Beginning:

अस्तु वा ज्ञानेच्छाया अविधेयत्वात् जिज्ञासापदस्य विचारे लक्षणेत्यत्र कर्तव्यपदाध्याहारः, सूत्रेषु निष्पाद्यतया ओंकाराध्याहारश्च, तस्य चाध्याह्रियमाणस्योंकारस्य ब्रह्मान्वय्योतत्त्वप्रतिपादकत्वम् । ननु सं यज्ञपतिराशिषा इत्यादाविव साकाङ्क्षत्वाभावात् कथमोंकाराध्याहारः ? कथं वा उपसर्जनभूते ब्रह्मणि तदर्थस्यौतत्वान्वयः ? आदौ प्रयोगेण च तत्प्रतीतिलाभे किमर्थमन्ते प्रयोगः ? कथं च तदर्थस्य जन्मादिसूत्रेष्वन्वयः ? इति चेदुच्यते ।

End:

किंच रेवत्यधिकरणे अङ्गाङ्गिभावराहित्यस्थले तन्न्यायानवतारस्योक्ततया अनङ्गभूते ब्रह्मणि कथमोंकारार्थान्वयः ? न चोपकारकत्वाद्ब्रह्मणोऽङ्गत्वमिति वाच्यम् ; उपकारकत्वलक्षणशेषत्वस्य शेषः परार्थत्वादित्यत्र पूर्वतन्त्र एव निरस्तत्वादिति दिक् ।

Colophon:

ओंकारवादः

182

औपाधिकशेषत्वभङ्गः

The anonymous author attempts to prove that the Goddess Lakṣmī is subordinate to the Lord Nārāyaṇa by her own essential nature and not through free will. The *Śrītattvasiddhāñjana* of Vedāntarāmānujamuni is criticized.

Beginning:

यत् सर्वभूतेश्वरवाक्यसाम्यात् केचिच्छ्रियो माधवशेषभावम् ।
औपाधिकं प्रोचुरिहार्थजातैः श्रुतिस्मृतिन्यायविरोध उच्यते ॥

यदुक्तं श्रीतत्त्वसिद्धाञ्जने बलाबलवैषम्यनियामकाभावात् समतुलारूढं परस्परबाधाद्यनर्हमुभयोरप्यविशिष्टं सर्वभूतेश्वरत्ववचनं श्रीश्रीशयोरन्योन्यनियन्तृत्वविरहेण जगन्नियन्तृत्वबोधकम्, उभयत्र तुल्ये सर्वशब्दे श्रूयमाणे तस्यास्तं प्रति नियाम्यत्वनिश्चयायोगात्; अन्यथा वैपरीत्यस्यापि प्रसङ्गात्; एकः संकुचितविषयः, अन्यस्तु न तथेत्यत्र विनिगमकाभावेनोभयोरपि तुल्यविषयत्वस्यैव न्याय्यत्वात्। तत्र च द्वयोरप्यन्योन्यनियन्तृत्वस्य दुर्वचत्वात् उभावपि सर्वशब्दौ उभयव्यतिरिक्तपरौ तिष्ठतः। तथा च सर्वभूतेश्वरत्ववचनसाम्यसिद्धिरिति। अत्राहुः—भवदुक्तरीत्या सर्वशब्दद्वयसंकोचे सत्यपि ताभ्यां वाक्याभ्यां श्रीश्रीशयोः जगन्नियन्तृत्वमात्रं सिध्यति। नियम्यनियामकत्वाभावे तु तद्वाक्यं मूकमेव।

End:

पाराशर्यविजये च परपक्षचतुष्टयमुपन्यस्य चरमपक्षं प्रकृत्योक्तं पापीयानयं तुरीयः पक्ष इति। तस्मान्नास्य चरमपक्षद्वयेन स्वपक्षत्वं स्वध्यवसानम्। अतः सर्वभूतेश्वरत्ववचनसाम्यं दुर्वचमिति स्वाभाविकमेव श्रियः श्रीशं प्रति शेषत्वमिति सिद्धम्।

184

कर्तृत्वकरणत्वविचारः

A discussion attempting to establish that the two aspects of Brahman, namely being the agent (*kartṛtva*) and being the instrument (*karaṇatva*) in granting release (*mokṣa*), are distinct and not identical.

Beginning:

तत्त्वनिर्णयार्थोऽयं वादः—रक्षायां भगवतः कर्तृत्वमिव करणत्वमप्यस्तीत्येके। कर्तृत्वातिरिक्तं करणत्वं दुर्निरूपमित्यपरे। तत्रैक आहुः—

उपाये गृहरक्षित्रोः शब्दः शरणमित्ययम् ।
वर्तते सांप्रतं त्वेष उपायार्थैकवाचकः ॥

इति निष्कर्षकवचने रक्षितृत्वव्युदासेन शरणशब्दस्योपायत्वपरतास्थापनं रक्षकत्वोपायत्वयोर्भेदे प्रकृष्टं लिङ्गम् ; ऐक्ये हि उपायत्वपरस्य रक्षकत्वपरत्वव्युदासानौचित्यम् ।

End:

इयं तूपपत्तिर्बोध्या—कर्तृत्वकरणत्वयोः परस्परविरहव्याप्यत्वं श्रुतप्रकाशिकाहृदयविदां स्पष्टम् । अत एव वेदार्थसंग्रहश्रुतप्रकाशिकायाम् अनेन जीवेनात्मनेत्यत्र तिङा कर्तुरभिधानात् तृतीयानुपपत्तिमाशङ्क्यानुप्रवेशक्रियां प्रति कर्तुरनभिधानात् तृतीयोपपत्तिः कृता । कर्तुः करणत्वे हि न तावान् प्रयास इत्यलम् ।

185

कार्यकारणभावमीमांसा

This is a discussion on the nature of cause and effect in general as accepted by the various schools: Nyāya, Vaiśeṣika, Mīmāṃsā, Vedānta, etc. The author lived in the beginning of the 20th century A.D. and was connected with the Mysore University and Government Library. His other works are the *Mānameyarahasyaślokavārttika*, *Darśanodaya*, etc. He was honoured with the title of Mahāmahopādhyāya.

Beginning:

अथ कार्यकारणभावमीमांसाप्रारम्भः ।

अभिवन्द्य महोदारामस्मद्गुरुपरंपराम् ।
कार्यकारणतत्त्वस्य मीमांसामारभामहे ॥
जगद्विदितमप्येतद्विदितं नैव तत्त्वतः ।
विद्वद्भिरपि दुर्ज्ञानमिति स्पष्टीभविष्यति ॥
कार्यकारणभावेऽभिप्रायभेदनिबन्धनाः ।
प्रवृत्ता मतभेदास्तद्बोद्धव्यमिदमादिमम् ॥
प्रज्ञाविवेकलाभाय नानासिद्धान्तदर्शनैः ।
दृढपूर्वश्रुताधीनान् दोषान् प्रशमयेदिह ॥

प्रस्तावना—प्रथमं तावदिदानीमिदमवधारणीयम् । इह खलु जगत्यां सर्वेऽपि पदार्थाः समुपलभ्यन्ते चेतनाचेतनलक्षणाः प्रतिक्षणपरिणामिनः विविधविचित्ररचनाविशेषाः नियतपौर्वापर्यलक्षणस्थितिमन्तः शृङ्खलिता इव प्रवहन्त इव च । स चायं प्रवाहः जगद्व्यापार इति संसार इति

व्यवहार इति लोकयात्रेति प्रपञ्च इति संप्रदाय इति च विवक्षाविशेषैर्व्यपदिश्यते विपश्चिद्भिः। तमेव च प्रवाहं स्वभावः परिणामः विकारः धर्मः अवस्था पर्यायः कार्यं समुत्पत्तिः अभिव्यक्तिः इत्यादिभिः शब्दभेदैः ते ते दार्शनिका विवेचयन्ति।

End:

वर्तमानावर्तमानत्वमेकस्य विरुद्धमिति चेत्; यदि सदसत्त्वं तत्, तन्न, अनभ्युपगमात्; तादूप्येणैव प्रत्यभिज्ञानात्। सदसत्संबन्धश्चेत् किमसंगतम्? ज्ञानवदुपपत्तेः। क्रमेणानेकसंबन्ध एकस्यानुपपन्न इति चेत्, न, कारणक्रमेणैव तस्याप्युपपत्तेः। प्रत्यभिज्ञानमप्रमाणमिति चेत्, अस्ति तावदत्र निरूपणीयम्। क्षणप्रत्ययस्तु भ्रान्तोऽपि नास्तीति विशेष इत्यन्यत्र विस्तरः।

Colophon:

लक्ष्मीपुरं श्रीनिवासविपश्चिच्चक्रवर्तिना।
कृता पण्डितरत्नेन कार्यकारणचिन्तना॥
कार्यकारणभावस्य मीमांसा तत्त्वचक्षुषा।
समग्राहि समग्रा हि सर्वेशस्तेन तुष्यतु॥

इति कार्यकारणभावमीमांसा समाप्ता

The last leaf contains the contents of the work.

186

कूरेशविजयः

A metrical summary from the Viśiṣṭādvaita and Śrīvaiṣṇava point of view of arguments for and against the supremacy of Viṣṇu. It is said that a discussion on this subject took place in A.D. 1078 between Śrīvatsāṅkamiśra alias Kūreśa and some Śaivites in the court of Kulottuṅga Cola I alias Kṛmikaṇṭha Cola of Tanjore. The king was keen on success for the Śaivites, but Kūreśa presented such strong arguments that he vanquished them. The work according to this MS. consists of 37 verses in all, 5 representing the view of the Śaivites as found in Haradatta's *Pañcaratna* and the rest that of Kūreśa.

Beginning:

गायत्र्या बोधितत्वादपि नमकमुखै राघवस्थापितत्वा-
च्छौरेः कैलासयात्राव्रतमुदिततयाभीष्टसंतानदानात्।
नेत्रेण स्वेन साकं दशशतकमलैर्विष्णुना पूजितत्वात्
तस्मै चक्रप्रदानादपि च पशुपतिः सर्वदेवप्रकृष्टः॥

कन्दर्पध्वंसकत्वाद् गरलकबलनात् कालदर्पापहत्वाद्
दैतेयावासभूमित्रिपुरविदलनाद् दक्षयागे जयित्वात् ।
पार्थस्य स्वास्त्रदानान्नरहरिविजयान्माधवे स्त्रीशरीरे
शास्तुः संपादकत्वादपि च पशुपतिः सर्वदेवप्रकृष्टः ॥

End:

विद्यारण्योज्झितत्वान्नमकचमकयोर्वेदभाष्ये तदर्था-
व्याख्यानाद् दक्षयागे हरचकितसुरोदीरितैतत्स्तुतित्वात् ।
विष्णावाम्नायवाचामपि सकलगिरां मुख्यवृत्तेश्च यद्वा
शम्भोर्नामाप्रयोगात् क्वचिदपि चमके विष्णुशब्दप्रयोगात् ॥
तेनैव न्यायरीत्या सपरिकरहरेः प्रार्थ्यभावाभिधानाद्
बाहुभ्यामेवमाद्यैरनघरघुपतेरेव संसेव्यतोक्तेः ।
मा हिंसीर्मुञ्च धन्वेत्यपि नमकगिरा घोररूपस्य शम्भो-
र्मन्योः स्तुत्योक्तिसिद्धेरपि न पशुपतिर्विष्णुरेव प्रकृष्टः ॥
कूरेन्द्रेणेति सार्धैः सदसि शतविधैर्दूषणैः सप्तरात्रं
वादे कृते विपक्षाः प्रतिवचनजडा विस्मयान्मौनमापुः ।
तद् दृष्ट्वा जैत्रघोषं व्यतनुत स महापूर्णनामार्यवर्यः
श्रुत्वा चैतत् तदानीं समजनि विमनाश्चोलभूपः समन्त्री ॥

190

कूरेशविजयव्याख्या

The commentator belonged to the Bhūpati family, another work of his being the *Bhūmistava*.

Beginning:

श्रियः पतित्वादपि भूपतित्वं प्रख्याप्य यस्तत् परमं मुरारेः ।
भूमिस्तवे भूपतिनामनिष्ठां वंशप्रतिष्ठां महतीमवाप ॥
धर्माचार्यसुधीः सोऽयं निर्माति विदुषां मुदे ।
विष्णुपारम्यपद्यानां प्रमाणमणिसंपुटम् ॥
पत्युः पशूनां परतां पद्यैः पञ्चभिरावृताम् ।
निराकरोति कूरेशो बुधसंख्यागतैस्तु तैः ॥
पञ्चविंशतिकक्ष्याभिरुपन्यस्ते मते परैः ।
सार्धया शतदूषण्या सिद्धान्तं वक्ति कूरराट् ॥
श्रीकूराधिपवाक्यानां व्याख्याने भुवि कः प्रभुः ।
तत्प्रसादस्तु लेखिन्या मया लिखति तत् स्वयम् ॥

अथ भगवद्रामानुजशिष्यावतंसाः श्रीमन्महापराशराङ्कपदप्रशंसाः श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यो-भयवेदान्तनिष्ठागरिष्ठाः अनन्तकल्याणगुणपरिपूर्णाः अस्मत्स्वामिनः श्रीवत्साङ्कमिश्राः चोलभूपाल-सभायां सप्तरात्रमतिमात्रं परतत्त्ववादे प्रवृत्ते कैश्चिन्मोहशास्त्रशङ्काकलुषितहृदयैः कुदृष्टिभिरुपन्य-स्तान् हेत्वाभासान् प्रत्यादिशन्तो महापूर्णोद्यजयघोषाः। तत्राद्यं गायत्रीत्यादि। 'गायन्तं त्रायते यस्माद्गायत्री तेन कथ्यते'।

End:

अथवा अस्यैवापन्निस्तारकत्वात् अवनगुणात् पुरा बदरिकाश्रमे रणाय प्रवृत्तो नरसखेन नारायणेन संजिहीर्षितो रुद्रः पितुः पुत्रस्य च मध्यप्रविष्टेन चतुर्मुखेन बोधितः शरणागतः सर्वलोक-शरण्येन रक्षित इति भारतकथा 'प्रसादयामास भवो देवं नारायणं प्रभुम्' इत्यादिना प्रवृत्तात्रानु-संधेया। शुद्धसत्त्वाश्रयत्वात्।

191

कूरेशविजयव्याख्या

End:

वैशिष्ट्यप्रसङ्गमन्यथयति। तथा स्वाङ्गार्धप्रदानात्। हरहरिनाथावतारे शेषाङ्गार्धस्य केशवाय दानात्। एवमुभयथा वैशिष्ट्याभावात् शम्भोरशरीरत्वसिद्धेः। परमरहस्यमाकृष्याह—भवतस्ताव-दुभयथापि शक्तेर्नापवर्गः, अयुक्तत्वादेव। न पशुपतिः, किंतु विष्णुरेव प्रकृष्ट इति निश्चयः।

Colophon:

कूरेशविजयव्याख्यानं समाप्तम्

193

कूरेशविजयव्याख्या

Beginning:

अत्र कूरनाथाचार्याः—यदुक्तं गायत्रीबोधितत्वाच्छिव एव सर्वेश्वर इति; तदयुक्तम्; अत्र भर्गशब्दः भर्ज्जो आमर्दन इति धातुनिष्पन्नस्तेजःपरः। अन्यथा तेजःशब्दा . . . प्रसङ्गात्। शिवेऽपि संहारकाले सकललोकभर्जकत्वात् भर्गशब्दप्रवृत्तिः। तेन एको ह वै नारायण आसीत्, य एषोऽन्तरादित्ये हिरण्मयः पुरुषः . . . हिरण्यकेशो हिरण्यश्मश्रुरा प्रणखात् सर्व एव सुवर्णः, तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी, तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः, स एषोऽन्त-रादित्ये हिरण्मयः पुरुष इति नारायणानुवाकादिना वेदान्तेषु, ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण इति ध्यानश्लोके च प्रसिद्धम्।

End:

प्रकृते च, एको ह वै नारायण आसीदित्यादिवाक्यजालेनाथर्वशिखादीनि . . . शिवादि-शब्दानामन्यथानयनेन उपसंहारस्थितेशानेश्वरशिवादिशब्दानां लब्धात्मकत्वाभावेनोपक्रमानुगुण्येन नारायणपरत्वावधारणान्नारायणपारम्यमेवाव्याहतम्। यच्चोक्तं विश्वं भूतं भुवनं, तमीश्वराणां परमं महेश्वरमिति मन्त्रद्वयेनापि परमशिवसिद्धिरिति, तदपि न मनोहरम्।

Colophon:

कूरेशविजयः समाप्तः

अब्दे सौम्ये मेषकृष्णद्वादश्यां गुरुवासरे।
कूरेशविजयव्याख्या लिलिखे रामसूरिणा॥

194

कैवल्यनिरूपणम्

An original treatise on the nature of *kaivalya* which is classified among the states of *mukti* by some philosophers. The author criticizes the view of Pillai Lokācārya. He was the son of Veṅkaṭācārya of the Vādhūla family and quotes Parāśarabhaṭṭa, Kṛṣṇapāda, Varadaviṣṇu, Sudarśana-bhaṭṭa, Vādihaṃsāmbuda's *Nyāyakuliśa* and Vedāntadeśika's *Tātparya-candrikā*.

Beginning:

अखिलभुवनहेतुर्व्योम्नि दिव्ये परस्मिन् स्वपदनलिनसेवानित्यहेवाकयुक्तैः।
अनुकलमनुभाव्यः सूरिभिर्नित्यमुक्तैर्वितरतु कुशलं नः श्रीसखो वेंकटेशः॥

केवलो नाम जीवोपासकः परमपदमर्चिरादिना मार्गेणोपगम्य यथोपासनं फलमिति न्यायात् त्यक्त्वैव भगवदनुभवं दिवाकीर्त्यवत् परमपदे क्वापि कोणे स्वपयोधरपार्श्वपशुवत् पतिपरित्यक्तपत्नीवच्च स्वात्मानमेवोपभुङ्क्त इति केचिदाचक्षते। तदेतदसारम्; प्रमाणाभावात्। न हि केवलात्मानुभव-निष्ठस्यार्चिरादिगतिः परमपदप्राप्तिश्च क्वचिदुपदिश्यते। नन्वस्ति पञ्चाग्निविद्यायां तत्र इत्थं विदुः इत्यादिना केवलजीवोपासकस्यार्चिरादिगत्युपदेशः; तथाच भगवता भाष्यकारेणाभिहितं श्रीमद्गीता-भाष्ये—अथात्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाह। द्वयोरप्यर्चिरादिका गतिः श्रुता श्रुतौ; यथा पञ्चाग्निविद्यायां तत्र इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभि-संभवन्ति, अर्चिषोऽहरित्यादौ।

End:

भट्टपराशरपादैश्च भगवद्गुणदर्पणे मुक्तानां परमा गतिरिति पदव्याख्याने संसारपरमपदयोर्मध्ये तेषां स्थानं चेति परमपदबहिर्भावः कैवल्यस्याभिहितः। अत्र संसारशब्देन ब्रह्मलोकादिकं विवक्षितम्,

श्रीकृष्णपादैः ब्रह्मलोकोपरि स्थितमिति विशेषणात्। वरदविष्णुमिश्रैरपि नन्वेवं निःशेषकर्मक्षयाभावात् कैवल्यं प्राप्तो न मुक्तः स्यादित्याशङ्क्योक्तं, सत्यममुक्त एव सः, मोक्षस्य परमानन्दानुभवरूपत्वात्, तस्य च ब्रह्मानुभवाभावात्, स्वानन्दमात्रानुभवस्य योगिनाममृतं स्थानं स्वात्मसंतोषकारिणामिति भगवत्पराशरवचनात्। अतो मुक्तिव्यतिरिक्तमनपायि योगसाध्यमैश्वर्यं कैवल्यमिति। व्यासार्यैश्च संजीवनीमिति जीवनमुजीवनं संसारोन्मोचनं ; सर्मिति कैवल्यव्यावृत्तिरिति सम्यक् संसारोन्मोचनत्वं कैवल्यस्य नास्तीत्युक्तम्। वादिहंसाम्बुवाहैश्च न्यायकुलिशे—

आज्ञानसिद्धविज्ञानप्रसरे चानिवारिते।
आनुकूल्यतिरोधानमशेषेष्वप्रमाणकम्॥
उभयोरविशेषेण ब्रह्मप्राप्तिश्रुतावपि ;
आकारभेदवाच्यत्वक्लृप्तिर्वैरूप्यदूषिता॥

इत्यादिना केवलस्य परमपदगमनानुपपत्तिः प्रत्यपादि। वेदान्ताचार्यैश्च—

सर्वकर्मविनिर्मोक्षे मुक्तिभेदः कथं भवेत्।
कर्मैकदेशयोगे तु न मुक्तिर्भुक्तिभेदवत्॥

इत्युक्तम्। विस्तृतं च तात्पर्यचन्द्रिकादिषु। अतः प्रमाणाभावात् प्रमाणविरोधात् युक्तिविरोधात् संप्रदायविरोधाच्च केवलजीवोपासकस्यार्चिरादिना परमपदप्राप्तिर्न घटत इति सिद्धम्।

Colophon:

इति वाधूलकुलतिलकवेंकटाचार्यसूनोः वरददेशिकस्य कृतौ कैवल्यनिरूपणं संपूर्णम्

195

कैवल्यशतदूषणी

A criticism of Vedāntadeśika's view, in support of Pillai Lokācārya, regarding the nature of *kaivalya*. The author was a resident of Śriperumbudur. He seems to have been called Śrīśaila Lakṣmaṇamuni or Rāmānujamuni in his Saṃnyāsa life. The postscript found after the colophon here and his *Tyāgaśabdārthaṭippaṇī* (268 below) suggests that his name before Saṃnyāsa was Śrīnivāsa. He also wrote the *Muktivicāra*.

Beginning:

यत्पादपद्मरसिका परिषद्वरूणामात्मानुभूतिमतिदूरतराज्जहाति।
तं नौमि दिव्यवपुषं वनवानराद्यैर्विस्मारिताभिजनमज्जनशैललोलम्॥
यद्गाथया विनिद्रा हेतिवराद्याः परावने व्यग्राः।
तं भट्टनाथमीडे केवलकरुणापराधीनम्॥

लोके समस्तमुनिमानसपद्मकोशा यद्भाष्यभानुपरिरम्भणतः स्फुटन्ति ।
यस्यैव ते विकसिताश्च विहारभूमिस्तौ भावये परमहंसवरावनन्यौ ॥
कमलनयनकान्ताकामनाकल्पवल्लीपरिणतिफलभूतामार्यगोष्ठीं विभाव्य ।
प्रतिमतशतदूषण्युग्रकैवल्यचिन्तां कलयति कुतुकाच्छ्रीशैलयोगीशदासः ॥

तत्र तावत् भवदहनदन्दह्यमानसकलजीवसंजीवनोपदेशाः भट्टनाथपराङ्कुशादयः कैवल्यमेव प्रथमतस्त्याजयन्ति । तत्र च निदानं तन्नित्यतानिबन्धनं निरतिशयक्रौर्यमेव । तत्र केचिद्विवदन्ते—कैवल्यमनित्यं, सर्वे च्यवनधर्माण इति वचनात्, प्रतीकोपासनसाध्यत्वात्, अज्ञानसंवलितत्वात्, ब्रह्मप्राप्त्युदर्कत्वाच्चेति । तानि च श्रुतिलिङ्गानि क्रमशो निरस्यन्ते । तत्र च्यवनधर्माण इति श्रुतिनिरसनार्थं तदन्यथासिद्धिसाधिकाः कक्ष्याः प्रदर्श्यन्ते ।

End:

तस्मात् कैवल्यस्य ब्रह्मप्राप्त्युदर्कत्वं कथंचिदपि दुरुपपादमेवेति तस्य हेतोरसिद्धिर्दुर्वारैवेति । तेन कैवल्यस्यानित्यत्वानुमानमनुपपन्नमेवेति कैवल्यानित्यत्वे प्रमाणाभावात् तन्नित्यत्वमपुनरावृत्तिग्राहकप्रमाणादिसिद्धमक्षतमेवेति । तस्य क्रूरनिषिद्धत्वात् पराङ्कुशादिभिस्तस्य प्रथमतस्त्याजनं तन्नित्यताप्रयुक्तक्रौर्यातिशयनिबन्धनमेवेति सिद्धो नः सिद्धान्त इति समञ्जसम् ।

Colophon:

इति कैवल्यशतदूषण्यां चतुर्थभङ्गः समाप्तः

श्रीश्रीनिवासदासेन श्रीभूतपुरवासिना ।
रचिता वर्धतामेषा कैवल्यशतदूषणी ॥

196

गायत्र्यर्थशतदूषणी

This work (360 vv.) refutes the view that the *Gāyatrīmantra* is in praise of Śiva and maintains that it is addressed to Viṣṇu. The author was the son of Śuddhasattvācārya of the Kauśikagotra and belonged to the Bāladhanvi family. He may be identified with the author of the *Atharvaśikhāvilāsa* (82 above) and the *Śrutaprakāśikāvyākhyā Gurubhāvaprakāśikā* (63 above) who was patronized by Nañjarāja, son of Vīrarāja and the younger brother of the Senāpati (Dalavāyi) of Kṛṣṇarāja II of Mysore (A.D. 1734 to 1766). Further details about Nañjarāja can be had from *Nañjarājayaśobhūṣaṇa* (GOS 47). Though the work is named *Śatadūṣaṇī* it contains only 60 points.

Beginning:

श्रीमद्रामानुजाचार्यः कौशिको देशिकोत्तमात् ।
शुद्धसत्त्वाचार्यनाम्नो लब्धभाग्यफलोदयः ॥
श्रीकृष्णराजभूपालसेनापत्यनुजन्मना ।
वीरराजतनूजेन नञ्जराजेन धीमता ॥
प्राक्तनानेकजन्मार्जितभाग्यपाकानुपातिना ।
तत्त्वज्ञानाभिलाषेण संतताक्रान्तचेतसा ॥
सज्जनश्लाघ्यसंमानं संप्राप्तः सर्वसाक्षिकम् ।
समाहूतश्च तत्त्वार्थनिर्णयाय महापुरे ॥
सत्यपूर्वं तेन पृष्टस्तत्त्वं वक्तव्यमित्यथ ।
सदस्यमध्यस्थमनोरञ्जकन्यायकल्पने ॥
प्रतिभां दुर्लभां प्रेक्ष्य पुरेऽस्मिन् प्रतिवादिनाम् ।
पत्रिकां चित्रितां न्यायैः प्रेषयत्याद्दतां बुधैः ॥
गायत्र्यर्थपराणां हि स्वायत्ता परदेवता ।
तदर्थतत्त्वजिज्ञासोरिदमुत्तरमुच्यते ॥
तत्र तावत् पूर्वपक्ष उपोद्घातेन वर्ण्यते ।
पूर्वपक्षे ह्युपन्यस्ते सिद्धान्तोऽतिस्फुटो भवेत् ।
गायत्र्या विष्णुपरता नोक्तिसंभवमर्हति ॥
विष्ण्वादिश्रीपतित्वादिश्रुतिलिङ्गप्रहाणतः ।
तस्या रुद्रपदत्वं तु स्याद्भर्गपदरूढितः ॥
हरः स्मरहरो भर्ग इति कोशप्रसिद्धितः ।
भर्गशब्दो हि पुंलिङ्गः प्रथमान्त इति स्फुटः ॥
तदभङ्गाय तदिति वागस्य महतो भवेत् ।

End:

उदु त्यं च जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि ।
इति तत्रापि वक्तव्यमन्यत्रैव प्रपञ्चितम् ॥

Colophon:

इत्थं कौशिकवंश्येन शुद्धसत्त्वार्यसूनुना ।
रामानुजेन गायत्र्या रुद्रतात्पर्यवारणी ॥
विष्णुतात्पर्यविस्तारिषष्टिन्यायानुसारिणी ।
सषष्टित्रिशतैः श्लोकैर्निबद्धा शतदूषणी ॥

199

गुरूपसदनविजयः

This is the first of the five Vijaya-s by Mahācārya, dealing with the method of studying the Vedānta at the feet of a teacher. The following are the topics: Śābdapratyakṣabhaṅga, Śravaṇavidheyatvabhaṅga, Sādhanacatuṣṭayapūrvavṛttatvabhaṅga, Śāstrabhedabhaṅga, Karmajñānānuṣṭhānadvārakatvabhaṅga, Avedyatvabhaṅga, Nirviśeṣajijñāsyatvabhaṅga, Devatāntaropāsyatvabaṅga and Avācyatvabhaṅga.

Beginning:

वक्त्राम्भोजान्मुरारेरुदयमधिगतां सम्यगद्वैतविद्यां
दिव्यां सिन्धुं ध्रुवाद्या इव पदसरितं व्यस्तृणन् ये धरायाम् ।
व्यासो नाथो यतीन्द्रः श्रुतिशिखरगुरुः श्रीमहाचार्यवर्यो
वाधूलश्रीनिवासो गुरुरिति महितांस्तानिमानाश्रयामः ॥
त्रैविक्रमं दितिजनेर्जयमातहर्षः सूनुर्यथाम्बुजभुवः प्रथयांबभूव ।
सानन्दमौपनिषदं तदुदारभावप्रत्यर्थिनिर्जयमहं प्रथयामि तद्वत् ॥
त्रिविक्रमजयो यथा जलजजन्मनः सूनुना
जितं भगवता जगन्निखिलमित्यजोघुष्यत ।
तथोपनिषदामिदं कुमतिगर्वमर्मच्छिदां
विनिर्जययशो रमानिधिसुतेन जोघुष्यते ॥
परस्परविरोधेन निरस्ताः प्रतिवादिनः ।
तेन वेदान्तसिद्धान्तः संपन्नो निरुपद्रवः ॥

स्वाध्यायोऽध्येतव्य इत्यध्ययनविधेरध्ययनगृहीताङ्गपरिकर्मितस्वाध्यायस्य समधिगतानन्तस्थिरफलकर्मब्रह्मावबोधस्य तत्प्रसूतवेदान्तार्थश्रवणाभिलाषस्य मीमांसितपूर्वभागस्य तत्संपादितात्पास्थिरस्वर्गपश्वादिफलकर्मावबोधस्य ब्रह्मजिज्ञासोत्पत्तिं पूर्वभागार्थनिर्णयसहितापरभागार्थापातप्रतीतिप्रसूतां समीक्ष्य ब्रह्मजिज्ञासोः गुरूपसदननियमं विदधाति—परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति ।

End:

इतरे पुनः प्रमाणशब्देन । ते हि शैलूषवत् वैदिकभूमिकां परिगृह्य वेदप्रामाण्यं वदन्त इव प्रविश्य वेदस्य व्यावहारिकार्थविषयत्वेनाप्रामाण्यापरपर्यायं प्रामाण्यमुक्त्वा कात्स्न्र्येन तथोक्तौ वैदिकैः बहिष्कारो भवितेति बुद्ध्या कस्यचित् तत्त्वावेदकत्वं वदन्त इव वैदिकगोष्ठीमध्यारुह्य तस्यापि तत्त्वावेदकतयाभिमततत्त्वमस्यादेः संसर्गबोधकत्वमप्यपह्नुत्य पदार्थस्यैव वाक्यार्थतां वदन्तः पौनरुक्त्यप्रसङ्गेन

तदपि त्याजयन्तो बोधकत्वमेव नास्ति, कुतः प्रामाण्यमिति व्यञ्जयन्ति। तत्र पूर्वनिरासः पूर्वकाण्डे विस्तृतोऽनुसंधेयः। पाश्चात्यनिरासविस्तरस्तु अद्वैतविद्याविजयेऽनुसंधेयः।

इति प्रथमविजये अवाच्यत्वभङ्गो नवमः

इत्थं स्वानुचरैर्न्यायैर्निराकृत्य विरोधिनः।
तद्विज्ञानश्रुतिः सार्धं तैर्जयत्वक्षरादिभिः॥

Colophon:

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदैकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये गुरूपसदनविजयः प्रथमः समाप्तः

201

चरमश्लोकरहस्यचन्द्रिका

This treatise points out some differences between the system of Vedāntadeśika and that of Pillai Lokācārya. The work is divided into various Kalā-s, each dealing with the two systems, the author representing Vedāntadeśika's view and Śuddhasattvārya Pillai Lokācārya's view. The former's discourse is called *Caramaślokacandrikā* and the latter's *Rahasya-candrikā*. Another work of the author is *Tattvabhāskara*.

Beginning:

रहस्यत्रयसारस्य प्रक्रिया तन्यते लघुः।
पेलापूरदीक्षितेनेयमुत्तमश्लोकचन्द्रिका॥

प्रथमं श्रीमद्रहस्यत्रयसारश्रवणवतामेव मोक्ष इति प्रतिपाद्यते तदनुसारेणैवोत्तमश्लोकार्थनिर्णयः श्रेयस्कर इति वक्तुम्। तथाहि तत्र तावदुत्तारकरुचिपरिगृहीतार्थ एव प्रपन्नैः श्रेयस्कामैरुपादेय इत्यत्र सर्वेषामविवादः। वचनानि च भवन्ति—

'को धर्मः सर्वधर्माणां भवतः परमो मतः।'
'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः।'

इत्यादीनि। तत्र द्वयोपदेष्टैवोत्तारकः। न हि द्वयोच्चारणमेव वा, द्वयमेव वा उत्तारकम्; द्वयस्याभावार्थकत्वेनाफलजनकत्वात्, फलाजनकस्याकरणत्वात्, उच्चारणस्य भावार्थत्वेऽपि नोपाधित्वं संभवति, उच्चारणस्याप्रतिपत्तित्वात्। ज्ञानविशेषो हि प्रतिवत्तिर्नाम।

End:

परित्यज्य व्रजेत्यत्र त्यागशरणागत्योरदृष्टार्थत्वस्य प्रमाणान्तरसिद्धत्वेन मोक्षसाधनतया स्वयं-प्रयोजनकेवलभगवत्प्रीतिसाधनतया त्यागः, विशिष्टशरणागतिविधौ वाक्यस्वारस्यसिद्धेर्गौरवस्यादोष-त्वात्। प्रतिबन्धकाभावतया दृष्टकारणभूतारोपितधर्माननुष्ठानरूपत्यागविशिष्टस्य साधनेच्छारूपतया

203

चरमश्लोकतात्पर्यटिप्पणी

A criticism of the view held by the followers of Vedāntadeśika that the Caramaśloka of the *Bhagavadgītā* declares Prapatti as the means of salvation. The author opines that the Caramaśloka refers only to Bhagavān as a means of salvation (*siddhopāya*).

Beginning:

स्मृत्वा यतीन्द्रलोकार्यौ नत्वा वरवरं मुनिम्।
करोमि चरमश्लोकसिद्धतात्पर्यटिप्पणीम्॥

तत्र तावत् सत्संप्रदायपरंपराप्राप्तोऽयमर्थः—सर्वधर्मपरित्यागपूर्वकं भगवन्तमेव शरणं गतस्य स एव भगवान् साधनमिति सिद्धोपायपरश्चरमश्लोक इति। अत्र कस्यचित् छान्दसस्य पैशाचं वचनम्—नायं श्लोकः सिद्धोपायं प्रतिपादयति, प्रवृत्तिनिवृत्त्यन्वयविरहिणः शास्त्रस्य प्रतिपादनापूर्त्या नैराकाङ्क्ष्यायोगात्। तथाच वार्तिकम्—

यावत् खलु प्रमातॄणां प्रवर्तननिवर्तने।
शब्दा न कुर्वते तावन्न निराकाङ्क्षबोधनम्॥

इति। केवलसिद्धपरस्य शास्त्रत्वं चानुपपन्नम्। तत्र च वार्त्तिकम्—

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥

इति।

End:

तस्माच्चरमश्लोकपूर्वार्धं स्वरूपयाथात्म्यज्ञानप्राप्तयोः साधनान्तरत्यागभगवदेकशरणवरणयोः भगवदभिमतत्वज्ञापनमुखेन शोकनिवर्तनपरम्। तदुत्तरार्धं च चेतनसंरक्षणे भगवत एव प्राप्तिप्रदर्शनेन शोकनिवृत्तिपरमिति सिद्धपर एवायं श्लोकः पुरुषार्थपर्यवसायीति सर्वं समञ्जसम्।

Colophon:

श्रीशैलयतिराजाख्यदासस्य कृतिरुज्ज्वला।
वर्धतां चरमश्लोकसिद्धतात्पर्यटिप्पणी॥

204

चरमोपायतात्पर्यनिर्णयः

Periyavāccān Pillai's son Nayinārāccān Pillai wrote the Tamil work *Caramopāyatātparyanirṇaya* or *Caramopāyanirṇaya* declaring that only service at the feet of Rāmānuja can help men to attain *mokṣa* in Kaliyuga. This MS. contains an anonymous Sanskrit version of the work. The author mentions *Guruprabhāvadīpikā* of Nārāyaṇadāsa, who was in the line of disciples of Govindaguru.

Beginning:

चरमोपायतात्पर्यं यतीन्द्रविषयेऽकरोत् ।
यस्तमार्यवरं वन्दे देवराजाह्वयं गुरुम् ॥

मुमुक्षोश्चेतनस्य चरमपर्वनिष्ठतया भवितव्यम् । ननु वेदान्तेषु मुमुक्षुसाधनतया कर्मादिचतुष्टयस्यैव विहितत्वात् कथमतिलघुचरमपर्वविषयचरमप्रपत्त्याश्रयणम् । उच्यते—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

धर्मज्ञसमयः प्रमाणम्, वेदाश्च इति शिष्टाचारस्यापि प्रबलप्रमाणत्वेन विधानात् ।

कर्म ज्ञानं च भक्तिः प्रपदनमिति च प्राप्यसिद्ध्यर्थमेता-
नालोच्यालोच्य हेतून् पुनरिह सुतरां दोषदृष्टिं विधाय ।
कर्तुं शक्ता न पूर्वे यतिवरचरणद्वन्द्वमूर्धाभिषिक्ता-
स्तत्कारुण्याभिमानात् तदनुजगुरवो मुक्तिमाता महान्तः ॥

कथमाचार्याभिमानस्य युक्तिहेतुत्वमिति चेत्, प्रमाणबलात् ।

End:

संसारनिवृत्त्यर्थं सर्वोत्तारकरामानुजगुरौ प्राप्यत्वप्रापकत्वद्वयमपि निश्चित्य तदेकनिष्ठावता भूत्वा चरमाधिकारिणा स्थातव्यमिति गोविन्दगुरुशिष्यप्रशिष्यभूतनारायणदासेन गुरुप्रभावदीपिकायामुपन्यस्तम् ।

206

चरमोपायनिर्णयः

Beginning:

मुमुक्षोश्चेतनस्य चरमप्रपत्तिनिष्ठया भवितव्यम् । तदेतत् कुत इत्याकाङ्क्षायां भगवन्निर्हेतुकाङ्गीकारविषयभूतस्याधिकारिणः चरमप्राप्यप्रकरणमिदमिति सारज्ञाः पूर्वाचार्याः स्वेषु हृदयेषू-

पायतयानुसंधायापि अधिकार्यभिप्रायं ज्ञात्वोज्जिजीवयिषया प्रवर्तमानां चरमप्रपत्तिनिष्ठां सर्वसारज्ञा अपि ज्ञात्वोज्जीवयेयुरित्येतत्प्रबन्धमुखेन स्पष्टतया प्रतिपादयन्ति लोकाचार्याः। तत्र पूर्वं बन्धमोक्षयोः साधारणकारणं निरङ्कुशं स्वतन्त्रं प्राप्तुं भक्तिप्रपत्त्योरनुपायत्वं विवृणोति।

End:

एतस्य प्रमाणमीश्वरस्य च सौहार्दमित्यादि। आहत्य याथात्म्यमुक्तं भवति। निष्ठा नाम अवताराः। ऋषयः दिव्ययोगिनः नाथमुनियामुनार्यपराङ्कुशदासप्रभृतयः। सर्वेऽपि गुरुपरंपरायाः स्वरूपप्रकारप्राधान्यप्रभावयाथात्म्यानि रामानुजचरणारविन्दयोर्निक्षिप्तवन्तः। इममर्थम् . . . . . इति गाथायाममृतदेशिकोऽपि प्रसादितवान्। अतः प्रमाणात् तत्पादारविन्दप्रावण्येन भवितव्यमिति।

पारंपर्यं गुरूणां भगवदनुगतं तत्प्रकारं विदीतं
प्राधान्यं च प्रभावं यतिवर बुधवेद्ये हि याथात्म्यनिष्ठे।
तत् सर्वं त्वत्प्रसादाद्विदितमनुकलं प्रार्थये तत्र निष्ठा
दातव्या त्वत्पदाब्जे त्वदनुचरबुधप्रीतिनिष्यन्दरूपा॥

207

जन्माद्यधिकरणविचारः

This is a brief discussion on the meaning of the *Brahmasūtra* I. 1. 2: *janmādy asya yataḥ.*

Beginning:

ननु यद्यनेन सूत्रेणेश्वरस्य लक्षणमभिधित्सितं, तर्हि तदसाधारणसर्वज्ञत्वादिप्रतिपादकवाक्यानादरेण किमर्थं जन्मादिकारणत्वमभिधीयते? तद्धि ब्रह्मण एव लक्षणं भवितुमर्हति; तस्यैव सर्वविधकारणत्वात्। ईश्वरस्य ब्रह्मांशत्वेन तदंशान्तरभूतं जगत् प्रति तस्य सर्वविधकारणत्वासंभवात्। उच्यते—ब्रह्मैवेश्वरः; तमीश्वराणां परमं महेश्वरम्, स कारणं करणाधिपाधिपः, न तस्येशे कश्चन, यस्मात् परं नापरमस्ति किंचित्, न तत्समश्चाभ्यधिकश्च दृश्यते, इत्यादिभिरीश्वरस्यैव परमकारणत्वसमाभ्यधिकराहित्यादेः प्रतिपन्नतया तस्मात् परस्य वस्तुनोऽभावात्।

End:

सद्ब्रह्मादिशब्दानां पुरुषसूक्तप्रतिपाद्यनारायणात्मकविशेष एव छागो वा मन्त्रवर्णादिति न्यायेन पर्यवसानभूमिरिति ज्ञापनरूपप्रयोजनमपि साधयति। एतदभिप्रेत्य परस्मात् पुंस इत्यभाषि भगवता भाष्यकृता। किंच एतदधिकरणे एकवचनान्तविशेष्यवाचिपदैक्ये विशेषणवाचिपदानामविरुद्धधर्मवाचित्वे एकत्रैव विशेषणानामुपसंहार इत्ययमर्थोऽपि शिक्षणीयतयाभिमतः। ज्ञानादिवाक्यस्य विषयत्वे समानाधिकरणवाक्येष्वेवायं नियमः; विभिन्नवाक्योपात्तविशेषणानां तु नैकत्रोपसंहारावश्यकतेति भ्रमः

स्यात्। तदपाकरणाय च यतो वा इमानीत्यादिश्रुतिं विषयतयाभिप्रेत्यैवं सूत्रितम्। नन्वेवमपि सौत्रपञ्चम्या उपादानार्थकत्वेन भगवत उपादानत्वसिद्धौ निमित्तान्तरसद्भावात् 'उपादानं तु भगवान् निमित्तं तु महेश्वरः' इति व्योमातीतपक्षस्यावकाशः स्यादिति चेन्न, निमित्तोपादानत्वस्यैव पञ्चम्यर्थत्वात्।

208

जातिविचारः

A discussion as to whether *jāti* (caste) is based upon birth or certain special qualifications.

Beginning:

श्रीवाधूलरमाप्रवालरुचिरस्रक्सैन्यनाथांशज-
श्रीगुर्विन्द्रमहार्यलब्धनिजसत्सत्तं श्रिताभीष्टदम्।
श्रीरामानुजमुख्यदेशिकलसत्कैंकर्यसंस्थापकं
श्रीमद्वेंकटलक्ष्मणार्यमिनं तं सद्गुणं भावये॥

अशेषजगद्धितानुशासनप्रवृत्तश्रुतिनिकरशिरःसारसंग्रहमन्त्रविशेषसमधिगमसिद्धये तन्मन्त्रं ब्राह्मणाधीनमित्यादिषु ब्राह्मण्यशब्दमुख्यार्थो विचार्यते। तत्र तावत् अदृष्टविशेषसंबन्ध एव ब्राह्मणशब्दप्रवृत्तिनिमित्तं ब्राह्मण्यं नामेति प्राचामाचार्याणां मतम्। अत्र केचित्।

End:

तस्मात् ब्राह्मण्यसिद्धेः पूर्वं विश्वामित्रादिषु ब्राह्मणशब्दप्रयोगप्रसङ्ग एवातिप्रसङ्गशब्दविवक्षित इति श्रुतप्रकाशिकैककण्ठ्यमनुसंधेयमिति।

209

जातिविचारः

This deals with *jāti* (the universal) as explained in the *Śrībhāṣya* according to which it is not a separate category, but only the specific formation of an object.

Beginning:

संस्थानमेव जातिः, जातिरेव भेद इति भगवद्भाष्यकाराभिमतः। उपपादितं चैतत् तैरेव संस्थानातिरेकिण इत्यादिना ग्रन्थेन। ननु संस्थानमिति किमेतत्? येन संप्रतिपन्नेनैव जातिव्यवहारोपपत्तिं मन्यसे। किमवयवसंयोगविशेषः? किं वान्यः? आद्ये निरवयवे आत्मादौ आत्मत्वादिजाति-

व्यवहारानुपपत्तिः। द्वितीये च किं स्वरूपमेव, उतान्यत्? न तावत् स्वरूपम्, भक्तदभिमतस्य प्रत्यक्षविषयत्वस्य भङ्गप्रसङ्गात्, शब्दान्तरेण जात्यभ्युपगमपर्यवसानाच्च।

End:

संस्थानगतं सौसादृश्यं गोत्वाद्यनुवृत्तव्यवहारे कृत्यादिव्यवहार इव प्रयोजकम्। तदेव धर्मिणामनुगतगवादिव्यवहारे कर्त्रादिव्यवहार इव प्रयोजकमिति पुष्कलसादृश्यमूलत्वात् व्यवहारस्य नाग्निमाणवकव्यवहारवत् गौणत्वमिति।

210

जिज्ञासादर्पणः

A critical discussion on the import of the term *jijñāsā* found in the *Brahmasūtra* I. 1. 1.

Beginning:

भवबन्धं जिहासन्तो यमन्तः सन्तमन्ततः।
जिज्ञासन्ते सदा सन्तस्तमनन्तमुपास्महे॥
गुरून् कृपागुरून् नत्वा धृत्वा च तदनुग्रहम्।
सतां संतोषमाधित्से जिज्ञासादर्पणार्पणात्॥

इह तावत् त्र्यन्तसंततिसमर्थनाय प्रवृत्तेन भगवता बादरायणेन प्रणीतानि ब्रह्मसूत्राणि। तेषां परकीयव्याख्यानप्रत्याचिख्यासया भवभयाभितप्तभुवनभागधेयवैभवभावितावतरणो भगवान् भाष्यकारः प्रववृते। तत्रेदमादिमं सूत्रम्—अथातो ब्रह्मजिज्ञासा। तत्र जिज्ञासाशब्दो मीमांसाशब्दवद्विचारे रूढ इति केचित्।

End:

अतोऽध्ययनसंस्कृतस्वाध्यायजनितापातप्रत्ययक्रमेण कर्मविचारः कर्तव्य इति निष्कण्टकोऽयं घण्टापथः। तदयमत्र संग्रहः—

मीमांसाशब्दवद्रूढं जिज्ञासापदमित्यदः।
तथानुशासनाभावादयुक्तमिति तद्विदः॥
. . . . . .
अधीत्य साङ्गान् निगमान् विचार्य कर्मास्थिरस्वल्पफलं प्रधार्य।
तस्मादकस्मात् प्रविरज्य कार्यः पर्यायतो ब्रह्मविचार एषः॥ ५६॥
कर्मभ्रष्टाः केचिदेतद्विचारे
वृत्तिं त्यक्त्वा हेतुमन्यं वदन्तः।
भङ्क्त्वाथातःशब्दयोः कृतमैत्रीं
चित्रं मित्रद्रोहतो व्याहताः स्युः॥ ५७॥

भास्वानुदेत्य यतिराड्वपुषा विशेषाद्
दोषानुसार्यवसरानसुरानकार्षीत् ।
ध्वान्ताध्वसाध्वसमुदस्य सदस्यवर्गं
सद्यः प्रबोधयति चेत् किमिवात्र चित्रम् ॥ ५८ ॥
प्रथयति यतिराजे सूत्रधारेऽत्युदारे
नटति शुभनिसर्गे पात्रवर्गेऽपवर्गे ।
परिजनपरिहासाभासवाचाप्रचाराः
कतिचन नटवृत्तं व्यक्तमुत्तम्भयन्तु ॥ ५९ ॥
मायाप्रायमशेषदूषिततयालङ्काप्यथं गाहतां
धत्तां नूनमहीनवह्निशिखतां तत्तादृशीं संगरे ।
उद्युङ्क्तां ततयाविशुद्धकथया वृद्धश्रवःखण्डने
धर्मोद्धारिणि निर्बलं तदखिलं रामानुजे जृम्भिते ॥ ६० ॥
पूर्णः शीर्णमतिः श्रुतिस्मृतियुगीसंकल्पनाजल्पनाद्
बुद्धः पद्धतिमुद्धतिं च विजहौ तत्किंकरः शंकरः ।
भ्रष्टो भट्टकुमारिलो गुरुरपि स्पष्टं न संचेष्टते
व्याख्यासौख्यमुपेयुषि प्रतिपदं क्षेमाय रामानुजे ॥ ६१ ॥
पथ्यं त्रिः खलु वेदनीयमिति यत् सूत्रं त्रिधा व्याचरोत्
त्रय्यन्तादयमुद्धार कृपया दुर्यन्त्रणामन्त्रणात् ।
गीतां चाप्यविगीतवैभववतीं चक्रे प्रचक्रे यश-
स्तस्मै दोषविदूरशेषवपुषे कस्मै नताः स्मो हृदा ॥ ६२ ॥

Colophon:

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासताताचार्यनन्दनेन लक्ष्माम्बागर्भशुक्तिमुक्तामणिना कौण्डिन्यश्रीनिवासकरुणाकटाक्षवीक्षशिक्षितमीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजाण्णयाचार्यदीक्षितानुग्रहगृहीतचतुस्तन्त्रीनियन्त्रितस्वान्तेन श्रीनिवासविदुषा विरचितं जिज्ञासादर्पणं नाम प्रकरणं समाप्तम् ।

213

जिज्ञासासूत्रभाष्यभावप्रकाशिका

A commentary called *Bhāvaprakāśikā* on the *Jijñāsāsūtrabhāṣya* of Rāmānuja.

Beginning:

जिज्ञासासूत्रगम्भीरभाष्यभावप्रदीपिका ।
नारायणेन मुनिना क्रियते विदुषां मुदे ॥

पौर्वापर्यं समुचितं कर्मब्रह्मविचारयोः ।
विषयैक्यफलैक्याभ्यामैकशास्त्र्यसमर्थनात् ॥
वेदार्थं एको विषय एकं तन्निर्णयः फलम् ।
अवान्तरार्थभेदस्तु कर्म ब्रह्म च काण्डयोः ॥
नित्यानित्यविवेकादेर्वक्तुं निरवकाशताम् ।
रागप्राप्तां च मीमांसामधीतिविधिचिन्तनम् ।
मीमांसाया विधेयत्वे समावृत्त्यादिचोदनम् ॥

End:

सौत्रामणौ राजसूये सुराग्रहविदेवने ।
अन्यत्र न प्रसज्येते तथेदं च व्यवस्थितम् ॥
तस्माद्बन्धः सत्य एव भवत्यैवास्य निवर्तनम् ।
भक्तिश्च कर्मापेक्षेति सौहार्दं काण्डयोः स्थितम् ॥

Colophon:

नारायणेन मुनिना श्रीवत्साङ्केन निर्मितः ।
जिज्ञासासूत्रगम्भीरभाष्यभावप्रकाशिका ॥

इति सर्वतन्त्रस्वतन्त्रपरमहंसपरिव्राजकाचार्यश्रीवत्साङ्कश्रीमन्नारायणमुनिकृता जिज्ञासासूत्रभाष्यभाव-प्रकाशिका समाप्ता ।

On the first page are seen:

चत्वारस्तत्त्ववर्गाः पृथिविजलमरुद्वह्निरूपाश्च तेषां
देही संसर्गजोऽयं निरय इह च यद् दुःखजातं प्रभूतम् ।
स्वर्गः सौख्यो महान् यो भवति तनुग्रहः पूर्वसंयोगनाशं
प्राप्नोतीच्छाभिरन्यत् तदुपरि न हि चेत्याह लोकायतो हि ॥
देही देहानुरूपो निखिलमपि जगत् साध्यहेतुस्वरूपं
नित्यानित्यं च भिन्नं तदितरदपि तत् सत्यमन्यच्च तत् स्यात् ।
नास्त्यादिः संसृतेरप्यतिमलभरणादात्मबोधाच्च मुक्तिः
प्राप्नोत्युर्व्यां गतिर्यत् प्रकृतिविरहतश्चेत्थमाहार्हतोऽपि ॥
नात्मा देहातिरिक्तः क्षणिकमपि जगच्चाक्षुषं चाणुसंघं
श्रेयो वैभाषिकस्य क्षणिकमिति च या संसृतिर्नित्यताधीः ।
प्रायः सौत्रान्तिकस्याप्यभिमतमखिलं किंतु नैवानुमानात्
सिद्धं सर्वं जगत् स्यादिति च बहु ततः पूर्ववैरूप्यमस्य ॥
ज्ञातृ ज्ञेयं च सर्वं भ्रमरचितमथ ज्ञानमात्रं तु शिष्टं
योगाचारो जगाद क्षणिकमिति च तज्ज्ञानमात्रं हि मुक्तिः ।

तेनोक्ता माध्यमस्याप्यभिमतविषया: किंतु शून्येन सर्वं
शून्यं चेत्येव या धीर्भवति विगुणिन: सास्य मुक्ति: प्रशस्ता ॥

214

जीवब्रह्मभेदनिरूपणम्

This is a tract showing that Brahman is distinct from individual souls in respect of nature, power, etc.

Beginning:

नन्वेवमपि जीवविलक्षण: परमेश्वर इत्यसंगतम् ; जीवेश्वराभेदप्रतिपादकबहुश्रुतिविरोधात् । तत्त्वमसि, अयमात्मा ब्रह्म, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि, स यो ह वा एतद् ब्रह्म वेद ब्रह्मैव भवति, सर्वं खल्विदं ब्रह्म, ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवा:, इत्यादिभि: ब्रह्मणो जीवाभेद एव प्रतीयते । एवं नेह नानास्ति किंचन, मृत्यो: स मृत्युमाप्नोति, नास्त्यत्र काचन भिदा, इत्यादिभि: भेदनिषेध एव श्रूयते ।

End:

किंचास्यां व्याप्तौ ग्राह्यभिन्नपदं व्यर्थम् । यदि ग्राह्यव्यतिरेकनिश्चयस्य ग्राह्यनिश्चयप्रतिबन्धकतया ग्राह्यनिश्चयस्य ग्राह्यनिश्चयहेतुतापत्त्या आत्माश्रयेण तत्पदमावश्यकम्, तर्हि प्रकृतेऽपि अन्योन्याश्रयभिया तद्द्वारकविशेषणं दीयतामित्यलमसमञ्जसविचारेण । तदेवं नाहमीश्वर इत्यबाधितप्रत्यक्षात् कार्यत्वानुमानात् क्षित्यादिपक्षकात् श्रुतिस्मृतिस्वारस्याच्च जीवेश्वरभेदसिद्धौ तत्त्वमसि ब्रह्म वेद ब्रह्मैव भवतीत्यादिवाक्यानां ब्रह्मज्ञानवान् ब्रह्मसदृशो भवतीत्येवमुपचरितार्थकल्पनमेव युक्तम्, आदित्यो यूप:, यजमान: प्रस्तर:, इत्यादौ तथा दर्शनादित्यास्तां विस्तर: ।

215

ज्ञानयाथार्थ्यवाद:

This is a tract proving the self-validity of knowledge.

Beginning:

जगज्जन्मस्थेमप्रविलयमहानन्दलहरी-
निदानं श्रीकान्तं निरुपधिककारुण्यजलधिम् ।
समाराध्य श्रीमद्यतिपतिमतं तन्यत इदं
मतीनां याथार्थ्यं यदुगिरिजुषानन्तविदुषा ॥

ज्ञानत्वव्यापकं याथार्थ्यमिति वेदान्तसिद्धान्तः। यद्यपि नैयायिकमतेऽपि सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायेन भ्रमस्यापि धर्म्यंशे प्रमात्वाङ्गीकारात् तद्वति तत्प्रकारकत्वरूपयाथार्थ्ये ज्ञानत्वव्यापकत्वमक्षुण्णम् ; तथापि ज्ञानत्वनिरूपितप्रतियोगिविषयधिकरण्याघटितव्यापकत्वस्य सिद्धान्त्यभिमतस्य नैयायिकैरस्वीकारात् न दोषः ; धर्मितावच्छेदकांशे प्रमात्वस्य निरुक्तव्यापकतानाश्रयत्वात्।

End:

अत एवाद्वैतवादिभिरपि प्रत्यक्षस्थले अनिर्वचनीयख्यातिः, परोक्षे अन्यथाख्यातिरङ्गीकृतेत्यादिकं वादान्तरे प्रपञ्चितमिति सर्वमवदातम्।

Colophon:

इति ज्ञानयाथार्थ्यवादः।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम्॥

217

णत्वदर्पणः

An attempt to prove that the word *nārāyaṇa* denotes only Viṣṇu, as the syllable *ṇa* makes it impossible to interpret it otherwise.

Beginning:

सद्ब्रह्मात्मादयः शब्दाः सर्वकारणवाचिनः।
पर्यवस्यन्ति यत्रैनं नारायणमुपास्महे॥
णत्वं वेदान्तसिद्धान्तव्यवस्थापकतां नयन्।
अङ्गं शृङ्गं श्रुतेर्यस्तु व्याचक्रे तं नमाम्यहम्॥

सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं ब्रह्म, ब्रह्म वा इदमग्र आसीत्, यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः, एको ह वै नारायण आसीत् न ब्रह्मा नेशानः इत्यादिषु कारणवाक्येषु सर्वकारणतया प्रयुज्यमानानां सद्ब्रह्मात्मशिवादिशब्दानां सर्वशाखाप्रत्ययन्यायेन एकार्थवाचिता सर्वसंमता। तात्पर्यपर्यवसानं च छागपशुन्यायेन सामान्यशब्दानां विशेषशब्दानुरोधित्वेन न्याय्यम्। तत्र सच्छब्दो बृहद्बृहत्साधारणः प्रयुज्यमानो ब्रह्मशब्दार्थे, स च चेतनाचेतनसाधारणः प्रयुज्यमान आत्मशब्दार्थे, स च जीवेश्वरसाधारणः प्रयुज्यमानो नारायणशब्दार्थे पर्यवस्यति। स च परमपुरुषैकान्तिकतया विशेषशब्दमूर्धन्यो न क्वचिदप्यन्यार्थे पर्यवस्यति।

End:

इह च द्रुणसादौ विधिपरतया चरितार्थस्य तस्य नियमपरत्वायोगात्। सिद्धविषयो हि नियमो भवति। न च द्रुणसादौ केनचित् णत्वसिद्धिः। पदादिविधित्वे

218

णत्ववादार्थः

An account of a discussion regarding the interpretation of the word *nārāyaṇa* which took place between the author and one Śaṃkarabhaṭṭa in the court of King Kṛṣṇarāja Woḍayar of Mysore.

Beginning:

श्रीमत्कृष्णमहीमहेन्द्रसदसि श्रीदेशिकानुग्रहा-
दस्माभिर्यदधायि णत्वविषये दौर्घट्यमव्याहतम् ।
श्रीनारायणनाम्नि यौगिकतया नीते शिवादौ बलात्
सोऽयं शंकरभट्टसंज्ञविदुषा वादक्रमो लिख्यते ॥
आसीद्विप्रतिपत्तिस्तु णत्वं संज्ञात्वमन्तरा ।
नारायणपदे साधु न वेति नृपसंसदि ॥
तत्र शंकरभट्टाख्ये साधुत्वं प्रतिजानति ।
अस्माभिस्तदसाधुत्वं सुव्यक्तमुपपादितम् ॥

पूर्वपदात् संज्ञायामगः इति सूत्रं वार्त्तिककारस्य मते नियमार्थम् । भगवतो भाष्यकारस्य मते त्वपूर्वविध्यर्थम् । भगवतः सूत्रकारस्यापि अयमेव पक्षोऽभिमतः । अस्मिन् पक्षद्वयेऽपि नारायणपदस्य संज्ञाविषयादन्यत्र णत्वं दुरुपपादम् । तथाहि—रषाभ्यां नो णः समानपदे इत्यत्र निमित्तनिमित्तिनोरेकपदस्थत्वमात्रं निमित्तिनो णत्वरूपकार्यनिमित्ततया प्रत्यपादि । तावतैव रामेण मातृभोगीणः द्रुणसः नारायणः इत्यादिसर्वलक्ष्येष्वपि इष्टसिद्धिः ।

End:

अग इति योगविभागाद्यसहनेन प्रवृत्तम् । नैवम् । नात्र पूर्वेण णत्वं प्राप्नोति । भवतः प्रतिकूलमेव; भवदुक्तरीत्या . . . . अजन्तक्रुगयनशब्दे पूर्वसूत्रप्राप्तणत्ववारणार्थमग इति योगविभागस्यावश्यापातात् ।

219

णत्ववादार्थः

End:

उक्तानेकज्ञापकैस्तत्रालक्ष्यताया निश्चितत्वात् सर्वेषामविवादाच्चेति त्रयोदशी कक्ष्या ।

शंकरभट्टः स्वोक्ते प्रोक्तानस्मभिरीदृशान् दोषान् ।
श्रुत्वा निरुत्तरोऽभूद्विद्वत्पूर्णे महीपतिसभे ॥
अतो नारायणाच्छब्दात् स्वबुद्धया कल्पितेऽप्यणि ।
णत्वं दुःसाधमेवेति निरचिन्वन् विपश्चितः ॥

220

तत्क्रतुन्यायविचारः

A discussion on Tatkratunyāya taught in *Chāndogyopaniṣad* III. 14. 1 with special reference to the verse *upāsitaguṇāder yā* etc. found in Vedāntadeśika's *Rahasyatrayasāra*. The author, who was the pupil of Śrīnivāsayati of Srirangam (A.D. 1900), concludes that the word *eva* found in the Upaniṣad means only *ayogavyavaccheda* and not *anyayogavyavaccheda*.

Beginning:

श्रीरङ्गाधिपमीडे श्रीनिधियोगीन्द्रदेशिकाकारम् ।
यत्पादाम्बुजयुगलं शरणं प्राप्यं ममाखिलार्थकरम् ॥

श्रीरहस्यत्रयसारे उपायविभागाधिकारे—உபேயமாகிற ஞாநவிகாஸவிசேஷம் கரணநிரபேக்ஷமுமாய் ஸ்வத: ப்ராப்தமுமாய் குணவிபூத்யாதிகள் எல்லாவற்றிலும் பரிபூர்ணப்ரஹ்மவிஷயமுமாயிருக்கும்.

उपासितगुणादेर्या प्राप्तावप्यवहिष्क्रिया ।
सा तत्क्रतुनयग्राह्या नाकारान्तरवर्जनम् ॥

इत्यनुगृहीतम् । अत्रायं पूर्वपक्षः ।

End:

एवंच सत्संप्रदायसिद्धमहाप्राज्ञाचार्यसकाशलब्धसकलभाष्यार्थाचार्यपादनिबन्धनस्थाया उपासितगुणादेर्येत्यादिश्रीसूक्तेर्न श्रीभाष्यविरोध इति सर्वं रमणीयम् ।

सारासारविवेकेतिश्लोकोक्तगुणशालिनः ।
श्रीभाष्याद्यर्थरसिकाः सन्तीत्येषा कृतिः कृता ॥
श्रीश्रीवासमुनीन्द्राङ्घ्रिध्यानसंशुद्धबुद्धिना ।
यतिना पादुकासेविलक्ष्मणाख्येन सन्मुदे ॥

Colophon:

इति तत्क्रतुन्यायविचारः ।

222

तत्क्रतुन्यायविचारः

Beginning:

यदुभूधराग्रनिलयं वन्दित्वा श्रीपतिं यतीन्द्रं च ।
तत्क्रतुनीतिविचारं कलयति कुतुकादनन्तार्यः ॥

यत्र देशविशेषावच्छिन्नब्रह्मसाक्षात्कारात्मकमुक्तित्वं तत्र स्वजन्यत्वस्वान्यूनानतिरिक्तविषयकत्वो-भयसंबन्धेनोपासनविशिष्टत्वमिति व्याप्तिस्तत्कतुन्यायार्थः। अथोक्तन्यायग्राहकात् यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवतीति श्रुतिवाक्यात् यद्धर्मप्रकारकोपासनावत्त्वं यस्य, तस्य तद्धर्मवत्त्वमित्येव व्याप्तिः प्रतीयते।

End:

ब्रह्मसंपत्त्युत्तरकालीनातिशयितफलस्य विद्याजन्यत्वाङ्गीकारेऽमानवकरस्पर्शविशिष्टतादृशविद्या-याः स्वजन्यफलप्रतिबन्धकसर्वकर्मनाशकत्वात् तदनाश्यप्रतिबन्धकान्तरकल्पनस्यासंगतत्वापत्तेरिति द्वयेऽपि विरोधाभावादिति।

223

तत्क्रतुन्यायसारः

This is similar to the above and contains 50 verses. The author was the son of Vīrarāghavācārya of Kauśikagotra, a resident of the village Pillaipakkam near Sriperumbudur. He was the disciple of Śaṭhakopayati and Śaṭhakopa Rāmānujayati of the Ahobalamaṭha. He became a Yati in his later life with the name Vīrarāghavaśaṭhakopayati and was the 37th pontiff of the Ahobalamaṭha. His other works are: the *Tārārthasāra, Sthemaśabdavicāra, Vedāntadeśikavaibhava, Ādeśamaṇi, Nyāyasiddhāñjanagandha, Ācāryasaptati, Śārīrakasuprabhāta, Goṣṭhīnāthastava, Śrutigītāvyākhyā, Vīrarāghava-śaṭhakopavaibhava* and *Tārārthasāraprabhā*.

Beginning:

श्रीनृसिंहपदत्राणसेवैककुतुकौ गुरू।
श्रीशठारिशठारातिलक्ष्मणार्यमुनी भजे॥
श्रीमद्रामानुजार्यश्रुतिशिखरगुरू निःसमागाधभाव-
ग्रन्थैः स्निग्धान्तरङ्गैः कुमतिविलसितोन्मूलनोन्मीलिताक्षौ।
स्वान्तं मे ध्वान्तहत्यै मुहुरधिवसतां यत्पदाम्भोजभक्त्या
वेदान्तार्थो दुरूहः करबदरसमः सम्यगीक्ष्येत सद्भिः॥
श्रीसूक्त्या तत्क्रतूक्तेः स्मृतिविषयगुणायोगबाधाशयत्वे
सिद्धे भाष्योपरोधं प्रथममभिदधुः केचिदिच्छानुरोधात्।
दृष्ट्वा तारार्थसारं तदुदितविहतिं वक्तुमुद्यम्य पश्चात्
श्रीसूक्त्यर्थाभ्यनुज्ञां दधुरपि तु मतं स्वं च किंचिद् ब्रुवन्ति॥
नातः प्रत्युक्तिखेदः क्रतुनयवचनस्यान्ययोगव्युदासेऽ-
प्येवंपर्यं निरर्थं दुरनुसरमपि स्याद्वचोभेददोषात्।

आनन्त्योपास्तिलाभे सकलगुणविभूत्यादिषु प्राप्यताया:
सिद्धेरन्यव्युदासे तदुपहतिरपि स्यादितीयत्तु वाच्यम् ॥

End:

यद्यश्रौतं च कृत्स्नं फलसमयगतं ध्येयमेवेत्यवक्ष्यत्
कैंकर्यादीन् विशेषानपि मननविधौ संयतानन्वमंस्यत् ।
तत्राशक्यग्रहत्वान्मननविलयने वेदमानत्वभङ्ग:
स्यादित्याद्याशयेन प्रवहति बहुधागाधतारार्थसार: ॥
इत्थं श्रीभूतभुर्यो विलसितयतिराडागमान्तार्थवीक्षा-
लब्धप्राज्यात्मवृत्ते: कुशिकसुतभुवो वीररथ्वीशसूरे: ।
सूनुर्गोपालसूरि: शठरिपुयतिराड्योगिपादाब्जभक्त्या
लब्धोन्मेषो मनीषी चुलकितमपिबत् तत्क्रतुन्यायसारम् ॥
श्रीमान् नृसिंह: करुणैकसिन्धु: शठारिरामानुजयोगिहृद्य: ।
स्ववेदनोत्क: क्रतुनीतिसारमनेन दासेन मुदेऽकरोत् स्वम् ॥

225

तत्क्रतुन्यायसार:

This is similar to the above, but represents the view of Pillai Lokācārya's school, maintaining that the word *eva* is used in the sense of *anyayogavyavaccheda*. The author was the pupil of Śrīśaila Rāmānujamuni of the last century.

Beginning:

यतीश्वरपदाम्बुजं शिरसि मानसे संभजन्
जगद्गुरुपदद्वयीमकुटमादरेणोद्वहन् ।
सुरम्यवरपादुकापरिसरे मनश्चारयन्
वृषाद्रियतिराण्मुने: पदयुगं सदा भावये ॥

तत्क्रतुन्यायस्यान्ययोगव्यवच्छेदपरत्वं श्रीभाष्यकारसिद्धान्तसिद्धम् । तथाहि—कार्याधिकरण-श्रीभाष्ये अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात् तत्क्रतुश्चेति सूत्रव्याख्याने तत्क्रतु: यथोपासीनस्तथैव प्राप्नोतीत्यर्थ इति व्याख्यानात् तं यथा यथोपासते तथैव भवतीति श्रुतिस्वारस्याच्च अनुपासिताकाराणामप्राप्तिरेवोच्यते ।

End:

तदनुगुणोपासनस्यैव कर्तव्यतया फलप्रतिपादकपरमसाम्यादिबोधकश्रुतिवाक्यैर्जगद्व्यापार-शङ्कायामुपास्यकोट्यनन्तर्भावादेव तत्प्राप्त्यभाव इति समाधानस्यासंभवेन तदधिकरणपूर्वपक्षोत्थिते: निष्प्रत्यूहत्वादिति दिक् ।

इत्थं श्रीभाष्यकारस्वरसतमवचोगुम्भगम्भीरभावं
श्रीवेदव्याससूत्रस्वरससमुचितं तत्क्रतुश्रुत्यभीष्टम् ।
ध्यातुर्ध्येयान्यभावप्रहणनविषयं वर्णितं व्यासपादै-
र्मेधाबाधातिगः सोऽप्यमरगुरुरमुं नान्यथा कर्तुमीष्टे ॥
श्रीमच्छ्रीशैलरामानुजमुनिकरुणासारसंजीवितेन
श्रीमद्रामानुजाम्भोरुहपदयुगलन्यस्तधीमस्तकेन ।
विद्वद्गोष्ठीविराजन्निजगुरुवचसा नारसिंहाभिधेन
भूयान्मोदाय वादः कृत इति विदुषां तत्क्रतुन्यायसारः ॥

227

This is a Sanskrit rendering of the Tamil work *Tattvatrayam* of Pillai Lokācārya. The author was well known in the last century. Another work of his is *Bhagavadviṣayam*.

228

This is a Sanskrit summary of the Tamil work *Tattvatrayaculaka* of Vedāntadeśika. The author was the son of Vedāntadeśika.

229

तत्त्वत्रयप्रमाणसंग्रहः

This gives the sources of the passages quoted in the *Tattvatraya* of Pillai Lokācārya and explains them.

Beginning:

माण्डूक्योपनिषदि—

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजन्मनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥

श्रीगीतायाम्—

ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ।
आढ्योऽभिजनवानस्मि नान्योऽस्ति सदृशो मया ॥

अस्यार्थः ।

End:

निश्चित्य त्वदधीनतां मयि सदा . . . .
. . . प्रपत्तुमधिकं सीदामि दुःखाकुलः ।
एतज्ज्ञानमुपेयुषो मम पुनः सर्वापराधक्षयं
कर्तासीति . . . . . धेः ॥

जीयरतिरुवडिकळे शरणम् ।

230

तत्त्वत्रयावलिः

Sixteen verses on the nature of three Tattva-s: Cit, Acit and Īśvara.

Beginning:

माया चिच्छादनी या बहुविकृतिमती चित्रसृष्टेः प्रसूति-
र्नित्या शश्वज्जडात्मा निरवधिमहिमा नेतृलीलानिदानम् ।
तस्यास्ताभ्यां दशाभ्यां त्रिगुणपरिणतेर्विस्तृताविस्तृताभ्या-
मुन्मेषान्तौ भवेतामुरुविधजगतामीशसंकल्पिताभ्याम् ॥ १ ॥
मायातश्चेतनानां वपुरिह बहु निर्माय कर्मानुरूपं
भोगस्थानानि भोग्यानपि जगति हृदा भूरिभेदानुपायान् ।
नर्मास्वादादरेण प्रसभमिति रमानायकेनैव जीवा
धीयन्ते मोहजाले प्रकृतिगुणपराधीननद्धस्वभावाः ॥ २ ॥
बद्धे स्वैः कर्मपाशैर्भ्रमति बहुविधं प्राप्तसंसारचक्रे
दुःखार्ते दुर्विपाकैः सपदि तदवने दूयमानो दयालुः ।
क्षिप्रं तं जायमानं जनिजनिततमःक्षेपदक्षैः कटाक्षै-
र्लक्ष्मीशो वीक्षमाणः शुभगुणवितरैर्लक्ष्यमेनं विधत्ते ॥ ३ ॥

End:

उत्क्रम्य ब्रह्मरन्ध्रादुदगयनगतोऽभ्युद्गतस्तैः सुधाम्भः-
सिन्धुस्नातः स पद्मोपनिषदपघनो जातलिङ्गाङ्गभङ्गः ।
श्रीवैकुण्ठोपकण्ठे श्रितपरिचरणैः सूरिभिर्नित्यदिव्यै-
र्मुक्तैः प्रत्युद्गतः सन्ननुभवति हि सालोक्यमुख्यापवर्गान् ॥ १५ ॥
स्फूर्जन्मूर्धन्यनाड्या स्फुटमुपरि गतोऽर्चिःप्रभृत्यूर्ध्वगामी
देवेरभ्युद्गतोऽतः शुभजलविरजास्नानतो दिव्यदेहः ।
मुक्तस्त्यक्तानुबन्धः परनमनपरः सूरिभिर्नित्यदिव्य-
स्त्रीभिः प्रत्युद्गतोऽसावनुभवति मुदा श्रीशकैंकर्यभोगान् ॥ १६ ॥

231

तत्त्वदीपः

On the meaning of the three Rahasyamantra-s of the Śrīvaiṣṇava sect. The author was popularly known by the Tamil name Vādikesari Alagiyamaṇavālajīyar. His other works are: *Tattvadīpasaṃgrahakārikā*, *Rahasyatrayakārikā*, *Rahasyatrayavivaraṇa* and *Pannīrāyirappaḍi*.

Beginning:

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसंतारपोतकम् ॥
अस्मद्गुरुभ्यस्तेषां च गुरुभ्यो विदधे नमः ।
निदधे च शिरस्यादिगुरोः पादौ श्रियःपतेः ॥
अस्मद्गुरुदयायातयतीन्द्राङ्गीकृतान्वयः ।
लभेय लब्धविज्ञानो लक्ष्मीपतिपदद्वयम् ॥
मन्त्रद्वयोत्तमश्लोकविषयार्थप्रदर्शकः ।
गुरुस्नेहदशारूढस्तत्त्वदीपः प्रकाश्यते ॥
तत्रार्थतत्त्वमाचार्याद्यथामति यथाश्रुतम् ।
वर्ण्यते मननार्थाय यतो ह्यर्थः स्थिरो भवेत् ॥

अयं जीवात्मा स्वयं नित्यनिर्मलज्ञानानन्दैकस्वरूपः स्वाभाविकज्ञातृत्वकर्तृत्वभोक्तृत्वस्वरूपधर्मो भगवदायत्तस्वरूपस्थितिप्रवृत्तिकतया तच्छरीरत्वेन तदनन्यार्हशेषत्वादिरूपस्वासाधरणाकारः ।

End:

अयमेवोपायविशेषः सर्वाधिकारिणां स्वाभिलषितपुरुषार्थसिद्ध्यर्थं स्वोज्जीवनार्थं च समाश्रयणीय इति निरवद्यम् ।

सौम्यजामातृमुनिना गुरुस्नेहदशान्वयात् ।
चरमश्लोकसारार्थतत्त्वदीपः प्रदर्शितः ॥
आरण्यकगुहान्तःस्थमदृश्यं गुरुगोपनात् ।
संपश्यति रहस्यार्थं तत्त्वदीपान्वितः पुमान् ॥
सुन्दरजामातृमुनिं वन्दे पूर्वैः सुरक्षितं गुरुभिः ।
यस्तत्त्वदीपकरणादकरोत् सुपथं रहस्यार्थम् ॥

Colophon:

इति श्रीमद्वादिकेसरिमिश्रविरचिते तत्त्वदीपे चरमश्लोकार्थविवरणं नाम तृतीयः परिच्छेदः समाप्तः ।
समाप्तश्चायं प्रबन्धः सर्वः ।

The scribe adds:

यद्यप्यशुद्धिबाहुल्यमुपलभ्येत कहिंचित् ।
सन्तस्तत् क्षन्तुमर्हन्ति ग्रन्थदौर्लभ्यवेदिनः ॥

232

तत्त्वदीपः

Adds the following verse in the beginning:

वेदान्तवेद्यं गुरुभिः सुगुप्तं मन्त्रद्वयं श्लोकमुखं रहस्यम् ।
यस्तत्त्वदीपात् सुपथं चकार तं सौम्यजामातृमुनिं प्रपद्ये ॥

Adds the following verse at the end:

स्वाधीनयति यो नित्यं हठात्कृत्य मनो मम ।
तस्मै रामानुजाख्याय नमस्ते ब्रह्मयोगिने ॥

Colophon:

इति श्रीतत्त्वदीपे मन्त्रार्थः समाप्तः ।

परभक्तिः पुरो दृष्टिप्रत्यक्षाभिनिवेशनम् ।
परज्ञानं तु तस्यैव साक्षात्कारः परिस्फुटः ॥

233

तत्त्वदीपः

Reads the following additional verse at the end:

सरसिजसहजेक्षणश्च कश्चित् सलिलधरोदरमेचको विलासः ।
हृदयवसतिरस्तु पीतवासा मुनिरभिरामवराधिराजनामा ॥

234

तत्त्वदीपः

The scribe adds the following at the end:

वात्स्यश्रीदेवराजार्यतनयं विनयाधिकम् ।
वात्सल्यादिगुणावासं वन्दे वरवरं गुरुम् ॥

235

तत्त्वदीपसंग्रहकारिका

A metrical epitome of the author's own *Tattvadīpa*, containing 518 verses and dealing with the Rahasyatraya-s.

Beginning:

अस्मद्गुरुमुखान् सर्वानभिवन्द्य गुरुन् क्रमात् ।
आद्यं लक्ष्मीपतिं देवमाश्रये परमं गुरुम् ॥
अस्मद्गुरुदयायातयतीन्द्राङ्घ्रीक्रियान्वयः ।
लभेय लब्धविज्ञानो लक्ष्मीपतिपदद्वयम् ॥
सद्गुरुस्नेहवर्त्यन्तःस्फुरितस्य विधीयते ।
संविवेक्तुं रहस्यार्थं तत्त्वदीपस्य संग्रहः ॥
मूलमष्टाक्षरं मन्त्रं मन्त्ररत्नं द्वयाह्वयम् ।
चरमश्लोक एतत्तु रहस्यत्रितयं विदुः ॥
तत्रादौ मूलमन्त्रार्थो यथावदुपवर्ण्यते ।
स्वस्वरूपावबोधार्थं तत्त्वयाथात्म्यचिन्तकैः ॥

End:

अतः श्लोकद्वयाच्छ्लोकाच्चरमाद्वापि केवलात् ।
सर्वोपायसमुद्रिक्तपरैकोपायतोदिता ॥
सौम्यजामातृमुनिना गुरुस्नेहदशान्वयात् ।
विहितः श्लोकवर्यार्थतत्त्वदीपस्य संग्रहः ॥

Colophon:

इति श्रीमद्वादिकेसरिमिश्रविरचितायां तत्त्वदीपसंग्रहकारिकायां चरमश्लोकार्थनिरूपणं नाम तृतीयः परिच्छेदः समाप्तः । समाप्ता चेयं तत्त्वदीपसंग्रहकारिका ।

237

तत्त्वनिर्णयः

This is an important Śrīvaiṣṇava work, which tries to prove the supremacy of Viṣṇu. The author belonged to the Śrīvatsa family and was popularly known as Naḍādūr Ammāl. He speaks of himself as the grandson (son's son) of the nephew of Śrī Rāmānuja. Bhūdevī and

Kamalādevī were the two sisters of Rāmānuja. Dāśarathi, also known as Mudaliyāṇḍān, was the former's son and Varadarāja was the son of the latter. This Varadarāja had a son called Devarāja whose son was our author, Varadācārya (A.D. 1200). He had two celebrated disciples: Sudarśanācārya (the author of the *Śrutaprakāśikā*) and Ātreya Rāmānujācārya also known as Vādihaṃsāmbuda (the author of the *Nyāyakuliśa*) and the preceptor of Śrī Vedāntadeśika (A.D. 1268 to 1369). The author's other important works are: the *Tattvasāra*, *Prameyamālā*, *Prapannapārijāta*, *Ārādhanakārikā* and *Paramārthastuti*.

Beginning:

श्रीमद्रामानुजमुनिवरैर्यामुनाद्यैर्मुनीन्द्रै-
रप्याचार्यैर्बहुभिरपरैर्विस्तरेणाभ्यधायि ।
विष्णुस्तत्त्वं परमिति परन्यायमन्वादिवाक्यै-
र्व्यक्तार्थाभिः श्रुतिवितितिभिस्तद्वयं संक्षिपामः ॥

अत्रैवं साध्यते—नारायणः परं ब्रह्मेति । अत्र पूर्वपक्षी मन्यते रुद्र एव सर्वस्मात् परं तत्त्वमिति । तथाहि—यतो वा इमानीत्यादिना जगत्कारणमेव परं तत्त्वमित्यवगम्यते । तच्च कारणं किमित्यपेक्षायां छान्दोग्ये सदेव सोम्येदमग्र आसीदित्यनेन वाक्येन जगत्कारणं सच्छब्दवाच्यमिति प्रतीयते । वाजसनेयके ब्रह्म वा इदमेकमेवाग्र आसीदिति ब्रह्मशब्देन कारणं प्रतिपाद्यते ।

End:

किंच नारायणपरायणानां पुराणानां सत्त्वमूलतया प्रामाण्यम्, इतरेषां रजस्तमोमूलतया अप्रामाण्यं च पुरुषनिर्णये सुव्यक्तमुक्तम् । तस्मान्नारायण एव मुमुक्षुभिर्जिज्ञास्यं परं ब्रह्मेति सिद्धम् ।

वात्स्यश्रीदेवराजार्यनयनानन्ददायिना ।
वरदेन कृतस्तत्त्वनिर्णयः श्रुतिसंमतः ॥

The scribe adds:

श्रीशैलवंशतिलकश्रीवेंकटवरदसूरिचरणाब्जे ।
लोलम्बवृत्तिभाजा लिखितोऽयं वरददासेन ॥

238

तत्त्वनिर्णयः

The scribe's writing:

इमं ग्रन्थं विलिख्याहं रामचन्द्रविपश्चितः ।
प्रायच्छं प्रीतिदाढ्यार्थ न तु भीतस्ततो ध्रुवम् ॥

शठकोपमुनीन्द्राय नमो वेदान्तवेदिने ।
वेदान्ताचार्यविदुषे रामानुजबुधाय च ॥

239

तत्त्वनिर्णयः

Reads the following colophon:

इति लक्ष्मणार्यभागिनेयपौत्रेण वेदान्तविद्याविनोदविदग्धेन वत्सकुलतिलकेन वरदार्यमिश्रेण कृतस्तत्त्वनिर्णयः ।

गुरवे वरदार्याय कुर्वीमहि नमस्क्रियाम् ।
यत्पादाम्बुजसेवा नः सूते वेदान्तसंपदम् ॥

251

सर्वार्थसिद्धिव्याख्या—आनन्ददायिनी

The commentator Nṛsiṃhadeva was the son of Totārambā (the daughter of Śrībhāṣya Śrīnivāsācārya) and Nṛsiṃhaguru of the Śrīvatsagotra. He was the sister's son of Vedāntācārya of the Kauśikagotra. He writes of himself as the pupil of Appalācārya of the Ātreyagotra and grandson of Devarāja, probably the author of the *Bimbatattvaprakāśikā*. His other works are the *Śatadūṣaṇīvyākhyā* and *Nikṣeparakṣāvyākhyā*.

Beginning:

श्रीमान् वेदान्तवेद्यः शुभगुणनिलयो निःसमः सर्वदोष-
प्रत्यर्थीभूतमूर्तिश्चिदमितमहिमानन्दसत्यस्वरूपः ।
सृष्टिस्थित्यन्तलीलः सकलचिदचितां मोक्षदः सर्वविद्या-
वेद्यो वागीशमूर्तिर्वृषभगिरिपतिर्जायतां श्रेयसे नः ॥
जरीजृम्भत् स्तम्भादुदयगिरिशृङ्गादिव रवि-
र्विभिन्दन् दैत्यौघं तिमिरपटलं स्वैः कररुहैः ।
वितन्वन्नानन्दं मृगपतिनराकारघटितः
स नः श्रेयो देयादमृतफलवल्लीसहचरः ॥
आराधनार्थं वृषशैलभर्तुर्घण्टा सदा पद्मभुवा प्रयुक्ता ।
यद्रूपमास्थाय जगन्त्यरक्षत् तमेव वेदान्तगुरुं नमामि ॥

प्रतिमतकथकधुरंधरविद्याहंकारतूलवातूलः ।
सकलजनवन्दनीयो भवतु मुदे मे महागुरुर्नित्यम् ॥
कुशिककुलजलधिचन्द्रो निगमान्तगुरुः श्रियो निवासो नः ।
जयति यतिराजदर्शितसिद्धान्ताम्भोजतोषकरभानुः ॥
आत्रेयवंशदुग्धाब्धिप्रालेयांशुं कलानिधिम् ।
अप्पलाचार्यवर्यं तं भजे विद्यागुरुं मम ॥
श्रीवत्सवंशाम्बुधिमध्यदेशाद्बभूव चन्द्रो नरसिंहनामा ।
तस्यात्मजः साधुजनैकसेवी नृसिंहदेवः प्रथितो धरायाम् ॥
तोतारम्बातनयः पौत्रः श्रीदेवराजस्य ।
दौहित्रः कुशिककुलश्रीभाष्यश्रीनिवासस्य ॥
अप्रसिद्धस्य पक्षस्य विस्तरेण प्रकाशिकाम् ।
सर्वार्थसिद्धिसट्टीकां करोम्यानन्ददायिनीम् ॥

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्यापरनामा वेंकटनाथाचार्यस्तत्त्वहित-पुरुषार्थज्ञानशून्यान् जनानवलोक्य संजातकारुण्यस्तद्रक्षणाय प्राचीनप्रबन्धेषु संक्षिप्तान् विप्रकीर्णा-श्चार्थान् संकलय्य तत्त्वमुक्ताकलापाख्यपद्यरूपप्रबन्धेन निरूप्य तस्यागाधतया दुरधिगमतामवलोक्य स्वयमेव व्याख्यास्यन् अविघ्नपरिसमाप्तिप्रचयगमनादिप्रयोजनकं शिष्टाचारपरिप्राप्तमिष्टगुरुप्रकाशनरूपं मङ्गलमाचक्ष्य शिष्यशिक्षार्थं पद्येन निबध्नाति—जयतीति । ताराकल्पे नक्षत्रसदृशे ।

End:

लौकिकजयादिपुरुषार्थनिष्ठानामप्ययमुपादेय इत्याह—इत्थमित्यादिना । मङ्गलादीनि मङ्गल-मध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि चेति न्यायेन गुरुप्रकाशना-त्मकमङ्गलं निबध्नातीत्याह—सर्वमङ्गलसिद्ध्यर्थमिति ।

इत्थं वेंकटदेशिकस्य निगमान्ताचार्यचूडामणे-
वर्णीं वासवलोकसिन्धुलहरीसंदोहसंदेहदाम् ।
दुर्वादिव्रजदूषणैकसरणीं सर्वार्थसिद्धिं सुधी-
र्व्याचख्यावनुकम्पितो नरहरिर्व्यक्तं महादेशिकैः ॥

Colophon:

इति कुशिककुलजलधिसुधाकरस्य निगमशिखरविद्याकुमुदिनीसंमोदकरस्य वेदान्ताचार्यस्य भागिनेयेन श्रीवत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन नृसिंहदेवेन विरचितायां सर्वार्थसिद्धिव्याख्याया-मानन्ददायिन्यामद्रव्यसरः पञ्चमः । सर्वार्थसिद्धिव्याख्या संपूर्णा ।

252

सर्वार्थसिद्धिव्याख्या प्रकाशिका

Beginning:

श्रीमान् नारायणो नस्तिरयतु दुरितं यः श्रितांस्त्रातुकामो
भूमावाविर्भवन् द्राङ् मुनिजननिवहैः सादरं स्तूयमानः ।
तत्तत्कर्माणि कुर्वन् श्रुतियुवतिवचोभावमुन्मीलयन् य-
स्तत्त्वोपायार्थसिद्धीर्विशदमभिदधन्निर्मलानन्दभूमा ॥
नानादुर्वादिवादानलशमनमहामेघवृष्टिप्रसर्प-
द्वाग्धारावाहिनीभिः प्रशमितविबुधस्तोमचित्ताभितापैः ।
तैस्तैः सद्युक्तिरत्नोत्करखचिततनुत्राणभूतैः सुबोधै-
र्वाग्भारैरञ्चितोऽस्मानवतु स भगवान् लक्ष्मणाख्यो मुनीन्द्रः ॥

इह खलु कवितार्किककेसरी सर्वतन्त्रस्वतन्त्रः श्रीवेंकटनाथापरनामा वेदान्ताचार्यः श्रीभाष्यादि-ग्रन्थैर्न्यायतत्त्वज्ञानस्य दुरवगमतां बुद्ध्वा स्वनिर्मितस्य तत्त्वमुक्ताकलापाख्यग्रन्थस्यातिसंक्षिप्तत्वेन झटिति याथार्थ्यबोधाभावं पर्यालोच्य स्वयमेव तं व्याचिख्यासुः मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, मङ्गलाचारयुक्तानाम्, इत्यादि प्रमाणानुसारेण कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—जयतीत्यादिना । विद्यावाहिनीत्यत्र मयूरव्यंसकादित्वात् विद्यापदस्य पूर्वनिपातः । उपमितसमासे तु रूपकप्रकरणोच्छेदापत्तिः ।

End:

ननु पार्थिवेभ्यो घटादिभ्यो हेमादेराधिक्यं न स्यात्, पार्थिवत्वाविशेषात् । तथाच त्वयापि तैजसत्वं स्वीकार्यमेवेत्यत्राह—तदिति । पार्थिवांश इति । स्फुरन् अत्यन्तशुद्धः सारभूतः पार्थिवांश इत्यर्थः । तदेतत् स्फुरत्तादीतिप्रतीकव्याख्याने वक्ष्यति । निश्रीयत इति । तत एव पार्थिवत्वाविशेषेऽपि घटादिभ्यस्त्रप्वादेर्वैषम्यमिति भावः ।

253

सर्वार्थसिद्धिव्याख्या प्रकाशिका

Beginning:

जगज्जननरक्षणप्रलयकेलिमुद्दिश्य यः
सुसूक्ष्मतनुतां गतां प्रकृतिमात्मभिर्योजयन् ।
विचित्रपरिणामिभिर्विपुलमोदमासेवते
पयोधितनयापतिः स तु भवेन्मम श्रेयसे ॥

निगमान्तगुरो त्वदीयवाणी परमार्थान् हृदये ममातनोतु ।
न हि मे महिते त्वदीयसूक्ते कथमप्यस्ति मतिः क्व विस्तृतिस्तु ॥

एतावता प्रबन्धेन जडद्रव्यवर्गो निरूपितः । अथोद्देशक्रमानुसारेण प्रथमं जीववर्गो निरूपणीय इत्यभिप्रायेण मूलमवतारयति—अथेति । प्रत्यगर्थ इति । निरूपणीये इति शेषः ।

End:

सिद्ध इति । अत्र श्रुतौ उपैतीति इण्धातोर्ज्ञानवाचितया अनुभवतीत्यर्थ इति बोध्यम् । श्लोकः सुगमः ।

इति परमते विरुद्धानामर्थानां मोक्षविरुद्धत्वप्रतिपादनम् ।

नानाशास्त्रविचारनिर्मलमनःपीयूषपाथोनिधिः
स्वैरोत्तुङ्गतरङ्गनीतिसुभगैर्वाचां विभेदैरहो ।
तत्तद्वादिमतान्यपास्य विशदं यो जीवतत्त्वानिमान्
सुव्यक्तं सुदृढं जगाद जयतु त्रय्यन्तसद्देशिकः ॥
चिरंतनसरस्वतीशिखरदेशिकप्रोल्लस-
त्पदाम्बुजनतिस्तुतिस्फुरितभारतीभूषिताम् ।
निरर्गलविनिःसरद्वचनचातुरीभासुरां
सुधां कृतिमिमामहो पिबत भावुकाः सादरम् ॥

Colophon:

इति श्रीसर्वार्थसिद्धिव्याख्यायां प्रकाशिकायां जीवसरो द्वितीयः ।

254

सर्वार्थसिद्धिव्याख्या प्रकाशिका

Beginning:

देव त्वं बहवः कुदृष्टय इमे नासीति निश्चिन्वते
स्वीकृत्यापि समस्तहेयनिलयैर्जीवैरभेदं परे ।
श्रुत्वा वाचमिमां दरस्मितमुखः सेनापतेः श्रीपति-
र्हन्तैते परमासुरा इति वदन् पुष्णातु भव्यानि नः ॥
चार्वाकैर्बुद्धशिष्यैर्जैनकपिलमतस्थाविभिर्योगनिष्ठैः
काणादैर्गौतमीयैः पशुपतिसमये तस्थिवद्भिस्तथान्यैः ।
भूयोभिर्युक्तिपाशैः प्रतिदिनमनघं सर्वतः पीड्यमानं
सिद्धान्तं यो ररक्ष प्रभवतु सततं वेदचूडागुरुर्मे

पूर्वोक्तयोः सत्योः संगतिमाह—तदेवमिति । अथेति । तथाच प्रसङ्गसंगतिरिति भावः ।

End:

ननु दोषत्वेनाभिमतवस्तुनोऽविद्यमानत्वेन कथं द्वैतापादनमित्यत्राह—यत्र क्वचिदिति । दोषत्वेनाभिमतवस्तुन इति शेषः । विरोधादिति ; शशशृङ्गादिवदिति भावः ।

255

तत्त्वविवेकः

This is a Prakaraṇa work explaining the nature and characteristics of the three Tattva-s: Cit, Acit and Īśvara. The author was the son of Kṛṣṇamiśra.

Beginning:

श्रियः पतेरखिलचेतनाचेतनपदार्थसार्थसकलविधशासितुः परमात्मनः परमबन्धोरखिलजनिजीवनलयैकलीलस्य भगवतो नारायणस्यानन्यार्हशेषभूतेन नित्यामलसुखावबोधस्वरूपस्वभावेन सर्वप्रकारतत्पारतन्त्र्ययुक्तेन तच्चरणारविन्दनित्यकिंकरतारसिकेन तन्मुखकमलविकासानुभवसंभावितनिरतिशयानन्दसिन्धुकल्लोलदोलाविहरणलीलानिरन्तरोचितेनापि गुणत्रयात्मकानादिमायातिरोहितस्वप्रकाशतया समधिगतायथाज्ञानेन ।

End:

ईश्वरस्य ज्ञातृत्वयुक्तं नियन्तृतैकस्वभावत्वं लक्षणम् ।

अतो धर्मीश्वरः सर्वहेयप्रतिभटः स्थितः ।
अपरिच्छिन्न एवैष देशात् कालाच्च वस्तुतः ॥
ततः सर्वगतो नित्यो निखिलात्मविशेषणः ।
ज्ञानानन्दस्वरूपोऽपि ज्ञानशक्तिबलादिभिः ॥
कल्याणगुणरत्नौघैरनन्तैः परिभूषितः ।
समस्तजगतां सर्गस्थितिसंहारकारकः ॥
अखिलाश्रयणीयोऽयमखिलार्थप्रदायकः ।
रम्यसौन्दर्यसौगन्ध्यलावण्यादिगुणोत्तमैः ॥
जाज्वल्यमानकल्याणनित्यदिव्यात्मविग्रहः ।
श्रीभूमिनीलाधिपतिश्चिदचित्तत्त्वनायकः ॥
समस्तशब्दाभिधेयः सर्वदेहत्वहेतुना ।
एवं वेदान्ततत्त्वज्ञैर्वैकुण्ठपतिरीरितः ॥

Colophon:

इति तत्त्वविवेके ईश्वरस्वरूपनिरूपणाधिकारस्तृतीयः ।

सूनुना कृष्णमिश्राणां लोकाचार्येण धीमता ।
प्रमाणैर्वस्तुतस्तत्त्वविवेकः संप्रदर्शितः ॥

256

तत्त्वसंग्रहः

Similar to the above. The author was the son of Abhayaprada alias Periyavāccān Pillai, the famous commentator on the *Divyaprabandha*.

Beginning:

प्रणम्य प्रणतार्तीनां हर्तारं हरिमिन्दिराम् ।
आचार्योऽात्मतत्त्वज्ञान् क्रियते तत्त्वसंग्रहः ॥

विश्वं चेदं भोक्तृभोग्यनियन्तृरूपेण त्रिविधं भवति । अत्र भोग्यं ज्ञेयतैकस्वरूपं वस्तु । भोक्ता च ज्ञातृतैकस्वरूपः । नियन्तृतैकस्वरूपश्च नियन्ता । अत्रैकशब्दैर्भोक्तृनियन्तृनियाम्यत्वानि निषिध्यन्ते । न चैतदतिरिक्तमस्ति । अभोक्तुरभोग्यस्यानियन्तुरन्यस्य कस्यचिदपि प्रतीतिपथानारोहात् । उदासीनोऽपि नातिरिच्यते । भोगनियमनादियोग्यस्यैव सतस्तदुपेक्षामात्रेण तथा व्यपदेशात् । अतस्त्रिविधमेव सर्वं तत्त्वम् । अत एव श्रूयते—भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति । सर्वं जगत् भोग्यादिरूपेण त्रिविधमित्यर्थः ।

End:

एवं सति ये चैतदनादृत्य भगवत्साम्यं तत्स्वरूपैक्यं तदाधीन्यं पत्नीत्वं चैच्छमिति चाप्रामाणिकमसांप्रदायिकमसदर्थं कर्णे कथयन्तः कलुषयन्ति जगत्, ते च सकलचिदचिद्वस्तुविलक्षणं निखिलजगदेककारणं निरस्तसमस्तहेयजातं नारायणनामधेयं परं ब्रह्मैव विश्ववेदान्तवेद्यमिति ब्रह्मसूत्रन्यायानुसारेणोपगतनिश्चयवद्भिर्वेदान्तविदग्रेसरमतानुसारिभिर्बहिष्कार्या इत्यलम् । महीमहीधरमहोदधिप्रभृतीनां महत्परिमाणत्वात् कालस्य च परममहत्त्वाच्च । एवं विश्वं जगत् कोटित्रयान्तर्गतमिति सिद्धम् ।

Colophon:

अभयप्रदपुत्रेण सर्वविद्यान्तगामिना ।
यज्वना रङ्गराजेन रचितस्तत्त्वसंग्रहः ॥

257

This is a metrical treatise in 100 verses giving the essence of Viśiṣṭādvaita Vedānta.

260

तत्त्वसारः

Reads the following verses at the end:

लोकाचार्यैस्तदनुजैर्द्राविडाम्नायदेशिकैः ।
श्रीवचोभूषणाद्याश्च प्रबन्धा निर्मिताः पुरा ॥
दूषिताश्च यथान्यायमाचार्यचरणैर्बुधैः ।
पश्चात् तद्भ्रम्यज्जामातृमुनिभिस्तदनादरात् ॥
यथाश्रुतार्था व्याख्याातास्तेन पक्षद्वयस्थितिः ।
अनन्यशरणोऽप्यात्मा योग्यो हि शरणान्तरे ॥
इत्येतन्नोपपन्नं हि भेदाभेदाविरोधवत् ।
अनन्यशरणात्यन्तपरतन्त्रत्वधर्मयोः ।
भरन्यासैकसौहार्दं यः पश्यति स पश्यति ॥

262

The commentator was the son of Nṛsiṃhaguru of the Vādhūla family and the disciple of Varadaguru, son of Veṅkaṭācārya of the Vādhūla family. He is known to have written commentaries on the *Uttararāmacarita* and *Mahāvīracarita* of Bhavabhūti. He is said to have been a native of the village Tirumalisai near Madras, and probably lived in the 18th century A.D.

263

तप्तचक्राद्यङ्कनप्रमाणानि

A justification of the Śrīvaiṣṇava practice of branding the arms with marks depicting the sacred weapons of Lord Viṣṇu, quoting the authority of Āgama, Śruti, Smṛti, etc.

Beginning:

. . . . . भगवच्छास्त्रे तप्तचक्रादिधारणम् ।
चोदितं तदतो धर्म इत्येवमधुनोच्यते ॥

तत्र तावत् विहगेन्द्रसंहितायाम्—

श्रृणु त्वं विहगेशान सदा त्वं वचनं मम।
. . . . . कारकम् ॥
सर्वधर्माधिकारश्च शुचीनामेव चोदितः।
शुचित्वं नियतं तस्य यो बिभर्त्यायुधानि मे ॥

End:

उपवीतादिवद्धर्म्याः शङ्खचक्रगदादयः।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥

इत्याद्युपबृंहणदर्शनात्; सामान्यस्य विप्रशब्दस्य विशेषपरत्वानुपपत्तेश्च।

264

तप्तचक्राद्यङ्कनप्रमाणानि

Beginning:

अथ भगवल्लाञ्छनधारणप्रमाणानि वक्ष्यन्ते। तत्र तावच्छ्रुतयः . . . . . पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वहन्तस्त-त्समाशतेति। अस्यार्थः—हे ब्रह्मणस्पते चतुर्मुखस्यापि नायक प्रभुः त्वं विश्वतः सर्वेषु गात्राणि शरीराणि पर्येषि व्याप्नोषि। व्यापकस्य तव विततं पवित्रं सुदर्शनम्। सहस्रारं पवित्रं चरणं पविः इति निघण्टुः। श्रीशास्त्रे च—

पवित्रं चरणं चक्रं . . . रं सुदर्शनम्।
पर्यायवाचका ह्येते चक्रस्य परमात्मनः ॥

इति।

End:

स्कान्दे—

येषां चक्राङ्कितं गात्रं शूद्रेष्वपि . . . . ते।
ते वै स्वर्गस्य नेतारो ब्राह्मणा भुवि देवताः ॥

मात्स्ये—

मच्चक्राङ्कितदेहो यो मद्भक्तो भुवि दुर्लभः।
नैवाप्नोति वशं मृत्योरप्याशाभङ्गकृन्नरः ॥

265

तारार्थसारः प्रभासहितः

Five verses with the author's own commentary dealing with Śarīra-bhāvādhikaraṇa (III. 3. 51) of the *Śrībhāṣya*, in answer to criticism against the verse *upāsitaguṇāder yā*, etc. of Vedāntadeśika. The work clearly elucidates the principles of the Tatkratunyāya of the *Chāndogyopaniṣad*, III. 14. 1 according to the view of Vedāntadeśika.

Beginning:

शरीरभावाधिकृतिं प्रणवार्थविशोधनीम् ।
प्रत्यभिज्ञापयञ्छ्रीमान् भाष्यकारः प्रसीदतु ॥
नृसिंहपादुकासेवी शठजिल्लक्ष्मणाभिधः ।
योगीन्द्रो हृदि मे नित्यं संनिधत्तां समृद्धये ॥

अत्र केचित् शरीरभावाधिकरणे सर्वासु परविद्यासूपास्योपासनस्वरूपवत् उपासकस्य प्रत्यगात्मनः स्वरूपस्यापि ज्ञेयत्वे सिद्धे ज्ञातृत्वादिमात्राकारतयानुसंधाने प्रजापतिवाक्योक्तापहतपाप्मत्वाद्याकारस्य तत्क्रतुन्यायेनाप्राप्तिपरसिद्धान्तग्रन्थेन 'उपासितगुणादेर्या प्राप्तावप्यबहिष्क्रिया' इति श्रीरहस्यत्रयसारश्रीसूक्तिसिद्धं तत्क्रतुन्यायस्यायोगव्यवच्छेदपरत्वं विरुध्यते । न हि तस्य तत्परत्वे तन्न्यायेन तदप्राप्तिपरसिद्धान्तग्रन्थोत्थितिः ।

End:

ज्ञानमात्रस्वरूपात्मवादपाषाणकल्पात्मवादयोरपाकरणस्य फलितत्वात् कुदृष्टिजयसिद्धिः स्पष्टैवेति सिद्धम् ।

इत्थं स्निग्धमनस्कयोर्यतिवरश्रीवेदचूडार्ययोः
प्रेक्षालेशवशेन निःसमगिरोरीषन्मनीषाजुषा ।
श्रीरामानुजपादुकात्ममकुटीलाभाजितेन्द्रादिना
गोपालाह्वयिना व्यतानि विदुषा तारार्थसारप्रभा ॥
शारीरकाब्धिरत्नाय शरीरेभावनीतये ।
शरीराभावलिप्सूनां शरणायास्तु मङ्गलम् ॥
श्रीशठारिशठारातिलक्ष्मणाख्ययतीन्द्रयोः ।
पादाब्जभृङ्गदासात्मा नृहरिः स्वमुदेऽतनोत् ॥

267

तिरोधानानुपपत्तिः

This is a criticism of the Advaita view that *avidyā* conceals the true nature of Brahman.

Beginning:

किंच ब्रह्मणस्तिरोधानमविद्याकृतं तदुत्पत्तिप्रतिबन्धकत्वं तत्स्वरूपनिरोधो वा तद्विनाशो वा स्यात् । उत्पत्तिशून्यत्वाद्ब्रह्मणः नाद्यः । नोत्तरः, नित्यत्वात् ब्रह्मणः । न चाविद्याजन्यप्रपञ्च-भ्रमाधारत्वमेव ब्रह्मणस्तिरोधानमिति वाच्यम् ; तिरोधाने ज्ञाते भ्रमाश्रयत्वज्ञानं, भ्रमाश्रयत्वे ज्ञाते तिरोधानमित्यन्योन्याश्रयणात् ।

End:

तस्मात् ब्रह्मणि स्वरूपातिरिक्ताकारानभ्युपगमात् तस्य तिरोधानं तन्निवृत्तिरेव स्यात् । अतः ज्ञानैकरसं ब्रह्म अविद्यातिरोहितमित्यसंगतम् ।

Colophon:

इति तिरोधानानुपपत्तिः ।

268

त्यागशब्दार्थटिप्पणी

An interpretation of the term *parityajya* found in the concluding verse of the *Bhagavadgītā*, supporting the view held by the followers of Pillai Lokācārya that the term indicates total abandonment of rituals (*dharma-s*) including those that are ordained in the Śāstra-s.

Beginning:

नत्वा यतीन्द्रलोकार्यौ स्मृत्वा वरवरं मुनिम् ।
करोमि चरमश्लोकत्यागशब्दार्थटिप्पणीम् ॥

तत्र तावत् संप्रदायपरंपरया प्राप्तोऽयमर्थः—सिद्धोपायाधिकाराङ्गतया सवासनसर्वधर्मस्वरूप-त्यागश्चरमश्लोकप्रथमपादे विधीयत इति । अत्र केचित्—प्रपत्त्यनुवादपरः कार्पण्यविधानपरः नैरपेक्ष्यानुसंधानविधानपरः अशक्यारम्भनिषेधपरः अशक्यप्रत्याशानिषेधपरः ब्रह्मास्त्रन्यायसूचन-परश्चेति षोढा तद्योजनां वर्णयन्ति । अत्र हि—

अशक्त्याद्यश्रुतेः पार्थे तद्बाधाद्विध्यनन्वयात् ।
विवक्षावैपरीत्यादप्याद्यः कल्पोऽसमञ्जसः ॥

End:

तथा सत्येव सकलप्रमाणसंप्रदायोपपत्तेश्च चरमश्लोके स्वरूपत्याग एव त्यजिधात्वर्थ इति सर्वं समञ्जसम् ।

Colophon:

श्रीशैललक्ष्मणमुनेः श्रीभूतपुरवासिनः ।
कृतिः प्रवर्धतामेषा त्यागशब्दार्थटिप्पणी ॥

त्यागशब्दार्थटिप्पणी समाप्ता ।

इति श्रीनिवासदासविरचितत्यागशब्दार्थटिप्पण्यां दिव्यसूक्तिविरोधभङ्गो नाम तुरीयो वादः समाप्तः । टिप्पणी च समाप्ता ।

270

त्रिंशच्छ्लोकी

A short work attempting to prove that the Goddess Lakṣmī is included in the category of the supreme Brahman. Eight of the 40 verses represent the objection and thirty, which answer the objection, are those referred to by the title. The author belonged to the Hārītagotra. He refers to Vedāntadeśika for support.

Beginning:

विभूतिपाठपत्नीत्वपारार्थ्याकारणत्वतः ।
ब्रह्मद्वित्वप्रसजनान्न परत्वं श्रियो मतम् ॥ १ ॥
विष्णुनारायणब्रह्मपुरुषोत्तमशब्दतः ।
अवाच्यत्वगतेश्चापि न परत्वं श्रियो मतम् ॥ २ ॥
श्रुतप्रकाशकाचार्यैर्व्यक्त्यैक्याद्ब्रह्मलक्षणम् ।
नाव्याप्तमित्युक्तभावान्न परत्वं श्रियो मतम् ॥ ३ ॥
भगवद्भिर्यामुनार्यैर्वादिनस्तु परान् प्रति ।
न हि केनचिदित्यादेरीश्वरद्वित्ववारणात् ॥ ४ ॥
भाष्यादौ भाष्यकारेण ब्रह्मशब्देन चोच्यते ।
अहेयानन्तगुणभाक् पुरुषोत्तम इत्यतः ॥ ५ ॥
अष्टाक्षरादौ चरमश्लोके चाप्रतिपादनात् ।
कारणत्वप्रकरणे न परत्वं श्रियो मतम् ॥ ६ ॥
उद्देश्यभावे सर्वत्र दम्पतित्वेन चोदना ।
न हि सँदृश्यतेऽतोऽपि न परत्वं श्रियो मतम् ॥ ७ ॥
यद्यप्युद्देश्यभावेन विशिष्टं वस्तु चोच्यते ।
अप्राधान्यात् प्रकारस्य न परत्वं श्रियो मतम् ॥ ८ ॥

इत्थं द्वादशकक्ष्याभिरष्टश्लोक्यान्यदेशिकैः ।
उपन्यस्ते मते पूर्वे सिद्धान्तस्तूच्यतेऽधुना ॥ ९ ॥
चतुर्विंशतिकक्ष्याभिस्त्रिंशच्छ्लोक्या च सूक्तया ।
लक्ष्मीपरत्वसिद्धान्तः प्रोच्यते देशिकाशयात् ॥ १० ॥
श्रीशब्दस्यान्यभावेन कीर्त्यादिसहपाठतः ।
विष्णुशब्दप्रयोगाच्च परत्वं संमतं श्रियः ॥ ११ ॥
गौणत्वेनानुवादस्तु त्रय्यन्तार्थसुधीमणेः ।
तुष्यतुन्यायमूलोऽतः परत्वं संमतं श्रियः ॥ १२ ॥

End:

विपक्षे बाधकाभावात् साधकानन्त्यतोऽपि च ।
बहुना किमिहोक्तेन परत्वं संमतं श्रियः ॥ ३९ ॥
निर्मत्सरेण मनसा विभावयत तान्त्रिकाः ।
हे सारज्ञा महात्मानो लक्ष्मीपारम्यशोधनम् ॥ ४० ॥
हारीतगुरुषड्भक्तिभ्यो नमोवाकं वितन्वता ।
त्रिंशच्छ्लोकी मुदं दद्यात् कृता श्रीरामशर्मणा ॥ ४१ ॥
पूर्वोत्तरायितसुयुक्तिसमेतपक्षा
लक्ष्मीपरत्वविशदीकरणैकदक्षाः ।
हारीतरामगुरुणा सुकृता मुदं वः
श्लोका अमी दशचतुष्कमिताः प्रदद्युः ॥ ४२ ॥

271

दाक्षिणात्यमतभङ्गः

A refutation of the view of the followers of Maṇavālamāmuni regarding certain points of religious practice. The first part of the work deals with Yatiprativandana and the second with Aṣṭādaśabhedavicāra. The author belonged to Vedāntadeśika's school and refers to his works and the *Yatiprativandanakhaṇḍana* of Veṇkaṭādhvarin (17th century A.D.), a contemporary of Nīlakaṇṭhadīkṣita. Therefore he must have lived after the 17th century A.D. His other works are the *Vijayīndraparājaya*, *Durūhaśikṣā* and *Nyāsavidyā-prakāśavyākhyā*.

Beginning:

सर्वतन्त्रस्वतन्त्रेण परकालयतीन्दुना ।
क्रियते दाक्षिणात्यानां मतभङ्गः सुधीमुदे ॥

अथातो धर्मजिज्ञासेत्यारभ्य प्रवृत्तं मीमांसाशास्त्रं वेदप्रामाण्यप्रसाधनमुखेन वेदार्थरूपधर्म-निर्णयार्थम् । धर्मश्चेह वर्णाश्रमधर्मानुगुण एव । तदननुगुणस्त्वधर्मः । सयूथ्यानां यतेर्गृहस्थवन्दन-मप्यधर्म एव, केवलसांकेतिकस्वसिद्धान्तस्य धर्मस्वरूपत्यागप्रवर्तनभेदरूपत्वात् अश्रौतत्वात् अस्मार्त-त्वात् तस्य ; यदत्र तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यादिति श्रुतिः प्रमाणमित्युक्तम् ; तन्न यतेर्गृहस्थवन्दनविषयम्, प्रत्यक्षतस्तथा अश्रवणात्, सामान्यतः प्रवृत्तस्य त्रय एव यतेर्वन्द्या इति विशेषनिषेधात् व्यतिरिक्तविषयत्वौचित्यात् ।

End:

अयमेवार्थः इतोऽधिकवैशद्येनावसेयश्चेत् आत्रेयवंशावतीर्णश्लेषयमकचक्रवर्तिरघुनाथाचार्य-यज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितमीमांसाद्वयेन काञ्चीनगरालंकारभूतेन श्रीवेंकटाचार्य-यज्वना अधिकरणगणवितितिमुखेन विरचिते यतिप्रतिवन्दननिन्दने द्रष्टव्यः । अयं च ग्रन्थः तत्संग्रह-तया अपरिचितमीमांसान्यायानामपि प्रकृतार्थविषयकबुद्धिस्थैर्याय परकालयतिना विलिखित इति ।

Beginning of the second part:

मुकुन्दकरुणां वन्दे मुग्धेष्वधिकवत्सलाम् ।
स्वरूपसंस्तवौ यस्या निर्हेतुकसहेतुकौ ॥

इति श्रीमद्वेदान्तदेशिका निरणैषुः । तौ पक्षौ स्वरूपविषये निर्हेतुकतां संस्तवतयोक्तप्रसरविषये सहेतु-कतामेकस्यैव पुरुषस्य स्वरूपप्रसराशयौ; न तु केषांचित् सा निर्हेतुका, केषांचित् सहेतुकेति भेदः ।

End:

सपूर्वपक्षः सिद्धान्तः संवादोऽष्टादशस्वपि ।
यतिना परकालेन विवृतः स्थापितश्च सः ॥
त्रय्यन्तदेशिकेन्द्राणां सिद्धान्तो वेदसंमतः ।
पूर्वपक्षस्तु विशदं बाधितस्तदसंमतः ॥

273

दिव्यसूरिप्रभावदीपिका

The work deals with the greatness and worship of Divyasūri-s, known as Ālvār-s among Śrīvaiṣṇava-s.

Beginning:

परः पद्माभर्तुः प्रथमपतिरन्यावयववान्
प्रपत्तौ भक्तौ च प्रतिनियतचित्तः कविवरः ।
हरिर्नित्यो यद्वा जनिमदवरो देशिकवरः
प्रतीतः पूज्योऽसावमृत इह वेदातिगमतिः ॥

इह किल जगति कासारादिसूरिसेविते श्रीमत्पराङ्कुशमुनावनङ्कुशज्ञानादिमाहात्म्ये जगदेक-जीवातौ कैश्चिदभिनवकुयुक्तिकल्लोलितमनोदोषैरन्तः कुदृष्टिभिरुद्भाविताः शङ्काः परिहर्तुकामस्तत्स्वरूप-स्वभावाद्यनवधिकमाहात्म्यं सप्रमाणोपपत्तिकमनेन पद्येन प्रदर्शयन्नर्थान्तरांश्च निराचष्टे। अत्र तावदेवं मन्यन्ते। तावदयं पूज्यो न भवति, अदेवतात्वात्।

End:

तत्रैव स्थलान्तरे प्रकर्षविशेषबाह्यशक्तिविशेषप्रतिनियतानामनुष्ठेयाचाराणामितरसाधारण्य-प्रतिपादनं च तेनैव निषिद्धं द्रष्टव्यमिति सर्वं समञ्जसम्।

Colophon:

इति श्री

दिव्यसूरिप्रभावस्य दीपिका सततं सताम्।
भासतां हृदि वेदान्तरामानुजमुनीरिता॥

274

दुरर्थदूरीकरणम्

Beginning:

A refutation of the view held by the followers of Maṇavālamāmuni regarding certain features of Śrīvaiṣṇavism. The author belonged to the family of Koṭikanyakādānam Tātācārya of Śaṭhamarṣaṇagotra. He was a native of the village Tiruppukkuli near Kanchipuram in the last quarter of the 19th century A.D. He was the disciple of Śrīnivāsayati of Srirangam also known as Śrīraṅgam Āṇḍavan. His other works are: the *Avacchedakatāsara*, *Śatakoṭikhaṇḍana*, *Vādakalpaka* and *Tarkasaṃgraha-candrikāvyākhyā* (Nyāyaśāstra); *Bhāṭṭasāra* (Mīmāṃsā); *Brahmapadaśaktivāda*, *Paramukhacapeṭikā*, *Pratyaktvādisvayaṃprakāśatvavāda*, and the commentaries on the *Nyāyasiddhāñjana* and *Nyāyapariśuddhi* (Vedānta); for further list of his works see *JSVOI*, vol. 2, pp. 464-6.

Beginning:

सकृत्प्रपन्नसंरक्षादीक्षितं सर्वकारणम्।
जगदीश्वरमद्वन्द्वं द्वन्द्वं किमपि संश्रये॥
तुषारधरणीधरस्फुरदुदग्रकोटीतटी-
निरर्गलविनिर्गलद्विबुधवाहिनीविभ्रमैः।
वचोभिरवनीतले कुमतिगर्वसर्वंकषो
मम स्फुरतु मानसे सपदि वेदचूडागुरुः॥

वकुलभूषणपादसरोरुह-
प्रवणमानससंयमिशेखरम् ।
कलयतो निगमान्तगुरोः पदे
कृतधिये करवै गुरवे नमः ॥
लक्ष्मीकुमारतातार्यवंशाम्बुधिसुधाकरः ।
श्रीवेंकटगुरुर्जीयाद्यतो मे जननद्वयम् ॥
जीयाद्गोपालतातार्यः पितृव्यो मे कवीश्वरः ।
यदीयचरणाम्भोजात् तार्तीयीकी जनिर्मम ॥
श्रीवासयोगीश्वरपादसेवा-
लब्धागमान्तद्वयसंप्रदायः ।
श्रीकृष्णतातो महतां नियोगाद्
दूरीकरोत्यद्य दुरर्थजातम् ॥

यत्तावदभिहितम्—मुमुक्षुर्वै शरणमहं प्रपद्ये, अमृतस्यैष सेतुः, यमेवैष वृणुते तेन लभ्यः, न्यास इति ब्रह्मा, इत्यादिवाक्यविशेषाः तत्संग्रहरूपं रहस्यत्रयं च वेदान्तशास्त्राद्भिन्नमिति; तन्न; उपनिषत्त्वरूपस्य मोक्षतत्साधनादिप्रतिपादनपरशास्त्रत्वरूपस्य वा वेदान्तशास्त्रत्वस्योक्तवाक्येष्वबाधात् । न च—मोक्षश्चतुर्विधः ; कैवल्यकेवलस्वार्थपरमात्मानुभवस्वार्थकैंकर्यपरार्थकैंकर्यभेदात् । तत्साधनान्यपि चतुर्धा ; ज्ञानयोगादिभक्त्यात्मसमर्पणसिद्धोपायभेदात् । तत्र परार्थकैंकर्यव्यतिरिक्तमोक्षतत्साधनप्रतिपादनपरशास्त्रत्वमेव वेदान्तशास्त्रत्वम् । तच्च सद्विद्यादिवाक्येषु तद्व्याख्यानरूपब्रह्मसूत्रतद्भाष्यादिषु च वर्तते । मुमुक्षुर्वै इत्याद्युक्तवाक्यानां तु केवलपरार्थकैंकर्यतत्साधनपरतया वेदान्तशास्त्राद्भिन्नत्वमव्याहतमेवेति वाच्यम् । उपनिषदन्तर्गतोक्तवाक्येषु वेदान्तत्वव्यवहारस्य सर्वतान्त्रिकसंप्रतिपन्नतया लाघवेन च मोक्षतत्साधनादिपरवेदत्वस्यैव वेदान्तपदप्रवृत्तिनिमित्तत्वावश्यंभावात् ।

End:

यत्तु भगवत एव फलित्वेन चेतनस्य तदभावान्न दोष इति; तन्न; तावतापि पुरुषार्थदायित्वाभावप्रसङ्गापरिहारात् । भगवत एव फलित्वेऽपि भगवता दीयमानचेतनगतकैंकर्यस्य चेतनेच्छाविषयत्वाभावे तस्य पुरुषार्थदायित्वं न सिध्यति । तस्मादुपायसंबन्धमन्तरेण केवलस्वातन्त्र्येणैव भगवता कस्यचिच्चेतनस्य स्वीकार इत्येतत् सर्वथानुपपन्नमिति स्थितम् ।

Contains the following topics:

१. विषयनिरूपणाधिकारखण्डनम्, २. मीमांसानिरूपणाधिकारखण्डनम्, ३. उपबृंहणनिरूपणाधिकारखण्डनम्, ४. पूर्वभागविरोधपरिहारखण्डनम्, ५. वेदान्तविरोधपरिहाराधिकारखण्डनम्, ६. पुरुषकारनिर्हेतुकत्वसमर्थनाधिकारखण्डनम्, ७. षडङ्गे पुरुषकाराभावाधिकारखण्डनम्, ८. पुरुषकारत्वसमर्थनाधिकारखण्डनम्, ९. देव्युपायत्वशोधनाधिकारखण्डनम्, १०. गौणोपायत्वनिषेधाधिकारखण्डनम्, ११. लक्ष्म्याः विभुत्वभङ्गाधिकारखण्डनम्, १२. भगवन्निर्हेतुकोपायत्वाधिकार-

खण्डनम्, १३. प्रपन्नस्वरूपनिरूपणाधिकारभङ्गः, १४. प्रपत्तव्यगुणादिनिरूपणाधिकारभङ्गः, १५. शोकनिवृत्तिकारणचिन्ताधिकारभङ्गः, १६. देशकालादिनियमाभावाधिकारभङ्गः, १७. प्रकारनियमाभावाधिकारभङ्गः, १८. अधिकारिनियमाभावाधिकारभङ्गः, १९. फलनियमाभावाधिकारभङ्गः, २०. विषयनियमाधिकारभङ्गः, २१. प्रपत्त्यधिकारज्ञानशोधनाधिकारभङ्गः, २२. न्यासशरणागतिभेदाधिकारभङ्गः, २३. न्यासशरणागतिस्वरूपशोधनाधिकारभङ्गः, २४. भगवदुपायभावनिर्हेतुकत्वभङ्गः, २५. उपायनिर्हेतुकत्वसमर्थनाधिकारभङ्गः, २६. प्राप्यप्राप्तृत्वव्यवस्थापनाधिकारभङ्गः, २७. परार्थकर्तृत्वादेर्निर्हेतुकत्वभङ्गः, २८. स्वार्थकर्तृत्वादिव्यवस्थापनाधिकारभङ्गः, २९. परभक्त्यादीनामुपेयाधिकारभङ्गः, ३०. शरणागतेः शमादिसापेक्षत्वभङ्गः, ३१. आचार्योपसत्तेरकार्यत्वाधिकारभङ्गः, ३२. न्यासोपासननिष्ठापूर्णत्वसमर्थनभङ्गः, ३३. भक्तेः स्वरूपविरुद्धत्वभङ्गः, ३४. भक्तेरनुपायत्वसमर्थनभङ्गः, ३५. भक्तेर्व्याजत्वनिराकरणभङ्गः, ३६. उपासनस्य श्येनादितुल्यत्वभङ्गः, ३७. भक्तेः प्रपत्तिद्वारकत्वभङ्गः, ३८. प्रपत्तेः साधनत्वाभावभङ्गः, ३९. भरसमर्पणस्यापचारत्वसमर्थनभङ्गः, ४०. भगवत उपायनैरपेक्ष्यभङ्गः।

275

दुरुपदेशाधिक्कारः

A refutation of the view of the followers of Vedāntadeśika that women and men of the fourth caste are not eligible to receive the Aṣṭākṣaramantra with Praṇava which is exclusively a Vaidika Mantra. The author of this work attempts to prove that all Śrīvaiṣṇava-s, including women and Śūdra-s are eligible to receive and recite the Aṣṭākṣaramantra with Praṇava. He puts forth six objections on this point and answers them one by one.

Beginning:

निजवसदसिताक्षीशोभितापाङ्गवीक्षाविहरणपरिपुष्टोत्फुल्लनीलोत्पलाभम्।
शठरिपुवदनाब्जस्यन्दिगाथामधूनां मधुपमतिरसज्ञं भावये वेंकटेशम्॥
वकुलधरचरणपीठं मद्गुरुकुलकन्दपादुकादण्डम्।
वरयोगिपूर्वरूपं वन्दे गुरुहारनायकं तेजः॥
कुदृष्टिमृगतृष्णासु भ्रान्तिदीनान् भवातपे।
मूलेनाखिलशाखानां नयामीह महामृतम्॥

तत्र तावत् भवकदनकालरात्रिविरामविधिविहितसुप्रभातकल्पं दयाधीनदेशिकोपदेशमपि निर्दयमेव निर्मूलयन्ति मूढाः। सैषा तावत् तेषां प्रक्रिया—न मूलमन्त्रः सर्वाधिकारः, शूद्रो नाधीयीतेति सामान्यनिषेधविरोधात्; न स्वरः प्रणवोऽङ्गानीति विशेषनिषेधविरोधात्।

End:

नापि शैवादयो गृह्णीयुः, वैष्णवधर्मशास्त्रोद्धृतत्वात् । तस्मान्मूलोपलम्भसंभावनायामपि तदधिकार्यलाभात् वैयर्थ्यमेवास्य ललाटपट्टे लिखितमिति तूष्णीमुपशाम्यतु भवानिति सर्वं समञ्जसम् ।

Colophon:

इति दुरुपदेशधिक्कारे षष्ठहेतुभङ्गः ।

276

दुरुपदेशधिक्कारः

Reads the following verse at the end:

श्रीवाधूलमहाचार्यचिन्तासन्तानजन्मना ।
श्रीश्रीनिवासदासेन कृतेयं कृतिरेधताम् ॥

श्रीमते वेंकटलक्ष्मणगुरवे नमः ।

277

दुरूहशिक्षा

This is a criticism of Maṇavālamāmuni's *Śrīvacanabhūṣaṇamīmāṃsā* dealing with some of the principles of Śrīvaiṣṇava religion and philosophy.

Beginning:

अस्मद्गुरूणां पङ्क्तिं तामसोघद्वयवासिताम् ।
भजामः श्रीशपादाब्जमधुधारात्मिकां पराम् ॥
साम्राज्यं वर्धतां वादिकविसिंहस्य सद्गुरोः ।
यत्रोदितोक्तिस्वप्नोऽपि दाक्षिणात्येभभञ्जकः ॥
रमासखस्याद्यगुरोः शङ्खचक्रादिदो गुरुः ।
व्याख्यामुद्रितहस्ताब्जो जीयाद्यतिपुरंदरः ॥
श्रीशैलपूर्णं श्रीभाष्यकारदेशिकमाश्रये ।
जगत्प्राणोऽपि यद्दत्तजीवनोऽभूज्जगत्पतिः ॥
शास्तापि गोप्ता समभूद्वक्षसि स्थितया यया ।
वृषाद्रीशस्तां शरणमशरण्यः श्रये श्रियम् ॥
सकरुणारुणफुल्लदृगुज्ज्वलं
सहसितोचितदृश्यसुविस्मयम् ।

स्वविनतेषु वृषाचलवल्लभं
पुरुषमेव मनो मम गाहताम् ॥
वचोभूषणमीमांसां दुरूहैकशरीरकाम् ।
शिक्षयामो लक्ष्मणार्यमतधौरेयसूक्तिभिः ॥
भाषैकाद्दतसाक्षिकप्रणयिनामर्थाननर्थावहां-
स्त्रय्यन्तद्वयबाधितस्ववचनैः साध्यानसिद्ध्या हतान् ।
नादत्ते मम चित्तमत्र सुतरामाचार्यवाग्गुम्फनै-
र्न्यायोपेतनिरर्गलप्रसरणग्रन्थैः प्रतिष्ठापितम् ॥
माक्ष्ये माक्षिकवत् परोक्तय इमा वेदान्तविद्यागुरोः
सूक्तिष्वत्र विशिष्य रङ्गनिलयः साक्षी परेषामपि ।
यद्यप्येवमथापि नः कृतिरियं वेदान्तसम्राड्गुरोः
सूक्तेर्माक्षिकशर्कराप्रसृतिरित्यार्यैर्विचार्या मुहुः ॥
धीर्नो यदभिमानात्तविषयस्थितवैभवात् ।
प्रसृतेत्थमहं वन्दे तं माण्डव्यपुराधिपम् ॥

उपदेशरूपं वचनभूषणशास्त्रमेतत् वेदान्तातिरिक्तमिति ततो विषयादिभेदं तद्भेदे चासारमित्यादेः प्रमाणतामङ्गीकृत्य तत्र तदमानतायां भिन्नयोर्विषयप्रयोजनयोरलाभात् नारम्भणीयं पृथगेतदिति पूर्वपक्षं, तस्य नानात्वे च भिन्नयोस्तयोर्लाभात् आरम्भणीयत्वसिद्धान्तं च कृतवतः अभिनवमीमांसकस्य प्रथमाधिकाररीतिरियम्—

विषयः सारभागोऽस्य वेदान्तात् पर इष्यते ।
परत्वं सारशास्त्रस्यासारमित्यभिमानतः ॥

End:

मानसब्राह्मण्यं त्रैवर्णिकेषु आधुनिकेष्वपि संभवतीति तदादाय पूज्यताप्रतिपादकप्रमाणानि प्रवृत्तानीति आधुनिकपश्चिमवर्णेषु न क्वचिदपि औत्पत्तिकशारीरजात्यपगम इति ।

Colophon:

इति द्रमिडब्रह्मसंहितामात्राध्यायिदाक्षिणात्यानामाधुनिकपश्चिमवर्णभागवतजात्यपगमप्रतिपादकाधिकारभङ्गः पञ्चविंशः ॥

भाषाभावितभूषणेष्वविदुषामीषत्करं भाषणं
किंचित् किंचिदपाटवेन भणितं जागर्ति मानासहम् ।
तत्तस्यानुजभाषणेऽपि च तथा तन्मात्रसारे मुधा
श्रौती पद्धतिरद्भुतापि बहुधा बाधागतास्मिन् युगे ॥

The work is divided into four Paricccheda-s dealing with the following topics:

प्रथमपरिच्छेदः—

१. उपोद्घाताधिकारभङ्गः, २-५. शास्त्रारम्भणाधिकारभङ्गः, ६. लक्ष्म्या निर्व्याजपुरुषकारत्वभङ्गः, ७. लक्ष्मीपुरुषकारत्वस्य षडङ्गयोगनिष्ठविषयत्वाभावभङ्गः, ८. लक्ष्मीपुरुषकारत्वस्य कुसृष्टया अप्रामाणिकत्ववर्णनभङ्गः, ९. लक्ष्म्युपायत्वशोधनभङ्गः, १०. लक्ष्म्या विशेषणत्वप्रतिक्षेपभङ्गः, ११. लक्ष्म्या अणुत्वभङ्गः।

द्वितीयपरिच्छेदः—

१२. प्रपत्तेरधिकारिविशेषणत्वभङ्गः, १३. प्रपत्तेः पापनाशकत्वाभावभङ्गः, १४. कृतकृत्यत्वाधिकारभङ्गः, १५. वात्सल्यादिगुणोपयोगाभावभङ्गः।

तृतीयपरिच्छेदः—

१६-१७. षडङ्गयोगस्य नैरपेक्ष्याधिकारभङ्गः, १८. षडङ्गयोगस्य निवृत्तपापाधिकारत्वभङ्गः, १९. फलप्रतिक्षेपभङ्गः, २०. परार्थकैंकर्यस्य फलत्वाभावभङ्गः, २१-२४. फलत्वाभावोपपादनभङ्गः।

चतुर्थपरिच्छेदः—

२५. चतुर्थवर्णभागवतानां जात्यपगमवादभङ्गः।

278

द्रमिडोपनिषत्तात्पर्यरत्नावलिः

Dramiḍopaniṣad is the Sanskrit name denoting the *Tiruvāymozhi*, a Tamil poem by Śaṭhakopa alias Parāṅkuśa or Nammālvār. The *Tātparyaratnāvali* of Vedāntadeśika is a metrical summary in Sanskrit of the work.

Beginning:

श्रीमान् वेंकटनाथार्यः + संनिधत्तां सदा हृदि ॥

सारः सारस्वतानां शठरिपुभणितिः शान्तिशुद्धान्तसीमा
मायामायामिनीभिः स्वगुणवितितिभिर्बन्धयन्तीन्धयन्ती।
पारं पारंपरीतो भवजलधिभवन्मज्जनानां जनानां
प्रत्यक् प्रत्यक्षयेन्नः प्रतिनियतरमासंनिधानं निधानम् ॥ १ ॥
प्रज्ञाख्ये मन्थशैले प्रथितगुणरुचिं नेत्रयन् संप्रदायं
तत्तल्लब्धिप्रसक्तैरनुपधिविबुधैरर्थितो वेंकटेशः।
तल्पं कल्पान्तयूनः शठजिदुपनिषद्दुग्धसिन्धुं विमथ्नन्
ग्रश्नाति स्वादुगाथालहरिदशशतीनिर्गतं रत्नजातम् ॥ २ ॥

पाञ्चालीगात्रशोभाहृतहृदयवधूवर्गपुंभावनीत्या
पत्यौ पद्मासहाये प्रणयिनि भजतः प्रेयसीपारतन्त्र्यम् ।
भक्तिः शृङ्गारवृत्त्या परिणमति मुनेर्भावबन्धप्रथिम्ना
योगात् प्रागुत्तरावस्थितिरिह विरहो देशिकास्तत्र दूताः ॥ ३ ॥

End:

शास्त्रे देहातिरिक्तात्मनि तदधिपतौ तत्प्रसादाद्युपाये
तस्मान्निःश्रेयसाप्तौ तदपचरणतोऽनन्ततापाभिघाते ।
तद्भक्तानां प्रभावे तदुपसदनतः स्वान्तकालुष्यशान्तौ
सारं वेद्यं स्ववेदे सकलमकथयत् सानुकम्पः शठारिः ॥ १२७ ॥
शोकः श्लोकत्वमभ्यागत इति नयतः शुद्धबोधार्णवोद्य-
न्नानाकल्लोलमालानुभववशपरीवाहतः श्राव्यभावात् ।
वेदान्ताचार्यकश्रीबहुमतबहुविद्वेंकटेशोद्धृतेयं
रम्या तात्पर्यरत्नावलिरनघगुणा रञ्जनी रङ्गभर्तुः ॥ १२८ ॥
इत्थं सत्संप्रदायक्रमसमधिगताशेषवर्णार्हवेद-
श्रद्धाशुद्धाशयानामघटयदनघं कौतुकं वेंकटेशः ।
सम्यक्त्वे तस्य साक्षाच्छठरिपुरथवा सर्वसाक्षी स साक्षी
सावद्यत्वेऽपि सोढुं प्रभवति हि सतामप्रकम्पानुकम्पा ॥ १२९ ॥

Colophon:

इति श्रीकवितार्किकसिंहस्य+कृतिषु तात्पर्यरत्नावलिः संपूर्णा ।

282

द्रमिडोपनिषत्तात्पर्यरत्नावलिः द्राविडटीकासहिता

The commentary contains also the relevant Sanskrit verses of the text at the beginning and end of each chapter.

विगाहे निगमान्तार्यदयादिव्यतरङ्गिणीम् ।
संसारघर्मसंतप्तसंजीवनविचक्षणाम् ॥
शठारिसूक्तितात्पर्यरत्नावलिमिमामहम् ।
वेदान्ताचार्यविहितां विवृणोमि सतां मुदे ॥

End:

शठारिसूक्तितात्पर्यरत्नावलिरियं शुभा ।
विवृता वेंकटेशेन विदुषा विदुषां मुदे ॥

वेदान्तदेशिकगिरां महनीयभूम्नां
भावं वदेत् फणिपतिः परमः पुमान् वा ।
तस्मिन्निविष्टमनसो मम मौर्ख्यमेतत्
सन्तः प्रसन्नहृदया दयया सहन्ताम् ॥

283

द्रमिडोपनिषत्सारः

A summary in 26 Sanskrit verses of the 10 main chapters (Śataka-s) of the *Tiruvāymozhi*.

Beginning:

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
सेवायोग्योऽतिभोग्यः शुभसुभगतनुः सर्वभोग्यातिशायी
श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः ।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत् सत्पदव्यां सहायः
श्रीमान् सर्वोचितायामुपनिषदि मिषत्येष गाथाशतैर्नः ॥ १ ॥
आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये
कल्याणोदारमूर्तेर्द्वितयमिदमिति प्रेक्षमाणस्तृतीये ।
ऐश्वर्यादेश्चतुर्थे विषमधुतुलयानन्यभोग्यत्वमिच्छन्
षड्भिः स्वां पञ्चमाद्यैरनितरगतितामाचचक्षे मुनीन्द्रः ॥ २ ॥

End:

सतामित्थ सारं द्रमिडनिगमस्यान्वकथय-
द्बहूनां विद्यानां बहुमतिपदं वेंकटपतिः ।
दिशासौधश्रेणीदृढघटितजैत्रध्वजपटी-
परामर्शभ्रश्यत्प्रतिमतनिराबाधनिगमः ॥ २५ ॥
मनुव्यासप्राचेतसपरिषदर्हा क्वचिदियं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने ।
निरुन्ध्युः के विन्ध्याचलविकटसंध्यानटजटा-
परिभ्रान्ता पद्मोरुपरि यदि गङ्गा निपतति ॥ २६ ॥

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु द्रमिडोपनिषत्सारः संपूर्णः ।

The fly-leaf contains the following:

संविद्या निरवद्यनन्दथुमयी निष्कृष्टसत्त्वाकृतिः
स्वाच्छन्द्यात् कमलापतेर्भगवतो भोगाय लोकायते ।
चिन्तादूरतरा चिरन्तनतमोनिःशेषमोक्षस्थली
चित्ते संनिदधातु मे शुभतरस्वैरावतारात्मिका ॥

288

द्वारत्वविचारः

A critical note on the passage found in *Śrībhāṣya* I. 1. 1 elucidating the meaning of the word *brahman*.

Beginning:

तद्व्यवधायकत्वे सति तत्संबन्धनिर्वाहकत्वं तन्निरूपितद्वारत्वम् । तद्व्यवधायकत्वं च तत्संबद्धत्वे सति तत्संबन्धित्वम् । तयोः संबन्धः तत्संबन्धः । एवं च प्रासादराज्ञोः दण्डघट्याद्योश्च य आधाराधेयभावकार्यकारणभावादिः संबन्धः तन्निर्वाहकत्वस्य प्रासादाधेयत्वराजाधारत्वदण्डजन्यत्वघटजनकत्वाद्योश्च पर्यङ्कचक्रभ्रमणादौ सत्त्वाल्लक्षणसमन्वयः ।

End:

स्वरूपबृहत्त्वे स्वरूपेतरगुणाश्रयस्वस्वरूपाश्रितत्वसत्त्वेऽपि स्वरूपे तदाश्रितत्वासत्त्वेन विशिष्टाभावसत्त्वात् स्वरूपसंबन्धरूपाश्रयतायाः स्वरूपेतरनिष्ठसंबन्धद्वयघटितत्वाभावेन तत्संबन्धावच्छिन्नाधेयतावत्त्वेऽपि तस्मिन् स्वरूपेतरनिष्ठसंबन्धद्वयघटितसंबन्धावच्छिन्नाधेयताभावस्याक्षतत्वाच्च न कश्चिद्दोषः ।

290

नयद्युमणिः व्याख्यासहितः

A metrical text with the author's own commentary intended to contradict the views of Haradatta as revealed in his *Śrutisūktimālā*, and different from Meghanādāri's work of the same name.

Beginning:

सत्यं ज्ञानमनन्तमच्युतमजं नित्यं स्वतो निर्मलं
श्रुत्यन्तप्रमितामिताद्भुतगुणं प्रत्यक्प्रकाशात्मकम् ।
ब्रह्मस्तम्बमुखोद्भवस्थितिपुनःसंहारलीलारसं
रंहोधूतविरोधियूथमनघं ब्रह्माद्वितीयं भजे ॥

दोहंदोहममोघवाङ्मयगवीराहृत्य सूत्राक्षर-
क्षीरं स्मेरमधान्मुदा क्षितितले क्षेमाय यो मादृशाम् ।
आतच्चैतदरिक्तयुक्तिनिकरैरामथ्य भाष्यात्मकं
गव्यं भव्यतमं च योऽप्युदहरत् ताभ्यामुभाभ्यां नमः ॥
कुदर्शनविकर्शनास्पदविविक्तयुक्तित्रजैः
प्रदर्शयितुमुद्यतं परिविमृश्य भाष्याशयम् ।
अपार्थपरकत्थनव्यपगमोल्लसद्व्यासता-
निदर्शनमहं भजे हृदि सुदर्शनार्यं गुरुम् ॥
प्राचीं वाचमचीकशन्निशिचरग्रस्तां समस्तां पुरा
व्याजाद्वाजिमुखः स तत्प्रकृतिकानन्यानधन्यान् बुधान् ।
तत्तात्पर्यहरांश्चिरान्निरसितुं जज्ञे यदात्मा पुन-
स्तं त्रय्यन्तगुरुं परापरकलातन्त्रस्वतन्त्रं भजे ॥
नत्वा वेंकटसुत्वनः पदयुगीं षड्दर्शनीहर्षिण-
स्तत्ताद्दक्परवादिवादविविधाहंकारहुंकारिणः ।
तद्बिम्बप्रतिबिम्बडम्बररुचस्तत्तन्मताक्षेपण-
प्रेक्षालक्षणलक्षितानभिनुमस्तत्सोदरान् सादरम् ॥
यं पर्यायपतञ्जलिं यदविदः शंसन्ति मीमांसका
यस्याचार्यगुरू निरूढविभवावन्तेवसन्तावपि ।
पश्यत्पादममृष्यमाणमनसः पश्यन्ति यं तार्किका-
स्तं त्रय्यन्तकथोदधीन्दुमनघं वन्देऽण्णयार्यं गुरुम् ॥
विहितबहुविरोधान् व्यक्ततात्पर्यभेदा-
नपगलितविवादान् हन्त वेदान् विधाय ।
सततकृतविनोदान् 'सर्वशास्त्रानुवादान्
प्रथयितुमतिमोदांस्तातपादान् नमामि ॥
यस्मादस्माभिरादावगणि विगणितोद्भावनं जैमिनीयं
पश्चादुद्यद्विपश्चिन्मतहितकथकादूष्यमग्राहि भाष्यम् ।
तस्मिन् कौण्डिन्यवंशच्छलजलधिविधौ श्रीनिवासाध्वरीन्दौ
भूयो भूयः प्रणामव्रततिरधिगतप्राभवी बोभवीतु ॥
सेवंसेवमसद्भदावदमदप्रागल्भ्यबिभ्यत्त्रयी-
जीवंजीववधूसुधाकरवचोधारालधाराभरान् ।
श्रीशैलाण्णयदीक्षिताग्रजगुरून् शेषाविशेषोल्लस-
त्पाण्डित्यान् स्वकृतिं यते विवरितुं तद्ब्रह्मसूत्रस्तवम् ॥
मोहावेशवशंवदात्ममनसो मूढा निगूढाशयं
श्रीमद्भाष्यमदूष्यमब्जजनुषाप्यादूष्य हृष्यन्ति ये ।

तानात्मीयमतिव्यतिक्रमभवद्दोषान् मनीषिब्रुवां-
स्तत्तात्पर्यविवेचनान्निरसितुं यत्नः कृतार्थोऽद्य नः ॥
यो वायोरभवत् तृतीयतनुभृद्यस्तद्भुजामीशितु-
स्ताद्द्यूपधरस्तयोर्हि चरमः स्पष्टप्रकृष्टोदयः ।
इत्थं तन्मतयोः क्रमादधिगतं न्यूनत्वमाधिक्यम-
प्यद्यत्वे त्वनवद्यतां प्रविशदीकर्तुं प्रवर्तामहे ॥
यावत्प्रज्ञमभिज्ञभाव्यमतिना ग्रन्थे मया निर्मिते
दोषान्वेषणतोषिताः कतिपये तुष्यन्तु कुप्यन्तु वा ।
किं नश्छिन्नमतः श्रुतिस्मृतिकथापारंपरीलम्पटाः
सन्तः प्रोज्झितमत्सराः प्रतिपदं सन्त्येव संतोषिणः ॥
ध्वान्तानुवर्तिषु जनेष्वपि चन्द्रिकायां
दोषानुषङ्गविधितः प्रथितोदयेषु ।
सन्मानसाब्जवितितिर्व्यथिता विकासं
गृह्णातु संप्रति नयद्युमणेरमुष्मात् ॥
स्वकृतब्रह्मसूत्रार्थहृद्यपद्यविवेचनी ।
क्रियते श्रीनिवासेन नयद्युमणिदीपिका ॥

* * * * * * *

तत्राथातो ब्रह्मजिज्ञासेत्यारभ्य अनावृत्तिः शब्दादितिपर्यन्तस्य कृत्स्नस्य शास्त्रस्य भगवदेकनिष्ठां प्रतिष्ठापयितुं जिज्ञास्यत्वं भगवतः प्रथमतो वक्ति—हरे जिज्ञास्यत्वमिति ।

हरे जिज्ञास्यत्वं तव मुनिरवादीत् प्रथमतो
यतो ब्रह्मेत्येतत् तव पदमसाधारणमभूत् ।
अथातः शब्दाभ्यामपि विहितकर्मावगतिभि-
स्तदाराध्यो वेद्यस्त्वमिति निरणैषीत् करुणया ॥

End:

तस्माद्वा एतस्मादात्मन आकाशः संभूतः, तस्य ह वा एतस्य महतो भूतस्य निश्वसित-मेतद्यद्दग्वेदो यजुर्वेद इत्यादीनां चेतनासाधारणपदघटितवाक्यानामेतद्विद्यान्तानाम् अनेन जीवेनात्मना

291

नयमणिकलिका

A criticism of the Mādhva view that Praṇava is a part of each of the *Brahmasūtra-s*. The work is also called *Oṃkāravādārtha* (cf. MG, D. 4871).

Beginning:

मदनकदनवेल्लद्बल्लवीजाललोल-
त्कुचतटघटनोद्यत्कुङ्कुमालंकृताङ्गः ।
निगमनिकरचूडाक्रीडलीलानुकूलः
कलयतु शुभकामी कोऽपि कामी मुदं नः ॥
यद्यपि चेदं प्रकरणमुपयुक्तं चन्द्रिकानिराकरणे ।
तदपि प्रथमे सूत्रे प्रणववदाप्नोति किं न पार्थक्यम् ॥

इह कतिचिदतिसाहसिनः प्रथमम् अथातो ब्रह्मजिज्ञासेति ब्रह्ममीमांसोपक्रमसूत्रे सकलैः पठ्यमानमोंकारं तदवयवमभिदधति । तदेतत् प्रमाणपथानुवर्तिनो नानुमन्यन्ते । तथाहि—तस्य तदवयवत्वे न तावत् प्रत्यक्षं प्रमाणम् ; असंभवात् । शब्दस्वरूपमात्रग्राहिणः श्रोत्रस्य साधुत्वासाधुत्वयोरिवावयवत्वानवयवत्वयोरुदासीनत्वात् ।

End:

तस्मात् प्रमाणाभावान्न सूत्राणां प्रत्येकं प्रणवगर्भत्वमिति प्राहुः । तस्मादप्रामाणिकमिदं ध्वान्तमतानुवर्तिनामवयवत्वकथनमिति सर्वं समञ्जसम् ।

श्रीमच्छ्रीशैलवंशाम्बुधिशशिकमलावासतातार्यपुत्रः
पौत्रश्चित्रापदानप्रगुणगुणनिधेरण्णयाचार्यनाम्नः ।
स्वाचार्याचार्यसेवासमधिगतहितोदन्तवेदान्ततत्त्वो
व्यातानीच्छ्रीनिवासो नयमणिकलिकां ध्वान्तदौर्गत्यहन्त्रीम् ॥

292

नयमणिकलिका

श्रीमत्त्रय्यन्तसीमायुगलविभजनाखण्डपाण्डित्यसीमा
षट्तन्त्रोदन्तदन्तावललवनसृणीबोभवत्सूक्तिदामा ।
श्रीशैलाख्यान्वयेन्दुः सुगुणगुणनिधिः सर्वतन्त्रस्वतन्त्रः
कारुण्यात् संनिधत्तां मम हृदि सततं श्रीनिवासार्यवर्यः ॥

294

नयमयूखमालिका

This is one of the four chapters of the *Caturmatasāra*, expounding the *Brahmasūtra-s* from Śrī Rāmānuja's point of view, the other three chapters

being comments on the *Brahmasūtra* according to the views of Śrī Śaṃkara, Śrī Madhva and Śrī Śrīkaṇṭha, called *Nayamañjarī*, *Nyāyamuktāvali* and *Nayamaṇimālā* respectively. For details of the celebrated author and his numerous works, see *NCC*, I, pp. 197 ff.

Beginning:

श्रेयसां निधिमिव श्रियः पतिं प्रेप्सतां प्रियहिताध्वदर्शिनी ।
लक्ष्मणार्यहृदयानुसारिणी रच्यते नयमयूखमालिका ॥

अथातो धर्मजिज्ञासेत्यारभ्य अनावृत्तिः शब्दादनावृत्तिः शब्दादिति पर्यन्तं विंशतिलक्षणमेकं शास्त्रम् । तत्र कर्मविचारार्था द्वादशलक्षणी, देवताविचारार्था चतुर्लक्षणी च वृत्ता । ब्रह्मविचारार्था चतुर्लक्षण्यारभ्यते । तत्रादौ ब्रह्मविषयव्युत्पत्त्यभावप्रतिपत्तिदोःस्थ्यमानान्तरसिद्धत्वफलराहित्यरूप-तदनारम्भहेतुचतुष्टयनिरासेन तदारम्भसमर्थनार्थतया शास्त्रोपोद्घातरूपाणि समन्वयाधिकरणपर्यन्तानि चत्वार्यधिकरणानि । तेषु व्युत्पत्त्यभावशङ्कानिराकरणार्थमिदमाद्यमधिकरणम् । अथातो ब्रह्मजिज्ञासा । ब्रह्मविचारात्मकमिदं शास्त्रमारम्भणीयं न वेति संशयः । तदर्थं ब्रह्मणि वेदान्ताः प्रमाणं न वेति संशयः । तदर्थं च सिद्धरूपे ब्रह्मणि व्युत्पत्तिः संभवन्ति न वेति संशयः ।

End:

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

यदि मुक्तानामपि भगवत्पारतन्त्र्यं तदा तेषां भगवत्संकल्पात् आवृत्तिरपि कदाचित् स्यात् नानाविधलीलारसिकपरमस्वतन्त्रभगवत्संकल्पस्य नियन्तुमशक्यत्वात् । अनावृत्तिश्रुतिरपि येषु न तत्संकल्पः तद्विषयः स्यादिति प्राप्ते उच्यते । भगवत्संकल्पवितर्कमात्रेण अनावृत्तिश्रुतिसंकोचस्य कर्तुमशक्यत्वात् प्रत्युत तादृशावृत्तिसंकल्प एव भगवतस्तेषु नास्तीति . . . . ब्रह्मण इव तत्स्वभाव-स्यापि शब्दैकसमधिगम्यत्वेन अनुमानागोचरत्वादिति सिद्धान्तः ।

निरङ्कुशः स्वतन्त्रत्वान्मुक्तानावर्तयेद्विभुः ।
नै . . तत्स्वभावादेः शब्दैक . . . त्वतः ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीरङ्गराजाध्वरिवरसूनोः अप्पय्यदीक्षितस्य कृतौ चतुर्मत-सारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः । समाप्तश्चा-ध्यायः । शास्त्रं च परिसमाप्तम् ।

विष्वब्दे सिंहमासे तु नवम्यां शुक्लसंयुजि ।
हारीतरामगुरुराडलिखन्नयमालिकाम् ॥

296

नारायणपदनिरुक्तिः

A criticism of Govindanāyaka's *Nārāyaṇapadasādhāraṇya* (preceding portion of this same MS.), trying to prove that the word *Nārāyaṇa* can denote only the Lord Nārāyaṇa and not other deities. The author criticizes the views of Appayadīkṣita and Mallanārādhya and states that the latter was defeated by him in a controversial discussion on this topic.

Beginning:

श्रीवेंकटाचलाधीशं श्रिताभीष्टप्रदायकम् ।
समस्तजगदाधारं श्रीनिवासमहं भजे ॥

'नारायणपदस्य महायोगविद्बृद्धिभ्यां मूर्तित्रयवाचकत्वं पुराणादिषु प्रसिद्धम्' इत्यादिः 'अतः सर्वेषां पुराणानां न हि निन्दान्यायेनेतरप्रशंसार्थत्वात् प्रमाणम्' इत्यन्तो ग्रन्थः स्वमतासाधकत्वात् स्वमतविरोधपर्यवसितत्वात् स्वमतपरमतयोरनङ्गीकृतार्थप्रतिपादकत्वात् परमतनिराकरणासमर्थत्वात् परमताज्ञानविजृम्भितत्वात् स्वमतस्याप्यज्ञानकृतत्वात् श्रुत्यादिविरुद्धत्वात् परस्परासंगतत्वाच्च विदुषामनादरणीय एव। तथाहि—वैतण्डिकत्वपरिहाराय ग्रन्थे स्वपक्षस्थापनं कर्तव्यम्। तद्दार्ढ्याय परपक्षनिराकरणं च कर्तव्यम्। तयोरुपयुक्तस्यैव प्रतिपादनं च कर्तव्यम्; अनुपयुक्तार्थकथने असंगताभिधानापत्तेः।

End:

अवच्छेदकपक्षमादाय भवद्भिरुपपादनेऽपि बिम्बप्रतिबिम्बभावपक्षेऽस्माभिरुक्तानि दूषणान्यवच्छेदकपक्षे लगन्तीति न तत्पक्षमादायाप्याशा कार्या। विवरणवाचस्पत्ययोरङ्गीकृतौ बिम्बप्रतिबिम्बावच्छेदकपक्षौ वाचस्पत्यविवरणानुसारिभिरेव खण्डितौ च। तस्मात् तत्तन्मूर्तेर्वाचकनाम्नां तत्तन्मूर्तिव्यवस्थिततयैव वक्तव्यत्वात् एकैकमूर्तेस्त्रितयनामवाच्यत्वं संभवतीति ग्रन्थो विदुषामग्राह्य एवेति सिद्धम्।

297

नारायणपारम्यम्

Beginning:

नारायणस्य सर्वस्मात् परत्वमुच्यते—

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
वेदशास्त्रात् परं नास्ति न दैवं केशवात् परम् ॥

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥
नास्ति नारायणसमो न भूतो न भविष्यति।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥
न प्रमातुं महाबाहुः शक्यो भारत केशवः।
परं ह्यपरमेतस्माद्विश्वरूपान्न विद्यते ॥

End:

श्रीमहाभारते—

तावद्गच्छेत्तु तीर्थानि सरितश्च सरांसि च।
यावन्नाभूच्च भूपाल विष्णुभक्तिपरं मनः ॥
प्रमादात् कुर्वतां कर्म प्रच्यवत्यध्वरेषु यत्।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥

इति।

298

नारायणपारम्यम्

Beginning:

श्रियः पतिर्नारायण एव सर्वस्मात् पर इति सर्वेष्वपि श्रुतिस्मृतिपुराणेषु प्रतिपाद्यते। तैत्तिरीये—

नारायण परं ब्रह्म तत्त्वं नारायणः परः।
नारायण परो ज्योतिरात्मा नारायणः परः ॥

इति। तथा यस्मात् परं नापरमस्ति किंचिदित्यादि। ऐतरेयब्राह्मणे—अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता इति। यजुष्यपि—अग्निरवमो देवतानां विष्णुः परम इति। सुबालोपनिषदि—एष सर्वभूतान्तरात्मा दिव्यो देव एको नारायण इति।

End:

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः।
अवश्यं धारयेच्चक्रमग्नितप्तमतन्द्रितः ॥

श्रीविष्णुतत्त्वे—

ब्रह्मचारी गृहस्थो वा वानप्रस्थो . . . .

299

नारायणपारम्यम्

Beginning:

श्रियः पतिं जगत्सृष्टिस्थितिसंहारकारिणम्।
प्रपद्ये भक्तरक्षार्थमवतीर्णं परं हरिम् ॥

यद्यपि भगवान्नारायणः पुरुषोत्तमः परं ब्रह्म परं ज्योतिः पर . . . . शब्दैरभिधीयते। सकल-जगत्कारणं सत्संरक्षणायाजोऽपि जायते मुक्तप्राप्यश्चेति सत्संप्रदायः। तथापि शिवादय एव कासु-चिच्छाखासु परत्वेन प्रपञ्चकारणतया मुमुक्षुभिर्ध्येया इति केषांचिन्मन्दमतीनां विप्रतिपत्तिः जायेतापि, अतस्तद्व्युदासाय प्रवृत्तोऽयं ग्रन्थ इति प्रयोजनवानेवायमारम्भः।

End:

किंच, अस्य देवस्य मीढुषो वया विष्णुशेष प्रवृदे हविर्भिः। विदेहदेहरुद्रियं महत्वयासिष्णु-वर्तिरश्विना परापतत् (?) महादेवः सर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूवेति समाराधितात् परम-पुरुषान्नारायणात् प्राप्तमहिमत्वं शिवस्य बहुशः श्रूयते। अस्य तु नारायणस्य तद्वैपरीत्यं श्रूयते। अतो नारायण एव परमकारणं नेशानादिरिति सर्वं समञ्जसम्।

300

नारायणपारम्यम्

Beginning:

अत्रोच्यते—अस्या उपनिषदो न भगवदतिरिक्तपर्यवसायित्वं वक्तुं शक्यम्। तस्मात् तमः संजायते, अव्यक्तमक्षरे लीयते, तमः परे देव एकीभवतीत्यन्यत्र परमकारणीभूतवस्तुजन्यत्वेना-वगतस्य तमसो यस्य मृत्युः शरीरं यो मृत्युमन्तरे संचरन् यं मृत्युर्न वेद एष सर्वभूतान्तरात्मा-पहतपाप्मा दिव्यो देव एको नारायण इति वाक्येन नारायणपरत्वावगमात्। मृत्युशब्दो हि यस्या-व्यक्तं शरीरं यस्याक्षरं शरीरमित्यनन्तरं यस्य मृत्युः शरीरमित्याम्नानेन स्थानप्रमाणेन तमोवाचकः। तमो वा इदमेकमास। तत्परेणेरितं विषमत्वं प्रयातीति वाक्यपर्यालोचनया गुणसाम्यावस्था प्रकृतेरेव। तमःशब्दार्थश्च . . . तस्याजन्यत्वायोगेन तमः संजायत इत्यस्य गुणवैषम्यावस्थायोग्यता-पादकात्यन्तविलीनत्वावस्थात्यागमात्रपरत्वात् तादृशतमःशरीरकप्रेरणादेव उत्तरभाविगुणवैषम्यावस्थाया उत्पत्तेरुत्थितत्वेन नारायणैकनिष्ठत्वस्य स्फुटतरं प्रतीयमानत्वात्।

End:

तस्मात् तापनीयोपनिषत् भगवत्पारम्यप्रतिपादनपरेति सिद्धम्। तदुक्तमाचार्यपादैः—ताप-नीयरहस्यानां सारः कामासिकाहरिरिति। एवं भूयसीभिः श्रुतिभिः भगवत्पारम्यप्रतिपादनात् क्वचित् श्रुतिषु शिवहिरण्यगर्भेन्द्रादिकारणत्वप्रतिपादनेऽपि तेषां जनिमत्त्वादिश्रवणेन तासामयोग्यार्थत्वात् नारायणस्यैव सर्वोत्तमत्वं सिद्धम्। ननु

301

निक्षेपचिन्तामणिः

An original treatise on Śrīvaiṣṇavism stressing the importance of Prapatti or Nikṣepa, following Vedāntadeśika's *Nikṣeparakṣā*, *Rahasyatrayasāra*

and other minor Rahasya works. The author belonged to the Ātreya family and was a resident of Kumbakonam and pupil of Vedāntarāmānujamuni (18th cent.), popularly known as Sākṣātsvāmin. He had three Saṃnyāsin-s for his pupils and hence he is known as the founder of the Munitrayasaṃpradāya. His other works are: *Rahasyatrayasāravyākhyā Uttarasārāsvādinī*, *Jayantīnirṇaya* and *Śārṅgapāṇistava*.

Beginning:

अखिलभुवनरक्षासाधनायावतीर्णे
कुमतिकलिविलासध्वान्ततिग्मांशुजाले ।
निरवधिकरुणाब्धौ वेदाचूडागुरौ मे
भवतु परमभक्तिः श्रीनिधौ वेंकटेशे ॥
क्षरन्ती सायुज्यं झटिति जगतां पापमखिलं
क्षिपन्ती संतापं द्रुतमपनयन्ती शुभगुणान् ।
वहन्ती मुर्ध्ना श्रीश्रुतिमकुटरामानुजमुने-
श्चरन्ती न्यासाख्या मनसि मम विद्या निवसतात् ॥
अस्मद्देशिकतद्गुरून् श्रुतिशिरश्चूडार्यरामानुजौ
रङ्गेशं रघुपुंगवानुजगुरुं श्रीमन्नतार्तिच्छिदम् ।
श्रीरामानुजपूर्णयामुनमुनीन् रामारविन्देक्षणौ
नाथश्रीशठकोपसैन्यरमणश्रीश्रीपतीन् भावये ॥
आत्रेयकृष्णार्यमथागमान्तरामानुजार्यं गुरुसार्वभौमम् ।
श्रीरङ्गनाथं च गुरुं प्रणम्य निक्षेपचिन्तामणिमातनोमि ॥
आचार्यचरणैरुक्तान् न्यासाङ्गाङ्गयादिगोचरान् ।
विशेषान् विप्रकीर्णान् संदर्शयामि यथामति ॥

तत्र निक्षेपन्यासापरपर्यायप्रपत्तिविद्याया अङ्गानि—आनुकूल्यस्य संकल्पः, प्रातिकूल्यस्य वर्जनम्, कार्पण्यम्, महाविश्वासः, गोप्तृत्ववरणं चेति पञ्चविधानि । सात्त्विकत्यागरूपाङ्गं तु निवृत्तिधर्मसामान्यप्रयुक्तम् । अङ्गाङ्गिसाधन . . . ङ्गम् ।

End:

अन्यथा लोकसमीक्षाजनितप्रत्यवायापत्तेः । इदं . . . प्रपन्नस्य बुद्धिपूर्वं . . . पानां बहूनां . . . विशिष्योपरि ज्ञाने जन्म प्रभृति यत्किंचित्

302

निक्षेपरक्षा

An important Śrīvaiṣṇava work dealing with Nikṣepa or Prapatti, accepted as one of the means of *mokṣa*. This is one of the five Rakṣā

works of Vedāntadeśika, the others being the *Pāñcarātrarakṣā, Saccaritrarakṣā, Rahasyarakṣā* and *Gītārthasaṃgraharakṣā.*

Beginning:

प्रणतिं वेंकटेशस्य पदयोर्विदधीमहि ।
यदुक्तयो यतीन्द्रोक्तिरहस्यानां रसायनम् ॥
संसाराध्वगतागतश्रमहरः सर्वावगाह्यः स्वयं
श्रीसंश्लेषसमुल्लसद्घनरसः शीतस्तटाको महान् ।
नेदिष्ठेन महापथेन सुगमो येषां प्रसादादभूत्
तीर्थं तत्र शुभं प्रकाशयतु नस्तेभ्यो गुरुभ्यो नमः ॥
प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।
हस्तः श्रीरङ्गभर्तुर्मामव्यादभयमुद्रितः ॥

स्थितं तावत्—शरीरबाह्याभ्यन्तरकरणप्राणधिषणाविलक्षणः पारलौकिकसुखदुःखोदर्कानुभवयोग्यः, परमपुरुषनित्येच्छातन्त्रितस्वातन्त्र्यपारतन्त्र्यः, अनादिकर्मप्रवाहहेतुकचतुर्विधशरीरप्रवेशजनिततत्तदात्माभिमानसंतन्यमानावर्जनीयदुःसहदुःखसंततिसहस्रसंततः, सांसिद्धिकसम्यगध्यक्षयुगपदध्यक्षितसमस्तवस्तुवास्तवेनापि स्वच्छन्दपञ्चकृत्यनित्यशक्तिसंपदापि सर्वजननिरुपाधिकपरमसुहृदापि।

End:

एतेन नित्यनैमित्तिकानपि धर्मान् परित्यज्य मद्यजनैकशेषमदेकध्यानादिपरो भवेति यादवप्रकाशोक्तमपि निरस्तम् ; भावार्थान्तरस्फौट्येन पूर्वश्लोकार्थप्रत्यभिज्ञाविरहात् , समाख्यादिभेदाच्च भेदसिद्धेः, प्रशंसामात्रस्य प्रयोजनमान्द्यात्, अधिकस्य चानुपदेशात् । अतः समस्ताभिमतसाधनस्वतन्त्रप्रपत्तिविषय एवायं श्लोकः।

सुदुष्करेण शोचेद्यो येन येनेष्टहेतुना ।
स स तस्याहमेवेति चरमश्लोकसंग्रहः ॥

इति ।

अङ्कूरत्परभक्तिकुङ्कुमलताकाश्मीरकेदारिकां
जीवातुं जरदन्धपङ्गुबधिरप्रायात्मनां प्राणिनाम् ।
निष्प्रत्यूहषडङ्गयोगनिगमप्रासादनिःश्रेणिकां
नित्यं चेतसि धारयन्तु सुधियो निक्षेपरक्षामिमाम् ॥
विवृतमिह रहस्यं यन्मया गोपनीयं
स्खलितमपि यदीषद्भूयसा वा तदेतत् ।
निजमहिमविशेषप्रेममात्रेण नाथः
क्षमत इति विचिन्त्य क्षन्तुमर्हन्ति सन्तः ॥

गुरुचरणसपर्यास्वादवैदेशिकानां
प्रलपितमवधूय प्राक्तनेनाध्वनैव ।
व्यवृणुत परमार्थं वेंकटेशः प्रजानां
निगमगिरिनिगूढं न्यासविद्यानिधानम् ॥

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु निक्षेपरक्षा संपूर्णा ।

Deals with the following topics:

उपोद्घातः, स्वरूपानुपपत्त्युद्भावनम्, लक्षणानुपपत्त्युद्भावनम्, अनुष्ठानानुपपत्त्युद्भावनम्, विध्यनुपपत्त्युद्भावनम्, निषेधोद्भावनम्, ऐक्योद्भावनम्, अशक्त्युद्भावनम्, अख्यात्युद्भावनम्, संप्रदायविरोधोद्भावनम्, स्वरूपसमर्थनम्, लक्षणसमर्थनम्, अनुष्ठानसमर्थनम्, विधिसमर्थनम्, निषेधभङ्गः, ऐक्यभङ्गः, अशक्तिभङ्गः, अख्यातिभङ्गः, संप्रदायविरोधभङ्गः ।

303

An important Viśiṣṭādvaita logical treatise. The author was the son of Padmanābha of the Ātreya family of Kanchipuram and maternal uncle and preceptor of Śrī Vedāntadeśika. He was also called Vādihaṃsāmbuda. He was the pupil of Vātsya Varadācārya alias Naḍādūr Ammāḷ and co-pupil of Sudarśanācārya, the celebrated author of the *Śrutaprakāśikā*. He was the preceptor of Śrī Vedāntadeśika (13th century). According to tradition, Ātreya Rāmānuja wrote three works, the other two being, according to Das Gupta, *Sarvadarśanaśiromaṇi* and *Mokṣasiddhi*. Das Gupta's (*HIP*, III, p. 118) attribution of the work *Divyasūriprabhāvadīpikā* to this author is however not acceptable as it was written by a recent author Vedāntarāmānuja.

304

A critical treatise on the Nyāya philosophy, whose special value is in showing that the *Nyāyasūtra-s*, though they were rejected by the *Brahmasūtra* of Bādarāyaṇa (II. 1. 13), can be interpreted so as not to be opposed to the principles of Vedānta philosophy. The author cirticizes the commentaries of Vātsyāyana and Udayana on the *Nyāyasūtra*.

306

न्यायपरिशुद्धिव्याख्या निकषा

The author (16th century) was the pupil of Ahobalācārya and Parāṅkuśayati, known as Ṣaṣṭha Parāṅkuśasvāmin of Ahobalamaṭha.

Beginning:

शब्दाध्यायमारभते—अथेति । हेतुहेतुमद्भावसंगतिमाह—अनुमोदयमिति । तयोर्मध्ये संस्थितम् ; अनुमानस्मृत्योर्मध्ये । इह; हेतुसमाप्त्यनन्तरप्रकरणे । इदानीम् ; हेतुरूपानुमानस्य समाप्तत्वात् अनन्तरमित्यर्थः । ननु हेतुहेतुमद्भावः कथं शब्दानुमानयोरिति चेत् ; उच्यते—अङ्गुल्या निर्दिश्य पदार्थं तत्पदार्थव्युत्पत्तेः, व्याप्तेरपि प्रत्यक्षसापेक्षत्वात् प्रत्यक्षस्य सर्वहेतुत्वम् ।

End:

अत एव ज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिं चाहेत्युत्तरत्रोक्तम् । अस्तु तस्याप्यर्चिरादिगतिरिति चेन्न ; अप्रतीकालम्बनानिति विशेषितत्वात् । इदमप्यप्रतीकालम्बनमिति चेन्न; मनआलम्बनस्याप्यप्रती

307

न्यायपरिशुद्धिव्याख्या न्यायसारः

The following verses are found after the colophon:

यदुक्तेरुल्लासः कविकथकदर्पप्रशमनो
यदीयाङ्घ्रिश्रद्धा प्रगुणयति तत्त्वाध्यवसितिम् ।
प्रतिष्ठा तर्काणां भवति च यदूरीकरणतः
स वेदान्ताचार्यः शमयतु ममाघं प्रतिमुखम् ॥
प्रवृद्धा भक्तिश्चेद्भवति परमाचार्यपदयो-
र्वयं तद्भक्तत्वादभिमतिपदं वा यदि मताः ।
तदा दोषादर्शिप्रणयरससारेण मनसा
परिग्राह्येयं स्यात् कृतिरनघभावा सुमनसाम् ॥

309

न्यायपरिशुद्धिव्याख्या सन्न्यायदीपिका

Beginning:

वन्देऽद्वन्द्वं द्वन्द्वं श्रितपरतन्त्रं निदानमखिलानाम् ।
दशरथजनकापत्यं स्थिरवाणीमौलिभूषणं किमपि ॥

वकुलभूषणपादसरोरुहप्रवणमानससंयमिशेखरम् ।
कलयतो निगमान्तगुरोः पदे कृतधिये करवै गुरवे नमः ॥
श्रीश्रीनिवासयोगीन्द्रचरणाम्भोजमाश्रये ।
कटाक्षान् वीक्षते यस्य रक्षितुं सर्वरक्षकः ॥
लक्ष्मीकुमारतातयदेशिकवंश्येन कृष्णतातेन ।
न्यायपरिशुद्धिटीका क्रियते सन्न्यायदीपिकाभिख्या ॥
क्वाचार्यपदसूक्तिः क्व च मे स्थूला मितंपचा बुद्धिः ।
श्रीसूक्तिभक्तिकलितं साहसमेतद्बुधोत्तमैः सह्यम् ॥

प्रारिप्सितग्रन्थाविघ्नपरिसमाप्तिप्रचयगमनादिप्रयोजनाय विरचितं गुरुनमस्काररूपं मङ्गलं शिष्यशिक्षायै शिष्याणामनुषङ्गतो मङ्गलसिद्धये च ग्रन्थतो निबध्नंश्चिकीर्षितं प्रतिजानीते—पत्युरिति ।

End:

मत्तः स्मृतिर्ज्ञानमपोहनं च इत्याद्युक्तेरिति भावः । यस्य भगवतः क्रुधा निग्रहसंकल्पेन पुंसः अत्याहितं महाभयम् । नित्यैश्वर्यमहोदधिः अपरिच्छिन्ननित्यैश्वर्यः । निश्रेयसाय मोक्षायेति ।

Colophon:

इति श्रीमन्महामहोपाध्यायैः तन्त्रचतुष्टयपारावारपारीणैः श्रीकृष्णतातार्यैः विरचितायां श्रीमन्न्यायपरिशुद्धिव्याख्यायामनुमानाध्याये चतुर्थं प्रमाणाभासाह्निकम् । संपूर्णश्चाध्यायः ।

310

न्यायरत्नावलिः

A criticism of the Ānandatāratamya of the Mādhva-s. The author who belonged to the Śrīvatsa family was the son of Koneṭyambā and Ādivarāhācārya (younger brother of Vedāntācārya) and grandson of Veṅkaṭācārya. He mentions his paternal uncle Mahāvedāntācārya. His other works are: *Vedāntakaustubha, Siddhāntacandrikā, Mahābhāratatātparyarakṣā.*

Beginning:

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

अथ न्यायरत्नावली—

स्वामी समस्तजगतामपि यः पुरासौ
दूतो बभूव विनतस्य मृदङ्गकेतोः ।

स्वां दर्शयन् प्रणतकिंकरतां जनानां
श्रेयः स मे दिशतु वृष्णिकुलाधिराजः ॥ १ ॥
यद्भक्तिरेव निखिलानि फलानि सूते
यत्पादपङ्कजयुगं धनमस्मदीयम् ।
यद्वन्दिनो निगममौलिगणाः समस्ताः
देवः प्रसीदतु स मे करिशैलसङ्ज्ञी ॥ २ ॥
श्रीमदादिवराहार्यान् वेंकटेशगुरोः सुतान् ।
वन्दे येषां प्रसादेन वस्तुभावं गतोऽस्म्यहम् ॥ ३ ॥
वेंकटेशगुरुं भक्त्या प्रपद्येऽस्मत्पितामहम् ।
अनवद्यगुणैर्यस्य च्छात्रैः पृथ्वी परिष्कृता ॥ ४ ॥
अस्मद्गुरोर्गुणगणान् हृदि भावयामः
श्रीवेंकटार्यचरणौ शरणं भजामः ।
वेदान्तदेशिकपदाम्बुजमाश्रयामः
श्रीमत्पतींन्द्रचरणौ मनसोद्वहामः ॥ ५ ॥
लक्ष्मीसहायपदपङ्कजभक्तिभाजो
निर्धूतसंसृतिभयाः कृपया मुरारेः ।
साम्यं व्रजन्ति परमं गतजन्मशङ्का
इत्यागमैकशरणाः प्रवदन्ति सन्तः ॥ ६ ॥
न्यायाभासैर्मुग्धितमतयो मध्वसिद्धान्तनिष्ठा
मुक्तानन्दान् कतिचन जगुस्तारतम्योपपन्नान् ।
तेषां दर्पं विबुधपरिषत्प्रीतयेऽद्य क्षिपामः
पश्यन्त्वार्या विमलमनसः प्रेमपूर्वं कृतिं मे ॥ ७ ॥
न्यायरत्नावली सेयं कुमतध्वान्तसंततिम् ।
विलोपयति धीराणां मण्डनाय च कल्पते ॥ ८ ॥

अत्र केचित्—यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥

End:

न च साधनवैषम्यान्मुक्तौ वैषम्यसंभवः ।
अत्यर्थप्रीतिरूपत्वं साधनस्याभ्युदीरितम् ॥
तारतम्यपरा या च परैः स्मृतिरुदीरिता ।
सा तु श्रुतिविरुद्धत्वान्न प्रमाणमिति स्थितिः ॥
सालोक्यादिपरा यद्वा तारतम्यपरा स्मृतिः ।
तत् सर्वथापि मुक्तानां भोगसाम्यं व्यवस्थितम् ॥

Colophon:

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसंप्रदायप्रवर्तकपरवस्तुवेंकटदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रमहावेदान्ताचार्यानुजश्रीमदादिवराहाचार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य कोनेट्यम्बागर्भसंभवस्य वेदान्ताचार्यस्य कृतिषु न्यायरत्नावल्यां द्वितीयः परिच्छेदः।

313

This Prakaraṇa is divided into six Pariccheda-s: Triguṇadravya, Jīva, Īśvara, Nityavibhūti, Buddhi and Adravya. It quotes the *Tattvaprakāśa*, *Tattvasāra*, *Āgamaprāmāṇya*, *Tattvaratnākara*, *Prajñāparitrāṇa*, *Nītimālā*, *Ṣaḍarthasaṃkṣepa* and *Gītābhāṣya*.

318

न्यायसिद्धाञ्जनव्याख्या

Beginning:

नेत्याद्यैक्यश्रुतिभेदनिषेधकश्रुतयः कुप्येयुरित्याशङ्क्याह—तत्रेति। विशिष्टैक्यमिति। आदिपदेन प्राधान्यादिकं गृह्यते। समस्तप्रमाणेति। पृथगात्मानं प्रेरितारं च मत्वा, ज्ञाज्ञौ द्वावजावीशनीशौ, द्वा सुपर्णा सयुजा सखाया, यस्यात्मा शरीरं यस्य पृथिवी शरीरं यस्य तमः शरीरम्, संयुक्तमेतत् क्षरमक्षरं च, व्यक्ताव्यक्तं हरते विश्वमीशः, क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः,

प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया।
विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ॥

इत्यादिशास्त्राणाम्।

End:

तत्त्ववैपरीत्यं वेति। सुदर्शनादेः पारम्यं भगवतोऽपारम्यमिति वा, परापरभाववैपरीत्योक्तिनिबन्धनं यन्त्रशास्त्राप्रामाण्यं वा न शङ्कनीयमित्यर्थः।

Colophon:

इति न्यायसिद्धाञ्जनव्याख्याने ईश्वरपरिच्छेदस्तृतीयः।

319

न्यासविंशतिः

Twenty verses on Nyāsa or Prapatti.

Beginning:

सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम्।

डम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥

End:

श्रुत्या स्मृत्यादिभिश्च स्वयमिह भगवद्वाक्यवर्गैश्च सिद्धां
स्वातन्त्र्ये पारतन्त्र्येऽप्यनितरगतिभिः सद्भिरास्थीयमानाम् ।
वेदान्ताचार्य इत्थं विविधगुरुजनग्रन्थसंवादवत्या
विंशत्या न्यासविद्यां व्यवृणुत सुधियां श्रेयसे वेंकटेशः ॥

323

न्यासविंशतिः सव्याख्या

Beginning:

श्रीमान् वेंकटनाथार्यः+संनिधत्तां सदा हृदि ॥
श्रुतिस्मृत्यादितात्पर्यनिरूढा न्यासविंशतिः ।
स्वयं व्याक्रियतेऽस्माभिर्दिङ्मात्रेण सदिच्छया ॥

प्रपत्त्यपरपर्यायां न्यासविद्यां संजिघृक्षुः प्रथमं तत्त्वज्ञानादिमुखेन तदधिकारहेतुभूतमाचार्य-संग्रहमाह—सिद्धमिति । एतेषामाचार्यगुणानां प्रमाणानि तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादीनि । समयनियतया यथाकालं प्रवृत्तया ।

End:

उक्तमुपायं सुग्रहणाय स्वानुष्ठानमुखेन निगमयति—संसारेति । अत्र सर्वशक्तौ परमकारुणिके सर्वाभिमतवरप्रदे न्यस्तभरत्वात् निर्भरत्वनिर्भयत्वसिद्धिः । अयमत्र मुमुक्षोरनुशासनीयसंग्रहः—सदाचार्योपसत्तिपूर्वकं समन्त्रकं सम्यग्ज्ञानं संपाद्य गुरुतरोपायान्तरनिष्पादनाद्यनुगुणज्ञानशक्तिविरहात् निर्विण्णः स्वशक्यसकृत्कर्तव्यलघूपायपरामर्शेन प्रत्यवस्थापितः फलसङ्गकर्तृत्वत्यागयुक्तसाङ्गभरन्यासेन कृतकृत्यः स्वीकृतभरं शरण्यं श्रियः पतिमवलोक्य निर्भरो निर्भयश्च स्वयंप्रयोजनकैंकर्येण सुखं वर्तेत ।

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यासविंशतिव्याख्या संपूर्णा ।

325

न्यासविंशतिव्याख्या

Beginning:

आत्रेयरामानुजदेशिकेन्द्रपादारविन्दप्रवणात्मवृत्तिम् ।
समस्तकल्याणगुणाम्बुराशिं वेदान्तविद्यागुरुमाश्रयामः ॥

सकलश्रुतीतिहासपुराणेष्वन्तःसारतया प्रतिपाद्यमानां भगवत्पराङ्कुशपरकालनाथयामुनयतिवरादि-सकलदेशिकवरपरिगृहीतां प्रपत्तिविद्यां संग्रहीतुकामो भगवान् श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ता-चार्यापरनामधेयः विंशत्यब्दे विश्रुतनानाविधविद्यः त्रिंशद्वारं श्रावितशारीरकभाष्यः कवितार्किकवर-कण्ठीरवो भगवत्समाराधनोपयुक्तघण्टावतार इति बुधजनोत्प्रेक्षणीयवैभवोऽष्टोत्तरशतप्रबन्धप्रकाशित-परावरतत्त्वयाथात्म्यः श्रीवेंकटदेशिकः प्रपन्नजनसार्थं कृतार्थयितुं प्रपत्त्यधिकारहेतुभूतसदाचार्यवरण-माह—सिद्धं सत्संप्रदायेत्यादिना। यद्यपि वेदान्ताचार्यप्रणीतमेव व्याख्यानं तत्र विद्यते, तथापि तस्य दुर्ग्रहार्थत्वात् कात्स्न्र्येन श्लोकार्थकथनाभावाच्च तदनुसारेणैव यथासंप्रदायं व्याख्यास्यते इत्यर्थवानेवायमस्मदारम्भः।

End:

निर्भरो निर्भयश्च स्वयंप्रयोजनकैंकर्येण सुखं वर्तेत ।

Colophon:

श्रीमन्नारायणमुनिः संप्रदायानुसारतः।
टीकां विपश्चितां प्रीत्यै चकार न्यासविंशतेः॥
रविसदृशतनुः श्रीवेंकटाचार्यपादः
करकलितपवित्रः सोत्तरीयः स्वभावात्।
सरसिजमणिमालामूर्ध्वपुण्ड्रं दधानो
मम मनसि विभाते संततं संनिधत्ताम्॥

327

न्यासविद्यापरिष्कृतिः

The author was the son of Veṅkaṭācārya and grandson of Varadācārya of Vādhūlagotra and Kandāla family. He was a resident of Yādavādri or Melkote in Mysore State and the pupil of Pādukāsevakarāmānujayati. He refers to the *Śrītattvasiddhāñjana* of Vedāntarāmānujamuni also called Sākṣātsvāmin, *Nikṣepadīpa*, *Nyāsavidyādarpaṇa* and *Nikṣepacintāmaṇi*.

Beginning:

जयन्ति जगतां पत्युर्जगद्रक्षणदीक्षिताः।
मूर्ता इव दयापूरा अस्मदाचार्यपङ्क्तयः॥
पोपोष्टि ज्ञानदृष्टिं सततमविकलं चाकशीति प्रकाशैः
पेपेष्टच्यन्धं तमस्तद्दिशि दिशि विबुधान् रञ्जयन् बोभवीति।
वर्वृष्टर्यानन्दधारां हृदि भुवि दिनकृत् कोऽपि वर्वर्ति शिष्यै-
र्वेंवेष्टुर्वीं यतीन्द्रोऽद्भुतमहिमनिधिः संततं जेजयीति॥

जयति निगमचूडादेशिकेन्द्रो जगत्यां
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।
तुरगवदनहेषाघोरणी चेच्छिदीति
श्रुतिशिखरविपक्षान् यस्य सूक्तिच्छलेन ॥
तुरंगमोत्तमाङ्गसद्वचस्तरङ्गिणीधवो-
त्तरङ्गभङ्गपूर्णिमाकुरङ्गलक्ष्मसूक्तिकः ।
दुरङ्गजादिसंगतिं नुदन्नपाङ्गलीलया-
स्तु रङ्गनाथयोगिराड् मदन्तरङ्गरङ्गके ॥
यत्सूक्तिर्न्यासविद्याप्रतिकृतिरमला द्रामिडीभाष्यरत्नं
भूषापेटी श्रुतीनां श्रुतिशिखरगुरोः सूक्तितात्पर्यरत्नम् ।
श्रीमच्छीतत्त्वसिद्धाञ्जनमखिलकलासारसर्वस्वमस्यं
स श्रीवेदान्तरामानुजमुनितिलको मानसे मेऽस्तु नित्यम् ॥
भक्तेः पक्तिर्विरक्तेः परिणतिरमलज्ञानसाम्राज्यलक्ष्मी-
रन्येषां सद्गुणानामविकलवितति‌र्ब्रह्मविद्याप्रतिष्ठा ।
डम्भेर्ष्याविप्रलम्भाद्यपगुणपदवीनित्यवैदेशिको मे
श्रीपादूसेविरामानुजमुनितिलको मानसे संनिधत्ताम् ॥
वाधूलान्वयदुग्धाब्धिराकाचन्द्रमसोऽन्वहम् ।
श्रीमतो वेंकटार्यस्य चरणौ शरणं श्रये ॥
कवितार्किकसिंहस्य देशिकेन्द्रस्य सूक्तयः ।
दिशन्तु नित्यं प्रज्ञां मे न्यासयाथात्म्यगोचराम् ॥
निक्षेपदीपश्रीन्यासविद्यादर्पणदर्शिताः ।
स्फुरन्तु मेऽर्था निक्षेपचिन्तामणिविभूषिताः ॥
अस्मद्गुरुभ्य आरभ्य नत्वा गुरुपरंपराम् ।
महतामाज्ञया कुर्वे न्यासविद्यापरिष्कृतिम् ॥

श्रीमन्न्यासविद्याया अङ्गानि आनुकूल्यसंकल्पप्रातिकूल्यवर्जनकार्पण्यमहाविश्वासगोप्तृत्ववरण-रूपाणि पञ्चविधानि संनिपत्योपकारकाणि सर्वाधिकारिसाधारणानि । अङ्गि तु रक्षाभरसमर्पणरूपम् । मोक्षार्थिनां तु स्वरूपभरफलसमर्पणरूपदलत्रयात्मकम् । सात्त्विकत्यागरूपाङ्गान्तरं तु अङ्गप्रधान-साधारणमिति सिद्धान्तः ।

End:

इत्थं देशिकसूक्तीनां गुरुपर्वक्रमागता ।
गुरुभिर्दर्शिता सम्यग्व्यलेखि स्वरसार्थता ॥
विमृश्य तदशेषेण सन्तः सारज्ञशेखराः ।
संगृह्णन्तु विशेषेण प्रसीदन्तु च नित्यशः ॥

न्यासविद्यापरिष्कृत्या परिष्कृतपदाम्बुजः ।
प्रीयतां श्रीहयग्रीवो दयन्तां मम देशिकाः ॥

Colophon:

इति श्रीमद्वाधूलकुलतिलकपदवाक्यप्रमाणपारदृश्वमूर्धन्यवेदान्तयुगलनिखिलरहस्यजालनिषद्या-यितहृदयकमलश्रीवरदाचार्यात्मजश्रीवेंकटाचार्यतनयेन श्रीमत्संयमिसार्वभौमविजयस्थानापरनामधेय-श्रीयादवाद्रिनिवासिना श्रीपादुकासेवकरामानुजसंयमीन्द्रकरुणाकटाक्षसमधिगतोभयवेदान्तनिखिल-रहस्यहृदयेन तच्चरणारविन्दसमर्पितस्वात्मरक्षाभरेण श्रीवरददासेन विरचिता श्रीमन्न्यासविद्यापरिष्कृतिः संपूर्णा ।

328

न्यासविद्याविचारः

A tract on Nyāsa or Prapatti according to Vedāntadeśika.

Beginning:

प्रणम्य वेणुगोपालं नीलमेघविपश्चिता ।
ज्ञाप्यते न्यासविद्याया मोक्षसाधनतास्थितिः ॥

स्वतन्त्रप्रपत्तिः भक्तिवदेव मोक्षं प्रति साक्षाद्विना तद्विषमतया साधनं वा, तद्वदेव साक्षाद्वेति विप्रतिपत्तिः । विषमतयेति नाम भरस्वीकारापरपर्यायोपायान्तरस्थानापत्तिद्वारेति । भरस्वीकारस्य शरणशब्दार्थोपायत्वं दुष्करकर्मयोगादिस्थानापन्नत्वपर्यवसितम्

End:

एतत् सर्वं साक्षात् प्रपत्तिमोक्षहेतुत्वानुकूलतयैवाचार्यैः कण्ठतः स्थापितत्वेन तद्विषये अस्माकं प्रतिपाद्यं किमपि नास्त्येव । तत् सर्वं दर्शितम् । तत्रापि प्रकृतं युष्मद्धृदयस्थं भगवदुपायान्तरस्थाना-पन्नत्वमेव मुख्यम् । तदनुगुणतयैव प्रपत्तिप्रसादनत्वोक्तिमोक्षहेतुत्वादिकं यथाकथंचिद्गौणतया परंपरया नेयमिति तत् साक्षाद्देशिकनिर्वाहप्रतिभटं दृश्यते ।

329

न्यासविद्याविजयः

This work supports the view held by Vedāntadeśika that Prapatti should be offered to Goddess Śrī as well as to Lord Nārāyaṇa and refutes the view held by Pillai Lokācārya that it should not be directed to Śrī.

The author Śrīnivāsācārya was the son of Śrīraṅgarāja of Āṇḍān Śrīśaila family (see No. 516 below, for his other work).

Beginning:

श्रीभाष्यकारसिद्धान्तरत्नाकरसुधांशवे ।
नमो वेदान्तगुरवे दुर्मतध्वान्तभानवे ॥
श्रीरङ्गराजगुरुपुंगवमस्मदार्यं रामानुजोत्तरपराङ्कुशमस्य मान्यान् ।
श्रुत्यन्तसूरियतिशेखरयामुनेयान् नाथं शठारिमपि नौम्यथ दंपती तौ ॥
श्रीमद्वेंकटनाथस्य दिव्यघण्टापथे भ्रमन् ।
सदुक्तिमन्त्रैरस्माभिर्निरस्यो ब्रह्मराक्षसः ॥
हयवदनाननाब्जमधु दुग्धपयोधिसुता-
वदनसरोजगन्धमखिलागमसिन्धुसुधाम् ।
शठरिपुभाष्यकृत्प्रभृतिकल्पकशाखिफलं
श्रुतिशिखरार्यसूक्तिमनुभूय भवामि कृती ॥

अत्र खलु—

माधवः परमानन्दं त्यक्त्वा वैकुण्ठमुत्तमम् ।
स्वामिपुष्करिणीतीरे रमया सह मोदते ॥
दक्षिणे स्वामितीर्थस्य तीरे नीरजलोचनः ।
श्रीवेंकटेशो भक्तानां वरदः श्रीनिकेतनः ॥

Colophon:

इति श्रीमदाण्डान्श्रीशैलवंशकलशोदधिकौस्तुभश्रीमच्छ्रीरङ्गराजमहादेशिकतनूजस्य तदेकदैवतस्य श्रीनिवासदासस्य कृतिषु न्यासविद्याविजये विषयादिपरिशोधनाधिकारः प्रथमः ।

End:

न च भगवत एव उपायान्तरस्थाननिविष्टत्वेन श्रियः कथं तत् स्यादिति वाच्यम् ; भगवदुपायान्तरस्थाननिविष्टत्वं शरणागतिविद्यायां वेद्याकारः, श्रियस्तु न तथेति एतावद्विशेषसत्त्वात् । अत एव पुरुषकारप्रपदनानपेक्षापूर्वकमुक्तमकिंचनपुरुषकारत्वमाचार्यत्वं चेति नार्थान्तरम् ; किं त्वेकमेव । अतः कार्यदशायां भगवत उपायत्वम् ।

The scribe adds the following stanzas at the end:

अस्मिन् विक्रमवत्सरे मिथुनगे मित्रे वलक्षे शुभे
पक्षे विष्णुतिथौ शनैश्चरदिने मे शक्रवह्न्योर्दिवा ।
अस्मत्सद्गुरुकृष्णतातसुधियः पादाम्बुजध्यानतः
शीघ्रं लेखनतः समाप्तिमगमच्छ्रीन्यासविद्याजयः ॥

तर्कव्याकृतितन्त्रवेदशिखराकूपारपारं गतः
श्रीमान् कृष्णगुरुः करोतु भगवान् नारायणः स्वस्ति नः ।
यस्यात्मा हृदयं यदन्वयमहावाराशिरत्नं महान्
गोपालाभिधतातसूरिरभवन्मल्लेखने प्रेरकः ॥
श्रीन्यासविद्याविजयलेखनाख्येन कर्मणा ।
भगवान् प्रीयतां देवः सर्वकारणकारणम् ॥
शान्तिर्दान्तिर्विरक्तिर्विमलहृदयता सत्यशुद्धी मृदुत्वं
चातुर्यं वादयुद्धे पटुमतिविलसद्युक्तिशस्त्रैर्जयित्वम् ।
आस्तिक्यं ब्रह्मनिष्ठा श्रितजनविषयेऽनर्घकारुण्यमेतत्
सर्वं श्रीकृष्णसूरौ प्रविलसति सदा जानकीनाथभक्ते ॥
पारुष्यकालुष्यदुरुक्तिकुत्सामात्सर्यलिप्साविगुणैर्वियुक्ताः ।
आकल्पमस्मद्गुरवो जयन्तु श्रीशैलवंशाब्धिसुधाकरास्ते ॥
दुरूहशास्त्रार्थनिरूपणैकसामर्थ्यबुद्धिप्रतिभाविशेषैः ।
गुणैरनन्तैः करुणैकमूर्तिश्चिरं स जीयाज्जगतीतलेऽस्मिन् ॥

330

पञ्चमतभञ्जनम्

The work criticizes the principles of Śaivism as explained by Nīlakaṇṭha, Appayadīkṣita, etc. It contains the essence of the arguments advanced by Tātadeśika (16th century) against his opponent in the court of the ruler of Chandragiri. These arguments were cast in the form of a book by his pupil Raṅgarāmānuja, the famous commentator on the Upaniṣad-s, who dedicated it to his preceptor Tātadeśika. Later Tātadeśika revised the work, gave it the title *Pañcamatabhañjana* and handed it over to Raṅgarāmānuja for propagation. Therefore though the work was actually written by Raṅgarāmānuja its authorship is generally attributed to Tātadeśika since he revised and named it. (Vide *Lakṣmīkumārodaya*, ch. 8, vv. 99 to 101)

Beginning:

कैटभारेः परेशस्य कटाक्षलहरी मयि ।
पारम्यकैरवज्योत्स्नाप्रसूतेयं प्रसादिनी ॥ १ ॥
श्रीशैलपूर्णपादाब्जमाध्व्यां साध्व्यां मनोरथः ।
लग्नो लगति नान्यत्र हर्षजम्बालजर्जरः ॥ २ ॥
भाष्यब्रह्मसुधादोग्धॄन् द्रोग्धॄन् दुर्मतगर्विणाम् ।

भर्तॄन् संयमिनां भाष्यकर्तॄन् मनसि भावये ॥ ३ ॥
त्रय्यन्तदेशिकं वादिधुर्यं तमनिशं भजे ।
रव्यन्तरमिव स्वान्तदर्यन्तरतमोऽपहम् ॥ ४ ॥
वनाद्रीशगुरूत्तंसकृपा मुक्तिपथप्रपा ।
पारम्यव्यक्तिजलधिं तरितुं तरिरेव नः ॥ ५ ॥
तातार्यकलितं हृद्यं **मतपञ्चकभञ्जनम्** ।
सहकृत्व सदा मे स्यादपहृत्याखिलं तमः ॥ ६ ॥
अय्यावार्यगुरुर्यो मे सत्तां जन्मद्वयीमयीम् ।
अजनिष्ट समस्तोऽयं तत्कृपायां कृतो भरः ॥ ७ ॥
तातदेशिकपादाब्जभ्रमद्भ्रमरगीतयः ।
आस्माकीनोक्तिगुम्भानामादिकारणमासताम् ॥ ८ ॥
श्रीमत्तिरुमलाम्बा च **शिङ्गमाम्बा च** मातरौ ।
कारुण्यस्रोतसा चेतः कुर्वाते मेऽतिनिर्मलम् ॥ ९ ॥
पूर्वाचार्योक्तिसुधया निर्णीते परमात्मनि ।
प्रवर्त्यते यो दुर्वृत्तैरर्वाचीनैरुपद्रवः ॥ १० ॥
उन्मूलयितुमुद्युङ्क्ते तमभङ्गुरनीतिभिः ।
अनन्तदेशिककृपासमुल्लासितमानसः ॥ ११ ॥

ननु कैटभारेरेव परेशतया प्राप्यब्रह्मरूपत्वं यदुक्तं तदालोचनीयम् ; ब्रह्मशिवयोरपि क्वचित् मुमुक्षूपास्यत्वप्रतिपादनदर्शनादिति चेदुच्यते । तयोरपि कैटभादिदैत्यकृतापन्निवृत्तेर्भगवदधीनत्वदर्शनात् स एव परमेश्वर इति । तदुक्तम्—दैत्यपीडाद्यापद्विमोचनेति । ननु अथर्वशिखायां शिवस्यैव मुमुक्षुध्येयत्वजगत्कारणत्वादिकं प्रतीयते ।

End:

अयमर्थः श्रीभागवते 'ये भजन्त्यशिवं शिवम्' इति पूर्वमशिवत्वप्रदर्शनेन 'तीर्थेन मूर्ध्नि विधृतेन शिवः शिवोऽभूत्' इति पश्चात् शिवत्वस्य ज्ञापनेन च स्पष्टीकृतः । तव श्रियः इत्यादिवाक्यस्य परोक्तार्थपरत्वे सङ्क्लेशत्वात् अशब्दार्थत्वाच्च स्वत एव स दुष्टः ।

त्वद्भक्तेषु च सद्भक्तिं त्वयि भक्तिं च देहि मे ।
नान्यं वृणोमि देवेश एतदेव हि मे परम् ॥

331

पञ्चमाम्नायसारः

An attempt to prove the supremacy of Viṣṇu on the authority of the *Mahābhārata* which is considered as the fifth Veda and criticizing the

Mahābhāratatātparyasaṃgraha of Appayadīkṣita advocating the supremacy of Śiva. The author was the pupil of Vādhūla Mahācārya alias Doḍḍayācārya of Ghaṭikācala, known as Cholasimhapura.

Beginning:

अथ पञ्चमाम्नायसार आरभ्यते—

. . . . . वेत्रतोत्रं दधानः
सेनाधूलीरुचिरचिकुरः स्यन्दनालम्बिपादः ।
पद्माकान्तः . . . णमहिमा पार्थसारथ्यदक्षः
पायादस्मानखिलजगतीरक्षणे जागरूकः ॥
श्रीरामायणभूषणं दिनकरप्रोद्यत्कुलोत्तारणं
साधूनां भरणं समस्तजगतां प्राणं भवोत्तारणम् ।
साकेताभरणं नतार्तिहरणं सौमित्रिसंतोषणं
सीताया रमणं गतोऽस्मि शरणं रामं जगत्कारणम् ॥
यत्पादाब्जप्रवणमनसां मादृशामात्मनीनाः
संपद्यन्ते सपदि कुहनाशामिकास्तत्त्वबोधाः ।
चक्राधीशं यमिह विबुधाः संगिरन्तेऽवतीर्णं
मज्जीवातुं महितविभवं तं महार्यं नमामि ॥
अल्पीयःश्रुतपूरुषप्रतरणत्रासार्दितं वैदिकं
मार्गं सर्वमवेक्ष्य तद्विवृतये चक्रे सुधीर्भारतम् ।
यस्तत्र प्रकटीचकार परमं नारायणं सर्वतः
सूत्राणि प्रणिनाय तत्प्रमितये व्यासाय तस्मै नमः ॥
यत्तत्वबोधविधुराः सुविपश्चितोऽपि
मुह्यन्ति तस्य विवृतिर्मम साहसेन ।
सद्भिर्मृदुक्रमवचोभरनीतिविद्भिः
क्षन्तव्य एष करुणापरिणाहवद्भिः ॥
आज्ञापयद् घनगुरुः करुणानिधिर्मां
त्वं भारतस्य विवृतिं कुरु मन्नियोगात् ।
ते चक्रराजकरुणापरिणाहभाजः
सर्वस्तदर्थनिचयः प्रतिभास्यतीति ॥
प्रारिप्सितप्रबन्धस्य श्रीनिवासो महागुरुः ।
पञ्चमाम्नायसाराख्यां परया . . . रोत् ॥
तन्मया तन्निदेशेन संयद्वृषभशर्मणा ।
पञ्चमाम्नायसाराख्यः प्रबन्धः क्रियतेऽधुना ॥

End:

ब्रह्म वा इदमग्र आसीत्। तदात्मानमेवावेत् अहं ब्रह्मास्मीति। तस्मात् तत्सर्वमभवदिति-वदर्थवादः। तथाच ब्रह्मशब्दः

332

पदार्थसंग्रहः

A summarized explanation of the Padārtha-s or categories accepted in the Viśiṣṭādvaita school.

Beginning:

प्रपद्य श्रीभाष्यकारचरणाम्भोरुहद्वयम्।
पदार्थसंग्रहं कुर्वे बालानां बोधसिद्धये॥

पदार्थो द्विविधः प्रमाणप्रमेयभेदात्। तत्र प्रमाकरणं प्रमाणम्। यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमा। व्यापारवत् कारणं करणम्। यत् यज्जनयित्वैव यज्जनयति स तस्य तत्र व्यापारः। उत्पत्तिमत् कार्यम्। अनन्यथासिद्धनियतपूर्वभावि कारणम्। तत् त्रिविधम्—उपादाननिमित्तसहकारिभेदात्। अवस्थाश्रय उपादानम्। संकल्पाश्रयो निमित्तम्। तदुभयभिन्नकारणं सहकारि।

End:

अस्मदादिस्पर्शनेन्द्रियग्राह्यविजातीयव्यावृत्तो गुणः स्पर्शः। स च वाय्वादिभूतचतुष्टयवर्ती। स त्रिधा—शीतोष्णानुष्णाशीतभेदात्। अप्सु शीतः। तेजस्युष्णः। क्षितिपवनयोरनुष्णाशीतः।

334

पदार्थसंग्रहव्याख्या

Beginning:

भाष्यकृच्चरणाम्भोजे ध्यात्वा तद्भक्तिचोदितः।
पदार्थसंग्रहमहं व्याकरोमि यथामति॥

चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमाचरितं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् शिष्यावधानाय चिकीर्षितं प्रतिजानीते—प्रपद्येति। प्रपद्य अविघ्नपरिसमाप्त्याद्युपायतयाध्यवसाय। किमर्थमयं ग्रन्थः क्रियत इत्यत आह—बालानां बोधसिद्धय इति। बालानां ग्रहणधारणपटूनां पदार्थतत्त्वज्ञानोत्पत्तिरेवास्य ग्रन्थस्य प्रयोजनमिति भावः। पदार्थं विभजते—पदार्थ इति।

End:

साध्यतावच्छेदकावच्छिन्नसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधन-समानाधिकरणात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वमिति बोध्यम्। एतेन व्याप्तेरुपाधिघटिततया तस्य व्याप्तिघटिततया चान्योन्याश्रय इति निरस्तम्।

338

परतत्त्वनिर्णयः

A short metrical treatise (120 vv.) on the supremacy of Lord Nārāyaṇa. The author offers salutation to the Ācārya-s of the Hārītagotra to which Sudarśanabhaṭṭa, the author of the *Śrutaprakāśikā*, belonged.

Beginning:

येन द्रमिडोपनिषद्दीका कारिभवानुस्मरणाद्धि ।
विदितः कारि . . . . . ॥
. . . . . योगिनाम् ।
श्रीवैष्णवैः सदा चिन्त्यं वन्दे जामातृयोगिनम् ॥
श्रीवैष्णवसुसिद्धा . . . . . ॥
घनदेवेशसर्वात्मवात्सल्यवरुणालयात् ।
जातेन तं भजे नित्यं रामानुजदिवाकरम् ॥
. . सुदृष्टपुंसां
दिव्यौषधं देहभृतां शरण्यम् ॥
मातरं सर्वलोकानां मातरं मम च श्रियम् ।
. . . सर्वकामफलप्रदाम् ।
वन्देऽहं देवदेवं तं श्रीनिवासं सदा हृदा ।
नमामि मूर्ध्ना हरिपाद . .
. . . नमाम्यहं श्रीपतिमात्मना सदा ॥
तत्त्वनिर्णायको ग्रन्थो मनःसंबोधको यथा ।
विरच्यते. . . . . ॥
श्रीनिवासे परे ब्रह्मण्याद्ये वर्तस्व संततम् ।
अये मानस दुष्टात्मभावं . . . . . ॥

End:

कृता मया कृतिरियं देवनायकशर्मणा ।
तनुतां संमुदं विष्णोः प्रभावस्य स्मृतेः सताम् ॥
भाष्यकृद्भाष्यतद्व्याख्याः प्रसीदन्तु . . . . . ।
कृपया विष्णुपारम्यं प्रसीदतु जगद्धितम् ॥
हारीतगुरुपङ्क्तिभ्यो नमोवाकमधीमहि ।
जगदाचार्यभूतेभ्यो विदधामि नमः परम् ॥

Colophon:

देवनायककृतपर . . . . विंशत्युत्तरशतश्लोकी संपूर्णा

339

परतत्त्वनिर्णयः

Beginning:

अथ परतत्त्वं निश्चीयते—अथातो ब्रह्मजिज्ञासेति तापत्रयातुरैरमृतत्वाय ब्रह्म ज्ञातव्यमिति प्रतिज्ञातं सूत्रकारेण। व्याख्यातं च भाष्यकारैः—तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्य इति। श्रूयते च ब्रह्मज्ञानस्य मोक्षसाधनत्वम्—यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति। तत् जगत्कारणत्वेन निर्दिष्टं ब्रह्म छान्दोग्ये सदेव सोम्येदमग्र आसीत् इति सच्छब्देन निर्दिश्यते।

End:

तस्मादनन्तकल्याणगुणो निर्दोषो नारायणः शिवादिशब्दवाच्यः परमात्मा जगत्कारणमिति सर्वमवदातम्।

जगतः परमार्थत्वं तन्मृषात्वनिराकृतिम्।
अविद्यादोषभङ्गं च भेदं विश्वेशयोरपि॥
पारम्यं श्रीनिवासस्य पश्यन्त्यत्र मुमुक्षवः।
अनादिमायासंछन्नकौतस्कुतजिगीषया
द्रव्यजातिगुणादीनां भेदे सति परस्परम्।
स्वरूपमात्रग्रहणं निर्विकल्पकमुच्यते॥
तयोर्गृहीते भेदे तु विशेषणविशेष्ययोः।
स्पष्टो विकल्पो भवति निर्विकल्पादनन्तरम्॥
विशेषणस्य जात्यादेर्ग्रहणं तत्तदिन्द्रियात्।
तत्तदिन्द्रियसंयोगाद्भेदस्य ग्रहणं कुतः॥
विशेषणस्वरूपस्य निर्विकल्पकमग्रहात्।
नास्ति पश्य मृषावादितार्किकैः प्रतिपादितम्॥
भेदो विकल्पात् कस्तर्हि विशेषणविशेष्ययोः।
यदि स्वरूपग्रहणं तदसारं हि तार्किकम्॥
समवायस्याग्रहणं निर्विकल्पविकल्पयोः।
भेदे पश्य मृषावादि . . . . तम्॥

Colophon:

इति परतत्त्वनिर्णयः समाप्तः।

340

परमुखचपेटिका

A refutation of the Śaiva view that the word *nārāyaṇa* found in the scriptures denotes Śiva and not Viṣṇu.

Beginning:

रघुवंशदुग्धजलधौ जातं संतानमाश्रये कमपि ।
अतितुङ्गादपि यस्माद्विनतैरन्यं फलं करग्राह्यम् ॥
सुरभितसमस्तलोकं संयमिवरचरणचन्दनं सेवे ।
छायां श्रयन् यदीयां स्थाणुमपर्णाश्रयं लघूकुरुते ॥
प्राचीनवाचानिचयाञ्चलार्यमाचान्तमोचामदहृद्यवाचम् ।
दुर्वारगर्वान् कुदृशोऽतिखर्वान् कुर्वाणमीडे कुलदैवतं नः ॥
श्रीश्रीवासयतीन्दुर्विलसतु सर्वज्ञशेखरो हृदये ।
यत्पादसङ्गलेशादपसरति तमः प्रकाशते सर्वम् ॥
लक्ष्मीकुमारतातयदेशिकवंशाब्धिशीतकिरणस्य ।
वेंकटगुरोस्तनूजः कृष्णः परमुखचपेटिकां कुरुते ॥

यदुक्तं नारायणशब्दः शिवपरः, शिववृत्तिधर्मावच्छिन्नप्रतिपादकत्वात् यथा शिवशब्द इति । तत्र किमिदं शिवपरत्वम् ? शिववाचकत्वं वा, शिवबोधौपयिकाकाङ्क्षाशालित्वं वा, शिवे साधुत्वं वा, शिवबोधौपयिकतात्पर्यविषयत्वं वा, अन्यद्वा किंचित् । नाद्यः, सिद्धसाधनात् ।

End:

सर्वमिदमभिप्रेत्यानुगृहीतमाचार्यचरणैः—

निःसाधारण्यनारायणपदविषये निश्चयं यान्त्यबाधे
सद्ब्रह्माद्याः समानप्रकरणपठिताः शङ्कितार्थान्यशब्दाः

इति । इत्थं च शिवोत्कर्षपरपुराणादीनां शारीरकस्मृत्यधिकरणनिश्चलीकृतविरोधाधिकरणन्यायेन 'अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम्' इति मात्स्यवचनेनाप्रामाण्यमिति सर्वं समञ्जसम् ।

श्रीकृष्णतातदासं द्वारीकृत्येह देशिकैः कलिता ।
याद्भागवतानां प्रीत्यै परमुखचपेटिका सेयम् ॥

Colophon:

इति श्रीशैलकुलतिलकस्य महामहोपाध्यायश्रीकृष्णतातार्यस्य कृतिषु परमुखचपेटिका संपूर्णा ।

341

पाञ्चरात्रप्रामाण्यम्

On the authoritativeness of the Pāñcarātra system.

Beginning:

भगवच्छास्त्रं च भारतादिषु प्रसिद्धवैभवम् । भारतं तु वक्ष्यते । श्रीवाराहे अष्टषष्टितमेऽध्याये—

पौरुषं सूक्तमास्थाय ये यजन्ति द्विजास्तु माम् ।
. . . जपमास्थाय ते मां प्राप्स्यन्ति ब्राह्मणाः ॥

अलाभे वेदमन्त्राणां पाञ्चरात्रोदितेन वा ।
मार्गेण मां प्रपद्यन्ते ते मां प्राप्स्यन्ति मानवाः ॥

End:

एवं निगदितार्थस्य सतत्त्वं तस्य तत्त्वतः ।
ज्ञायते येन तज्ज्ञानं परमस्य त्रयीमयम् ॥
पूजायां भगवच्छब्दः क्रियते ह्युपचारतः ।
शुद्धे महाविभूत्याख्ये

342

पाराशर्यविजयः

A discourse on the *Brahmasūtra-s* following the *Śrībhāṣya*.

Beginning:

पाराशर्यो दयालुर्जयति बहुविधान् वेदमार्गप्रतीपान्
सम्यक्तर्काख्यशस्त्रैः प्रतिभटजनतागर्वसर्वंकषैस्तैः ।
ब्रह्मण्यैश्वर्यभूती गुणगणवितितिं हर्तुकामान् कुतर्कै-
स्तैस्तैर्दुर्लङ्घ्यमायावितितिविरचितैर्न्यायमार्गप्रहीणैः ॥
वेदापहारिणं दैत्यं मीनरूपी निराकरोत् ।
तदर्थहारिणः सर्वान् व्यासरूपी महेश्वरः ॥
पाराशर्यजयोऽस्माभिः ख्याप्यतेऽद्य सतां मुदे ।
वाधूलश्रीनिवासार्यगुरूणामनुकम्पया ॥

श्रियः पतिरवाप्तसमस्तकामः समस्तकल्याणगुणगणभूषितो भगवानात्मतनूजाय ब्रह्मणे वितीर्णं ब्रह्मशेवधिं वेदबृन्दं दैत्येनापहृतं मीनरूपेणावतीर्य दैत्यं संहृत्य पुनर्ब्रह्मणे प्रदाय तदर्थं कुदृष्टिभिरपहृतं पुनर्व्यासरूपेणावतीर्य कुदृशो निर्जित्य विबुधेभ्यः प्रददौ । अत्र तावदिदं विचार्यते— किं ब्रह्ममीमांसाशास्त्रं द्वैतविषयमुताद्वैतविषयमिति । द्वैतविषयमिति केचित् । द्वितीये शुद्धाद्वैतविषयमिति परे । विशिष्टाद्वैतविषयमिति वेदान्तिनः ।

End:

एतेन सर्वे व्याख्याता व्याख्याताः । एतेन पादचतुष्टयोक्तन्यायकलापेन सर्ववेदान्तेषु जगत्कारणप्रतिपादनपराः सर्वे वाक्यविशेषाः चेतनाचेतनविलक्षणसर्वज्ञसर्वशक्तिब्रह्मप्रतिपादनपरतया व्याख्याताः । व्याख्याता इति पदाभ्यासः अध्यायपरिसमाप्तिद्योतनार्थः ।

Colophon:

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते पाराशर्यविजये प्रथमस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

344

पुच्छब्रह्मवादनिरासः

A criticism of the Advaita view that Brahman is described in the *Taittirīyopaniṣad* as Ānandapuccha and not as Ānanda.

Beginning:

पुच्छब्रह्मवादे ब्रह्मविदित्यादिनोपक्रान्तोऽर्थः असद्ब्रह्मेति वेद चेत् इति ब्रह्मशब्देनैवोपसंहियते। अतः पुच्छमेव ब्रह्मेति। आनन्दमयब्रह्मवादे तु उपक्रान्तस्यार्थस्यानन्दमयविषयश्लोके ब्रह्मशब्देनोपसंहारात् आनन्दमयो ब्रह्मेति तत्तत्पर्यायस्थश्लोकानां तत्तदवयविपरत्वदर्शनादत्रापि तथैव। तत्रावयविनः प्राधान्यात् पुच्छस्याप्राधान्याद्वैषम्यम्।

End:

आनन्दं ब्रह्मणो विद्वानिति आनन्दज्ञानादेरेव फलवत्त्वावगमात् अपूर्वत्वाभ्यासादिभिः तात्पर्यलिङ्गैः आनन्दमयस्यैव महावाक्यतात्पर्यविषयत्वात् विपश्चिदात्मादिशब्दैः वाणत्वमुक्तप्राप्यत्वादिलिङ्गैः ब्रह्मवल्ल्यानन्दवल्ल्योः आत्मन आकाशः, यतो वेत्यादिनोक्तस्य जगत्कारणत्वस्य आनन्दाद्धयेव खल्वित्यादिना आनन्दात्मकानन्दनिष्ठतयोपसंहारः।

Colophon:

इति पुच्छब्रह्मवादनिरासः

345

पुच्छब्रह्मवादनिरासः

Beginning:

यद्ध्यानात् परमानन्दः सिध्येद्वाचामगोचरः।
कारणं जगतामीशं तमानन्दमयं श्रये॥
त्रयीसिद्धान्तशुद्धान्तःकरणान् परमान् गुरून्।
प्रणम्याद्वैतिनो भिक्षोः वक्षो विक्षोभ्यतेऽधुना॥

इह तावत् पुच्छब्रह्मवादिनः पूर्वपक्षिणः आनन्दमयब्रह्मवादिनः सिद्धान्तिनश्च विप्रतिपत्त्या वादकथा प्रस्तूयते। पुच्छब्रह्मवादिनस्तावदाहुः—उपक्रमे ब्रह्मविदाप्नोति परमिति मुख्यमुपायभूतज्ञानविषये ब्रह्मशब्दः प्रयुज्यते। तदर्थसुखप्रतिपत्तये चान्नमयादिकोशावतारः। तेन च ब्रह्मशब्दो यत्रोपसंहियते तदेवोपास्यं ब्रह्मेत्यवगन्तव्यम्। ब्रह्मशब्दश्च ब्रह्म पुच्छं प्रतिष्ठेति पुच्छ एवोपसंहियते; नानन्दमये।

End:

कारणाक्षेपकापूर्णत्वापादकपुच्छत्वश्रवणेन पूर्वपक्षहेतुपौष्कल्यात् तदभिधानमादौ युक्तमिति चेन्न; शारीरत्वादेः सर्वसाधारणवृत्ताक्षेपकहेतोरपि सत्त्वेनान्नमयाद्यपेक्षायोगादित्यन्यत्र विस्तरः ॥ तस्मादानन्द

346

प्रणवोद्धारः

The author states that the Mādhva custom of adding Praṇava before and after each of the *Brahmasūtra-s* does not contradict the principles of other philosophers including Rāmānuja and Śaṃkara and therefore there is no objection to doing so. But the Mādhva view that such additions are to be treated as part of the Sūtra-s is not acceptable to other philosophers.

Beginning:

प्रपद्ये प्रणवं ब्रह्म प्रत्यूहप्रशमोद्यतम् ।
येनाभिरक्षितं ब्रह्म पठतां विजयप्रदम् ॥
यः सर्वतन्त्रकलशोदधिपारदृश्वा
त्रय्यन्तचिन्तननिरन्तरबद्धचित्तः ।
उद्धारमाकलयते प्रणवस्य नून-
मुच्चारणस्य कुतुकेन स राघवार्यः ॥

End:

मध्यस्थानामपि च महतामस्मदाचार्यकाणां
न व्याकोपः प्रसजतितरां शंकराचार्यकाणाम् ।
नैव क्षोभः प्रभवति परं सर्वसिद्धान्तनीतेः
पक्षे चास्मिन् श्रुतिपथहिते कोऽनुमन्येत दोषम् ॥
माध्वाः साध्वाशयविलसिता नैगमाध्वानुरोधात्
साध्वाद्यन्तप्रणवघटितं ब्रह्मसूत्रं पठन्ति ।
कात्स्न्र्येनैके प्रणवममुकं सात्त्विकाः सर्वसूत्रे-
ष्वूचार्यादौ विदधतितरां सूत्रपारायणादि ॥

347

प्रतिज्ञावादार्थः

A refutation of the Advaitic interpretation of a certain passage of the *Chāndogyopaniṣad* (VI. 1) which teaches that by knowing Brahman everything becomes known.

Beginning:

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥
अविस्तृताः सुगम्भीरा रामानुजमुनेर्गिरः ।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ॥
आराध्य वारिधिसुतादयिताङ्घ्रियुग्म-
मानम्य लक्ष्मणयतीश्वरमादरेण ।
तोषाय सर्वविदुषां कुतुकात् प्रतिज्ञा-
वादं सयुक्तिकमनन्तसुधीर्विधत्ते ॥

इह खलु प्रतिज्ञाविरोधात् प्रतिज्ञाहानिरव्यतिरेकादित्यादिषु प्रतिपादिताया एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया विवेचनाय सद्विद्याघटकः कश्चिदंशो व्याख्यायते । पिता तावदुद्दालकः समस्त-वेदवेदाङ्गपारीणं कर्ममीमांसोपचितमनसं श्वेतकेतुं प्रति पुत्रस्नेहेन ब्रह्मोपदिदिक्षुस्तस्य ब्रह्मजिज्ञासा-मुत्पादयितुमाह—स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति ।

End:

किंच स्वान्यशून्यं ब्रह्मेत्युक्तौ कथं तद्भेदनिषेधः । न च विशेषणेऽपि निषेधान्वयात् तल्लाभ इति वाच्यम् ; विशेष्यबाधस्थल एव तथात्वात् ; सविशेषणे हीति न्यायस्य बाधघटितत्वात् । एवं स्वभेदनिषेधस्य स्वस्मिन् सिद्धतया वैयर्थ्याच्च । तस्मादद्वैतमसंगतमिति दिक् ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon:

इति प्रतिज्ञावादार्थः संपूर्णः ।

348

प्रतितन्त्रदर्पणम्

A tract explaining some exclusively Viśiṣṭādvaitic principles. Pratitantrasiddhānta is one of the four Siddhānta-s mentioned in the *Nyāyasūtra*, I. 1. 27.

Beginning:

अशेषदोषैकमुषे विदुषां श्रेयसा पुषे ।
चिदचिद्वपुषे तस्मै नमस्कुर्मो मधुद्विषे ॥
स्वापृथक्सिद्धसर्वार्थस्तद्वाचिपदवाच्यताम् ।
गुणवृत्त्यादिवद्विन्दन् मुकुन्दोऽस्तु मुदे मम ॥

इह खलु भगवान् बादरायणः सर्वे वेदा यत्पदमामनन्ति, सर्वे वेदा यत्रैकं भवन्तीति श्रुतिसिद्धं, वेदैश्च सर्वैरहमेव वेद्य इति गीतोपबृंहितं भगवतः सर्ववेदवेद्यत्वं प्रतितिष्ठापयिषुः फलमत उपपत्तेरिति भगवतः सर्वकर्मफलप्रदत्वप्रतिपादनमुखेन 'वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' 'तृत एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति' इति तत्तत्कर्मकाण्डस्थवाक्यप्रतिपन्नं तत्तत्कर्मसमाराध्यदेवतानां फलप्रदत्वं भगवत्पर्यन्तमिति 'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः' इति वेदान्तवाक्यप्रतिपन्नम्। तत्रोत्पत्तिशिष्टाग्न्याद्यवरोधनपरिहाराय 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' इत्युत्तरवाक्येन तत्तद्वाच्यग्न्यादिशब्दानां भगवद्वाचितां प्रतिपादनमुखेन निरूप्य तेन कर्मकाण्डस्य कृत्स्नस्य भगवत्पर्यन्ततां प्रख्याप्य ब्रह्मकाण्डस्य तत्पर्यन्ततामथातो ब्रह्मजिज्ञासेति प्रतिज्ञाय तदुपयोगितया जगत्कारणतामन्तर्गतां प्रतिपाद्य।

End:

तदिहापि सर्वेषां परमात्मापृथक्सिद्धतया तद्वाचिनां परमात्मपर्यन्तत्वेऽपि तन्न्यायमपर्यवसानवृत्तिं वा अजानद्भिरशास्त्रज्ञैस्तेषु तेष्वर्थेषु ते ते शब्दा भङ्क्त्वा प्रयुज्यमानास्तत्रार्थरूढिमूलाः शक्तिभ्रममूलाश्च निश्चीयन्ते। कुशलप्रवीणादिशब्दवन्निरूढलक्षणावन्तो वा ते भवन्ति। न तावता शास्त्रप्रवृत्तिमन्यथा कर्तुं ते शक्ताः। न चैवं जातिशक्तिवादिनोऽपि नापराध्येरन्निति शङ्क्यम्; बाधकसद्भावासद्भावाभ्यां विशेषात्। उक्तानि हि बाधकानि। अत्र न किंचिदपि बाधकम्। साधकं चास्तीत्युक्तम्। पण्डितप्रतिपत्तेः पामरप्रतिपत्तिर्हि दुर्बला। तन्मूलापि वृत्तिर्बलीयसी स्वविषये बाधते, न स्वाविषये। अतस्तदविषये वैदिकीं प्रवृत्तिमुपजीव्य प्रवर्तमाना वैदिका व्यवहारा नापराध्यन्ति। यथा शास्त्रीयगुणादितत्तत्कार्यवर्जितोऽपि वर्णनिर्देशो नापराध्यति; तेन विना तदनिष्पत्तेः। तद्वदिहापीति सर्वमवदातम्।

Colophon:

इति श्रीशठमर्षणकुलतिलकश्रीनिवासतातार्यनन्दनेन लक्ष्माम्बागर्भशुक्तिमुक्ताफलेन कौण्डिन्यश्रीनिवासदीक्षितकटाक्षलक्षितभाष्यतत्त्वार्थेन निजाग्रजाण्णयार्यदीक्षितानुग्रहलब्धबुद्धिना प्रतिदिनप्रबन्धनिर्माणधुरंधरेण श्रीनिवासेन विरचितं प्रतितन्त्रदर्पणं नाम प्रकरणं समाप्तम्।

351

प्रत्यक्त्वादिस्वयंप्रकाशत्ववादः

On the self-manifestation of the *pratyaktva* (inward-consciousness) of souls. The author's name is known through a scribal note and is corroborated by the preceptor's name given in the introductory verse.

Beginning:

श्रीश्रीनिवासगुरुवर्यपदारविन्द-
निष्यन्द्यमन्दमकरन्दरसैकलोलम्।

ऐश्वर्यमप्यमरतां परमं पदं वा
प्राप्तुं न वाञ्छति कदापि मनो मदीयम् ॥
प्रत्यक्त्वाद्यजडत्ववादविषया: कैश्चित् पुरैवेरिता
आपातप्रतिपत्तिमाश्रितवतां रम्या इवाभान्ति ये ।
तेषांस्तानधुना धुनोमि करुणावीक्षावशात् सद्गुरो-
र्विद्वांस: करुणाघनार्द्रहृदया: पश्यन्तु तुष्यन्तु च ॥

प्रत्यक्त्वादय: स्वयंप्रकाशा:, स्वेतराप्रकाश्यत्वे सति प्रकाशत्वात् इत्यनुमानं प्रमाणयद्भि: प्रत्यक्त्वादीनां स्वयंप्रकाशत्वं सिसाधयिषितम् । अत्र केचिदाचिक्षिपु:—अत्रानुमाने स्वेतराप्रकाश्यत्वे सति प्रकाशत्वादित्यात्मको हेतु: साध्यानतिरिक्त: ।

End:

ज्ञाननिष्ठप्रकारतानिरूपितविशेष्यतानिरूपकत्वं हि ज्ञानांशे विशिष्टप्रत्ययत्वम् । विशिष्टप्रत्ययत्वाभावे च विपरीतबुद्धिप्रतिबन्ध्यत्वं न स्यादित्यत: प्रत्यक्त्वादीनां स्वयंप्रकाशत्वमव्याहतमेवेति विदांकुर्वन्तु विद्वांस: ।

The scribe adds:

प्रत्यक्त्वादीनां निजभानत्वविषक्तं श्रीमत्कृष्णार्यैरखिलज्ञैरपि चाज्ञै: ।
संप्रोक्तं रामावरजो वारदिरेनं हस्तिक्ष्माभृ स्त्रौ निवसन् लेलिखति स्म ॥
विष्णुवर्षचैत्रमासे सप्तमदिवसे महीभुवो वारे ।
रामानुजदासेन ग्रन्थोऽयं लिखित इत्यवेतव्यम् ॥

The fly leaf in the beginning contains the following verse:

प्रत्यक्त्वप्रमुखानां स्वयंप्रकाशत्वसाधकग्रन्थ: ।
श्रीकृष्णतातगुरुभी रचितोऽस्मिन् पुस्तके ह्यस्ति ॥

352

प्रपञ्चमिथ्यात्वानुमानखण्डनम्

A refutation of the inference adopted by the Advaitin-s for proving the falsity of the world. The author's name is not found in the MS. But from MG, R 1364 (b) it is presumed that the work must have been written by Varadācārya, son of Vedāntadeśika.

Beginning:

इह कतिचिदतिसमुपचितदुरितविन्ध्याटवीं संचरन्त: प्रपञ्चस्य मिथ्यात्वमाहु: । तद्विषयमनुमानं प्रपञ्च्यते । प्रपञ्चो मिथ्या, दृश्यत्वात् । यत्र दृश्यत्वं तत्र मिथ्यात्वम् ; यथा शुक्तिरूप्ये ।

घटादयोऽपरमार्थाः, व्यावर्तमानत्वात्, रज्ज्वधिष्ठानसर्पवदिति। तत्र प्रथममिथ्यात्वानुमानस्य दूषणान्युच्यन्ते। पक्षतावच्छेदकावच्छेदेन पक्षे साध्यसिद्धेरुद्देश्यत्वात् पक्षस्वरूपं विचारणीयम्। पक्षः किमसिद्धः, उत सिद्धः। असिद्धश्चेत्, हेतुराश्रयासिद्धः। सिद्धश्चेत्, किं प्रमितिसिद्धः, उत भ्रान्तिसिद्धः। आद्ये मिथ्यात्वसाधनव्याघातः।

End:

ननु क्वचित् बाधदर्शनात् भागासिद्धो हेतुरिति न वाच्यम्; तस्य प्रतिपन्नोपाधिजन्यबाधस्या-हेतुत्वादित्युपरामः।

Colophon:

प्रपञ्चमिथ्यात्वखण्डनं समाप्तम्।

353

प्रपञ्चमिथ्यात्वानुमानखण्डनम्

Beginning:

इह कतिचिदतिरभसमुपचितदुरितमनसः प्रपञ्चमिथ्यात्वं कथयन्ति। तद्विषयमित्थमनुमानं ग्रथ्नन्ति च। प्रपञ्चो मिथ्या, दृश्यत्वात्। यद्यत् दृश्यं तन्मिथ्या, यथा शुक्तिरूप्यम्। घटादयोऽपर-मार्थाः, व्यावर्तमानत्वात्, रज्ज्वाद्यधिष्ठानसर्पादिवदिति। प्रथमं दृश्यत्वानुमाने सर्वदोषा समाह्वियन्ते।

End:

तस्मात् व्यावर्तमानत्वानुमानस्य सोपाधिकत्वात् न साधकत्वम्। अतः केनापि प्रपञ्चस्य मिथ्यात्वं वक्तुं न शक्यत इति समञ्जसम्।

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्यस्य कृतिषु प्रपञ्चमिथ्यात्वानुमान-खण्डनं समाप्तम्।

354

प्रपञ्चमिथ्यात्वानुमानखण्डनम्

Beginning:

स्यादेतत् ब्रह्मव्यतिरिक्तसत्यतायाम्। तदेव तु नास्ति। ब्रह्मव्यतिरेकेण सर्वस्यापि मिथ्या-त्वात्। तथाहि—प्रपञ्चो मिथ्या, दृश्यत्वात् स्वप्नप्रपञ्चवदित्यनुमानात् ब्रह्मव्यतिरिक्तत्वमिथ्यात्व-

सिद्धेः। एवं घटादयोऽपरमार्थाः, व्यावर्तमानत्वात् रज्जुसर्पभूदलनाम्बुधारादिवदित्यनुमानादपि तत्सिद्धिः। एवं वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतिरपि घटादीनामसत्यत्वमेव प्रतिपादयति।

End:

ननु दुर्घटत्वं नापारमार्थ्यप्रयुक्तोपपत्तिनिरपेक्षत्वम्। तत्सद्भावे . . . . अयुक्तमेवेति चेन्न। तर्हि अपरमार्थप्रयुक्तोपपत्तिरूपदोषापेक्षा

355

प्रपञ्चमिथ्यात्वानुमानखण्डनम्

It is said that the discussion on this subject took place between Rāmaśāstrin and Anantācārya of Mysore in the presence of Śrīnivāsa Parakālayati of the Parakālamaṭha of Mysore.

Beginning:

श्रीश्रीनिवासपरकालयतीश्वराणां विद्वद्वरिष्ठकलिते किल संनिधाने।
योऽभूत् प्रसङ्गवशतो विषयः स एव संलिख्यते क्रमवशेन कुतूहलेन॥
स्वामिनस्तत्र मध्यस्था वादिनो रामशास्त्रिणः।
अनन्तार्यश्च कुतुकात् प्रपेदे प्रतिवादिताम्॥

अत्रेयं वादिनः प्रथमा कक्ष्या—विमतं मिथ्या, दृश्यत्वादित्यनुमाने हेतुभूतदृश्यत्वं स्वसमानसत्ताकज्ञानविषयत्वम्। तत्र ज्ञाने स्वसमानसत्ताकत्वनिवेशात् ब्रह्मणि न व्यभिचारः।

End:

अस्माकं मते ब्रह्मणि हेतुसंभवेन संदिग्धानैकान्त्यस्य दुर्वारत्वात्। तस्माद्भेदाभेदवादं मिथ्यात्ववादं वा परित्यज्यैवोक्तपरिष्कारो ब्रह्मानन्दाद्युक्तः। अन्येऽपि च भेदघटितात्यन्ताभावपरिष्काराः संरक्षणीया इत्यलं पल्लवितेन।

अनन्तसूरिखण्डकं च रामशास्त्रिवादिकं
जगन्मृषात्वसाध्यदृश्यभावहेतुगोचरम्।
विवादमालिलेख हस्तिशैलशृङ्गसंचर-
द्वरप्रदाम्बुभृत्कृपाम्बुचातको नु लक्ष्मणः॥

356

प्रपञ्चमिथ्यात्वानुमानखण्डनम्

Similar to the above. The author, Veṅkaṭācārya of the Surapuram family, was the son of Śrīnivāsatātācārya of the Bukkapaṭṭaṇam family

and the elder brother of Aṇṇayācārya and Śrīnivāsācārya, the author of the *Tattvamārtāṇḍa*.

Beginning:

प्रपञ्चो मिथ्या, दृश्यत्वात् शुक्तिरूप्यवदित्यनुमानं प्रपञ्चमिथ्यात्वे प्रमाणमिति वदन्ति मायिनः। तत्र विचार्यते—किमिदं विवक्षितं पक्षतावच्छेदकत्वेन। न तावत् कार्यत्वम्; अज्ञानस्य पक्षत्वाभावप्रसङ्गात्। तस्यानुत्पत्तिमत्त्वेनाकार्यत्वात्। न च जडत्वम्; विकल्पासहत्वात्। किमिदं जडत्वम्? ब्रह्मान्यत्वं वा, ज्ञानान्यत्वं वा। नाद्यः।

End:

द्वितीये वेदान्तानां बाधितार्थकत्वेन शुक्तिरजतवाक्यव्यावृत्तप्रामाण्याभावादप्रामाण्यप्रसङ्गादित्यादिकमूह्यम्।

Colophon:

इत्येवं वेंकटार्येण तातयार्यस्य सूनुना।
रचितं वादिसिंहेन जगन्मिथ्यात्वखण्डनम्॥
अण्णयार्योक्तमिथ्यात्वखण्डनं चातिविस्तृतम्।

357

प्रपत्त्युपायत्वविचारः

The work discusses how Prapatti is an aid to Mokṣa. The author's name is not known.

Beginning:

सर्वकर्मफलप्रदो भगवान् फलोपायत्वात् प्रधानभूतसाक्षान्मोक्षोपायः। तत्प्रसादनोपायत्वात् तद्भक्तिप्रपत्ती अप्रधानोपाये इति प्रसादद्वारा मोक्षहेतू इति संप्रतिपन्नम्। तत्र प्रपत्तेः प्रसादहेतुत्वविषये विप्रतिपत्तिः। किं भक्तिवदेव साक्षात् तत्प्रसादं प्रति हेतुत्वम्? उत, भगवत उपायान्तरस्थानापन्नत्वद्वारकत्वरूपपरंपरयेति। विप्रतिपत्तिमूलं तु प्रमाणाचार्यवाक्येषु भक्तिप्रपत्ती सहोपादाय प्रसादविषये तुल्यतयैव तत्र तत्र कथनात्; प्रपत्तेर्भगवदुपायान्तरस्थाननिवेशनत्वेन कथनाच्च। तथाहि—श्रीमदञ्जलिवैभवे।

End:

किंच विषयस्वभावपरामर्शेऽपि प्रसादपश्चाद्भावित्वमेव युक्तम्। निरपेक्षफलप्रदत्व

358

प्रपत्त्युपायत्वविचारः

Beginning:

श्रीमन्न्यासविद्याविषये आधुनिकास्मदाचार्यकृतदेशिकग्रन्थव्याख्यानोक्त्या प्रपत्तिस्वरूपतद्धेतुत्वविषये विप्रतिपत्तिजननेनास्माकमवश्यज्ञातव्यत्वात्तत्त्वस्थितेस्तदर्थं स्वार्थमेव देशिकसिद्धा-

न्तस्थितिः कीदृशीति ज्ञायते। भक्तिप्रपत्ती प्रसादविषये मोक्षहेतू इत्यत्र न कोऽपि संशयः। संशयस्तु किं प्रपत्तिः भक्तिवदेव साक्षान्मोक्षप्रसादमुत्पाद्य तद्द्वारा हेतुः? यद्वा नेति। तत्राद्यपक्ष एव मे मनसः स्वरसतः प्रतीयते। द्वितीयस्तु तेषाम्।

End:

तर्हि द्वयादौ स्वरसत एव तदर्थस्याभिधातुं शक्यत्वेऽपि किमिति प्रायस्तमध्यवसायत्वेन वा प्रकृष्टज्ञानत्वेन वा प्रपद्य इत्यत्र तदपि विवक्षणीयमिति।

359

प्रपत्त्युपायत्वविचारः

Beginning:

विप्रतिपत्तयः पर्यायाः। प्रपत्तिर्मोक्षं प्रति भक्तिवदेव साक्षादुपायः, उत परंपरयेति। प्रसत्त्यै तस्योके इत्यादोन्यन्यानि च सर्वाणि साक्षात्परंपरासाधारण्येन तद्विषयाणि? उत भक्तिकल्पतया साक्षादेवेति।

End:

ईश्वरनिष्ठसिद्धोपायत्वस्य प्रसादपूर्वकसंकल्पविशिष्टत्वेनैवोक्तत्वेनाकिंचनविषयेऽप्युपायान्तरनिरपेक्षतयैव प्रपत्तिमात्रेण भक्तिसाध्यप्रसादं कृत्वोपायान्तरनिरपेक्षतयैवेमं मोक्षयिष्यामीति पूर्वं संकल्पयित्वा पश्चात् फलप्रदानस्य निरर्गलत्वेन प्रसादात् पूर्वमेवोपायान्तरस्थाने भगवता स्थित्वानन्तरमेव प्रसादः कर्तव्य इति निर्बन्धाभावात्। तथा निर्बन्धेऽविरतत्वोक्तेः भक्तिप्रपत्त्योर्विकल्पत्वोक्तेः द्वयाकारत्वोक्तेरन्यस्याः सर्वस्या अपि सूक्तेः व्याहतत्वप्रसङ्गात्; यथोक्तप्रकारेण स्वरसतयैव सर्वैककण्ठ्ये संभवति वृथा क्षोभकल्पनायोगात्। सर्वज्ञानां किमितः परं वक्तव्यम्?

स्वीकृत्वेशानतत्वं कतिचन जहतस्तत्प्रसादादि साध्यं
गङ्गाम्भःपञ्चगव्यप्रभृतिवदवदन् पावनत्वादि तस्य।
तच्छ्रुत्यादिप्रतीपं यदपि च फलदं दर्शितं निष्प्रसादं
तच्चैतस्य प्रसादादिति हि निजगदुर्धर्ममर्मज्ञचित्ताः॥

The fly-leaf added at the end reads some stray passages taken from the *Añjalivaibhava* and *Gadyabhāsya* of Vedāntadeśika.

360

प्रपत्त्युपायत्वविचारः

Beginning:

विरोधपरिहारादौ श्रीदेशिकपादानां परमनिष्कृष्टार्थस्तावत् भक्तिवदेव प्रपत्तिरपि साक्षान्मोक्षहेतुरिति। गोपालदेशिकानां निष्कृष्टार्थस्तु तथा नेति। प्रपत्तेर्भक्तिस्थानीयत्वमेव मुख्यमुपगम्य भगवतस्तदुक्तेर्गतिरुच्यते देशिकैः। गोपालदेशिकैस्तु विपरीततया।

End:

अतः प्रसादभरस्वीकारादिसर्वपश्चाद्भाविनः स्थानापन्नत्वशब्दितभगवदीयभक्तिनिरपेक्षमोक्ष-प्रदानरूपरक्षणस्य तत्पूर्वभाविभरस्वीकारत्वबाधात्

362

प्रपन्नगायत्रीनिरूपणम्

On the greatness of the two Tamil poems, *Kaṇṇinuṇśiruttāmbu* of Madhurakavi and *Rāmānujanūṟṟantādi* of Śrīraṅgāmṛtadeśika alias Tiruvaraṅgattamudanār in praise of Śrī Śaṭhakopa and Rāmānuja respectively. The latter work is called *Prapannagāyatrī*. These poems are considered as sacred Mantra-s to be recited daily by Prapanna-s.

Beginning:

इह खल्वस्मत्पूर्वाचार्याः स्वयमुपायतयानुसंधाय स्वाश्रितानामपि तादृक्कतिपयार्थविशेषान् गुह्यतयोपदिशन्ति । ते क इत्याकाङ्क्षायां वस्तुनिर्देश उपायनिर्देश उपेयनिर्देशश्च । एतन्निर्देशदशायां मूलभूतप्रमाणस्यापेक्षिततया तत् प्रथमं निर्देश्यम् । तच्चापौरुषेयनित्यनिर्दोषतयाखिलप्रमाणोत्कृष्ट-सकलवेदसारसंग्रहश्रीमदष्टाक्षरतद्विवरणभूतशरणागतिमन्त्रचरमश्लोकप्रतिपादितार्थवैशद्यजनकभूतादि-योगिकर्यदिव्यसूक्तिसंग्राहकं तत्तात्पर्यावेदकं श्रीमदाचार्यैः परमसाधकतया ज्ञायमानमष्टाक्षरादिष्वार्थ-तया संगोप्योपदिश्यमानार्थविशेषान् शाब्दतया प्रतिपादयत् मधुरकविकृतं गाथादशकम् ।

End:

एतद्रहस्यार्थानां प्रमाणं श्रीमधुरकविकृतगाथादशकं श्रीमदमृतदेशिककृतद्रमिडप्रपन्नगायत्री चाष्टोत्तरशतगाथात्मिका । एतदर्थमजानतो यावदात्मभावी संसारबन्धः । एतदर्थनिष्ठस्याधिकारिणः शठकोपरामानुजप्रपत्तिद्वयं नित्यानुसन्धानं स्यात् ।

Colophon:

श्रीशैलेशार्यसंव्याप्तिस्वानुसंधाननामकः ।
ग्रन्थः समाप्तिमगमच्छ्रीरामगुरुणा कृतः ॥

363

प्रपन्नपारिजातः

A short metrical treatise in ten chapters on the greatness of Prapatti and the duties of Prapanna-s.

Beginning:

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥ १ ॥
आचार्यार्यमपादेभ्यो नमस्यां विदधाम्यहम् ।
यत्संसर्गवशात् पुंसां मनःपद्मं प्रबुध्यते ॥ २ ॥
अभङ्गुरकलादानस्थूललक्षत्वमीयुषे ।
तुङ्गाय महसे तस्मै तुरङ्गाय मुखे नमः ॥ ३ ॥
लक्ष्मीचक्षुरनुध्यानात् तत्सारूप्यमुपेयुषे ।
नमोऽस्तु मीनवपुषे वेदवेदिविपन्मुषे ॥ ४ ॥
रजो रजःप्रशमनं प्रपद्य पदयोः सताम् ।
प्रपन्नपारिजाताख्यप्रबन्धाय यतामहे ॥ ५ ॥
प्रपत्तेर्मानसौभाग्यं स्वरूपमधिकार्यपि ।
प्रपन्नानां गुरौ वृत्तिः श्रीशे सूरिषु सत्सु च ॥ ६ ॥
विहितेषु व्यवस्थानं वर्जनीयं फलं तथा ।
एते दशार्थाः कीर्त्यन्ते त्रय्यन्ताद्यर्थसंग्रहात् ॥ ७ ॥
प्रपत्तिस्तैत्तिरीयाणां वेदे तावद्विधीयते ।
न्यासाख्या सप्रयोगासौ वसुरण्येतिमन्त्रतः ॥ ८ ॥

End:

त्रय्यन्तस्मृतिमुख्यसन्मुनिवचःश्रीपाञ्चरात्राचल-
क्षोदैः संघटितः प्रपन्नचरितक्षीराब्धिसेतुर्महान् ।
ये वाञ्छन्त्यमुना तथाप्तुमचिरात् पारं भवाम्भोनिधे-
स्ते पूर्वोत्तरकर्मसागरभयान्मुक्ता विमुक्ता ध्रुवम् ॥ ४८ ॥
कार्पण्याचितबद्धमूलफलका विश्वासकीलान्विता
याच्ञाबन्धनरज्जुकृष्टिवशगा निक्षेपसत्क्षेपणी ।
संसारार्णवतारणी तनुभृतां संन्यासनौस्ताभिमा-
मच्छिद्रामथ पारयिष्णुमभयाः सद्योऽधिरूढा जनाः ॥ ४९ ॥
अशेषार्थमतिर्यत्र परितो जायते सताम् ।
प्रपन्नपारिजाताख्यः प्रबन्धः कथितो भुवि ॥ ५० ॥

Colophon:

इति श्रीवात्स्यवरदाचार्यविरचिते प्रपन्नपारिजाते फलपद्धतिर्दशमी ।

365

प्रपन्नपारिजातः

Reads the following two additional verses at the end:

श्रीमद्रामानुजमुनिरभून्मातुलो यस्य पौत्र-
स्तस्यार्यस्य प्रथितमहिमानुश्रवान्तैकतीर्थः ।
. . . . . .
माद्दङ्मर्त्यबहिःस्थलान्यपि दयासिन्धुप्रवाहो मुहु-
र्यस्यासिञ्चति संततं तु वरदाचार्यः स बन्धुः सताम् ॥
एवं सद्गुरुशिक्षितार्थनिवहस्येम्नं नियुक्तः सतां
बृन्दैस्तत्पदवन्दनीयसचिवैस्त्वेतं प्रबन्धं व्यधात् ।
श्रीमद्वत्सकुलोद्भवस्त्वभिधया सद्धारणाद्रीश्वर-
स्त्रय्यन्तार्णवपिण्डितामृतरसादानप्रदानाम्बुदः ॥

369

प्रमाणसंग्रहः

A collection of passages taken from Śruti, Purāṇa, etc. to prove that Lord Nārāyaṇa is the supreme Brahman and His worship alone can give Mokṣa. The author was the son of Devarāja of Śrīvatsagotra.

Beginning:

वात्स्यश्रीदेवराजार्यतनयं विनयाधिकम् ।
वात्स्यल्यादिगुणावासं वन्दे वरवरं गुरुम् ॥
परतत्त्वप्रधानेषु प्रमातव्येषु सर्वशः ।
प्रमाणानि विलिख्यन्ते प्रबन्धेऽस्मिन् यथाश्रुतम् ॥

प्रथमं तावत् श्रियः पतिर्नारायण एव सर्वस्मात् पर इति सर्वेष्वपि श्रुतिस्मृतीतिहासपुराणेषु प्रतिपाद्यत इत्युच्यते । तैत्तिरीयके तावत्—नारयण परं ब्रह्म तत्त्वं नारायणः परः । नारायण परो ज्योतिरात्मा नारायणः परः ॥ इत्यादि । तथा—यस्मात् परं नापरमस्ति किंचिदित्यादि । महोपनिषदि—नारायणः परं ब्रह्म तत्त्वं नारायणः पर इत्यादि । ऐतरेयकब्राह्मणे—अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता इति । यजुष्यपि—अग्निरवमो देवतानां विष्णुः परम इति । सर्वकारणत्वमपि तस्यैव श्रूयते । महोपनिषदि—एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमेत ।

End:

वस्त्रं यज्ञोपवीतं च गन्धालेपश्च भूषणम् ।
पुष्पमञ्जनमादर्शो धूपदीपौ स्वगेव च ॥
दशोपचारा देवस्याप्यलंकारासने मताः ।
मधुपर्कोऽर्हणं चैव प्रापणं तर्पणं तथा ॥

उपचारास्तु चत्वारो भोज्यासनपरिग्रहे ।
स्तुतिर्ध्वजं चामरं च छत्रं वाह . . . ॥

Colophon:

इति श्रीवत्सकुलतिलक . . . चार्यस्य देवराजतनयस्य वरवरगुरोः कृतिषु प्रमाणसंग्रहः संपूर्णः ।

370

प्रमाणसंग्रहः

Reads the following end:

नारदीये—

वेदाः शास्त्र . . . . . ।
. . . . . नालं फलितुं भगवद्रतिम् ॥
शास्त्रं सद्भक्तिरहितं सस्यं च कणिशोज्झितम् ।
कुलस्त्री चाप्रजाः कूपमम्बुहीनं वृथा . . . ॥
भगवद्भक्तिहीनस्य जातिः शास्त्रं जपस्तपः ।
अप्राणस्येव देहस्य मण्डनं लोकरञ्जनम् ॥

इत्यादि ।

Colophon:

इति श्रीवात्स्यश्रीसौम्यजामातृमुनिविरचिते प्रमाणसंग्रहे भागवतवैभवखण्डः समाप्तः । प्रमाणसंग्रहः समाप्तः ।

371

प्रमाणसंग्रहः

Beginning:

परतत्त्वं च सर्वस्मात् परत्वं ब्रह्मणः परम् ।
तेनान्यसमबुद्धिश्च दोषहेतुर्महान् भवेत् ॥
ब्रह्मस्वरूपमाहात्म्याद्यज्ञानत्वं ततः परम् ।
ब्रह्मादीनां च सृज्यत्वं तेषां तस्य सहायता ॥
तेषां च कर्मवश्यत्वं तेषामैश्वर्यकारणम् ।
विष्णोराराधनायत्तं तेषामापन्निवारणम् ॥

तेषामप्यनुपास्यत्वं संशयच्छेदपूर्वकम् ।
इच्छैव हेतुरुत्पत्तेर्नान्यथात्वं हरेस्तथा ॥
तस्मात्तस्यैव विष्णोश्च संहर्तृत्वमथोच्यते ।
कर्मवश्यत्वराहित्यं जगत्सृष्ट्यादिकारणम् ॥

End:

छायामाक्रम्य यो मोहाद्विमानस्य वसुंधरे ।
प्रदक्षिणं करोति स्म तस्य पापफलं शृणु ॥
श्मशानवृक्षतां प्राप्य कण्टकैर्बहुभिर्वृतः ।
पङ्गवः पादहीनाश्च कुष्ठिनो भुवि ये नराः ॥
विष्णुच्छाया ध्रुवं तैस्तु लङ्घिता स्याच्छतक्रतो ।
यः प्रदक्षिणमाकाङ्क्षन् पुरुषस्तु शचीपते ॥
त्रिधा कृत्वा तु तच्छायां मूलभागेन वै व्रजेत् ।
प्रदक्षिणविधावेवं विधिरेष न चान्यथा ॥

Colophon:

इति प्रमाणसंग्रहः समाप्तः ।

372

प्रमाणसंग्रहः

This work gives the sources of quotations found in the *Īḍu* or *Muppattāyirappaḍi* of Nampillai, which is a commentary on the *Tiruvāymozhi* of Śaṭhakopa. The work is called *Pramāṇattiraṭṭu* in Tamil.

Beginning:

श्रीमति वैष्णवे पुराणे पञ्चमेंऽशे षष्ठाध्याये—

बृन्दावनं भगवताक्लिष्टेनाक्लिष्टकर्मणा ।
शुभेन मनसा ध्यातं गवां वृद्धिमभीप्सता ॥
ततस्तत्रातिरूक्षेऽपि घर्मकाले द्विजोत्तम ।
प्रावृट्काल इवोद्भूतं नवशष्पं समन्ततः ॥
उत्पन्ननवशष्पाढ्या शक्रगोपास्तृता मही ।
स्थली मारकतीवासीत् पद्मरागकृतान्तरा ॥

शक्रगोपः अरुणः कीटविशेषः । मारकती मरकतमयी । लोकायतिकन् इत्यादि । अथ लोकायतम् —पृथिव्यापस्तेजो वायुरिति तत्त्वानि । तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवत् इति बार्हस्पत्यसूत्रम् । अस्यायमर्थः—अत्रायमथशब्द आरम्भार्थे वर्तते ।

यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥

यावज्जीवं सुखं जीवेदिति लौकिकाभिमतार्थोपदेशात् अर्थकामयोरेव पुरुषार्थत्वप्रतिपादक-कामनीतिशास्त्राविरोधित्वादलौकिकार्थप्रतिषेधाच्च लोकेषु आयतं विस्तृतमिति लोकायतमित्युच्यते। एवं लोकेषु विस्तृतमितीदं मतमारभ्यते प्रस्तूयत इत्यर्थः। तन्मतप्रतिपाद्यमर्थविशेषमाह—पृथिवीति।

End:

तत्र पञ्चदशे—

ततो मलिनसंवीतां राक्षसीभिः समावृताम्।
उपवासकृशां दीनां निश्वसन्तीं पुनः पुनः॥
ददर्श शुक्लपक्षादौ चन्द्रलेखामिवामलाम्।
मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम्॥

तत्रैकोनचत्वारिंशे—

बलैः समग्रैर्यदि मां रावणं जित्य संयुगे।
विजयी स्वपुरीं यायात् तत्तस्य सदृशं भवेत्॥

373

प्रमाणसारः

This work quotes as authority Śruti, Smṛti, Purāṇa, Itihāsa, Pāñcarātrāgama, etc. for the religious practice of Śrīvaiṣṇava-s of the Rāmānuja school. The author was the son of Cintāmaṇiguru belonging to the family of Govindaguru or Embar who was Rāmānuja's cousin.

Beginning:

श्रीवैकुण्ठपतिः स्वयं यमदिशत् तत्त्वं भुवि स्थापितुं
वेदात्मा विहगेश्वरोऽयमिति यं पूर्वे बुधाश्चक्षते।
यस्यैवाजनि मातुलः कुलगुरुः श्रीशैलपूर्णो महान्
माता यस्य बभूव सैव कमलादेवी पिता श्रीपतिः॥
यं रामानुजयोगिमातृभगिनीसूनुं विदुः पूर्वका
यं योगिप्रवरस्य पादकमलच्छायां विदुः सूरयः।
यस्मै योगिवरः स्वनाम च ददौ यो योगिराजप्रियो
भारद्वाजकुलं परिष्कृतमभूद्येनैव भूमाब्धिना॥

उक्तान् सर्वपुराणशास्त्रनिवहैर्विस्तारतोऽर्थोस्तत:
संक्षिप्याह दशोक्तित: स्वकृपया लोकोपकाराय य: ।
यस्य भ्रातृसुतस्य कारितनयस्याख्यां यतीन्द्रस्तदा
कुर्वन् यामुनदेशिकेन्द्रमनसो वैकल्यमेवाहरत् ॥
भोगार्थं न विविक्तमस्ति न तमश्चास्तीति यो वावद-
द्यत्सूक्तिं बहु मन्वते गुरुजना: सर्वेऽपि सत्संमताम् ।
श्रीगोविन्दगुरोरमुष्य महति श्रीवृत्तरत्नान्वये
श्रीचिन्तामणिदेशिकेन्द्र इति संजज्ञे महादेशिक: ॥
अचिन्त्यभूमाम्बुनिधेरमुष्य चिन्तामणेर्देशिकसत्तमस्य ।
तनूद्भव: सर्वगुणाब्धिरासीद्गोविन्दनामा गुरुसार्वभौम: ॥
स आकलय्य श्रुतिपाञ्चरात्रस्मृतीतिहासादिपुराणजातम् ।
चक्राङ्कनादे: स्वमतस्य गुप्त्यै प्रमाणसारं प्रकटीकरोति ॥

मुद्राधारणप्रमाणानां क्रोडीकार: । प्रथमं श्रुतिवचनानि—पवित्रं ते विततम् । चरणं पवित्रम् ।

End:

छायाशुष्कं शुचौ कृत्वा गुरुपादोदकं तथा ।
प्रत्येकं वलयेद्धीमान् पट्टवस्त्रादिना सदा ॥
मृत्खाज्यादिसमायुक्तं पेटिकायां विनिक्षिपेत् ।
नित्यं तद्वटकं सम्यक् पूर्वोक्तविधिना पिबेत् ।
पूर्वोक्तं तत् सदा विष्णोर्निशाचूर्णं द्विजातय: ॥
सम्यग् विलसितं कण्ठे विनिक्षिप्य द्विजोत्तम: ।
पुण्ड्रेषु सान्तरालेषु हरिद्रां धारयेच्छ्रियम् ।

374

प्रमाणानुपपत्ति:

This work points out that there is no valid proof for accepting the Avidyā of the Advaita school.

Beginning:

यच्च भावरूपाज्ञानसद्भावे प्रमाणमाहु:—अहमज्ञो मामन्यं च न जानामीति प्रत्यक्षमेव प्रमाणम् । न चेदं ज्ञानप्रागभावगोचरमिति वाच्यम् ; तस्य षष्ठप्रमाणगोचरत्वात् । इदं भावरूपमज्ञानमनुमानादपि सिध्यति । देवदत्तप्रमा तत्प्रागभावेतरकिंचिदनादिध्वंसिनी प्रमात्वात् यज्ञदत्तप्रमावत् । प्रमाणज्ञानं स्वप्रागभावेतरस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकमप्रकाशितार्थप्रकाशकत्वात् ; अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् ।

End:

ननु तमःशब्देन कथं मूलप्रकृतिरुच्यते इति चेत्, अक्षरं तमसि लीयत इति श्रुत्यन्तरेष्वपि तमःशब्देन मूलप्रकृतेरभिधानात्। नापि जीवब्रह्मैक्यान्यथानुपपत्तिप्रसूतार्थापत्तिस्तत्र मानम्; शरीरशरीरिभावनिबन्धनेनास्य प्रतिपादनेऽविरोधात्।

Colophon:

इति प्रमाणानुपपत्तिः।

375

प्रमेयमाला

A short treatise in ten chapters explaining some of the principles of Viśiṣṭādvaita.

Beginning:

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम्।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि॥
नमः श्रीविष्णुचित्तार्यपदपङ्कजपांसवे।
रामानुजमुनीन्द्रोक्तिरहस्यज्ञानहेतवे॥
जगतामुपकाराय जातं यतिवरात्मना।
प्रागुणीकृतसार्वज्ञ्यमनन्तं नौमि सादरम्॥
सच्चेतोमधुकरवृन्दसेवनीयां सौरभ्यं श्रुतिशिरसः समादधानाम्।
वत्सानां कुलपतिरद्भुतामतानीदम्लानां वरदगुरुः प्रमेयमालाम्॥

तत्र मीमांसाध्ययनस्य वैधत्वरागप्राप्तत्वविवेकार्थमध्ययनविधिर्निरूप्यते—किमध्ययनविधिरर्थज्ञानपर्यवसायी; आहोस्वित् अक्षरराशिग्रहणमात्रपर्यवसायीति। अर्थज्ञानपर्यवसायीति पूर्वः पक्षः। तथाहि—अध्ययनविधेरक्षरराशिग्रहणमात्रपर्यवसायित्वे मीमांसाश्रवणस्य प्रवर्तकाभावात् अनारम्भणीया मीमांसा स्यात्। साङ्गवेदाध्ययनात् प्रयोजनवदर्थापातप्रतीतेरुत्पन्नो रागो मीमांसायाः प्रवर्तक इति चेत्; न; आचार्यकुलाद्वेदमधीत्याभिसमावृत्य, वेदमधीत्य स्वाध्यादित्यादिश्रुतिस्मृतिभ्यः अध्ययनानन्तरं समावर्तनादिप्राप्तेः मीमांसावसराभावात् मीमांसाश्रवणस्य रागप्राप्तस्य बाधितत्वात्।

End:

अन्यानपि स्वधर्मस्थान् चालयिष्यन्ति ते कलौ।
एकवेणुं समाश्रित्य जीवन्ति बहवो द्विजाः॥
नरके रौरवे घोरे कर्मत्यागात् पतन्ति ते।
तस्मात् तान्नालपेत् प्राज्ञो न निरीक्षेत वापि तान्॥

आलोकनेन तेषां तु शुध्यते भानुदर्शनात् ।
नग्नं वानुपनीतं वा यः श्राद्धे भोजयेद् द्विजः ॥
रेतोमूत्रपुरीषाणि स पितृभ्यः प्रयच्छति ॥

इति । अत उपवीतत्रिदण्डशिखादिकमवश्यं यतीनां धार्यमिति स्थितम् ।

The work is divided into the following ten chapters:

१. अध्ययनविधिनिरूपणम्, २. ऐकशास्त्र्यसमर्थनम्, ३. प्रपञ्चमिथ्यात्वभङ्गः, ४. भेददूषणनिस्तारः, ५. भावान्तराभावसमर्थनम्, ६. अखण्डवाक्यार्थभङ्गः, ७. त्रिविधपरिच्छेद-राहित्यम्, ८. सर्वशरीरत्वम्, ९. अपशूद्रनयविरोधोपपादनम्, १०. यतिलिङ्गसमर्थनम् ।

Colophon:

इति श्रीमद्वत्सकुलतिलकश्रीमद्वरदार्यसूरिविरचितायां प्रमेयमालायां यतिलिङ्गसमर्थनम् ।

प्रमेयमाला समाप्ता ।

The scribe adds:

इदं लेखनकैंकर्यं श्रीमल्लक्ष्मीनारायणः स्वप्रीतये स्वशेषभूतेन वात्स्यवेंकटराघवदासेन मया स्वयमेव विभवाब्दकटकशुक्लद्वितीयायां कारितवान् ।

श्रीवत्सवंशकलशोदधिपूर्णचन्द्रं
भाष्यामृतार्पणसुजीवितभृत्यवर्गम् ।
श्रीमद्यतीन्द्रभगिनीसुतपौत्रवर्यं
श्रीवद्वरप्रदगुरूत्तममाश्रयामः ॥

378

प्रमेयमाला

Post-colophon readings:

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥
यस्य वाग्वृत्तिपर्यन्ता यतिराजसरस्वती ।
तस्मै वेदान्तगुरवे भूयो भूयो नमो नमः ॥
वेदान्ताचार्यपादाब्जचञ्चरीकमहं भजे ।
श्रीरामानुजसिद्धान्तस्थापकं वरदाह्वयम् ॥
यामुनार्यमुनीन्द्रश्रीपदपङ्कजषट्पदम् ।
श्रीमल्लक्ष्मणयोगीन्द्रं भाष्यकारमहं भजे ॥

379

फलभेदखण्डनम्

A refutation of the view held by the followers of Pillai Lokācārya that those who attain liberation by means of Bhaktiyoga enjoy only the experience of Brahman, but those who are liberated through Prapatti have in addition the enjoyment derived from service done to Brahman or Nārāyaṇa. The author concludes that both Bhakta-s and Prapanna-s experience equally the twofold enjoyment.

Beginning:

अनुभवपरिवाहानन्तहृद्यानवद्य-
स्वचरणपरिचर्यो यः परे व्योम्नि दिव्ये ।
वितरति विनतानामादिदेवो दयालुः
स दिशतु कुशलं नः श्रीसखो वेंकटेशः ॥

ये पुनर्महासाहसिकाः प्रत्यक्षश्रुत्यादिविरोधमप्यनादृत्य भक्तस्य भगवदनुभव एव फलं, प्रपन्नस्य तु भगवदनुभवः कैंकर्यं चेति प्रतिपादयन्ति, तान् प्रति ब्रूमः—भक्तस्य भगवदनुभव एव फलं, न कैंकर्यमित्यत्र किं श्रुतिः प्रमाणम्? यद्वा स्मृतिः? अथवा न्यायः? यद्वा संप्रदायः? नाद्यः, तथा विधायकश्रुतेरदृष्टेः । सोऽश्नुते सर्वान् कामानित्यादिकमस्तीति चेत् ; ततः किम्? ब्रह्मानुभव एवेति चेत् ; न ; अवधारणाश्रवणात् । विशेषविधानात् तत्सिद्धिरिति चेत् ; न; विभूत्यनुभवस्याप्यसिद्धिप्रसङ्गात् । श्रुत्यन्तरैस्तत्सिद्धिरिति चेत् ; तुल्यम् । श्रूयते हि शेषवृत्तितया अनुसंचरणसामगान-पितृलोकसृष्ट्यादिकम् ।

End:

रहस्यत्रयव्याख्याने च—इदं च कैंकर्यम्, एतत् साम गायन्नास्ते, नम इत्येव वादिनः, येन येन धाता गच्छति तेन तेन सह गच्छति, इत्यादिप्रकारेण कायिकवाचिकरूपमित्युपासनफलतया श्रुतानां सामगानानुसंचरणादीनां शेषवृत्तिरूपत्वमभिहितम् । अतः संप्रदायतः फलभेदसाधनं तृषोपशमनार्थं मरीचिकानुधावनसमानमिति । एवं फलभेदसाधकस्य कस्यचिदपि प्रमाणस्यानुपलम्भात् श्रुतिस्मृतिशतविरोधात् सूत्रकारादिसंप्रदायविरोधाच्च न मुक्तौ फलभेद इति श्रीमल्लक्ष्मणाचार्यवर्तनीनिष्णातानां प्राचामाचार्याणां संप्रदाय इति ।

Colophon:

इति श्रीवाधूलकुलतिलकवेंकटाचार्यसूनोः वरददेशिकस्य कृतौ फलभेदखण्डनं समाप्तम् ।

380

ब्रह्मपदशक्तिवादः

An interpretation of the term *Brahman*. The author concludes that the word indicates Brahman as full of excellent qualities such as knowledge, power, etc. and not devoid of qualities as held by the Advaitin-s.

Beginning:

मुरहरचरणाब्जध्यानधारां विधाय
प्रथितयतिपतिश्रीपादपद्मं प्रणम्य ।
विशदतममनन्ताचार्यवर्यः प्रसिद्धां
प्रकटयति विविक्तां ब्रह्मशब्दस्य शक्तिम् ॥

इह तावत् ब्रह्मशब्दप्रवृत्तिनिमित्तं विचार्यते । स्वावच्छिन्नाश्रयत्वस्वावच्छिन्नाश्रयाश्रयत्व-स्वावच्छिन्नजनकसंकल्पवत्त्वैतत्त्रितयसंबन्धेन परममहत्परिमाणवत्त्वरूपं बृहत्त्वमेव ब्रह्मपदप्रवृत्ति-निमित्तम् । ब्रह्मणश्च विभुत्वेन परममहत्परिमाणाश्रयत्वात् सर्वज्ञत्वेन परममहत्परिमाणाश्रयज्ञाना-श्रयत्वात् मुक्तानां सर्वज्ञत्वसाधकत्वेन तज्ज्ञाननिष्ठपरममहत्परिमाणहेतुभूतसंकल्पाश्रयत्वाच्च ब्रह्म-पदवाच्यतोपपत्तिः ।

End:

ब्रह्मोद्देश्यकब्रह्मेतरत्वावच्छिन्नप्रतियोगिकताकभेदविधेयताकानुमितिजनकत्वं जगत्कारणत्वरूप-लक्षणस्य, सत्यज्ञानादिलक्षणस्य तु ब्रह्मविशेष्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिजनक-त्वमिति तयोर्विशेषस्य जन्माद्यधिकरणटीकासिद्धतया प्रकृते अर्थसामान्यपदेन ब्रह्मोद्देश्यकाचेतनत्वाद्य-वच्छिन्नभेदकूटविधेयकानुमितिजनकतावच्छेदकप्रकारताश्रयत्वस्यैव विवक्षणेन जगत्कारणत्वे तद-भावेन व्यभिचाराभावात् । तादृशजन्माद्यधिकरणटीकावाक्यं च सोपपत्तिकं व्याख्यातं लक्षणवादे इत्यलमतिविस्तरेण ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon:

इति श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य श्रीमदनन्तार्यवर्यस्य कृतिषु ब्रह्म-पदशक्तिवादः समाप्तः ।

381

ब्रह्मपदशक्तिवादः

The author was also called Śrīśailayogin and was a resident of Bhūtapurī or Sriperumbudur.

Beginning:

अखिलभुवनबन्धोन्मोचने बद्धदीक्षं
प्रकृतिमनपहाय स्वेच्छयेहावतीर्णम् ।
वृषगिरिशिखरस्थैः सर्वथा भुज्यमानं
कमपि पुरुषमीडे कान्तया नित्यजुष्टम् ॥
नत्वा यतिवरचरणौ स्मृत्वानन्तार्यपादुकाधूलीः ।
ब्रह्मपदशक्तिवादं तनुते श्रीशैल्ययोगिराजसुधीः ॥
श्रुतिस्मृतिपुराणज्ञाः संप्रदाये सुशिक्षिताः ।
श्रीशादनन्यगं प्राहुर्ब्रह्मशब्दं निमित्ततः ॥
तदेतदपरिज्ञाय शब्दजालं प्रयुञ्जताम् ।
मौनमुद्राविधानेन जयत्वेषा कृतिर्मम ॥

ब्रह्मशब्दो हि बृह बृहि वृद्धाविति धातोरौणादिककर्त्रर्थकमनिन्प्रत्ययान्तः । तत्र धातूक्ता वृद्धिर्नाम सूक्ष्मावस्थाप्रहाणपूर्वकस्थूलावस्थायोग एव ; चन्द्रकला वर्धत इत्यादौ तत्रैव प्रयोगात् । तत्र सूक्ष्मावस्थाप्रहाणस्य भावान्तरभाव इति न्यायेन स्थूलावस्थारूपत्वात् स्थूलावस्थायोग एव धात्वर्थ इत्युक्तं भवति ।

End:

तस्मात् सिद्धं ब्रह्मशब्दो योगवृत्त्या बृहत्त्वे सति बृहद्गुणकत्वे च सति बृंहणत्वमेव निमित्तीकृत्य परमपुरुषमेव प्रतिपादयति । सहस्रनामपाठबलायातरूढिवृत्त्या तु श्रियः पतित्वं निमित्तीकृत्य तमेव परमपुरुषं प्रतिपादयतीति स्वनिमित्ततो भगवदनन्यग एवायमिति सर्वं समञ्जसम् ।

Colophon:

श्रीश्रीनिवासदासेन श्रीभूतपुरवासिना ।
योगिराजेन रचितो वादार्थोऽयं विजृम्भताम् ॥

इति ब्रह्मपदशक्तिवादः संपूर्णः ।

383

ब्रह्मपदशक्तिवादः

Beginning:

रघुवंशदुग्धजलधौ जातं संतानमाश्रये कमपि ।
अतितुङ्गादपि यस्माद् विनतैरप्यं फलं करग्राह्यम् ॥
श्रीश्रीनिवासयोगीन्द्रचरणाम्भोरुहद्वयम् ।
ध्यात्वा श्रीकृष्णतातेन ब्रह्मशब्दार्थ उच्यते ॥

ब्रह्मशब्दो हि बृहेरम् चेत्यौणादिकेन कर्त्रर्थकमनिन्प्रत्ययेनामागमसहितेन निष्पन्नः योगशक्त्या बृहत्त्वाश्रयमाह। अस्य च केवलयौगिकत्वे बृहन्महच्छब्दवत् घटादिसाधारण्यं स्यात्। न चैवं दृश्यते। अतो योगरूढ एवेत्याश्रयणीयम्। न चोद्भिदादिशब्दानां केवलयौगिकत्वेऽपि तद्योगार्थतावच्छेदकस्य फलोद्भेदनकारित्वस्य फलसाधनतारूपस्य ज्योतिष्टोमादिसाधारण्येऽपि नोद्भिदादिशब्दैर्ज्योतिष्टोमादिबोधप्रसङ्गः ; अभियुक्तप्रयोगविरहात्। अभियुक्तप्रयोगस्य हि सहकारित्वं लोके कृतमित्युद्भिदधिकरणकौस्तुभादावुक्तम्।

End:

तदेवं दर्शिततत्त्वटीकाश्रीसूक्त्या सर्वावधिकोत्कृष्टस्यार्थापत्तिसहकृतयोगलभ्यत्वमेवावगम्यत इति सिद्धम्। एवमुपलक्ष्यं ह्यनवधिकातिशयबृहत् बृंहणं च ब्रह्म। बृहतेर्धातोस्तदर्थकत्वादिति जन्माद्यधिकरणभाष्ये बृहतेर्धातोरित्यस्य मनिन्प्रत्ययान्तस्य रूढिसहकृतस्येति श्रुतप्रकाशिकायां पूरणमप्यत्रैव कल्पे स्वरसम्। अनेन हि मनिन्प्रत्ययान्ततया योगेनानवधिकातिशयबृहत्त्वाश्रयत्वस्य रूढिसहकारात् बृंहणत्वस्य च भानमिति बृहत् बृंहणं मनिन्प्रत्ययान्तस्य रूढिसहकृतस्येति क्रमाल्लभ्यते। तत् सिद्धं ब्रह्मशब्दो योगरूढः ; रूढ्यर्थतावच्छेदकं बृंहणत्वम् ; अर्थापत्तिसहकृतयोगलभ्यश्च सर्वावधिकोत्कर्ष इत्यलं पल्लवितेन।

Colophon:

लक्ष्मीनन्दनतातयदेशिकवंश्येन कृष्णतातेन।
ब्रह्मपदार्थविचारः कलितो विदुषां प्रियंकरो भवतु॥

384

ब्रह्मपदशक्तिवादः

Beginning:

विशिष्टाद्वैतसिद्धान्ते विशिष्टजनसेविते।
विमृष्टश्रुतिमौलीष्टे को वा शिष्टोऽन्यथा वदेत्॥
श्रीनिवासः परं ब्रह्मेत्यस्ति श्रीभाष्यपद्धतिः।
तत्कण्टकोन्मूलनं तु निगमान्तगुरुर्व्यधात्॥

तथाहि—ब्रह्मशब्दस्तावत् केवलरूढ इति श्रीभाष्यनिर्णयः। रूढ्यर्थतावच्छेदकं च स्वरूपरूपगुणविभूतिभिरनवधिकातिशयबृहत्त्वमेव। तच्च सामान्यविशेषन्यायसर्वशाखाप्रत्ययन्यायसर्ववेदान्तप्रत्ययन्यायादिसहकृतं कारणवाक्यपर्यालोचनया नारायणैकान्तमिति निर्णीतं ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोष इत्यादिना भगवच्छब्दवदित्यन्तेन भाष्येण। पाराशर्यविजये महाचार्यैः जिज्ञासासूत्रे योगरूढब्रह्मशब्देन निर्विशेषब्रह्मवादिनः देवान्तरपारम्यवादिनश्च निराकृता इति योगरूढत्वमप्याश्रितम्।

End:

चतुर्मुखप्रमुखानां बद्धानां च यथाप्रमाणं व्यवस्थितप्रतिनियतपरमात्मसंकल्पाधीनतरतमभावापन्नस्वाभाविकौपाधिकशक्तिविशेषविशिष्टानां परमात्माधीनस्वरूपस्थितिप्रवृत्तिभेदानां सर्वेषामपि चेतनानामनन्यशेषत्वानन्योपायत्वानन्याधेयत्वरूपाकारत्रयशालिनामनीश्वरत्वमव्यापकत्वमकारणत्वं च सिद्धमिति सुधीभिर्विभावनीयम् ।

मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो
भूयो विधाय विनयं विनिवेदयामि ।
दोषो वचो मम परं निपुणं विभाव्य
भावावबोधविहितो न मनो दुनोति ॥

385

ब्रह्मलक्षणवाक्यार्थसंग्रहः

Beginning:

अव्याद्वोऽयमदृष्टपूर्वकरटप्रेक्षाक्षणाकम्पित-
स्वेदार्द्रीकृतकुङ्कुमारुणकुचामुद्वीक्ष्य संरम्भतः ।
मत्वा ध्वाङ्क्षविदारितां प्रणयिनीमस्त्रेण तार्णेन यो
विव्याधारिदृशं प्रियाहसितसप्रश्नोऽपि सत्यव्रतः ॥
प्रणम्य श्रीहयग्रीवचरणाम्भोरुहद्वयम् ।
ब्रह्मलक्षणवाक्यार्थः संग्रहेण प्रकाश्यते ॥

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् । तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते इति प्रत्यक्षादिवेद्यानामैहिककियाफलानामिव कृतकत्वाविशेषेण श्रुतिवेद्यानां पारत्रिककियाफलानामप्यनित्यत्वस्य श्रुत्यैव निश्चितत्वात् वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तपसस्तु पारे । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् । ब्रह्मविदाप्नोति परम् । इत्यादिश्रुत्या महापुरुषविज्ञानस्यैव निरतिशयानन्दरूपमोक्षसाधनत्वनिश्चयाच्च नित्यनिर्दोषपुरुषार्थार्थिनां निरूपकाणां परमात्मज्ञानमेवोपादेयम् ।

End:

न च सगुणविद्याफलरूपेयं मुक्तिः, न सायुज्यरूपेति शक्यते वक्तुम्; परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति स्वरूपाविर्भावश्रवणात् । साक्षाद्ब्रह्मप्राप्तिश्रवणात् । कार्यब्रह्मणश्चतुर्मुखस्य परंज्योतिःशब्दवाच्यत्वं न संभवति । तथा ब्रह्मविदाप्नोति परम् इत्यत्रापि यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चितेति परविद्यानिष्ठस्यैव कामविशिष्टविपश्चिद्ब्रह्मानुभवस्य मोक्षत्वमुपदिश्यते । भगवता च पराशरेण—निरस्तातिशयाह्लादसुखभावैक-

लक्षणा। भेषजं भगवत्प्राप्तिरेकैवात्यन्तिकीमता ॥ ज्ञात्वैतद् ध्रुवमचलं सनातनं तत् कुर्याद्विशति येन वासुदेवं स विष्णुः परमं ब्रह्म यतो नावर्तते यतिरिति ज्ञानबलैश्वर्याद्यपरिमितकल्याणगुणगण-विशिष्टस्य भगवतो वासुदेवस्य प्राप्तिरेव परमोक्ष इति निर्धारितम्। तस्मात् सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षणवाक्येन परस्य ब्रह्मणो नारायणस्य सत्यत्वैकरूपत्वस्वयंप्रकाशत्वसर्वव्यापकत्वलक्षणगुणा एव स्वरूपनिरूपकाः प्रतिपाद्यन्त इति ॥

Colophon:

इति श्रीसर्वतन्त्रस्वतन्त्रभगवद्रामानुजाचार्यसिद्धान्तधुरंधरश्रीशठारिसूरिचरणारविन्दसेवासमधिगतवेदान्तसुधारसस्य श्रीशठकोपमुनेः कृतिषु वाक्यार्थसंग्रहः समाप्तः।

387

ब्रह्मलक्ष्मनिरूपणम्

Beginning:

भुवनजननक्षेमध्वंसादिलीलमनाकुलं
यदुगिरितटाधारं नत्वा श्रियः पतिमञ्जसा।
यतिपतिपदाम्भोजे वद्वान्तरङ्गमचञ्चलं
कलयति मुदानन्तार्यो ब्रह्मलक्ष्मनिरूपणम् ॥

जगज्जन्मादिकारणत्वं ब्रह्मलक्षणमिति वेदान्तोदन्तः। तथाच सूत्रम्—जन्माद्यस्य यत इति। ननु सत्यं ज्ञानमित्यादिलक्षणस्यापि श्रुतिसिद्धत्वादेव कथं न सूत्रितमिति चेत्; अत्र श्रुतप्रकाशिकानुसारिणः—यद्धर्मावच्छिन्नविषयतान्तःपातिविषयता मोक्षजनकतावच्छेदकविषयताव्यापिका तादृशधर्मावच्छिन्नमेव लक्षणं सूत्रकृता विवक्षितम्।

End:

जन्मादिसमुदायनिरूपितकारणतात्वमित्याकारकज्ञाने जन्मादिनिरूपितकारणतात्वविषयिताविरहादिति संक्षेपः।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

388

ब्रह्मविद्याविजयः

This is the second book of the *Vedāntavijaya*, attempting to prove that the Brahmavidyā-s taught in the Upaniṣad-s refer to Nārāyaṇa as Brahman endowed with numerous auspicious qualities.

Beginning:

पुरुषं ब्रह्मविद्यानां मुण्डकेन स्वयं परम् ।
ख्यापितं ख्यापयन्त्येता: स्वं भावं पुरुषे स्वयम् ॥

परविद्या तावत् भगवन्निष्ठा, पुरुषश्रुत्यभ्यासात् अक्षरपुरुषशब्दसामानाधिकरण्यात् अमृत-शब्दादेकर्षिशब्दात् एकर्षिशब्दप्रत्यभिज्ञानाल्लिङ्गादुपबृंहणाच्च । ननु पुरुषपदस्य सविशेषणस्यैव श्रुते: सामान्यार्थकस्यैव विशेषणबलात् विशेषनिष्ठत्वान्नात्र भगवद्रूढद्युन्मेष इति चेन्न, भगवतोऽन्यत्र तदमुख्यत्वस्योपपादितत्वात् । वेदान्तपुरुषो ह्यसावित्यादिवचनै: वेदान्तेषु पुरुषपदस्य भगवत्यौत्सर्गिकत्वावगमात् ।

End:

अत्रोदाहृतानामनुदाहृतानां चोपनिषदां स्वारसिकपदवाक्ययोजनानुगुणं तात्पर्यरहस्यं मदीयोपनिषन्मङ्गलदीपिकायां द्रष्टव्यम् ।

Colophon:

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये ब्रह्मविद्याविजयो द्वितीय: ।

Post-colophon readings:

गाधिजर्षिकुलोत्पन्नवेंकटार्यतनूभव: ।
राघवार्याभिधो विद्वान् महागुरुजनप्रिय: ॥
वेदान्तविजये ब्रह्मविद्याविजयमुत्तमम् ।
द्वैतीयीकं समालोच्य व्यलिखद्बहुलादरात् ॥

390

ब्रह्मशब्दार्थनिष्कर्ष:

The author, Śaṭhakopācārya, was the son and pupil of Śrīrāmācārya. His other works are: *Brahmaśabdārthavicāra* and *Bhāvaprakāśikādūṣaṇoddhāra*.

Beginning:

प्रपद्य विद्वद्रामार्यचरणाम्भोरुहद्वयम् ।
ब्रह्मशब्दार्थनिष्कर्ष: शठकोपेन तन्यते ॥
बृहत्त्वं च स्वरूपेण गुणैश्चेत्यादिभाष्यत: ।
प्रतीयमानस्वारस्यादादावर्थोऽभिधीयते ॥

भाष्यवाक्यस्यैदमर्थ्यमान्यपर्ये विरोधतः।
श्रुतप्रकाशिकार्याणां मतमित्यभिधीयते ॥
श्रुतप्रकाशिकाग्रन्थपौर्वापर्यविमर्शनात्।
आमूलाग्रमिमं ग्रन्थं सम्यक् पश्यन्तु सज्जनाः ॥

अत्र श्रीमद्भाष्यम्—बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थ इति। अत्र तृतीयार्थो द्वारत्वम्। न च द्वारत्वे तृतीयाया अननुशासनात् कथमेतदिति वाच्यम्; प्रकृत्यादिभ्य उपसंख्यानमिति कात्यायनेनानुशासनात्; प्रकृत्यादेश्चाकृतिगणत्वात्; तत्र गुणादिशब्दानामपि प्रयोगानुरोधेन निवेशात्। अत एव समवायेन रूपवान् इत्यादिप्रयोगाणामुपपत्तिः।

End:

तत्र द्वारपदस्य निमित्तमात्रपरतया दोषाभावात्। सामानाधिकरण्यलक्षणे भिन्नप्रवृत्तिनिमित्तानामित्यादि वाक्यार्थनिमित्ततया सामानाधिकरण्यपदस्य विवरणमिति विज्ञायते।

391

ब्रह्मशब्दार्थविचारः

Beginning:

श्रुतप्रकाशिकायाम्—पुरुषोत्तमे गौणत्वमन्यत्र मुख्यत्वं किं न स्यादिति। अत्र ब्रह्मशब्दप्रयोगो न बृहत्त्वमात्रनिबन्धनः; अतिप्रसङ्गात्। अत एवोत्तरत्र—बृहतिधातोर्मनिन्प्रत्ययान्तत्वेन निष्पन्नस्य ब्रह्मशब्दस्येत्यारभ्य एवं सर्वत्र प्रयोगादर्शनादित्यन्तेन ग्रन्थेन तथात्वे दोष उच्यते। नापि ब्रह्मशब्दप्रयोगविषयपञ्चषव्यक्त्यनुवृत्तधर्मनिबन्धनः, तादृशधर्मस्याप्रामाणिकत्वात्। अत एव पङ्कजशब्दव्यवस्थापककुमुदादिव्यावृत्ततामरसानुवृत्तपद्मत्वजातिवत् ब्रह्मशब्दप्रयोगविषयपञ्चषव्यक्त्यनुवृत्तान्यव्यावृत्ताकारादर्शनात् इत्युत्तरत्रोच्यते।

End:

नित्यानां पदार्थानां भगवन्नित्येच्छाधीनत्वस्येतरैः कैश्चिदप्यनङ्गीकारात् स्वसंप्रतिपत्त्यर्थं प्रकारान्तरेण नित्यसिद्धव्यावृत्तिं दर्शयतीत्यवतारिका दत्ता।

392

ब्रह्मशब्दार्थविचारः

Beginning:

श्रियः पतिरखिलहेयप्रत्यनीककल्याणैकतानः सर्वेश्वरः लौकिकोज्जीवनाय व्यासरूपेणावतीर्य पूर्वभागार्थनिर्णायकं कर्ममीमांसाशास्त्रं जैमिनिकृतमङ्गीकृत्य तदेकशास्त्रतयोत्तरभागार्थनिर्णयार्थं

ब्रह्ममीमांसाशास्त्रं विस्तारयामास। तत्रेदमाद्यं सूत्रम्—अथातो ब्रह्मजिज्ञासेति। इदं च शास्त्रोपोद्घातरूपमित्येतदर्थनिर्णयपूर्वक एव शास्त्रार्थनिर्णय इत्येतदर्थं ब्रह्मशब्दार्थो निर्णीयते।

यद्यपि ब्रह्मशब्दार्थनिर्णयो बहुभिः कृतः।
तथापि तत्र स्खालित्यात् सफलोऽयं मम श्रमः॥

इह खलु बृहति बृंहयति तस्मादुच्यते परं ब्रह्म। कस्मादुच्यते ब्रह्म। बृहन्तो ह्यस्मिन् गुणा इति। बृहत्त्वात् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते इति श्रुतिस्मृतिभ्यां बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थ इति।

End:

केचित्तु बृहिधातोरुत्कर्षापरपर्यायवृद्धिवाचितया स्वरूपतो गुणतश्चानवधिकातिशयोत्कर्ष एव ब्रह्मशब्दप्रवृत्तिनिमित्तम्। न तु परममहत्परिमाणरूपं बृहत्वं प्रवृत्तिनिमित्तम्। भाष्यादावपि इदमेव बृहत्त्वं प्रवृत्तिनिमित्तमुच्यते। तत्र स्वरूपतो

393

ब्रह्मशब्दार्थविचारः

Beginning:

विद्वद्रामाचार्यवर्यचरणाम्भोरुहद्वयम्।
प्रणम्य ब्रह्मशब्दार्थविषये किंचिदुच्यते॥

अत्र श्रीमद्भाष्यम्—बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थ इति। अत्र स्वरूपेणेति गुणैरिति च प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया। तदर्थश्च द्वारद्वारिभावः। तस्य ब्रह्मत्वेऽन्वयः। स्वरूपेणेत्यस्येतराद्वारकत्व एव तात्पर्यम्। तन्निर्वाहस्तु पार्ष्ठिकेन बोधेनैव।

End:

इदं च भाष्यं तत्रैवेत्थमवतारितम्—पुरुषोत्तमे गौणत्वम्, अन्यत्र मुख्यत्वं च किं न स्यादित्यत्राहेति। सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्द इति पूर्वभाष्ये ब्रह्मशब्दप्रयोगविषयेषु सर्वेषु बृहत्त्वगुणयोगोऽस्ति।

394

ब्रह्मसागुण्यवादः

The work maintains the Viśiṣṭādvaita view that Brahman is endowed with numerous good qualities and not devoid of qualities as held by Advaitin-s.

Beginning:

सद्ब्रह्मादिशब्दवाच्यस्य परमेश्वरस्य सकलकल्याणगुणाकरत्वमनुपपन्नम्, तस्य निर्गुणत्वात्। तथाहि श्रुतिः—अस्थूलमनण्वह्रस्वम्; निर्गुणं निरञ्जनं निष्कलं शान्तम्; यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह; यस्यामतं तस्य मतम्; विज्ञातमविजानताम्; न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथाः; आनन्दो ब्रह्म; विज्ञानमानन्दं ब्रह्मेत्यादिवाक्यैर्शनैकस्वरूपस्य ब्रह्मणो निर्गुणत्वावधारणात्। न च यः सर्वज्ञः सर्वविदित्यादिसगुणवाक्यविरोधात् निर्गुणवाक्यानामप्रामाण्यमिति वाच्यम्। सगुणनिर्गुणवाक्यानां परस्परविरोधे निषेधवाक्यानां निषेध्यापेक्षितया सगुणवाक्यापेक्षया निर्गुणवाक्यानामपच्छेदनयेन परत्वात् प्राबल्यावधारणात्।

End:

हेयगुणनिरासपूर्वककल्याणगुणयोगप्रतिपादनेन मानुषादिब्रह्मपर्यन्तज्ञानतारतम्यप्रतिपादनमुखेन सर्वज्ञत्वप्रतिपादनेन ज्ञानाश्रयत्वादिप्रतिपादनात् निरस्तसमस्तहेयः प्रशस्तकल्याणगुणैकतानः हेयगुणास्पदजीवविलक्षणः परमेश्वरः श्रुतिसिद्ध इति ब्रह्मवेदननिन्दापरकृतिविधायकस्मृत्यन्तरमन्वेषणीयमिति।

Colophon:

इति सगुणवादः।

395

ब्रह्माज्ञाननिरासः

This is a criticism of the Advaita view that Brahman is the substratum of Ajñāna under the influence of which the universe comes into existence. It is said that a dispute on this topic took place between the author and Tryambakapaṇḍita in the court of king Krishnaraja Wodiar of Mysore.

Beginning:

श्रीमत्कृष्णमहीमहेन्द्रसदसि श्रीदेशिकानुग्रहा-
द्रष्टव्यम्बकपण्डितेन महता वादे समुज्जृम्भिते।
ब्रह्माज्ञानमतव्युदासनिपुणाः स्वप्रोक्तकर्कच्छटाः
संगृह्णाति मुदे समस्तविदुषां श्रीश्रीनिवासः सुधीः॥
बहिरन्तस्तमःस्तोमविध्वंसिनखरांशुभिः।
द्योतमानौ श्रीमदार्यचरणौ शरणं व्रजे॥
आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः॥

इति शुद्धचिद्रूपं ब्रह्मैव प्रपञ्चमूलभूतस्याज्ञानस्याश्रयो विषयश्चेति मृषावादिवेदान्तिनः संगिरन्ते। तत्र

ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम्।
अज्ञानं चेत् तिरस्कुर्यात् कः प्रभुस्तन्निवर्तने॥

इत्यादिभगवन्नाथमुनिप्रोक्तकारिकोदाहरणमुखेन भगवद्भाष्यकारैरुपपादिता एव दोषाः ग्रन्थान्तरेष्वपि प्रपञ्चिताः। तेषां च दोषाणामुद्धारो न कदाचिदपि संभवति। तथाहि—अज्ञानं तावत् ज्ञानविरोधितयैव धर्मिग्राहकप्रमाणसिद्धं ब्रह्म च चिद्रूपमिति तयोः तमःप्रकाशवत् निवर्त्यनिवर्तकभावापन्नतया तयोराश्रयाश्रयिभावो नोपपद्यते; अहमज्ञ इति प्रतीत्या अज्ञानस्य जीवाश्रयत्वेनैव सिद्धतया तादृशप्रतीतिविरोधश्च; सर्वदोषनिदानभूतस्याज्ञानस्य मुख्यदोषतया ब्रह्मणो निर्दोषत्वप्रतिपादकशास्त्रविरोधश्च; ब्रह्मणोऽज्ञानाश्रयत्वे भ्रान्त्यादिरूपतत्कार्यदोषापत्तिश्चेति चत्वारो दोषाः। तस्मात् शुद्धचिद्रूपब्रह्मणो नाज्ञानाश्रयत्वं संभवतीति सिद्धान्तिनः प्रथमा कक्ष्या।

End:

एवमेकादशे तत्र पर्यायेऽस्माभिरीरिते।
कथाया विश्रमस्तावत् कृतः प्रभुनिदेशतः॥

इत्थं श्रीमच्छतदूषण्यां स च आश्रयः किं ब्रह्मस्वरूपम्, उत तदेवोपहितम्, अथवा स्वतन्त्रोऽन्यः। न प्रथमः, नित्यशुद्धिविरोधादिति भगवन्निगमान्तदेशिकानुगृहीतदोषेणैव ब्रह्माश्रिताज्ञानवादो निरस्तः। न त्वस्माकं तत्र निर्भरः।

Colophon:

श्रीश्रीनिवासधिषणा त्र्यम्बकनैयायिकस्य सति वादे।
ब्रह्माज्ञाननिरासः कृत इह सन्तः प्रसीदन्तु॥

396

ब्रह्माज्ञाननिरासः

This is similar to the above. The author is said to have been the grandson of the commentator on the *Bhāgavata* who may be Veṅkaṭakṛṣṇamācārya (the author of the *Bhāgavatavyākhyā Bhāgavatatātparyacandrikā*), the son of Śrīkṛṣṇa and pupil of Veṅkaṭavarada. The author Veṅkaṭakṛṣṇamācārya belonged to the Koḍavalūr family.

Beginning:

विषयचैतन्याश्रितमज्ञानं प्रमातुरधिष्ठानस्वरूपमावृत्य तद्याथात्म्यज्ञानं प्रतिबध्नाति। ततश्च मूलाज्ञानादेकमज्ञानं शुक्तिरजतादिरूपविषयाकारेण विवर्तते। तद्विषयश्च इदं रजतमिति भ्रमः।

तस्मादावृतिमूलकभ्रमादिरूपकार्यं प्रमातर्यापादयत् विषयचैतन्याज्ञानं प्रमातारं प्रत्येव दोषो निरूपकतासंबन्धेन ।

End:

तस्मात् स्वमते ब्रह्म प्रति न कोऽपि दोष इति नित्यशुद्धत्वोपपत्तिः । परमते तु उक्तदिशा ब्रह्म प्रति अज्ञानस्य दोषत्वात् तद्विरोध इति श्रीमतामाचार्याणामाशयः प्रतीयते तदीयश्रीसूक्तिपरिशीलनशालिनाम् । ननु ब्रह्म प्रति आवारकत्वेऽपि नाज्ञानं तत् प्रति दोषः, प्रमाणबलादिति चेत्, तर्हि चिदचिद्गतसर्वोपप्लवानपि ब्रह्मणि स्वीकृत्य प्रमाणबलात् तेषामदोषत्वमिष्यतामिति दिक् ।

Colophon:

इति श्रीकोडवलूर् वेंकटकृष्णमहाचार्यविरचितं ब्रह्माज्ञाननिरसनम् ।

कृत्स्नं भागवतं यस्य व्याचकार पितामहः ।
श्रीमान् वेंकटकृष्णार्यो जीयादाचन्द्रतारकम् ॥
यस्तु व्याकरणं कृत्स्नमनधीत्य गुरोर्मुखात् ।
शिष्यानध्यापयामास स जीयाच्छरदः शतम् ॥

397

भक्तिप्रपत्त्यधिकारविचारः

A polemic work on the qualifications for Bhakti and Prapatti leading to final Bliss. The anonymous author mentions Toṇḍamānatham Cakravarti Deśikācārya, Veṅkaṭācārya, Varadācārya, Kṛṣṇamācārya and Śrīnivāsācārya as participating in this discussion.

Beginning:

आर्तेष्वाशुफलेत्यादिश्लोके इच्छानुगुण्येन प्रारब्धनाशकत्वस्य सर्वाधिकारत्वस्य च भक्तितो वैलक्षण्यस्य पूर्वार्धेनोक्तत्वात् श्रीरङ्गेश्वर यावदात्मेत्युत्तरार्धेनापि भक्तिवैलक्षण्यप्रतिपादनस्यैवोचितत्वात् अशक्तस्वरूपोचितपरत्वे यावदात्मनियतेत्यस्यासांगत्यात् त्वय्येव त्वदुपायत्वधीरित्यादिना पारतन्त्र्यस्वरूपोचितत्वे हेतुकथनाच्च प्रपत्तेः स्वरूपानुरूपत्वं भक्त्युपायस्य स्वरूपाननुरूपत्वं चाचार्याणामभिमतमिति भक्तेरपि स्वरूपानुरूपत्वकथनं तेषामभिप्रायान्तरमूलकमिति वेंकटेश्वरसूरिरम्यवराभिधानयतीशयोः काचिदत्र न दृश्यते कृतिषूत्तमासु भिदा सतामिति पूर्वैरुक्तमुपपन्नमिति ।

End:

इत्थं लोकार्यसिद्धान्तनिर्धारणविचक्षणान् ।
विद्वद्रामगुरूनेष विज्ञापयति कश्चन ॥

वादाय तैराह्वाने तु न तत्र युष्माभिर्गन्तव्यम्। किंतु श्रीमन्मण्डयं तिरुमलाचार्यगृहं प्रतीत एवागच्छन्त्विति वक्तव्यम्। नरसिंहाचार्यप्रभृतयश्च मध्यस्थीकार्याः। तेषामनुत्तरवृत्तान्तश्च प्राक्तनो मया प्रेषितस्तेषां दर्शयितव्यः। भगवद्यामुनमुनिश्रीसूक्तिसाधुत्वप्रकारश्च प्रहितः। अणुत्वचुलक-ग्रन्थश्च प्रेषितः। एते सर्वे श्रीमद्भिः कटाक्षणीयाः। अणुत्वचुलकग्रन्थस्तु एक एव लिखित इति सोऽन्यत्र न देयः। कोशान्तरं च लेखयितव्यम्।

One extra leaf at the end contains साधुत्वसमर्थन of the word दासदासीगणः used by Yāmunācārya in the *Catuḥślokī*.

398

भगवद्विषयः

'Bhagavadviṣaya' denotes the commentaries on the Tamil Prabandha *Tiruvāymozhi* of Śrī Śaṭhakopa or Nammāzhvār. Originally the term was used for the commentary *Ārāyirappaḍi* (6000 Grs.) of Kurukeśa, a direct disciple of Bhagavad Rāmānuja. But subsequently it has also been freely used for the sub-commentaries on it like the *Onpadināyirappaḍi*, *Irupattinālāyi-rappaḍi* and *Īḍu*. All the commentaries are written in Maṇipravāla style. Towards the end of the last century, Govardhanam Raṅgācārya rendered the *Tiruvāymozhi* and the *Īḍu* into Sanskrit according to the view of Pillai Lokācārya for the benefit of those who do not know Tamil.

Beginning:

श्रियः पतिरवाप्तसमस्तकामः समस्तकल्याणगुणात्मकः सर्वेश्वरः पर्यायेण नानाजन्मानि प्राप्येत्युक्तरीत्या जन्मपरंपरासु स्कन्धविनिमयं कुर्वाणे नित्यसंसारिण्यस्मिन् चरणं प्राप्य निर्वृतमनाः नाशरहितानन्दमहाप्रवाहे निमग्नोऽहमिति प्रथमं स्ववाचा वक्तुं यथा शक्तः स्यात् तथा प्रथमं विशेषकटाक्षमकरोत्।

बृन्दावनं भगवता कृष्णेनाक्लिष्टकर्मणा।
शुभेन मनसा ध्यातं गवां वृद्धिमभीप्सता॥

इत्युक्तप्रकारेण बृन्दावनमुत्पन्ननवशष्पाढ्यमिव विशदतत्त्वज्ञानसमर्थः स्यात्, तथा विशेष-कटाक्षमकरोत्। इतरदर्शनेषु तत्त्वानि षोडशेति वदन्ति, षडिति च एवं बहुधा विप्रतिपद्यन्ते।

End:

एतदुक्तं भवति। श्रीभाष्यकारः स्वस्य श्रीगोष्ठीपूर्णेनात्यन्तरहस्यत्वेनोपदिष्टं चरमश्लोकं தெற்காழ்வானग्रे कैंकर्यसहायीभूतानां तेषु प्रीत्योपदिदेश किल। तदुच्यते। सर्वकाले पूजयित्वा

अपर्वणि समुद्रो न स्पृश्य इतीव तस्यैका नियतिर्नास्तीति भावः। अवधिशून्यं कालं सर्वं सहचारी स्थित्येति तद्विषये अनेन प्रार्थितम्। एतदभ्यासवत् तद्विषये नित्यसूरयो दास्यं कुर्युः।

Colophon:

इति श्रीभगवद्विषये सप्तमशतकं समाप्तम्।

399

भगवद्विषयः

This is a Sanskrit commentary on the *Tiruvāymozhi*. The work follows the principles of Śrī Vedāntadeśika.

Beginning:

अतसीगुच्छसच्छायमञ्चितोरःस्थलं श्रिया।
अञ्जनाचलसंकाशमञ्जलिर्मम गाहताम्॥
नाथयामुनयोगीन्द्रप्रमुखानखिलान् गुरून्।
नत्वा द्राविडवेदान्तसंप्रदायप्रवर्तकान्॥
द्रमिडोपनिषत्सारररत्नावल्याशयं स्फुटम्।
विवृण्वन् व्याकरिष्यामि द्रामिडीं ब्रह्मसंहिताम्॥

इह खलु संसारिणाम्,

लोकं वैकुण्ठनामानं दिव्यं षाड्गुण्यसंयुतम्।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम्॥
नित्यसिद्धैः समाकीर्णं तन्मयैः पाञ्चकालिकैः।
सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभम्॥
वापीकूपतटाकैश्च वृक्षषण्डैश्च मण्डितम्।
अप्राकृतं सुरैर्वन्द्यमयुतार्कसमप्रभम्।
प्रकृष्टसत्त्वराशिं तं कदा द्रक्ष्यामि चक्षुषा॥

इति,

प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुराः सुरार्चिताः॥

तयोर्मिश्रं ताभ्यां मिश्रम्। कालविक्रमः कालकृतपरिणामः। माया प्रकृतिः। अपरे तद्विकाराः। अनुव्रताः अनुचराः।

श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः।
सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः॥

End:

परमाकाशरूपे वैकुण्ठे वैकलुं सदा मकिल्वु एय्तुवर् आनन्दमनुभवतीत्यर्थः।

Colophon:

पञ्चमदशकं समाप्तम्।

400

भावप्रकाशिकादूषणोद्धारः

This is a refutation of an objection against the *Bhāvaprakāśikā* (*Śruta-prakāśikāvyākhyā*) of Raṅgarāmānuja in the context of elucidating the meaning of the word *Brahman*. The author Śaṭhakopācārya was the son and pupil of Śrīrāmācārya.

Beginning:

ननु बृहत्त्वात् बृंहणत्वाच्चेति प्रमाणानुसारेण द्वयमपि प्रवृत्तिनिमित्तमित्यभ्युपगमेन ब्रह्मगुणादौ नातिप्रसङ्ग इति शङ्कैव नोत्तिष्ठति। अनुपदमेव गुणतो बृहत्त्वे बृंहणत्वस्यान्तर्गतत्वादिति ब्रूम इत्यादिना बृंहणत्वस्य गुणतो बृहत्त्वेऽन्तर्भावकथनात् तद्लाभावे बृंहणत्वस्याप्यभावादिति कश्चित् भावप्रकाशिकाग्रन्थमदूषयत्। तदलमेकम्। श्रुतिस्मृतिविरोधन्यूनतयोरन्यतरपरिहाराय गुणतो बृहत्त्व-नियतसिद्धिकत्वरूपतदन्तर्गतत्वस्यैवात्र पूर्वग्रन्थेऽभिहितत्वेन वाच्यार्थपरत्वस्य पदानामौत्सर्गिकतया मोक्षप्रदत्वौपयिकगुणगणवत्त्वरूपबृंहणत्वस्यैव श्रुतिस्मृत्योः प्रवृत्तिनिमित्तत्वे तात्पर्यावगमात् तदनु-सारेण निरुक्तबृंहणत्वस्यैव प्रवृत्तिनिमित्तत्वं स्वीकर्तुमुचितम्। न तु तन्नियतसिद्धिकगुणतोबृहत्त्व-स्यापि ; प्रयोजनाभावात्।

End:

यद्यप्युत्कर्षेण गुणवानिति प्रयोगः, तथापि स धान्येन धनवानितिवत् अभेदे बोध्य इति न कोऽपि क्षुद्रोपद्रव इति दिक्।

Colophon:

विद्वद्रामार्यपुत्रेण शठकोपेन धीमता।
भावप्रकाशिकाग्रन्थदूषणोद्धरणं कृतम्॥

401

भेदसमर्थनम्

An attempt to prove the existence of the category Bheda (Difference) which is denied by Advaitin-s.

Beginning:

इह कतिचिदतिचिरसमुपचितदुरितसंचया वञ्चयन्ति भेदतत्त्वम् । एष खलु तेषामाघोषः—प्रमाणात् प्रमेयसिद्धिरिति तेषां समयः । तत्र भेदे न किंचित् प्रमाणं पश्यामः । प्रत्यक्षमिति चेन्न ; शास्त्रप्रत्यक्षयोः विरोधे शास्त्रवत् प्रत्यक्षस्यापि निर्विशेषवस्तुग्राहित्वस्यावर्जनीयत्वात् । वस्तुतस्तु तयोर्विरोध एव नास्ति, प्रत्यक्षस्यापि सन्मात्रग्राहित्वस्य स्वारसिकत्वात् ।

End:

ननु निर्गुणमित्यादिश्रुतेः का गतिरिति चेत्, हेयगुणनिषेधपरत्वेन निर्णयात् ; विजरो विशोक इति वाक्यान्तरानुगुण्याच्च । अधिकं तु भेदनिर्देशात् इत्यादिषु भेदशब्दप्रयोगानुपपत्ति-प्रसङ्गाच्च ।

Colophon:

इति भेदसमर्थनं समाप्तम् ।

402

महाभारततात्पर्यरक्षा

This is a treatise seeking to prove that the *Mahābhārata* propounds the supremacy of Viṣṇu and not of Śiva as interpreted by Śaivites like Appayadīkṣita in his *Mahābhāratatātparyasaṃgraha*.

Beginning:

आम्नायशिखरश्लाघ्यषाड्गुण्यपरिपूरितः ।
देवकीपुण्यसंघातः पातु नः पार्थसारथिः ॥
संरक्षणाय जगतामितिहासरत्नं यो दर्शयन्निरमिमीत परं मुकुन्दम् ।
द्वैपायनः स भगवानमलां मनीषां तन्वीत नो मधुरिपोरपरावतारः ॥
प्रपद्ये पञ्चमाम्नायं दुग्धाम्बुधिमिवापरम् ।
यत्र भाति त्रयीमौलिभूषणं रत्नमद्भुतम् ॥
अपाकृत तमोऽस्माकं शठकोपदिवाकरः ।
निर्धूतास्तगतिः श्रीमान्नित्यं विष्णुपदाश्रयः ॥
श्रीमल्लक्ष्मणमिश्रेभ्यो नमोवाकमधीमहे ।
यत्सूक्तिनावमाश्रित्य तरन्ति भवसागरम् ॥
यन्नामश्रवणात् सद्यः कवितार्किकवारणाः ।
भग्नगर्वाः प्रधावन्ति तं देशिकमुपास्महे ॥
यमाहुर्निगमान्तार्थमवतीर्णं बुधा भुवि ।
तं मङ्गलगुणोपेतं परवस्तुगुरुं भजे ॥

श्रीमदादिवराहार्यान् परवस्तुगुरोः सुतान् ।
वन्दे येषां पदाम्भोजं शरणं मम निःसमम् ॥
लीलादूतप्रसादाय विदुषां हृदयंगमा ।
महाभारततात्पर्यरक्षास्माभिर्विधीयते ॥

ननु पिष्टपेषणवदयमारम्भो निष्फलः; भगवतो महाभारततात्पर्यविषयत्वस्याचार्यवाक्यशतसिद्धत्वात् ।

End:

भोक्ता महेश्वरो देव इत्यत्र महेश्वरशब्दो भगवत्परः । एवमुपरितनो महादेवशब्दोऽपि भगवत्परः । तथाच न विरोधः । एवं च न रुद्रस्य भगवताभेदः प्रामाणिक इति कृतं प्रसक्तानुप्रसक्त्या । गीतोपनिषत्तु भगवत्पारम्यपरेत्येतदनवद्यम् । अतः शिवपारम्याभ्युपगमे तद्विरोधो दुष्परिहरः ।

तथाच पञ्चमाम्नायः सकलो भगवत्परः ।
स एवातः परोऽस्माकमिति सर्वं समञ्जसम् ॥

The scribe adds:

केताण्डिपट्टि निगमान्तचक्रवर्तितनूजेन श्रीकृष्णदासेनायं ग्रन्थो लिखितः ।

403

मुक्तिविचारः

This is a treatise which attempts to prove that the state of Kaivalya is also Mukti as per the view of Pillai Lokācārya.

Beginning:

अञ्जनघनमदभञ्जनमपि च कयाचित् सुरञ्जितं कलया ।
अञ्जनविधुरदृगञ्जनमञ्जनगिरिरञ्जनं भजे भवुकम् ॥
निजगलवकुलगलन्मधुललितकलालापनिगलितश्रीशम् ।
करकलितबोधमुद्रं किमपि विनिद्रं समाश्रये भद्रम् ॥
निगमयुगलसारौ श्रावितौ येन धाम्ना
परमपि परतन्त्रं पात्रमेवोपकल्प्य ।
तदिह निखिलरक्षादीक्षितं नौमि नत्वा
वरवरयतिवर्येत्यादिनामाभिलापैः ॥
कलशजलधिकन्याकान्तवीक्षामृतौघै-
रनुकलमभिषिक्तामार्यगोष्ठीं विभाव्य ।

विपुलमिह विचारं मुक्तिशब्दस्य शक्तेः
कलयति कुतुकाच्छ्रीशैलयोगीशदासः ॥

अत्र तावत् मुक्तिशब्दशक्तिर्विचार्यते । तदिदं सर्वसंप्रतिपन्नं संसारनिवृत्तित्वमेव मुक्तिशब्दशक्यतावच्छेदकमिति । युक्तं चैतत् ; प्रधानक्षेत्रज्ञपतिर्गुणेशः, संसारबन्धस्थितिमोक्षहेतुरित्यादिश्रुत्या स्मृत्या च तत्तथात्वावगमात् । संसारो नाम स्वरूपतिरोधायकाचित्संसर्ग एव । तदापीतेः संसारव्यपदेशादिति सूत्रे अचित्संबन्धस्यैव संसारशब्देन व्यपदेशात् ।

End:

तथाच मुक्तिमोक्षादिशब्दानां कैवल्यादिष्वपि मुख्यतायाः पाद्मोत्तरखण्डादिसिद्धत्वेन तत्र सर्वत्रानुगतमनतिप्रसक्तं च यत्, तदेव मुक्त्यादिशब्दरूढिनिमित्तं वक्तव्यमिति यथोक्तमेव तदुपपन्नतरमिति सर्वं समञ्जसम् ।

Colophon:

श्रीवाधूलमहाचार्यचिन्तासंतानजन्मना ।
श्रीश्रीनिवासदासेन कृतेयं कृतिरेधताम् ॥

404

मुमुक्षुप्पडिव्याख्या तात्पर्यदीपिका

A Sanskrit commentary on Pillai Lokācārya's *Mumukṣuppaḍi* or *Rahasyatraya* which is a Tamil work dealing with the three Rahasyamantra-s: Aṣṭākṣara, Dvaya and Caramaśloka. The author Vīrarāghavācārya was the son of Rāmānujācārya of the Śrīśaila family and pupil of Śrīnivāsa-rāmānujamuni and Śaṭhakopācārya. He was known as Bālasarasvatī.

Beginning:

श्रीबालसरस्वतीविरचितमुमुक्षुप्पडिसमाख्यानरहस्यत्रयटीकायां तात्पर्यदीपिकायां मूलमन्त्राधिकारः प्रथमः । सर्वलोकोज्जीवनाय रहस्यत्रयं व्याचिख्यासुः परमकारुणिको लोकाचार्यः प्रथमं मुमुक्षोर्व्याख्येयरहस्यत्रयस्यावश्यापेक्षितत्वज्ञापनायाह—मुमुक्षुवुक्कु इत्यादि । मुमुक्षुः अविच्छिन्नभगवदनुभवप्रतिबन्धकसंसारनिवृत्तीच्छावान् ।

Colophon at the end of the 1st chapter:

इति श्रीशैलकुलतिलकश्रीमद्रामानुजगुरुसूनुना तच्चरणनलिनमधुव्रतेन श्रीनिवासरामानुजमुनिश्रीमच्छठारिसूरिनिर्व्याजकरुणासमधिगतनिखिलार्थतत्त्वयाथार्थ्येन श्रीवीरराघवदासेन विरचितायां रहस्यत्रयविवरणटीकायां मूलमन्त्रार्थप्रकरणं समाप्तम् ।

End:

पुरुषोत्तमविद्याया भक्तिसाध्यप्रीतिजनकत्वं स सर्वविद्भजति मामित्यादिना प्रतिपाद्यत इति भाषितत्वात् प्रशंसार्थमपि तस्या मोक्षसाधनतोक्तित्येतावता तदुक्तिः ।

405

मूलमन्त्रार्थकारिकाः

Verses explaining the meaning of the Mūlamantra (Aṣṭākṣaramantra). The author Nārāyaṇa belonged to the Cintāpaṭṭaṇa family.

Beginning:

श्रीकूरकुलकन्दालवंशवार्धिसुधाकरम् ।
रघुनाथार्यजं वीरराघवाख्यं भजाम्यहम् ॥
अष्टाक्षरमनावाद्ये पदत्रयविभागतः ।
शेषत्वं पारतन्त्र्यं च कैंकर्यं प्रतिपादितम् ॥
प्रणवोक्तमात्मरूपं विरोध्युपायौ नमःपदेनोक्तौ ।
नारायणायपदयोः प्रथितौ च परस्वरूपपुरुषार्थौ ॥

End:

वाक्यार्थः प्रापकस्यात्र स्वरूपस्य निरूपणम् ।
शेषित्वरूपकथनं प्रधानार्थ इति स्मृतम् ॥

Colophon:

चिन्तापत्तनवंशाब्धिचन्द्रो नारायणाह्वयः ।
चक्रे हिताय मन्त्रार्थकारिकामालिकां सताम् ॥

The scribe adds:

कौशिकार्यवंशजेन देवशिखामणिना रामानुजदासेन लिखितमेतत् पुस्तकम् ।

406

मूलमन्त्रार्थकारिकाः व्याख्यासहिताः

Beginning:

ओमर्थाय नमो नारायणायेत्येकवाक्यता ।
न्यासोऽत्र नमसोऽर्थः स्यात् तेनोपायपरो मनुः ॥

ओमिति । ओमित्यव्ययं पदम् । नम इति द्वितीयान्तं पदम् ; अव्ययं वा ।

End:

इहेति । इह मन्त्रे संगृहीतः । अकारे श्रीमान् गोता च भाव्यः अनुसंधेयः । लुप्तचतुर्थ्यौ शेषी समाधिकदरिद्रश्च भाव्यः । नमसि शरणमुपायो भाव्यः । नारायणशब्दे सर्वशरीरी भाव्यः । अन्तिमचतुर्थ्यौ प्रापकत्वेन सेव्यत्वेन च भाव्यः । प्राप्यत्वमनुभाव्यत्वम् । सेव्यत्वं कैंकर्यप्रति-संबन्धित्वम् ।

407

मूलमन्त्रार्थविचारः

An explanation of the meaning of the Mūlamantra.

Beginning:

सकलशास्त्रसंग्रहरूपस्य सकलफलप्रदस्य सकलमन्त्राधिकस्याष्टाक्षरात्मकस्य श्रीमन्त्रस्या-स्मत्पूर्वाचार्याः 'स्वरूपं प्रतिपादयति, प्राप्यं प्रतिपादयति' इति द्वेधा वाक्यार्थमाहुः । स च ओमिति नम इति नारायणायेति पदत्रयात्मकं वर्तते । एतस्मिन् प्रथमपदं प्रणव इतिनामविशिष्टम् अकारोकारमकाररूपपदत्रयात्मकं वर्तते । अस्य मन्त्रस्य कलिवैरिदासेन प्रतिपाद्यमानस्तात्पर्यार्थः— आश्रयणम्, आश्रयिणो वैशद्यम्, आश्रयम्, आश्रयवैशद्यम्, आश्रयणीयम्, आश्रयणफलं च वदतीति ।

End:

तथाच पदत्रयात्मकप्रणवेन अकारवाच्यपरब्रह्मणः मकारवाच्यो जीवः अनन्यार्हशेष इत्युक्तं भवति । इतः परं मन्त्रशेषोऽस्य पदस्य विवरणरूपः ।

Colophon:

मूलमन्त्रार्थविचारः समाप्तः ।

Post-colophon reading:

सर्वकर्माणि संत्यज्य रामानुज इति स्मर ।
विभूतिं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥

408

मोक्षकारणतावादः

A discussion regarding the means of Mokṣa. The author maintains the view that Bhaktiyoga is the means of Mokṣa and not mere knowledge of Brahman as accepted by the Advaitin-s.

Beginning:

मुक्तिप्रदं मुररिपुं मुनिबृन्दवन्द्यं
मोहच्छिदं यतिपतिं च मुदाभिवन्द्य ।
श्रीमाननन्तगुरुरुज्ज्वलयुक्तियुक्तं
मोक्षैकहेतुविषयं तनुते विचारम् ॥

इह तावन्मोक्षस्य मुख्यसाधनं विचार्यते । मोक्षो नाम—स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसंबन्धेन कर्मप्रागभावविशिष्टान्यो यः कर्मध्वंसः स्वसामानाधिकरण्यस्वोत्तरत्वोभयसंबन्धेन तद्विशिष्टानन्दः । केवलानन्दस्य उक्तसंबन्धेन कर्मध्वंसविशिष्टानन्दस्य च बद्धदशायामपि सत्त्वेन तदानीं मोक्षव्यवहारवारणाय कर्मप्रागभावविशिष्टान्यत्वं ध्वंसविशेषणम् ।

End:

एवमभ्यासाधेयातिशयस्येति जिज्ञासाधिकरणभाष्यस्यापि पूर्वपूर्वस्मृतिपरंपराप्रयोज्यलौकिकविषयिताकस्येत्यर्थः । अनवरतभावनावशात् ध्यानव्यक्तिषु लौकिकविषयता संभवतीति पूर्वमेवोक्तम् । तथाच विशिष्टविषयकध्यानत्वेन कारणत्वे न काप्यनुपपत्तिरित्यन्यत्र विस्तरः ।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

The scribe adds:

वात्स्यश्रीभाष्यकृता श्रीभूतपुरीचिरंनिवासवता ।
लिखितो वादार्थोऽयं मुक्तेस्तद्धेतुतायाश्च ॥

411

यतीन्द्रमतदीपिका

This work summarizes the chief tenets of the Viśiṣṭādvaita school. It closely follows the *Nyāyasiddhāñjana* of Vedāntadeśika. The author Śrīnivāsācārya or Śrīnivāsadāsa was the son of Govindācārya of Tirupati and the pupil of Mahācārya alias Doḍḍayācārya of the Vādhūlagotra.

Beginning:

श्रीवेंकटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहम् ।
कृष्णेन साकं यतिराजमीडे स्वप्नेऽपि दृष्टान् मम देशिकेन्द्रान् ॥

यतीश्वरं प्रणम्याहं वेदान्तार्यं महागुरुम् ।
करोमि बालबोधार्थं यतीन्द्रमतदीपिकाम् ॥

End:

संयोगशक्तिरूपौ गुणौ षड्द्रव्यसाधारणाविति विवेकः ।

Colophon:

इति अद्रव्यनिरूपणम् ।

इति श्रीमद्वाधूलकुलतिलमहाचार्यप्रथमदासेन विरचितायां यतीन्द्रमतदीपिकायामद्रव्यनिरूपणं नाम दशमोऽवतारः ।

416

रहस्यत्रयकारिकाः

This is a metrical explanation of the three Rahasyamantra-s. According to one of the concluding verses and the colophon the author is Varadācārya, son of Veṅkaṭācārya.

Beginning:

नाचितः शास्त्रवश्यत्वं न स्वतन्त्रस्य तद्भवेत् ।
कर्मवश्यविशेषस्य शास्त्रवश्यत्वमिष्यते ॥ ३९ ॥
अन्तरङ्गं हि शेषत्वमधिकारादिषु त्रिषु ।
तस्माच्छेषत्वमेवाहुराचार्याः प्रथमं गुणम् ॥ ४० ॥
भगवत्पारतन्त्र्येण शेषत्वमपि सिध्यति ।
इति वक्तुं क्वचित् पूर्वं पारतन्त्र्यस्य वर्णनम् ॥ ४१ ॥

End:

इति किल यतिराजोपज्ञमार्गोपरोध-
प्रशमनरसिकानां प्राक्तनानां प्रियाय ।
मुनिजनबहुमान्यां मूलमन्त्रार्थवृत्तिं
व्यवृणुत वरदार्यः सर्वतन्त्रस्वतन्त्रः ॥ ८० ॥
नियममुपगतो यः पद्मया नित्यरक्षा-
सदयहृदयवृत्त्या निष्प्रकम्पानुकम्पः ।
प्रदिशतु पदसेवालभ्यसाम्राज्यलक्ष्मीं
प्रपदनरसिकानां प्रापकः कोऽपि देवः ॥ ८१ ॥

* * * * *

पूर्वस्मादुपशोकादिनिवृत्तेरत्र वर्णनात् ।
केषांचिच्छोकलेशानामुपलम्भोऽपि युज्यते ॥

. . . . . पराधनिवारणे ।
इत्थं वाचिककैंकर्यं पश्यन्तु हरिकिंकराः ॥ १०० ॥

Colophon:

(वेंक)टार्यनन्दनेन वरदार्येणोक्ताः कारिकाः समाप्ताः ।

417

रहस्यत्रयकारिकाः

A metrical tract on the three Rahasyamantra-s.

Beginning:

सौम्यजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसंतारपोतकम् ॥
अस्मद्गुरूंस्तथाचार्यान् परमानखिलानपि ।
रामानुजार्यं करुणावात्सल्यवरुणालयम् ॥
श्रीशाङ्घ्रिहेमसंमोहतृणीकृततदन्यकम् ।
पूर्णयामुनपादाब्जद्वन्द्वनाथशठवैरिणम् ॥
सतां यदङ्घ्रियुगलं मातृतातसुताङ्कनाः ।
सेनेशश्रीतदीशांश्च नत्वा तेषां प्रसादतः ॥
रहस्यत्रितयार्थोऽयं चिन्त्यते दृढतातये ।
रहस्यत्रितयं ज्ञेयं चेतनेन मुमुक्षुणा ॥

End:

तत्राहुः केचिदाचार्याः सर्वकर्मविमोचने ।
ब्रह्मातिरेव भवति न कैवल्यं प्रजायते ॥
सर्वकर्मविनिर्मोके . . . . . ।
कर्मैकदेशशेषे तु न मुक्तिर्मुक्तिभेदवत् ॥
अमुक्तित्वादनित्यं तत् प्रमाणं चात्र विद्यते ।
चतुर्विधा मम जना भक्ता एव च ते स्मृताः ॥

420

रहस्यत्रयचूडामणिः

A metrical explanation of the three sacred Mantra-s.

Beginning:

अस्मद्गुरुं सर्वगुरून् गुरूणां परमं गुरुम् ।
रामानुजार्यमार्याणां चूडामणिमहं भजे ॥ १ ॥
पारार्थ्यं प्रणवेनोक्तं स्वार्थत्वं नमसा हृतम् ।
अचिद्व्यावृत्तिमात्रं स्याच्चैतन्यं प्रत्यगात्मनः ॥ २ ॥
नष्टेऽहंकारचण्डाले सा नश्येन्ममतासती ।
नश्येतां स्तन्यविरहाद्रागद्वेषौ यमौ शिशू ॥ ३ ॥
ज्ञातुर्ज्ञानं कृतिः कर्तुर्भोगो भोक्तुर्निरूपकः ।
अनर्घयत्यष्टगुणं त्रिगुणादन्नमन्यतः ॥ ४ ॥
त्रिगुणान्नं परित्यज्य षड्गुणान्नमदन् स्वयम् ।
अन्नमष्टगुणं मृष्टं भोजयेयं श्रियः पतिम् ॥ ५ ॥
देहात्मभावसंबन्धसिद्धभोगनिरूढया ।
नारायणपदव्यक्तचतुर्थ्यैदं प्रकाश्यते ॥ ६ ॥

End:

शोकस्थाने न ते शोको भयस्थाने न ते भयम् ।
अस्थाने तु भयं शोक इति कृष्णस्य विस्मयः ॥
दशाङ्केष्वेकाङ्कं सितहयशताङ्के कलयतां
नवाङ्कं चाष्टाङ्कं भवति चतुरङ्कैः परिवृते ।
विना द्व्यङ्कं त्र्यङ्कं दलयति सहस्राङ्कमरिभिः
षडङ्कं पञ्चाङ्कं वितरति च सप्ताङ्कविजयम् ॥

421

रहस्यत्रयजीवातुः

An original treatise explaining the meaning of the three Rahasya-mantra-s. The author offers salutations to Śaṭhārimuni as his teacher.

Beginning:

प्रपद्ये जगदानन्दकन्दमिन्दीवरप्रभम् ।
इन्दिरामन्दिरं तेजो वन्दनीयमनिन्दितैः ॥
कलयाम्यस्मदाचार्यांस्तदाचार्यांस्तथापरान् ।
प्रपद्ये कमलां देवीं कमलेक्षणवल्लभाम् ॥
अस्मदाचार्यवर्येभ्यः श्रुतस्यार्थस्य सादरम् ।
संग्रहः क्रियतेऽस्माभिर्मननायैव केवलम् ॥

मुमुक्षोश्चेतनस्य रहस्यत्रयार्थो ज्ञातव्य इत्याचार्याः प्रत्यपीपदन् । रहस्यत्रयशब्देन श्रीमदष्टाक्षरमनुः द्वयाख्यमन्त्ररत्नं चरमश्लोकवर्यश्च कथ्यते । अत्र श्रीमदष्टाक्षरो मनुः श्रीमद्बदरिकाश्रमे परमकारुणिकेन भगवता नारायणेन स्वांशभूतनराय सर्वजनहितार्थमुपदिष्ट इति पुराणेषु स्मरणात्, विष्णुगायत्र्यां नारायणाय विद्महे इति प्रथमोपात्तत्वात्,

तथा सर्वेषु वेदेषु नास्ति चाष्टाक्षरात् परः ।
व्यक्तं हि भगवानेष साक्षान्नारायणः स्वयम् ।
अष्टाक्षरस्वरूपेण मुखेषु परिवर्तते ॥

इत्यादिवचनशतबलाच्च सर्वव्यापकमन्त्रान्तरेभ्य उत्कृष्टो विज्ञायते ।

End:

एवंभूतः सर्वदेशसर्वकालसर्वावस्थानुस्यूतकैंकर्यसाम्राज्यमनुभवतीति । एवं निरतिशयमत्प्राप्ति-प्रतिबन्धकैः विरहितं कुर्याम् ; शुचं मा कृथा इत्यस्मिन् प्रबन्धे नास्माभिरपूर्वार्थः प्रकाश्यते । आचार्यप्रबन्धेषु यदुपपादितं, यच्चास्मदाचार्या उपदिदिशुः, तत् सर्वं संगृह्यास्माभिरुक्तमिति विदांकुर्वन्तु सन्तः ।

नमः शठारिमुनये निखिलागमवेदिने ।
नमामि श्रीनिवासं तं श्रीवेंकटनिवासिनम् ॥
यत्कारुण्यैकदेशेन तृणमब्जासनायते ।
इत्थमाचार्यवर्येण संप्रदायप्रदर्शितान् ।
अर्थान् प्रकाशयामास श्रीमान् नारायणो मुनिः ॥

Colophon:

श्रीमन्नारायणमुनिविरचितो रहस्यत्रयजीवातुः समाप्तः ।

422

रहस्यत्रयमीमांसाभाष्यम्

Kṛṣṇapāda, popularly known as Pillai Lokācārya wrote the Tamil work *Mumukṣuppaḍi* also called the *Rahasyatraya* explaining the meaning of the three Rahasyamantra-s in 289 Sūtra-s. Maṇavālamāmuni wrote a commentary on it called *Rahasyatrayamīmāṃsā*. The *Rahasyatraya-mīmāṃsābhāsya* is a Sanskrit commentary on Maṇavālamāmuni's work.

Beginning:

लोकाचार्यकृतां रहस्यविवृतिं मीमांसया शोभितां
श्रीमान् सौम्यवरो मुनिः सुविशदं वृत्त्यात्मना व्याकरोत् ।

श्रीमत्कौशिकशुद्धसत्त्वगुरुणा लब्धात्मजन्मत्रयो
दासो लक्ष्मणनामको विवृणुते भाष्यात्मना तन्मुदे ॥
अस्मद्गुरूत्तमैर्जुष्टो विस्मयावहवाङ्मयः ।
सौम्यजामातृसूरिर्मे संनिधत्तां सदा हृदि ॥
श्रीमल्लोकगुरूद्भूतं रहस्यत्रयगोचरम् ।
मीमांसाशास्त्रमत्रेदमाद्याधिकरणं मतम् ॥

तत्र रहस्यत्रयमीमांसा विषयः । सा कर्तव्या न वेति संशयः । तदर्थमिदं विचार्यते—तदसाधारणाधिकारितत्फलभूतप्रमितितद्विषयवेदान्तवाक्यतदुपबृंहणानि संभवन्ति न वेति । तत्र पूर्वः पक्षः—न तावत् तदासाधाराणाधिकारी संभवति; मुमुक्षुर्वै शरणमहं प्रपद्य इत्यादिश्रुतिप्रसिद्धमुमुक्षोरेव शरणागतिशास्त्ररूपरहस्यत्रयमीमांसाधिकारित्वात्; मुमुक्षायाश्च स्वात्मानुभूतिरिति या किल मुक्तिरुक्तेति श्रीवत्साङ्कमिश्रसूक्त्यनुसारेण मुक्तानां परमा गतिरिति श्रीसहस्रनामभाष्यसूक्त्यनुसारेण जीवनमुज्जीवनं संसारोन्मोचनं समिति कैवल्यव्यावृत्तिरिति श्रुतप्रकाशिकासूक्त्यनुसारेण च कैवल्यार्थिसाधारण्यात् ।

End:

द्वादशे पञ्चभिर्द्वेधा प्रपत्त्यर्थत्वमीरितम् ।
त्रयोदशे प्रधानार्थः कृत्स्नो बोध्यस्त्रिभिर्मतः ॥
चतुर्दशे त्रिभिर्मन्त्रादर्थोत्कर्षः समर्थितः ।
द्वादशाधिकरण्येषा मन्त्रवैभवपेटिका ॥

Colophon:

इति श्रीमत्कुशिककुलतिलकस्य श्रीशुद्धसत्त्वगुरुचरणतनूजरत्नस्य तत्प्रसादलब्धसकलविद्यावैशद्यस्य रामानुजदासस्य कृतौ रहस्यत्रयमीमांसाभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ।

423

रहस्यत्रयमीमांसाभाष्यम्

Beginning:

प्रथमे पादे करिष्यमाणमूलमन्त्रव्याख्यानोपोद्घाततया मूलमन्त्रपरीचिक्षिषासिद्ध्यर्थं मूलमन्त्रप्रभावः प्रपञ्चितः । अथ मूलमन्त्रं त्रिपाद्यां व्याख्यास्यामः । तत्र द्वितीये पादे प्रणवो व्याख्यायते तदुपोद्घाततया च प्रथममधिकरणत्रयमारभ्यते । तत्र प्रथमाधिकरणे

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्

इत्युक्तरीत्या वाक्ययोजनामुखेन मूलमन्त्रो व्याख्यायते ।

End:

अपिशब्देन स्वोक्तिः समुच्चीयते । अथोपक्षिप्तं पक्षं प्रतिक्षिपति चतुर्थसूत्रेण । लक्ष्मीशेषत्वाद-पीत्यर्थः । अपिर्विरोधे ; पदार्थसंभावनायां वा । यद्यप्यन्यशेषत्वनिवृत्तेः लक्ष्मीशेषत्वफलत्वात् लक्ष्मी-शेषत्वस्यार्थे प्राधान्यमस्ति ।

424

रहस्यत्रयविवरणम्

A metrical exposition of the three Rahasyamantra-s.

Beginning:

गुरुपङ्क्तिं नमस्कृत्य तत्प्रसादोपबृंहितः ।
रहस्यत्रितयार्थस्य वक्ष्ये विवरणक्रमम् ॥
उक्तार्थविशदीकारयुक्तार्थान्तःबोधनम् ।
मतं विवरणं तत्र महितानां मनीषिणाम् ॥

End:

एवं विवरणाकारो रहस्यत्रयगोचरः ।
सौम्यजामातृमुनिना संग्रहेण प्रकाशितः ॥

425

रहस्यत्रयसारकारिकाव्याख्या कारिकादर्पणम्

A commentary on the Sanskrit verses found in the *Rahasyatrayasāra* of Vedāntadeśika. The commentator was the son of Śrīnivāsācārya and grandson of Varadācārya of the Ātreya family. He speaks of himself as the disciple of his grandfather and of his elder brother Sundarācārya. The Ātreya family is well known among Śrīvaiṣṇava-s as headed by Praṇatārtiharācārya, one of the direct disciples of Rāmānuja and by Vādihaṃsāmbuda Rāmānujācārya, the well-known teacher and maternal uncle of Vedāntadeśika. Our author might have belonged to the 18th century A.D. His other work is a poem called *Kṛṣṇābhyudaya* (MG, D. 11531-2).

Beginning:

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दंपती जगतां पती ॥
नाभीपङ्कजनीडस्थवेधःकीरगिरोत्सुकौ ।
नमामि प्रणवस्यार्थौ दंपती जगतां पती ॥
वन्देऽहं निगमान्तार्यचरणाम्भोरुहद्वयम् ।

यद्रेणवो नृणां मुक्तिनिर्माणपरमाणवः ॥
विगाहे निगमान्तार्यविष्णुपादसमुद्भवाम् ।
रहस्यत्रयसाराख्यां त्रिस्रोतसमकल्मषाम् ॥
आत्रेयवरदाचार्यमस्मदाचार्यमाश्रये ।
सर्वज्ञः संप्रदायं यो बालिशं मामशिक्षयत् ॥
आत्रेयश्रीनिवासार्यसुतोऽहं वरदः कविः ।
रहस्यत्रयसारस्य व्याकुर्वे कारिकाः क्रमात् ॥
जगति निगमचूडाचार्यवाचां रहस्यं
निधिमिव जननान्धो निर्भयः साहसिक्यात् ।
प्रकटयितुमसाध्ये संप्रवृत्तोऽस्मि यद्वा
प्रतिभुव इव तन्मे देशिका दर्शयन्ति ॥

तत्रभवान् वेदान्ताचार्यो निखिलजगदुज्जीवनाय श्रीरहस्यत्रयसाराख्यं मोक्षशास्त्रं प्रणिनाय ।

End:

तस्मादिहामुत्र च तत्पादौ आचार्यपादौ शरणमिति प्राप्यं प्रापकं चेति देशिका यामुनादयो विदुः ; अत्र परत्र चापि नित्यं यदीयचरणौ शरणं मदीयमिति समुपदिष्टवन्तः । तस्मादाचार्यचरणावेव शरणमिति सर्वदा न्यस्तभरैः प्रपन्नैः सुखेन वर्तितव्यमिति भावः ।

Colophon:

इति श्रीमदात्रेयवरदाचार्यचरणाम्बुजचञ्चरीकस्य तत्सुतश्रीनिवासाचार्यकरुणैकजीवनस्य वरदकवेः कृतिषु कारिकादर्पणे संप्रदायप्रक्रियाभागस्तुरीयः ।

बालस्य मेऽग्रजो भ्राता पितामह इवापरः ।
सारज्ञः सुन्दराचार्यः संप्रदायानुपादिशत् ॥
क इह निगमचूडाचार्यसूक्तौ निगूढं
करवदरयिता स्यान्मां विना साहसिक्यात् ।
निधिमिव जननान्धो निर्भयो वा तथापि
प्रतिभुव इव यन्मे देशिका दर्शयन्ति ॥

428

रहस्यत्रयसारकारिकाव्याख्या

Beginning:

श्रीमान् वेंकटनाथार्यः+हृदि ॥

प्रारिप्सितस्य श्रीमद्रहस्यत्रयसाराख्यदिव्यप्रबन्धस्याविघ्नपरिसमाप्त्यर्थं शिष्यप्रशिष्यादिपरंपरया प्रवचनाभिवृद्धिसिद्ध्यर्थं च गुरुपङ्क्तिपूर्वकं परमगुरुभूतलक्ष्मीनारायणचरणशरणवरणमनुसंधत्ते श्रीमान् देशिकेन्द्रः—

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती ॥

End:

तत्प्रत्याशाप्रशमनं ब्रह्मास्त्रन्यायसूचनम् ।
सर्वधर्मपरित्यागशब्दार्थः साधुसंमतः ॥

इति । अतः एवं प्रमाणसंप्रदायोपपत्तिप्रपञ्चनात् सर्वधर्मान् परित्यज्य स्थितस्त्वमित्यनुवाद

429

रहस्यत्रयसारव्याख्या सारचन्द्रिका

This is a commentary in Sanskrit on the *Rahasyatrayasāra* of Vedāntadeśika by Aparyāptāmṛtadāsa alias Ārāvamuda also known as Lakṣmīkumāratātācārya. He was a descendant of the famous Lakṣmīkumāratātācārya of the 16th century A.D. and a pupil of Kavikathakakaṇṭhīravatātācārya of the Śrīvatsa family.

Beginning:

श्रीमद्वात्स्यकुलाब्धिचन्द्रममलं श्रीतातयार्यं गुरुं
वन्देय श्रुतिमौलिदेशिकपदद्वन्द्वं वृणीयानिशम् ।
श्रीमल्लक्ष्मणयोगिवर्यममलं नौमि प्रकृष्टाशया-
नाचार्यान् मम वन्दिषीय सकलांस्तत्त्वावगत्यै सदा ॥
श्रीशैलान्वयशीतभानुरमलः श्रीकोटिकन्याप्रद-
स्तातार्य इति प्रसिद्धिमगमल्लक्ष्मीकुमाराभिधः ।
तन्नाम्ना च तदीयवंशजनन.त् प्रख्यापितात्मा गुरोः
कश्चिद्वेंकटपूर्वतद्वरदयुङ्नाम्नः प्रपौत्रोऽभवत् ॥
चिरन्तटीकार्थविमर्शशालिना वितन्यते तेन तदर्थगुम्फिता ।
टीका रहस्यत्रयसारसत्कृतेः सत्सांस्कृती संस्कृतरागितुष्टये ॥

इह खलु भगवान् सर्वतन्त्रस्वतन्त्रः श्रीवेंकटनाथनामा गुरुः सर्वोज्जीवनाय रहस्यत्रयसाराख्यप्रबन्धकरणव्याजेन प्रपत्तिविद्यां प्रकाशयितुं गुरुपरंपरोपसत्तिपूर्वकं श्रियः पतिं प्रणमति—गुरुभ्य इति ।

End:

क्वापीत्यनेन स्थानविशेषाधिकारार्थः, निर्मुक्तस्थूलसूक्ष्मप्रकृतिरित्यनेन निर्याणाधिकारगतिविशेषाधिकारार्थौ च सूचितौ । नित्यमच्युतं तमनुभवतीत्यनेन परिपूर्णब्रह्मानुभवाधिकारश्च सूचितः ।

Colophon:

इति श्रीशैलकुलतिलकश्रीमद्रमाकुमारतातयार्यवंश्येन लम्भिततन्नाम्ना श्रीमत्कविकथककण्ठी-रवतातयार्यगुरुवरचरणानुग्रहलब्धवेदान्तरहस्यार्थजातेनापर्याप्तामृतदासेन विलिखितायां श्रीमद्रहस्य-त्रयसारव्याख्यायां सारचन्द्रिकाख्यायां परिपूर्णब्रह्मानुभवाधिकारो द्वाविंशः। इत्यर्थानुशासनभागः प्रथमः।

Post-colophon writing:

यत्कटाक्षवशाल्लब्धवेदान्तात्मभरादिकः।
तानहं तातयाचार्यान् वन्दे वात्स्यकुलाधिपान्॥
श्रुतिचूडागुरुं वन्दे मतिवैशद्यसिद्धये।
यतिराजादिकान् विश्वपतिमाद्यं तथा गुरुम्॥
लक्ष्मीकटाक्षसंभूतकोटिकन्याप्रदानतः।
लक्ष्मीकुमारतातार्य इति ख्यातो महीतले॥
तद्वंशसंभवेनात्र तन्नाम्ना लिखिताधुना।
रहस्यत्रयसाराद्यभागव्याख्या सुसंस्कृता॥

The scribe adds:

अक्षये श्रावणे कृष्णपक्षेऽष्टम्यां गुरोर्दिने।
काञ्च्यां वरदशालाया दक्षिणेऽष्टभुजे गृहे॥
वसता रङ्गनाथेन लिखिता सारचन्द्रिका।
श्रीवत्सान्वयवार्धीन्दुश्रीनिवासार्यसूनुना।
रहस्यत्रयसाराद्यभागव्याख्या सुसंस्कृता॥

430

रहस्यत्रयसारव्याख्या सारचन्द्रिका

Beginning:

एवमर्थानुशासनभागेन शिक्षणीयार्थाः शिक्षिताः। तत्र केचिदेवमाक्षिपन्ति। तथाहि—ईश्वरस्य चेतनस्य च स्वस्वामिभावसंबन्धसद्भावादेव तस्य चेतनरक्षकत्वोपपत्तेः चेतनस्य कर्तव्यतया शरणागतिविधानमनुपपन्नम्। ये नाथवन्तो हीत्यादिश्लोकेषु नाथवतां नाथैकरक्ष्यत्वश्रवणात्।

End:

अयं बुद्धिस्थो रहस्यत्रयसारो वेंकटेशविपश्चिता वेंकटेशाख्यब्रह्मणा; ब्रह्मणा विपश्चितेति श्रुतेः। भगवदवतारभूतेनेत्यर्थः। समगृह्यत अपेक्षितसंकोचानपेक्षितविस्ताराभ्यां विना संग्रहेणोक्त इत्यर्थः।

Colophon:

इति श्रीशैलकुलतिलकश्रीमद्रमाकुमारतातयार्यवर्य्येन लब्धिभततन्नाम्ना श्रीमत्कविकथककण्ठीरव-गुरुवरानुग्रहलब्धवेदान्तरहस्यार्थजातेन अपर्याप्तामृतदासेन विलिखिता श्रीमद्रहस्यत्रयसारव्याख्या सारचन्द्रिकाख्या संपूर्णा ।

The scribe adds:

प्रमादीचाभिधे वर्षे मासे मकरसंज्ञिते ।
संपूर्णा लिखिता चाभूत् सरसा सारचन्द्रिका ॥

431

रहस्यत्रयसारार्थसंग्रहः

This is a summary of the *Rahasyatrayasāra* of Vedāntadeśika by Varadācārya, the son of Vedāntadeśika.

Beginning:

नमो वरदनाथाय वेदान्ताचार्यसूनवे ।
सर्वतन्त्रस्वतन्त्राय वाजिवक्त्राम्बुधीन्दवे ॥
पद्मानायकपादपद्मयुगले पर्यायभृङ्गात्मना
चेतो मे चिरपक्षपातविभवादास्वादमासीदतु ।
अध्यात्मश्रुतिदुग्धसिन्धुलहरीसंचारसंभावितै-
र्हंसश्रीरधिगम्यते सुकृतिभिर्यत्रोल्लसद्बुद्धिभिः ॥
श्रीमद्वरदनाथेन वेदान्ताचार्यसूनुना ।
रहस्यत्रयसारार्थसंग्रहोऽयं प्रकाश्यते ॥

सदाचार्यकटाक्षेण शरणागतस्य रहस्यत्रयसारार्थो नित्यभोग्य इति सत्त्वोत्तराणां संप्रदायः । रहस्यत्रयमिति श्रीमदष्टाक्षरो द्वयं चरमश्लोकश्च कथ्यते । तेन प्रतिबुद्धस्याधिकारिणः शरणागति-मन्त्रेण शरणागत्यनुष्ठानप्रकारः प्रकाश्यते ।

End:

तस्यापि सर्वे च्यवनधर्माण इति च्यवनधर्मत्वमुच्यते । तथाच कर्मवशात् पुनर्विषयानुभवोऽपि संभवतीति । भागधेयवशाद्भगवदुपासनमस्ति चेत् तद्विहाय स्वानुभवपरः किं सर्वबन्धविनिर्मुक्तः ? उत कर्मपरवशः ? अन्त्ये संसार्येव । आद्ये ब्रह्मानुभवविच्छेदे न कारणम् । स्वेच्छयेति तु हास्यम् । ईश्वरः स्वातन्त्र्यान्निगृह्णाति चेत्, तस्य निर्हेतुकत्वे महान् दोषः । सकारणं चेत् कर्मैव कारणं न किम् । तदनुवृत्तौ मुक्तिरेव न भवेत् । अतो ब्रह्मविदामेव ब्रह्मप्राप्तिरिति सर्वं समञ्जसम् ।

विमलमतिविशेषाद्वीक्ष्य हेयान् पुमर्थान्
स्थिरविनिहितबुद्धिर्यस्तु कैवल्यमुक्तौ ।
पुनरपि च भवेत् सा संसृतिस्तस्य काले
हरिभजनविपाकान्मुक्तिरेवाथ वा स्यात् ॥
वरुणनिलयकन्यावल्लभस्यैव पादे
शरणवरणवाणीतत्पराणां नराणाम् ।
चरणमनितराणां निर्मलं निर्ममाणां
शरणमिह परत्राप्यन्वहं नः प्रतीमः ॥

Colophon:

श्रीमत्त्रय्यन्तसिद्धान्तदेशिकेन्द्रस्य सूनुना ।
रहस्यत्रयसारार्थो वरदार्येण वर्णितः ॥

432

रहस्यत्रयसारार्थसंग्रहः

Reads the following colophon:

इति निखिलकवितार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथापरनाम्ना वेदान्ताचार्येण विरचितेषु रहस्यत्रयसारार्थसंग्रहः संपूर्णः ।

The scribe adds:

युवाब्दमीनधवलहरितिथ्यां पुनर्वसौ ।
रहस्यत्रयसारार्थसंग्रहो लिखितोऽभवत् ॥

The former owner of the MS. was Varadadeśika.

434

रहस्यत्रयार्थसारसंग्रहः

Beginning:

यत्प्रसादपरिज्ञातरहस्यत्रयवीक्षणात् ।
तमो निरस्तमखिलं तं नृसिंहगुरुं भजे ॥
श्रीमल्लक्ष्मणयोगीन्द्रैरन्यैश्च गुरुभिस्तथा ।
रहस्यत्रितयार्थोऽयं विस्तरेण समीरितः ॥

तदेकदेशमादाय नातिसंकोचविस्तरम् ।
क्रियते राघवार्येण विशदः सारसंग्रहः ॥

श्रीमन्नारायणस्य पादारविन्दमुपायोपेयतयाध्यवस्यतः कस्यचिच्चेतनस्य सदाचार्योपदिष्टतत्त्व-हितपरतया रहस्यत्रयं तावत् ज्ञातव्यं भवति । रहस्यत्रयमिति मूलमन्त्रद्वयचरमश्लोका उच्यन्ते । तथोक्तमभियुक्तैः—

मूलमष्टाक्षरो मन्त्रो मन्त्ररत्नं द्वयाह्वयम् ।
चरमश्लोक इत्येतद्रहस्यत्रितयं विदुः ॥

इति । तत्र तत्त्वस्वरूपयाथात्म्यं प्रतिपादयति मूलमन्त्रः । हितस्वरूपानुष्ठानं प्रकाशयति द्वयम् । अस्यानुष्ठानस्य शरण्यात्यन्ताभिमतिं प्रकाशयति चरमश्लोकः । तस्याभिमतविषयत्वात् रहस्यत्रयस्य तत्त्वहितपरत्वं सुव्यक्तम् ।

End:

अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः ।
अविद्यातरुसंभूतिबीजमेतद् द्विधा स्थितम् ॥

इति संसारहेतुतया स्मर्यमाणमहंकारममकाररूपमुभयविधं स्वार्थत्वमत्र निरस्यते । तत्राहं ममेति स्वस्य स्वकीयत्वाभिमानोऽहंकारः । अहमेव मम निर्वाहक इति तदर्थः । स च द्विविधः— देहात्माभिमानरूपः देहात् परस्य स्वतन्त्राभिमानरूपश्चेति । उभयविधोऽहंकारोऽनात्मन्यात्मबुद्धिरेव; दासोऽहं वासुदेवस्य इत्यादिभिरात्मस्वरूपस्य भगवत्पारार्थ्यप्रतिपादनात् । इदं ममेति स्वव्यतिरिक्ते वस्तुनि स्वकीयत्वबुद्धिर्ममता । सा च द्विविधा—देहानुबन्धिभोग्यभोगोपकरणादिविषया तद्व्यति-रिक्तपारलौकिकतत्साधनविषया चेति । एवमुभयतः स्वस्मिन् स्वव्यतिरिक्ते च ममतान्वयो दोषः । स एवात्र निवर्त्यते । तत्र देहात्माहंकारस्तदनुबन्धिविषय

435

रहस्यमञ्जरी

This is a metrical work explaining the mystic principles of Śrīvaiṣṇava religion and answering the objections raised by other schools. The author belonged to the Gārgya family and was the pupil of Kauśika Varadācārya.

Beginning:

रम्यजामातृयोगीन्द्ररहस्यामृतवर्षिणी ।
रहस्यमञ्जरी रम्या राजते नितरां भुवि ॥
अन्तर्बहिश्चेति श्रुत्या द्व्यणोरन्तर्विभोर्बहिः ।
विष्णोः श्रुता या व्याप्तिस्तां श्रुतिरेवाह च स्फुटम् ॥

अणोरणीयान् महतो महीयानिति विस्तरात् ।
समुदायः कथं वा स्यादेकत्रैव विरुद्धयोः ॥
विरुद्धयोः समावेश एकाधिकरणे यदि ।
भेदाभेदावपि तथा स्यातां ब्रह्मण्यबाधितौ ॥
सर्वाद्वैतार्थकथने को दोष इति चेन्न तत् ।
विरुद्धघटनाशक्त्या विरोधपरिहारवत् ॥
विरुद्धघटना शक्तिर्न भेदाभेदवादिभिः ।
अङ्गीकृता न चाद्वैतवादिभिः शक्तिरीरिता ॥
स्वरूपतो विभोर्विष्णोरणुत्वं च स्वरूपतः ।
विरुद्धघटनाशक्त्या विरोधोऽत्र न दृश्यते ॥

End:

श्रीमतो भाष्यकारस्य सर्वज्ञस्य यतीशितुः ।
दर्शनार्थविरोधित्वात् पूर्वार्याज्ञत्वकल्पनात् ॥
सर्वत्राग्रहमूलत्वात् शुष्कतर्कैकमूलतः ।
उपक्रमोपसंहारविरोधाच्च पदे पदे ॥
श्रुतिस्मृतिगुरूक्तीनां विरुद्धार्थप्रकीर्तनात् ।
पराङ्कुशमुनीन्द्रादिसूक्तिभाष्यविरोधतः ॥
सौम्यजामातृयोगीन्द्रसंप्रदायप्रवर्तकैः ।
सर्वज्ञैः सर्वविद्भिश्च सर्वशास्त्रार्थपारगैः ॥
काणादतन्त्रवत् पूर्वपक्षत्वेनाप्यनादरात् ।
नास्माभिरपि संस्पृश्यमित्यस्माभिर्विभाव्यते ॥

Colophon:

श्रीकौशिकाधीशवरप्रदार्यलब्धात्मसत्तेन नतार्तिहन्त्रा ।
गार्ग्येण सम्यग् लिखिता रहस्यमज्झर्यसौ सन्मधुकृत्सुभोग्या ॥

Post-colophon writing:

द्विजत्वं नित्यकर्मादेर्विप्रत्वं वेदपाठतः ।
ब्राह्मण्यं ब्रह्मविज्ञानात् प्रवदन्ति मनीषिणः ॥

437

रहस्यविवेकार्थसंग्रहः

Eight verses summarizing the purport of the Tamil work *Rahasyaviveka* dealing with certain points on which the two sects of Śrīvaiṣṇava-s differ

from each other. These verses are found at the end of the same Tamil work *Rahasyaviveka*.

Beginning:

नोपायः श्रीर्न विभ्वी न शरणवचसः साधनत्वं विमुक्तिः
कैवल्यं तस्य सिद्धेः परमपि न परप्राप्तिरण्डाद्वहिस्तत् ।
दौर्बल्यं न प्रपत्तेरपि शकनवतां न स्वरूपानुरूपा
भक्तिः सर्वाधिकारो न्यसनमिह पृथक् साधने कर्मबुद्धी ॥ १ ॥

End:

प्रत्येकोक्तौ त्वशक्तौ न्यसनमिह पुनर्मा निवृत्तिः स्वभोगा-
दाज्ञानुज्ञानसिद्धे परिचरणयुगे पूर्वमेव प्रधानम् ।
न्यासो रक्षाभरः स्यात् प्रपदनमविनाभूतपञ्चाङ्गमेतद्
भक्तस्याप्यस्ति मुक्तौ भगवदनुभवश्चापि कैंकर्यपङ्क्तिः ॥ ८ ॥

438

रामानुजनवरत्नमालिका

This explains the chief principles of the Viśiṣṭādvaita school. (See Nos. 78 above and 511 below for the author's other works.)

Beginning:

अनवद्यगुणावासमञ्जनाद्रौ विजृम्भितम् ।
अपारकरुणासिन्धुमाश्रये पुरुषोत्तमम् ॥
पाषण्डद्रुमषण्डदावदहनश्चार्वाकशैलाशनि-
र्बौद्धध्वान्तनिरासवासरपतिर्जैनेभकण्ठीरवः ।
मायावादिभुजङ्गभङ्गगरुडस्त्रैविद्यचूडामणिः
श्रीरङ्गेशजयध्वजो विजयते रामानुजोऽयं मुनिः ॥

यदाहुर्नवीनाः स्वविषयस्वाकारतद्विरुद्धद्वयवैशिष्ट्यावगाहिस्वसमबलज्ञानाविरोधिज्ञानत्वं संशयत्वम् । श्वैत्यानुमितेः पीतभ्रमविरोधित्वाभावेन तत्रातिव्याप्तिवारणाय समानबलत्वं विशेषणम् । तथा च समानबलपरोक्षभ्रमविरोधित्वात् संशयविरोधित्वाच्च न श्वैत्यानुमितावतिव्याप्तिः । यज्ज्ञानं यत्संशयनिवृत्त्यनुकूलस्वरूपविशेषवत् स तन्निश्चयः । इतरस्तु न तथेति ।

End:

अत एव अथ कस्मादुच्यत इत्याद्यपि न ; अशब्दार्थत्वात् । अत एव गङ्गापदेन तीरमुच्यत इत्यप्यसत् ; स्वगोष्ठीमात्रसंप्रदायत्वात् । भगवतो नारायणशब्दाभिधेयस्यावाच्यत्वं वदन्त एवावाच्याः ।

Colophon:

इत्यात्रेयकुलतिलकवादिगजेन्द्रकेसरिजगन्नाथार्यसूनुना स्वपितृव्यश्रीनृसिंहार्यशिष्येण धर्मपुरीशेन ग्रथितायां रामानुजनवरत्नमालिकायां ब्रह्मणोऽवाच्यत्वभङ्गनं नाम नवमं रत्नम्। समाप्तं च प्रकरणम्।

रामानुजमतस्थानां पादपङ्केरुहं भजे।
तन्मतद्वेषिणां वाचं निरुन्ध्यां नृपसंसदि॥

The work is divided into the following 9 chapters or Prakaraṇa-s:

१. संशयलक्षणखण्डनम्, २. निर्विशेषवस्तुखण्डनम्, ३. प्रपञ्चमिथ्यात्वखण्डनम्, ४. भावरूपाज्ञानखण्डनम्, ५. अहमर्थानात्मत्वखण्डनम्, ६. भेदसमर्थनम्, ७. भेदश्रुत्यपार्थखण्डनम्, ८. सगुणब्रह्मसमर्थनम्, ९. ब्रह्मणोऽवाच्यत्वभङ्गः।

439

रामानुजसिद्धान्तविजयः

This is an original treatise on the *Śrībhāṣya*. The author, Rāmānujadāsa alias Ramyajāmātṛmuni, was a pupil of Veṅkaṭācārya of the Vādhūla family of Srirangam. The work is also entitled *Ravimaṇḍalī* in the MS. It is also called *Candrikākhaṇḍana* as it refutes the views of the *Tātparyacandrikā* of Vyāsayati. The author refers to Sudarśanabhaṭṭa, Vedāntadeśika and Campakeśa.

Beginning:

रविमण्डली चन्द्रिकाखण्डनप्रारम्भः।

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां सकलाभीष्टतदुपायतदाभासविवेकाय 'हर्तुं तमः सदसती च विवेक्तुमीशो मानं प्रदीपमिव कारुणिको ददाति' इत्युक्तविधया वेदाख्यप्रमाणं प्रदाय, अवतारादिमुखेन तदर्थविषयकज्ञानं चोत्पाद्य,

नारायणात् समुत्पन्नं ज्ञानं कृतयुगे स्थितम्।
किंचित् तदन्यथा भूतं त्रेतायां द्वापरे खिलम्॥

इत्युक्तप्रकारेण तस्मिन् ज्ञाने कृतयुगानन्तरं क्रमेण खिले सति,

संकीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः।
शरण्यं शरणं जग्मुर्नारायणमनामयम्॥
तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः।

अवतीर्णो महायोगी सत्यवत्यां पराशरात् ॥
उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम् ।
चतुर्धा व्यभजत् तांश्च चतुर्विंशतिधा पुनः ॥
शतधा चैकधा चैव तथैव च सहस्रधा ।
कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये ।
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥

End:

न चैवं सर्वत्र प्रसिद्धगायत्रीरूपं विहाय क्वाचित्केन तद्रूपेण सादृश्यग्रहणे सर्वत्र गोः चतुष्पात्त्वेऽपि क्वचिदौत्पादिकी गौर्द्विपात्

440

रामानुजसिद्धान्तसंग्रहः

This is a summary in five chapters of the principles of the Viśiṣṭādvaita school as accepted by Rāmānuja. The author was the son of Caṇḍamārutam Veṅkaṭācārya and grandson of Kṛṣṇasūri of the Śrīvatsagotra of Alasur village in Chingleput District. He refers to his grandfather's work *Nityānuṣṭhānadīpikā* and Nṛsiṃharāja's *Sarvārthasiddhivyākhyā Ānandadāyinī*.

Beginning:

वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥
श्रीमानेव शरण्य इत्यनुपदं जोघुष्यतेऽनुश्रव-
स्मृत्याचार्यपरंपरोक्तिभिरथाप्येतद्दृढिम्ने स्वयम् ।
अङ्के पङ्कजवासिनीं स्वसदृशीं बिभ्रज्जगद्रक्षणा-
लंकर्मीणविहारभेदरसिको जीयान्नृकण्ठीरवः ॥
जननीं जगतां पत्युरभिगम्यत्वदायिनीम् ।
अज्ञातनिग्रहां नौमि जगद्रक्षणदीक्षिताम् ॥
अ रमारमणादा च रङ्गनाथगुरूत्तमात् ।
गुरुपारंपरीं वन्दे करुणामिव रूपिणीम् ॥
श्रीकृष्णसूरिचरणौ शरणं संश्रयेमहि ।
यत्सेवया परत्रेव समृद्धिरिह पुष्कला ॥
यद्वाग्झरीभिर्वादेऽदाच्छ्रीनिवासमहामुनिः ।
चण्डमारुतसंज्ञां हि यस्मै तं पितरं श्रये ॥

श्रीवासराघवेणाद्य क्रियते विदुषां मुदे ।
रामानुजार्यसिद्धान्तसंग्रहः साधुसंमतः ॥
न्यायसिद्धान्जने सर्वमाचार्येण निरूपितम् ।
तत्रापि मेयमानानां दुर्ग्रहत्वादियं कृतिः ॥
द्रव्याद्रव्यप्रभेदेन तत्त्वयाथात्म्यरूपणम् ।
परपक्षप्रतिक्षेपपूर्वकं क्रियतेऽधुना ॥

नन्वपवर्गसिद्धौ यदपेक्षितं तदेव विशदं तदर्थिभिर्ज्ञातव्यम् ; तावदेव शिष्यादिभ्योऽपि प्रवर्तयितव्यम् ; किमन्यैरनपेक्षितैः द्रव्याद्रव्यादिभिरिह कीर्त्यमानैरिति चेत् ; न ; द्रव्यादिनिखिल-पदार्थनिरूपणस्यापि परंपरया मोक्षसाधनत्वात् ।

Colophon at the end of the Prakṛtipariccheda:

इति वत्सकुलतिलकश्रीकृष्णसूरिचरणारविन्दसेवासंपादिताशेषविद्याविलासेन तत्पौत्रेण चण्ड-मारुतापरनामधेयश्रीवेंकटाचार्यतनूजेन श्रीनिवासराघवदासेन विरचिते रामानुजसिद्धान्तसंग्रहे प्रकृति-परिच्छेदः समाप्तः ।

End:

श्रीमद्गीतायामेकादशाध्याये विग्रहस्य व्यापकत्वादिकं व्यक्तमेव भाष्यकारैः प्रतिपादितम् ।

इहैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥

इत्यत्र पृथिव्यन्तरिक्षस्वर्गपातालवितलसुतलादिभोगोपकरणभोगस्थानभिन्न . . . पुरुषात्मकं कृत्स्नं जगत् इहैकस्थम् एतद्विग्रहैकदेशस्थमित्युक्तम् । तथा—

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यदर्शनकाङ्क्षिणः ॥

इति ममेदं सर्वप्रशासने च स्थितं सर्वाश्रयं सर्वकारणभूतं रूपं यद् दृष्टवानसि तत् सुदुर्दर्शं न केनापि द्रष्टुं शक्त्यमित्याद्युक्तम् ।

441

रामानुजसिद्धान्तसंग्रहः

The author was the son of Pāṭṭarācārya and grandson of Kumāratātā-cārya of Kumbakonam.

Beginning:

श्रीमहीसेवितपदं शेषपर्यङ्कशायिनम् ।
शेषिणं सर्वजगतां शार्ङ्गिणं संश्रयेमहि ॥
हरिश्रीसैन्यराट्कारिभूनाथाब्जदृशो भजे ।
रामयामुनपूर्णार्यलक्ष्मणाम्नायशेखरान् ॥
पाट्टराचार्यतनयः श्रीनिवासमुधीमणिः ।
श्रीलक्ष्मणार्यसिद्धान्तं संगृह्णाति यथामति ॥

श्रीमद्द्वैपायनबोधायनरामानुजमुनिभिरुन्नीतमुपलिख्यते । तत्र निखिलचिदचिच्छरीरकपरमात्मा श्रीपतिरेव शास्त्रस्य प्रधानप्रतिपाद्यो विषयः । नित्यनैमित्तिकवर्णाश्रमधर्मानुगृहीतया तदुपासनया तन्न्यासेन वा देशविशेषप्राप्तिपूर्वकं तत्साम्यं प्राप्तस्य परिपूर्णब्रह्मानुभवो मोक्षः परमपुरुषार्थः । तच्चाचिन्नाम चैतन्यानाश्रयो द्रव्यम् । तच्च त्रिविधम्—प्रकृतिकालशुद्धसत्त्वभेदात् ।

End:

एवं शारीरकशास्त्रे प्रतिपादितं सकलश्रुतीतिहासपुराणादिगोचरं निखिलचिदचिच्छरीरं हेयप्रत्यनीककल्याणगुणैकतानं परं ब्रह्म नारायण इति सिद्धम् ।

निखिलचिदचिन्मूर्तिः सर्वान्तरोऽखिलकारणं
गुणगणनिधिः श्रीमान् हेयोज्झितः श्रुतिगोचरः ।
अनितरपरा भक्तिर्न्यासोऽथवात्र परं हितं
वितमसि पदे तस्य प्राप्तिः फलं च परं मतम् ॥
पट्टराचार्यतनयः श्रीनिवासमुधीमणिः ।
अकरोल्लक्ष्मणाचार्यमतसिद्धान्तसंग्रहम् ॥

श्रीनिवासाचार्याणामेव राजसभायामस्मन्मतसंग्रहश्लोकः—

विष्णुः सर्वान्तरामा विमलगुणनिधिर्विश्वशब्दैकवाच्यो
भक्त्या लभ्यः प्रपत्त्या पुनरतिसुलभो मुक्तिमुक्तिप्रदोऽपि ।
जीवः सर्वोऽस्वतन्त्रः प्रकृतिरपि तथा किंकराः शंकराद्या
इत्थं त्रय्यन्तसिद्धं मतमिदमनघं ताड्यतां जैत्रभेरी ॥
विश्वं सत्यमबाधितं च परवद्विख्यातमेवं श्रुतौ
किंचैतत् स्वयमस्वतन्त्रमपरः कश्चित् स्वतन्त्रः पुमान् ।
तत् सृष्ट्वा तदनुप्रविश्य जगतः सम्यक् प्रकारक्रमै-
राविर्भावमवाप्य यः स्वयमहो लक्ष्म्या सह क्रीडति ॥

442

रामानुजसिद्धान्तसंग्रहव्याख्या प्रकाशिका

This is a commentary on the *Rāmānujasiddhāntasaṃgraha* described under MG, D. 4988.

Beginning:

प्रपद्य श्रीहयग्रीवचरणौ शरणं मया ।
रामानुजार्यसिद्धान्तसंग्रहार्थः प्रकाश्यते ॥

चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्तये प्रचयगमनाय च भगवद्वन्दनात्मकं मङ्गलं, भगवद्वन्दनं स्वाद्यं गुरुवन्दनपूर्वकम्, इत्याद्यनुसारेण गुरुवन्दनपूर्वकमाचरति—वाधूलेत्यादिना । अत्र वाधूलवंशोद्भवस्य वरदाचार्यस्य पञ्चभिः संस्कारैः स्वसंस्कर्तुः प्रधानाचार्यतया प्रथमनिर्देशः । वत्सवंशोद्भवस्य श्रीनिवासाचार्यस्य श्रीभाष्याचार्यतया तद्वन्दनस्याप्यादर इति बोद्धव्यम् । अथ भगवन्तमाश्रयते—श्रीवराहमिति । लक्ष्मीसहितमित्यर्थः । तस्याश्रयणीयत्वोपयोगिफलप्रदत्वमाह—श्रितेति । अथ प्रेक्षावत्प्रवृत्तये विषयप्रयोजनसंबन्धाधिकारिणः प्रदर्शयन् शिष्यावधानाय चिकीर्षितं प्रतिजानीते—रामानुजार्येत्यादिना ।

End:

तेन यद्धर्मविशिष्टे बोध्यबोधकभावो गृहीतः, तद्धर्मविशिष्टे वृत्तिरभिधा वृत्तिरिति लभ्यते । एवमप्युपचरितार्थेऽपि बोध्यबोधकभावग्रहसंभवात् तद्वृत्तिरशक्यवारणेत्याशयेनाभिप्रेतार्थमाह—शब्दस्येति । तत्प्रतिपादनमिति ; अर्थप्रतिपादनमित्यर्थः ; तच्छब्दस्य विशेष्यमात्रपरत्वात् । सा च ; अभिधा वृत्तिश्च

445

रामानुजसिद्धान्तसारः

This work gives the essence of the teachings of Rāmānuja, and also of some important festivals to be observed by the Śrīvaiṣṇava-s. (See *JSVOI*, vol. 2, p. 187 f.)

Beginning:

अतसीगुच्छसच्छायमञ्चितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
लक्ष्मीवल्लभपर्यन्तां नत्वा गुरुपरंपराम् ।
श्रीरामानुजसिद्धान्तसारः सम्यक् प्रकाश्यते ॥
गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दंपती जगतां पती ॥

नमोवाकं नमउक्तिम्। अधीमहे इति अधिपूर्वात् इङ् अध्ययने इत्यस्मात् लुङ्विकरण-पठितात् लटि रूपम्। केचित् अधीमहि इति पठन्ति। तन्नाधिपूर्वात् इङ् अध्ययने इत्यस्मात् लिङि आङ्गत्वात् दीर्घात् परत्वाच्च इयङादेशे अधीयीमहि इति रूपेण भाव्यम्; न त्वधीमहि इति वदन्ति। कथमधीमहि रङ्गधुर्यमिति श्रीभट्टप्रयोगः? आगमशासनस्यानित्यत्वेन सीयुडागमस्यानित्यत्वात्। एवमेवाह—आचार्यवान् पुरुषो वेद। तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति। सद्विद्यायां यथा गान्धारदेशेभ्यः पिहिताक्षतया कश्चिच्चोरेण नीतो विजने वने विसृष्ट आक्रन्दन् केनचित् कारुणिकेन पुंसा विमोचिताक्षिबन्धनस्तदुपदिष्टमार्गविशेषं प्रतिपद्यते, एवमेवाचार्यवान् पुरुषस्तदुपदेशेन ब्रह्मस्वरूपं विदित्वा प्रारब्धावसाने ब्रह्म प्राप्नोतीति प्रतिपादनेनाचार्यवत्ताया मोक्ष-हेतुत्वश्रवणात्।

End:

यच्चोक्तं वैदिकसार्वभौमैः—अष्टम्यामथ रोहिण्यां ..... धर्ममुपवासार्जितं फलम्, इति जयन्त्यां दिवापारणस्य निषिद्धत्वात् जयन्त्यर्धरात्र एव पारणं भविष्यतीति। तदसत्; परदिने अहर्व्याप्ततिथ्यृक्षसद्भावे पारणं न कार्यमित्येतावता जयन्त्यर्धरात्रपारणस्याप्रसक्तेः। जयन्तीमात्र-पारणस्य निशि कर्तव्यत्वात् दिवा निषेधे अवैष्णवस्यापि जयन्तीपारणं दिवा न स्यादित्यास्तां तावत्।

आस्तिक्यवान् निशितबुद्धिरनभ्यसूयुः
सत्संप्रदायपरिशुद्धमनाः सदर्थी।
संकेतभीतिरहितः सतृणेष्वसक्तः
सद्वर्तनीमनुविधास्यति शाश्वतीं नः॥

Colophon:

इति श्रीरङ्गरामानुजमुनेः कृतिषु श्रीरामानुजसिद्धान्तसारः समाप्तः।

446

लक्षणानुपपत्तिः

The work attempts to prove that the doctrine of Avidyā of the Advaitin-s cannot be maintained by giving a satisfactory definition of Avidyā.

Beginning:

किंच किमविद्याया लक्षणम्? वाच्यत्वानधिकरणत्वं वा, तुच्छत्वं वा, सत्त्वासत्त्वात्यन्ता-भावाधिकरणत्वं वा, ब्रह्मतुच्छविलक्षणत्वं वा? न प्रथमः, सदसद्विलक्षणत्वेन वाच्यत्वमङ्गीकुर्वतः स्ववचनव्याघातात्; ब्रह्मणि तुच्छे चातिव्याप्तेः; वाच्यत्वस्य केवलान्वयितया तदनधिकरणा-प्रसिद्धेरसंभवत्वापाताच्च। किंच वाच्यत्वानधिकरणत्वं केनचिदवगतं वा? न वा? नाद्यः, वाच्यत्व-प्रसङ्गात्।

End:

तत् किं ब्रह्मतुच्छविलक्षणत्वं सत्यम्? असत्यं वा? नाद्यः; असत्ये भावरूपाज्ञाने सत्यस्य तस्यावस्थानं व्याहन्येत। न द्वितीयः, ब्रह्मतुच्छतादात्म्यप्रसङ्गात्।

Colophon:

इति लक्षणानुपपत्तिः।

447

लक्ष्मीविभुत्वखण्डनम्

This is a metrical work criticizing the view of the school of Vedāntadeśika that Goddess Lakṣmī comes under the category of Īśvara or Brahman and she is *vibhu* (all-pervading) like the Lord Nārāyaṇa.

Beginning:

नियन्तृत्वं नियाम्यत्वविरहव्याप्यमीरितम्।
यत् तन्न धरणीदेव्यामनैकान्तिकता यतः॥ १॥
भूमौ श्रुतं नियन्तृत्वं तद्विभूतित्वतः श्रियि।
पर्यवस्यति चेदेतत् तद्विभूतौ हरौ भवेत्॥ २॥
नियन्तृत्वं न प्रवीणं शेषत्वस्य प्रसाधने।
कालात्ययापदिष्टत्वं पत्नीत्वश्रवणाद्यतः॥ ३॥
असिद्धं यदि पत्नीत्वमसिद्धा स्यान्नियन्तृता।
औपाधिकं चेत् पत्नीत्वं नियन्तृत्वं च तादृशम्॥ ४॥
अश्रुतेन श्रुतत्यागो न मीमांसकतोषदः।
सर्वशाखाप्रत्ययस्य निष्कलत्वं यतो भवेत्॥ ५॥

End:

ब्रह्मरुद्रादिदेवेषु श्रुतिष्वीश्वरता श्रुता।
अन्योन्येच्छाविघातस्य निवृत्तेर्न निषिध्यताम्॥ ५९॥
पत्नीवत् पुत्रपौत्रादेरविरोधः समञ्जसः।
. . . . . .
न हि तद्व्याप्यतामेति श्रौती व्यातिर्यतोऽरुणत्॥ ६०॥

448

लक्ष्मीविभुत्वखण्डनम्

Beginning:

अस्येशानादिवाक्येन विष्णुपत्नीति शब्दतः।
भूमिनीलादिसर्वासु जगदीशानता श्रुता॥

तत्रैकवचनं जातिविवक्षावशतो भवेत् ।
आत्मा शरीरमितिवत् तच्च सोपाधिकं मतम् ॥
विष्णुपत्नीति निर्देशस्त्वारस्यं नान्यथा भवेत् ।
अन्तर्यामिब्राह्मणादौ यमयत्यन्तरोऽखिलम् ॥
श्रुतमित्थं ब्रह्मलिङ्गं यस्मिन् वाक्येऽभिधीयते ।
आकाशन्यायतस्तच्च वाक्यं ब्रह्मपरं मतम् ॥

End:

नो चेत् सर्वं सापवादं सर्वसिद्धान्तभञ्जनम् ।
इत्यादिः सुमहान् दोषो भवेदेव न संशयः ॥
न्यूनेश्वरत्वं वा सर्वेश्वरत्वं वा प्रसाध्यते ।
सिद्धसाधनमाद्ये स्याद् द्वितीये बाधितं भवेत् ॥

449

लक्ष्मीविभुत्वखण्डनम्

Beginning:

भूमिनीलापतिर्योऽसावीश्वरः समुदाहृतः ।
निरुपाधीश्वरत्वं तु वासुदेवे प्रतिष्ठितम् ॥

इत्यादिना भगवत एवेश्वरत्वं, लक्ष्म्यास्तु जीवत्वमित्यवगम्यते। ईशितव्याद्विभाजकलक्ष्मी-वाल्लभ्येत्यादिना श्रियो जीवत्वं भट्टपराशरपादैरुक्तम् । जीवत्वं भगवद्भिन्नचेतनत्वम् ; सेश्वरत्वं वा । ईश्वरत्वं त्वनन्यनैसर्गिकशेषित्वम् । तच्च भगवत एव । अत्र च श्रियः स्वरूपप्रदर्शनविषये राडसि बृहती, यया मया जगद्व्याप्तं स्वरूपेण स्वभावतः, इत्यादेर्महत्त्वपरसामान्यविशेषवचनवर्गद्वयस्य, वालाग्रशतभागस्य, अज्यायांसोऽपरे सर्वे ज्यायानेकः परो मतः, श्रियं च मत्कलां सूक्ष्माम्, अहं नारायणी सूक्ष्मा, इत्यादेस्तदणुत्वबोधकसामान्यविशेषवचनवर्गद्वयस्य च विरोधेऽन्यतरसंकोच-स्यावश्यकतया कस्य संकोच इति विमर्शे बृहतीशब्द एव स्वरूपातिरिक्तबृहत्त्वपरतया संकोच-कल्पनमुचितम् ।

End:

श्रियामपि भगवद्विभूतित्वनिबन्धनवैभवावादप्रतिबन्ध्युद्भावनं प्रमाणशरणानामस्माकं प्रमाण-स्वारस्यकुण्ठनमेवेति सुधीभिर्विभावनीयम् ।

450

लक्ष्मीविभुत्वसमर्थनम्

This is a metrical treatise supporting the view held by Vedāntadeśika's school that Goddess Lakṣmī comes under the category of Īśvara or Brahman and she is *vibhu*.

Beginning:

शीर्षाक्षिवर्ष्मवान् वेदे त्रिवृद्वायत्रसामभिः ।
यः ख्यातः सोऽवतादस्मान् स्तोमात्मा विहगेश्वरः ॥
सद्वंशजः सुवृत्तः शुभगुणशाली सदा विशुद्धात्मा ।
रघुनाथदेशिकमणिर्विलसतु हृदि मे महागुरुः श्लाघ्यः ॥
ओं नमो भक्तिसाराय गुरुवेदान्तसूरये ।
बौद्धान् प्रच्छन्नबौद्धांश्च वादैर्वातर्विधून्वते ॥
ईष्टे पत्न्यप्यतः श्रीर्जगदवगमकख्यापितैश्वर्यमस्याः
कम्रैश्चेष्टैः कृपा न क्रमितृकलिता तादृशी स्यात् तदन्या ।
तेनास्तं स्वाम्यसाम्यं नियमनविषये भूरिमालिन्यलूनं
विभ्वीयं सूक्ष्मभावः प्रतिबलवशतः संश्रयेदान्यविध्यम् ॥
एकः शास्तेति शास्तुः प्रकटमनितरामैश्वरीं नेतुरेता-
मीशानाश्रुत्युपेतं नियमयति गिरोः साम्यमौचित्यरूपम् ।
गन्धद्वारेति मन्त्रस्फुटतरपठितामिन्दिरासूक्तमध्ये
भूसूक्तेऽप्यस्ति नायं घटयति धरणेर्निःसहायस्तथात्वम् ॥

End:

मातृत्वाकारयोगात् कठिनदमनता नेष्यते सर्वशक्ते-
स्तस्मात् तच्छक्तिमात्रं न फलमुपदधात्यागसामालयेऽपि ।
तस्माल्लक्ष्मीरुपायः सह . . . . . ॥

451

लक्ष्म्युपायत्वनिरासः

A refutation of the theory of Vedāntadeśika's school that Goddess Lakṣmī too is the means for obtaining Mokṣa.

Beginning:

उल्लेखः पूर्वपक्षस्य भवद्भिः प्रहितोऽद्य नः ।
राद्धान्तोद्गारचारुत्वे भवत्यवसरप्रदः ॥

यदुक्तं श्वेतरक्तपट आनेय इत्यादाविव व्यवहितान्वय इति । तत्रोच्यते—न हि क्वचिद्व्यवहितान्वयदर्शनमात्रेणाव्यवहितान्वयज्यायस्त्वमपैति, न वा व्यवहितान्वयस्य दुष्टत्वं वार्यते । तथा सति मूलतः शाखां परिवास्योपवेषं करोतीत्यादावपि व्यवहितान्वयप्रसङ्गेन सर्वस्याग्रार्थत्वानापत्तेः । श्वेतरक्तपटनिदर्शनं चासंगतम्, त्रिपदकर्मधारयपदस्यासाधुत्वेन कर्मधारयगर्भकर्मधारयस्यैवाश्रयणीयत्वात् । तत्र श्वेतश्चासौ रक्तश्चेति श्वेतरक्तः, स चासौ पटश्चेति श्वेतरक्तपट इत्याश्रयणे

श्वेतशब्दार्थस्य रक्तपदार्थानन्वये व्यपेक्षाभावेन समासानापत्तेः। रक्तश्चासौ पटश्च रक्तपटः, श्वेतश्चासौ रक्तपटश्च श्वेतरक्तपट इत्याश्रयणेऽपि रक्तपटरूपं यद्विशेष्यं तत्रैव श्वेतपदार्थस्याभेदेनान्वयात् व्यवहितान्वयाप्रसक्तेः।

End:

परं तु स्वसामग्र्या निष्पन्नस्य सद्विद्यादेः विनिवर्तनसामर्थ्यमेवाङ्गविशेषेणाधीयते इत्येव जन्म कर्म चेत्यादिना बोध्यते।

452

लक्ष्म्युपायत्वसमर्थनम्

This work tries to refute Bālasarasvatī's *Mumukṣuppaḍivyākhyā Tātparyadīpikā* and prove that Goddess Lakṣmī is the means for attaining Mokṣa. The author was the son and pupil of Varadācārya of Śrīvatsagotra, who was the sister's son of Gopāladeśika of Kumbakonam. He was also the pupil of Vedāntarāmānujamuni. He quotes the following works and authors: *Śrītattvasiddhāñjana, Vedārthasaṃgraha, Śrutaprakāśikā, Śrīsūktabhāsya, Prapannapārijāta, Rahasyatrayasāra, Pārāśaryavijaya, Nayaviveka, Nayavivekadīpikā, Caṇḍamāruta, Kāśikāvṛtti, Tattvabodhinī, Tantraratna, Śāstradīpikā, Somanāthīya*; Śrīvatsāṅkamiśra, Yāmunācārya and Parāśarabhaṭṭa.

Beginning:

आकारत्रयसंपन्नामरविन्दनिवासिनीम्।
अशेषजगदीशित्रीं वन्दे वरदवल्लभाम्॥
श्रियो जगुरुपायत्वमाचार्याः सप्रमाणकम्।
तान्नमामि तदीयांश्च तद्ग्रन्थांस्तां श्रियं हरिम्॥
श्रीसूक्तमपि पुंसूक्तं ययोस्तत्त्वैकजीवने।
उपायोपेयभूतौ तावीश्वरौ दंपती भजे॥
श्रीमदाचार्यसूक्तिस्थपूर्वपक्षः परोदितः।
तदीय एव सिद्धान्तो लिख्यते विदुषां मुदे॥

श्रीमत्सिद्धोपायशोधनाधिकारे—*இப்படி நாராயணசப்தத்தில் ஸித்தமான குணவிசேஷங்களடியாகப் பிறக்கும் கலக்கங்களுக்குப் பரிகாரமுதாகரித்தோம். இனி,*

लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया।
रक्षकः सर्वसिद्धान्ते वेदान्तेऽपि च गीयते॥

என்கிறபடியே ஸபத்நீகனுய்க் கொண்டு ஸர்வரக்ஷணயஜ்ஞ தீக்ஷிதனன ஸர்வேச்வரனுக்கு ஸ்ரீமத்சப்தத்திலே சொல்லுகிற பத்நீ-

ஸம்பந்தத்தில் வரும் கலக்கங்களுக்கு திங்மாத்திரத்தாலே பரிஹாரம் காட்டுகிறோம்.

Colophon on page 186:

वत्सान्वयकुलोद्भूतवरदाचार्यसूनुना ।
बालसारस्वती युक्तिर्बालयुक्तिसमीक्रता ॥
लिखित रघुनाथेन तत्पितुः पादसेविना ।
क्षन्तव्यः सर्वदा सद्भिर्लेख्यदोषो दयालुभिः ॥

End:

युवत्वादौ तुल्येऽपीत्यादिना एकतत्त्वमिवोदितावित्यादिप्रथमोदाहृतप्रमाणशतेन च तेषां तद्धर्माणां भगवद्धर्मैतुल्यत्वप्रतीतेः। अन्यथा अप्रमेयं हि तत्तेजः इत्यादिना भगवद्धर्माणामपि लक्ष्म्यधीनत्वप्रसङ्गः ।

453

लक्ष्म्युपायत्वसमर्थनम्

Beginning:

श्रीमत्तदङ्घ्रियुगलं हरिचरणावित्यत्रैव श्रीमच्छब्दस्य चरणविशेषणत्वात् नीलघटमानय पुत्रवच्चैत्रमानयेत्यादाविव विशिष्टतात्पर्यबलेन श्रीविशिष्टचरणयोः प्रपदनकर्मत्वान्वये बाधकाभावात्, विशेष्याभिप्रायेण द्विवचनोपपत्तेश्च । एकत्र विशेषणत्वेनान्वितस्यापरत्र स्वातन्त्र्येण विशेषणत्वान्वयायोगेऽपि घटो नास्तीत्यादौ घटत्वस्य समवायत्वावच्छिन्नप्रतियोगित्वसंबन्धाभ्यां घटतदभावयोरिव श्रीमच्छब्दार्थस्य नारायणतच्चरणयोरन्वयोपपत्तेश्च चरणाविति द्विवचनान्तस्य दंपत्योर्विग्रहद्वयोपलक्षकत्वसंभवाच्च ।

End:

तस्मादुभयमध्यस्थतया विशिष्टं तत्त्वमुपायः, प्राप्यं शेषि परतत्त्वं परं ब्रह्म परं ज्योतिः नित्यानुकूलं स्वतः इच्छया विशेषणविशेष्यभावापन्नमित्येवाभ्युपगन्तव्यमिति ।

श्रौतवाक्यानुसारीणि कानिचिद्वचनानि हि ।
तन्त्रेषु प्रायशो लक्ष्म्याः प्राधान्यपरता गिराम् ॥
श्रुतावपि गिरामेवं प्राधान्यपरता हरेः ।
अस्येशानादिवाक्यानां केषांचिच्छ्रीप्रधानता ॥

454

लयविचारः

A discussion on the meaning of the word *laya*. The author explains that the Laya mentioned in the Upaniṣad-s is not a complete cessation of

existence, but it is the merging of the effect with its cause and remaining in the shape of the cause.

Beginning:

विसदृशावस्थाप्रहाणेन कारणत्वधर्मिणा द्रव्येण विभागावधिभूतेन संश्लेषो लयः। ननु संश्लेषो नाम किं स्वरूपैक्यम्? उत संयोगः? आद्ये कारणेन स्वरूपैक्यमेव कार्यस्य लय इत्युक्तं स्यात्। तत्तु नैमित्तिकादिप्रलयसाधारणं न भवतीत्यादिदूषणग्रस्तम्। द्वितीये तु संयोगस्य द्विनिष्ठत्वाद्वय्यंभावेन घटपटयोरिव कार्यकारणयोः संश्लेषो न संभवति; आरम्भणाधिकरणादौ कारणस्यैव कार्यात्मना परिणामस्योपपादनेन तयोरनन्यत्वात्; स्वेन स्वसंयोगस्याङ्गुल्यग्रस्य स्वात्मस्पर्शनवदशक्यत्वात्।

End:

ननु मुद्गराभिघातादिना घटादौ चूर्णिते घटस्य लयः कथमुपपद्यते? तत्रापरिणतकारणांशस्य प्रत्यक्षानुपलम्भेन तत्संश्लेषायोगादिति चेत्; न; न्यायमते घटातिरिक्तकपालस्येवास्मन्मते कार्यावष्टब्धापरिणतसूक्ष्मकारणांशानामभ्युपगमेन तत्र लयसंभवात्।

455

वादित्रयखण्डनम्

A refutation of the views held by Śaṃkara, Bhāskara and Yādavaprakāśa on certain principles of the Vedānta. The author's name is not found in this manuscript, but MG, D. 4992 attributes the work to Kavitārkikasiṃha. Most probably the author was Varadācārya, son of Vedāntadeśika.

Beginning:

प्रदिशतु परिहृतदोषं प्रज्ञानन्दादिगुणगणोपेतम्।
कमलाभूषितवक्षः कल्याणं वश्चिरं धाम॥

परावरतत्त्वयाथात्म्यवेदनपूर्वकस्वाधिकारानुगुणपरिकरपरिकर्मितः परमपुरुषचरणारविन्दध्यानार्चनादिः तैलधारावदविच्छिन्नस्मृतिसंतानरूपो विभूतिद्वयविशेषणावच्छिन्नमनवच्छिन्नानन्दरूपं परमात्मानं प्रापयन्तीति पराशरपाराशर्यशुकशौनकप्रभृतयो निर्धारयन्ति। तत्र केचिदन्तिमयुगतत्त्वचिन्तकाः शंकरादयः सर्वमप्यन्यथयन्ति।

End:

अनालोचितविशेषाशेषलोकशरण्यमपकलितनिखिलसांसारिकदुःखैरभिवन्द्यमानचरणारविन्दं निरतिशयानन्दमरविन्दलोचनं परं ब्रह्म वेदान्ताः प्रतिपादयन्तीति वैदिकसदःशिखामणीनां सिद्धान्तः।

456

विजयीन्द्रपराजयः

This is a refutation of the views held by Vijayīndratīrtha of the Madhva school.

Beginning of chapter 1 (on fo. 110b):

इन्दिरामन्दिरोरस्कमिन्द्रनीलनिभं शुभम् ।
भावये कुमतिध्वान्तविनिवर्तकभास्करम् ॥
जयति विमतविद्वद्गर्वभङ्गप्रचण्डः
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।
शमितविमतभावग्रन्थसंदर्भवीर्यः
फणितिभिरचलाभिर्मद्गुरुर्देशिकेन्द्रः ॥
तत्त्वे हिते पुमर्थे च माध्वाध्वात्यन्तहेयताम् ।
देवः प्रदर्शयत्यस्मदुक्त्या पश्यन्तु साधवः ॥
तत्त्वे धीर्विपरीता तु हितेऽपि च तथैव सा ।
पुमर्थेऽपि तथैवैतत् सर्वं माध्वस्य पुष्कलम् ॥

इह खल्वखिलनिगमगणशिखरमुखरितसकलभुवनसमुदयनावनविलयनप्रमुखविशृङ्खलवृत्तिकेन भगवतैव निखिलजगदवनैकपरायणतानुगुणकरुणापरिणतिकृतावतरणेन बादरायणेनाखिलापवर्गसाधकमनुजगणावधारणीयस्वपरस्वरूपफलतत्साधनपरिपन्थिनिर्धारणकरणैः सूत्रगणैरेव प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्, तदनन्यत्वमारम्भणशब्दादिभ्यः, क्षोऽत एव, नाना शब्दादिभेदात्, विकल्पोऽविशिष्टफलत्वात्, एतेन योगः प्रत्युक्तः, एतेन शिष्टापरिग्रहा अपि व्याख्याताः, इत्यादिभिः निरस्तस्वमतेन माध्वेन सेश्वरसांख्यभास्करशंकरादिमतभिक्षितप्रतितन्त्रार्थगणविषयकाहार्यभ्रमजनितश्रद्धामयेन तत एव प्रत्यक्षितबादरायणाभिमतविवरणपरायणबोधायनादिभणितिविदूरेण पुलस्त्यवसिष्ठवरप्रदानलब्धनिखिलार्थप्रबोधभगवत्पराशरभणितपुराणरीतितोऽपि बाधितस्वमतग्रन्थसंदर्भेण प्रसिद्धतमश्रुतिसूत्रोभयहिंसनपटीयसा यदभिहितमिदमपि रामानुजमतमसारमिति तत्संनिकृष्टमपि वा मतमित्यभिहितप्राचीनरीतिमजानता प्रबलविरोधोदयेन स्वमतस्थाखिलदोषप्रदर्शनमात्रफलकमस्माभिः सारासारविवेचने कृते त्वन्मतस्यैवासारत्वेन सर्वप्रसिद्धतया ।

End of 20th chapter (on fo. 110b):

एवं चिदचिद्विशिष्टं ब्रह्म जगदुपादानमित्यस्य न किंचिद्बाधकमिति ।
इति विजयीन्द्रपराजये जगद्ब्रह्मणोरुपादेयोपादानवादासहनवादभङ्गो विंशः ।

The work is divided into the following 21 Paricceda-s:

१. द्रव्याद्रव्याभेदवादभङ्गः, २. गुणगुण्यभेदवादभङ्गः, ३. भेदाभेदवादभङ्गः, ४. मुक्तानन्दतारतम्यस्य प्रामाणिकत्वभङ्गः, ५. मुक्तानन्दतारतम्यानुमानभङ्गः, ६. जीवतारतम्यकृतानन्द-

तारतम्यभङ्गः, ७. मुक्तानन्दतारतम्यभङ्गः, ८. विशेषे प्रत्यक्षप्रमाणभङ्गः, ९. विशेषसाधनभङ्गः, १०. विशेषे श्रौतार्थापत्तिभङ्गः, ११. विशेषे अनुमानभङ्गः, १२. शब्दद्रव्यत्वभङ्गः, १३. अव्याकृताकाशस्य द्रव्यान्तरत्वभङ्गः, १४. अन्धकारस्य द्रव्यान्तरत्वभङ्गः, १५. अखण्डकालानभ्युपगमभङ्गः, १६. धर्मभूतज्ञानानभ्युपगमभङ्गः, १७. शुद्धसत्त्वद्रव्यानभ्युपगमभङ्गः, १८. सत्त्वादेर्द्रव्यत्ववादभङ्गः, १९. उपादेयोपादानभेदभङ्गः, २०. जगद्ब्रह्मणोरुपादानोपादेयभावासहनवादभङ्गः, २१. प्रपत्तेर्मोक्षसाधनत्वासहनवादभङ्गः।

The leaves bear the serial numbers 52 to 121. Leaves 52 to 110b, contain Vāda-s 4 to 20, and 110b to 121 contain Vāda-s 1 to 3.

457

विजयीन्द्रपराजयः

End of the 21st chapter:

न चेन्मृतिमेव बहुतरनरकप्रवेशोचितां प्राप्य पुनः पुनर्यावदात्मभाविसंसरणभाग्भवसीत्यलमवैदिकासन्मतपुरस्करणतस्तन्निरसनेन ।

निरस्तान्यमतध्वान्तप्रौढालोकसुधाकरे ।
विशिष्टाद्वैतसिद्धान्ते मन्मनस्त्वं सुनिर्विश ॥
अत्यन्तहेयमाध्वानां सिद्धान्ते मानबाधिते ।
निरासाय विचारेऽपि विरमत्वथ मन्मनः ॥
यतिना परकालेन विजयीन्द्रः पराजितः ।
रामानुजमतेऽप्येवमसारत्वोक्तिगर्वितः ॥
त्रय्यन्तदेशिककृपाभरितावलोकलब्धोभयागमशिरोनिहितार्थतत्त्वम् ।
प्रत्यर्थिवादिमददन्तिघटामृगेन्द्रं पश्यन्तु चात्र परकालमथास्मदीयाः ॥
जयति विमतविद्वद्गर्वभङ्गप्रचण्डः
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।
शमितविमतभावग्रन्थसंदर्भवीर्यः
फणितिभिरमलाभिर्मद्गुरुर्देशिकेन्द्रः ॥

458

विजयोल्लासः

This is the fifth book of the *Vedāntavijaya*. It consists of two chapters; the second is called *Parikaravijaya* in MG, D. 4927.

Beginning:

श्रीस्तनस्तबकन्यस्तकस्तूर्यभ्यस्तकौस्तुभम् ।
निस्तुलोरःस्थलं विभ्रद्वस्तु स्वस्तिकृदस्तु नः ॥
इत्थं वेदान्ततात्पर्यं देशिकानां प्रसादतः ।
वर्णितं मुनिमुख्यानां मतं तदनुकम्प्यताम् ॥
तद्भावोद्ग्राहिणीभिस्ते श्रुतिभिर्न्यायबन्धुभिः ।
श्रुतीनां पुरुषे भावं निरणैषुः समन्ततः ॥

ते मुनयः श्रुतीनां भावं विजयचतुष्टये प्रदर्शितैर्न्यायैर्न्यायान्तरसचिवैरुपोद्बलिताभिः सर्वासां श्रुतीनां भगवति तात्पर्यबोधिकाभिः श्रुतिभिर्निरचिन्वन् । स्वर्णधर्मानुवाकस्तावत् आदित्यमण्डल-समुद्रान्तर्वर्तिपरत्वात् पूर्वोक्तविनियोगानुसाराच्च भगवत्परः । तत्रैवं श्रूयते—सर्वे वेदा यत्रैकं भवन्तीति । अत्र रामसुग्रीवयोरैक्यं देव्येवं समजायतेतिवत् एकशब्दः सौहार्दपरः । अनेन वाक्येन पूर्वोत्तरभागात्मकस्य कृत्स्नस्यापि वेदस्य भगवत्येव परमतात्पर्यमिति स्पष्टमवगम्यते ।

End:

भागवते—

निन्दन्ति ये भगवतश्चरणारविन्द-
चिन्तावधूतसकलाशुभकल्मषौघान् ।
तेषां यशोधनसुखायुरपत्यबन्धु-
क्षेत्रादयः स्थिरतरा अपि यान्ति नाशम् ॥

इत्यादि । श्रीपाञ्चरात्रे—

वासुदेवं तत्प्रपन्नं निन्दन्तं हि द्विजाधमम् ।
विवासयेत् खरारोहं कृत्वा भूपो न पापभाक् ॥

इत्यादि बहु द्रष्टव्यम् ।

Colophon:

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्त-विजये विजयोल्लासः पञ्चमः । समाप्तश्चायं ग्रन्थः ।

459

विरोधपरिहारः

This is a Sanskrit rendering of the Tamil work *Virodhaparihāra* of Śrī Vedāntadeśika by his son Varadācārya alias Nayinārācārya. The work reconciles the discrepancies said to exist in the Śrīvaiṣṇava doctrine.

The first three leaves are partly broken.

Beginning:

श्रीमान् वेंकटनाथार्यः+संनिधत्तां सदा हृदि ॥

श्रीमद्वेंकटनाथार्यनन्दनः प्रणमाम्यहम् ।
शेषशायिपदाम्भोजशेषत्वज्ञाननिर्मलान् ॥
आविष्कृतः श्रुतिगणैरविरोधवृत्त्या
काले कदापि रचयन् रजनीं दिवापि ।
भुक्तं विहङ्गमभुजङ्गमभूपतिभ्यां
पादाम्बुजं दिशतु पाण्डवसारथिर्मे ॥
ऊरीकृत्य तु लक्ष्मणार्यपृतनासंतानदन्तावलान्
पृथ्वीनिर्जरतल्लजानुपनिषत्सिद्धान्तबद्धाशयान् ।
अन्यानप्यरविन्दलोचनदयाविन्यासधन्या वयं
तूलायापि तृणाय वा न च तुषच्छेदाय मन्यामहे ॥

अहं खलु लक्ष्मणार्यसिद्धान्तनिष्णातविष्णुभक्तजननासीरवीरः शुनासीरपुरोहितसदृशमपि परपक्षवादिनमन्यथयन्ननन्यथासिद्धगुरुभक्तिप्रवाहपरिणतपरभक्त्युपलभ्यमानसभ्यानुविधेयवचनो वरदाचार्यनामा पङ्कजनाभपादारविन्दमकरन्दमधुकरायमाणमानसैः धर्मसंप्रदायवर्तनीव्यवस्थापनसंतोषितसर्वाचार्यैः श्रीमद्वेदान्ताचार्यैरसत्तातपादैरगस्त्यभाषया प्रणीतमध्यात्मविद्धिरवधार्यं रहस्यत्रयसारार्थविरोधपरिहारमशेषदेशवासिनामपि परशेषत्वज्ञानरसिकानां सुग्रहणसिद्धये सोपबृंहणनिपुणनिरूपितनिगमसंवादसंस्कृतया संस्कृतभाषया सम्यगनुकथयामि ।

End:

अस्तु जन्मान्तररहितानां चिन्तयन्त्यादीनामपवर्गः । बहुषु जन्मसु भगवद्विरोधमाचरतः

460

विलक्षणवैष्णवोत्कर्षनिरूपणम्

This work deals with the greatness of Śrīvaiṣṇava devotees irrespective of castes according to the view held by the followers of Pillai Lokācārya and Periyavāccānpillai.

Beginning:

महाभारतवाराहलेङ्गारुडभागवतभारद्वाजस्मृतिपुराणेतिहासेषु भागवतानां वर्णाद्यपकृष्टत्वेऽपि भगवत्संबन्धप्रत्यासत्त्या तेषां पावनत्वं सर्वेश्वरवत् पूज्यत्वं वन्द्यत्वादिकं च सुस्पष्टं प्रतिपादितम् । अपारकरुणापरवशपरमपुरुषाभिप्रायविशेषपरिणतपश्चिमवर्णादिपरिग्रहाणां परमभागवतानां परमपुरुषवदेव परिचर्याविषयत्वमिति प्राचामाचार्याणां पन्थाः ।

End:

तत्र प्राधान्येन जन्माद्यवरा एव भागवता विवक्षिताः। इतरे तु दृष्टान्ततया। वैष्णवम् ; विष्णोर्दास्यैकबलतेत्यारभ्य इत्यैतैर्लक्षणैर्युता इत्यन्त

461

विलक्षणाधिकारिनिर्णयः

This work deals with the sanctity of the Tamil Prabandha-s of the Ālvār-s and the greatness of those who have studied them. Only in the margin of the first leaf is the title given as *Vilakṣaṇādhikārinirṇaya.*

Beginning:

नारायणीयशाखायाम्—अथ भगवन्तं नारायणं श्वेतद्वीपवासिनं वैनतेयः प्रणम्य मम ब्रूहि भगवन् केवलमोक्षैकप्रयोजनां मुमुक्षुजनाध्येयामविलम्ब्य फलप्रदां द्राविडीं ब्रह्मसंहिताम्। अथ ह भगवान् वैनतेयमवोचत्। प्रयत्नाध्येया द्राविडी ब्रह्मसंहिता वैष्णवैर्मुमुक्षुभिः सहस्रशाखोपनिषन्मयी सदा वैकुण्ठवल्लभा सनियमाभ्यस्यमाना ब्रह्मानन्ददायिनी सद्गुरोरुपदेशगम्या ।

End:

खगेश्वरसंहितायाम्—

कन्या भर्तृमती चैव विधवा वा खगेश्वर।
श्रीचूर्णं धारयेन्नित्यं न दोषो मम शासनात् ॥

462

विशिष्टदेवतानिर्णयः

This is a tract on Viśiṣṭādvaita Vedānta, maintaining that Paramaikāntin-s should perform the obligatory daily (Nitya) duties with the conviction that thereby they worship solely the supreme God Nārāyaṇa, who has the entire world for His body. Thus the work refutes the view of some groups of Śrīvaiṣṇava-s that Paramaikāntin-s should not perform ordinary rites, in which lower deities are included for worship. The author quotes authorities from Tamil Prabandha works.

Beginning:

जयन्तु गुरवोऽस्माकं श्रेयसे शरदः शतम्।
यत्सूक्तयः सदसतोर्विवेचनधुरंधराः ॥

प्रातर्दननयात् कार्ये नित्यनैमित्तिके सताम् ।
देवतात्वं विशिष्टस्थं दुर्निषेधं विशेषणे ॥
तद्विशिष्टे विशेषेति सूक्तैर्न्यायफलं स्फुटम् ।
बाधकं नात्र पश्यामः प्रत्युतानेकसाधकम् ॥
प्रत्यग्रूपाधिकस्वादुहविरुद्देश्यतां गते ।
विशिष्टे हि प्रपत्तव्ये सर्वं संप्रत्यपद्यत ॥
सूक्तयोऽत्र विमृश्यन्तां व्याख्याव्याख्येयलक्षणाः ।
अन्योन्यसामरस्येनानन्यसामान्यवैभवाः ॥
शृङ्गग्राहिकया तासां संग्रहे तु ममोद्यमः ।
गुम्भने कुसुमानां किमपगच्छति सौरभम् ॥

End:

ब्रह्मத்தை யறியும்போது तत्स्वरूपरूपगुणविभूतिகளெல்லாமறியவேண்டியவையாகயாலே विभूतिभूतचेतनाचेतनங்களின் ஸ்வரூபமறியலாம்.

463

विशिष्टाद्वैतशब्दार्थविचारः

This gives the meaning of the term *Viśiṣṭādvaita*.

Beginning:

विशिष्टाद्वैतं नाम वैशिष्ट्यावच्छिन्नाभेदः । वैशिष्ट्यं च शरीरशरीरिभावरूपं विवक्षितम् । एवं च माध्वादिभिरन्तर्याम्यद्वैताङ्गीकारेऽपि वैशिष्ट्यस्यावच्छेदकत्वानङ्गीकारात् तन्मतवैलक्षण्यम् । मायिमते तु वैशिष्ट्यप्रतियोगिप्रपञ्चमात्रस्याध्यस्तत्वादेव न तद्वैशिष्ट्यावच्छिन्नाभेदः ।

End:

उपादानत्वप्रयुक्तविकारसंबन्धप्रसक्तौ तन्निवृत्त्यभिप्रायत्वात् घटकश्रुतीनाम् दृष्टान्तोपादानं च निर्विकारश्रुतीनां

464

विशिष्टाद्वैतसमर्थनम्

The anonymous author tries to prove that Upaniṣadic and other scriptural texts support the view of the Viśiṣṭādvaita school.

Beginning:

अघकदनं हयवदनं निजपददं समाश्रितजनानाम् ।
वरदमहं शशिबिम्बे श्वेतसरोजे स्थितं वन्दे ॥

निसर्गभिदुरोऽपि सन् निखिलचेतनाचेतनात्
समस्तजगदात्मकः सकलशब्दवाच्यः स्वयम् ।
अशेषवपुरुज्ज्वलो हतसमस्तहेयाकृतिः
स ते भवतु केशवः शुभगुणाश्रयः श्रेयसे ॥
जगद्ब्रह्माद्वैतं जलहुतवहाद्वैतसदृशं
प्रकृत्या भिद्यन्ते प्रकृतिपुरुषेशास्त्रय इति ।
त्रिदण्डव्याजेन स्थितिमभिदधत्तत्त्वविषयां
जगत्या जीवातुः स जयति यतीनां परिवृढः ॥

सर्वेषां वेदान्तवाक्यानां विशिष्टाद्वैत एव तात्पर्यम् । तथाहि—कानिचिच्छास्त्राणि स्वरूपभेदं प्रतिपादयन्ति । प्रधानक्षेत्रज्ञपतिर्गुणेशः, क्षरं प्रधानममृताक्षरं हरः क्षराक्षरावीशते देव एकः ।

End:

तस्मात् निर्विशेषस्वरूपाभेदसाधकमानाभावात् साधकप्रमाणसद्भावाच्च सजातीयविजातीयादि-सकलभेदविशिष्टं ब्रह्मैव तत्त्वमिति सिद्धम् ।

पूर्वाचार्यदृढीकृते बलवता प्रातोपरोधश्चिरं
मिथ्यावादिजनेन माधवकृपारूपैस्तमश्छेदकैः ।
श्रीरामानुजविष्णुचित्तवरदव्यासादिभिर्देशिकै-
स्तत्त्वज्ञैरुपदर्शितोऽयमनघस्त्रय्यन्तघण्टापथः ॥

465

विषयतावादः

A disquisition on Brahman as the object of knowledge, refuting the Advaita view that Brahman is not an object of knowledge.

Beginning:

जननावनलयहेतुं जगतः श्रीशं समाराध्य ।
नन्ता गुरुचरणाब्जेऽनन्तार्यो वक्ति विषयतावादम् ॥

इह खलु ब्रह्मविषयज्ञानस्य मोक्षहेतुत्वेन ब्रह्मण इव विषयताया अपि अवच्छेदकत्वादवश्यं ज्ञातव्येति सा विचार्यते—विषयता नाम ज्ञानविषययोः संबन्धविशेषः ज्ञानविषयो घटः ज्ञातो घट इत्यादिप्रतीतिसाक्षिको दुरपह्नवः । ननु सा किंरूपेति चेत्, अत्र ब्रह्मानन्दः—विषयता हि विषयेषु ज्ञानस्य तादात्म्यम् । ज्ञानं च वृत्त्यवच्छिन्नचैतन्यम् । असत्त्वापादकाज्ञानाविषयत्वप्रयोजकत्वविशिष्टं वा चैतन्यम् । अज्ञानं तावत् द्विविधम् । एकमसत्त्वापादकमन्तःकरणावच्छिन्नसाक्षिचैतन्यनिष्ठम् । अन्यदभानापादकं विषयावच्छिन्नब्रह्मचैतन्यनिष्ठम्; घटमहं न जानामीत्युभयावच्छेदेनानुभवात् ।

End:

प्रमेयत्वव्याप्यतत्तद्व्यक्तित्वावच्छिन्नविषयताकज्ञानवत्त्वरूपत्वे प्रमेयत्वव्याप्यतत्तद्व्यक्तित्वावच्छिन्नेदंयुक्तवाक्यजन्यबोधवत्यतिप्रसक्तिरिति परास्तमिति प्राहुरिति निरवद्यम् ।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति विषयतावादः ।

466

विषयतावादः

Post-colophon writing:

रामानुजार्यसहितं लिखति स्म श्रीनिवाससूरिकृते ।
श्रीवेंकटराम इमं त्वनन्तबुधरचितविषयतावादम् ॥

467

विषयवाक्यदीपिका

This is a commentary on the Upaniṣad passages referred to in the *Brahmasūtra-s* and quoted in the *Śrībhāṣya*.

Beginning:

व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
भाष्योदाहृतवेदान्तवाक्यार्थः संप्रकाश्यते ॥
विस्तृतोपनिषद्भाष्यप्रवेशाक्षमचेतसाम् ।
अनुग्रहेण साफल्यं कृतिरेषा प्रपत्स्यते ॥

जन्माद्यस्य यतः । भृगुवल्ल्यां श्रूयते—यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । येनात्मभूतेन जीवन्तीत्यर्थः ।

End:

तदेव प्रपञ्चयति—यान्येव देवत्रा क्षत्राणि इन्द्रो वरुण इत्यादि । देवत्रा देवेषु । शिष्टं स्पष्टम् ।

क्षेमाय यः करुणया क्षितिनिर्जराणां
भूमावजृम्भयत भाष्यसुधामुदारः ।

वामागमाध्वगवदावदतूलवातो
रामानुजः स मुनिराद्रियतां मदुक्तिम् ॥

Colophon:

इति रङ्गरामानुजमुनेः कृतिषु भाष्योपयुक्तोपनिषद्वाक्यविवरणं समाप्तम् ।

The scribe adds:

कौशिकान्वयसंभूतश्रीनिवासार्यसूनुना ।
लिखिता वेंकटार्येण चार्पिता वाजिवक्त्रके ॥
निखिलोपनिषद्वाक्यगतार्थप्रकटार्थका ।
सूत्राणां विषयार्थानां दीपिका कुलदीपिका ॥

475

विष्णुतत्त्वरहस्यम्

The work tries to prove the supremacy of Viṣṇu by quoting as authority Śruti-s, Smṛti-s, Purāṇa-s and Itihāsa-s. The author was an Advaitin and the son of Rāmaśaṃkara Śāstrin and grandson of Aśvattha Nārāyaṇa Śāstrin of Śrīvatsagotra He was a resident of the village Tiruvisanallur in Tanjore District. His teacher was Śivarāma Śāstrin.

Beginning:

वेदोपबृंहणानां मध्ये श्रीमन्महाभारतमुत्तमतमम्, तस्यैव साक्षाद्वेदव्यासकर्तृकत्वात् ।

कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् ॥

इति हरिवंशवचनात् । इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति स्मृतौ पुराणपदस्याल्पाच्तरत्वेन प्रथमनिर्देश्यत्वेऽपि पुराणपदं पश्चान्निक्षिप्य बह्वृचोऽपीतिहासपदस्य अभ्यर्हितं पूर्वमिति न्यायेन प्रथमं निर्दिष्टत्वात् ।

End:

मायावपुः परं ब्रह्म तुरीयं विश्वकारणम् ।
स च लक्ष्मीपतिर्नान्यस्तुरीय इति वैदिकाः ॥

इति सिद्धम् । यत्तु—शिवरहस्यशिवपुराणपर्यालोचनया

मायावपुः परं ब्रह्म तुरीयं विश्वकारणम् ।
उमासहायो भगवानिन्दुमौलिरिति स्थितिः ॥

इति, तत्तु . . . त्यमेव; शिवरहस्यशिवपुराणाधीनशिवपारम्यबुद्धेरस्माभिरनिवार्यत्वादिति सर्वं समञ्जसम् ।

हरिर्वा शास्त्रार्थो भवतु हर एवास्य विषयो
न नः सूक्ष्मा कापि क्षतिरिह भवेदद्वयजुषाम् ।
तथापि श्रीरामो भवति विदितब्रह्मविभवः
परैर्जीवः प्रोक्तो मम मनसि दुःखं वितनुते ॥

Colophon:

इति श्रीवत्सकुलजलधिकौस्तुभश्रीमद्वेदान्तविद्याप्रवर्तकश्रीमदश्वत्थनारायणशास्त्रितनूजमन्वादि-सर्वधर्मविद्याप्रवर्तकश्रीरामशंकरशास्त्रितनूजेन समस्तवेदवेदान्तप्रतिपाद्यपरतत्त्ववस्तुपरिज्ञातृश्रीमच्छिवरामशास्त्रिणामन्तेवासिना हरिहराद्वैतविद्याविलासाचार्येण श्रीहरिदासवरिष्ठेन रामसुब्रह्मण्यशास्त्रिणा कृतः शैववैष्णववादः समाप्तः ।

476

विष्णुपारम्यनिर्णयः

Beginning:

कृतकृत्यधियो मूढाः; आहाहितमिदं जगत् इत्यादि । सात्त्विकज्ञानम्— . . . निश्चयेन दृढीकृता । अभिध्या परमा बुद्धिः शुद्धेति परिकीर्त्यते । गारुडे—

कलौ च विपरीतं स्यादिति शास्त्रविदां स्थितिः ।
शास्त्राण्यपि च सर्वाणि त्रिविधानि महामते ॥
यानि सत्यपरं विष्णुं वदन्ति परमेश्वरम् ।
तानि शास्त्राणि सर्वाणि सात्त्विकानि मतानि वै ॥

End:

ब्रह्मणश्च परं रूपं नैर्गुण्यं वक्ष्यते मया ।
सर्वत्र जगतो ह्यत्र मोहनार्थं कलौ युगे ॥

इति । इति विष्णुपरत्वं सिद्धम् ।

477

विष्णुपारम्यनिर्णयः

Beginning:

कासुचिदुपनिषत्सु देवताविशेष एव ब्रह्मलक्षणभूतैर्जगत्कारणत्वादिनियमैः विशिष्टः प्रतिपाद्यते—यथा अथर्वशिखादौ शिवः, महोपनिषदादौ नारायणः । न च—तासां ब्रह्माभेदसंकीर्तनेन तत्तद्देवताप्रशंसन एव तात्पर्यम् ; न त्वभेदे, यजमानः प्रस्तर इतिवदिति वाच्यम् ; दृष्टान्ते मुख्य-

बाधेन विहितस्तुतिमात्रपरत्वस्वीकारेऽपि दार्ष्टान्तिके तदबाधेन तस्यैवादरणीयत्वात् । योग्यता-संशयस्यापि शाब्दबोधे तन्त्रत्वात् ।

End:

विष्णुरात्मा भगवतो भवस्यामिततेजसः ।
तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः ॥
न हि विष्णुः प्रणमति कस्मैचिदबुधाय तु ।
तत्तदात्मानमेवेति ततो रुद्रं नमाम्यहम् ॥

इति रामायणभारतयोश्च नारायणस्य शिवान्तर्यामित्वप्रतिपादनात् । एवं, तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः, इति रुद्रं प्रति चतुर्मुखवचनमप्यत्र प्रमाणमनुसंधेयम् ।

478

विष्णुपारम्यनिर्णयः

Beginning:

जयतीश्वर एक एव यः पृषतीनां पृषतान् विनिर्ममे ।
तपनभ्रमणानुकारिता तनुभेदस्य च येन शिक्षिता ॥
तस्य यज्ञवराहस्य विष्णोरमिततेजसः ।
प्रणाममपि ये कुर्युस्तेषामपि नमो नमः ॥

श्रीमत्पराङ्कुशपरकालपराशरपाराशर्यश्रीमन्नाथमुनियामुनाचार्यभगवद्रामानुजाचार्यश्रीवत्स-चिह्नमिश्रश्रीमन्निगमशिरोदेशिकैरस्मदाचार्यपर्यन्तैरन्यैश्च पूर्वाचार्यैरशेषागमहृदयपुण्डरीकमार्ताण्डाय-मानमहितन्यायाञ्जनविमलीकृतशास्त्रदृष्टिभिरष्टादशपुराणपरिशोधनपरिशुद्धान्तःकरणैः श्रियः पतिः श्रीभगवान् वासुदेव एव सकलसुरनराद्युपास्य औपनिषदः परमपुरुष इति निरणायि ।

End:

स विष्णुः महांश्चासावीश्वरश्च महेश्वरः दहरविद्योपास्यो नियन्तेत्यर्थः । अनादिनिधनं विष्णुं सर्वलोकमहेश्वरमित्यादौ विष्णावपि महेश्वरशब्दप्रयोगो ब्रह्मविदां दृश्यते । अवयवानामवयवि-प्रकृतित्वस्य लोकसिद्धत्वात् अकारस्य प्रणवावयवत्वेन तत्प्रकृतित्वव्यवहारः । यद्यप्यथर्वशिखादौ प्रणवावयवस्याकारस्य चतुर्मुखदेवादिवाचित्वमुच्यते, तथापि निखिलवाचकप्रकृतित्वरूपेणाकारस्य निखिलवाच्यप्रकृति

479

विष्णुपारम्यनिर्णयः

Beginning:

ननु विष्णोर्जगत्कारणत्वप्रतिपादिकाः श्रुतयोऽप्ययोग्यार्थाः; तस्य कर्मवश्यत्वश्रवणात् । तथाहि—वाजसनेयिशाखायां शतपथब्राह्मणे पुरुषो ह वै नारायणोऽकामायत । अतितिष्ठेयं सर्वाणि

भूतानि। अहमेवेदं सर्वं स्यामिति। स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत्। तमाहरत्। तेनायजत। तेनेष्ट्वात्यतिष्ठत् सर्वाणि भूतानि। इदं सर्वमभवत्। इति श्रूयते। अनेन, अत्यतिष्ठद्दशाङ्गुलम्। पुरुष एवेदं सर्वमिति पुरुषसूक्तोक्तमहिमशालि वैष्णवं पदं यज्ञानुष्ठानफलमिति स्पष्टं प्रतिपादितम्। छन्दोगानां ग्रन्थे—सोमं राजानं वरुणमग्निमन्वारभामहे। आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिमिति मन्त्रानन्तरम्, इत एत उदाहरन् दिवः पृष्ठमन्वारुहन्। प्रभुर्जयो यथापथो द्यामङ्गिरसो ययुरिति मन्त्र आम्नायते।

End:

प्रभुमात्रशक्तत्वाङ्गीकारेण यस्मात् क्षरमतीत इति संगत्यर्थं निखिलजगत्पतित्वमादाय तस्यापि भगवत्परत्वाच्च। अन्यथा गीतास्वेव सकलजगत्कारणत्वादिप्रतिपादनविरोधप्रसङ्गः। न च शिवाहं

480

वेदान्तकण्टकोद्धारः

This work answers the objections raised by Advaitin-s against the views of the Viśiṣṭādvaita school. From another MS. of the work noticed in MG, R. 771, the author Campakeśa is known as the son and pupil of Kauśika Varadācārya who was the pupil of Rāmānujācārya and Samarapuṅgavācārya of the Hārīta family The author mentions in this work Śrī Rāmānuja, Vedāntadeśika and Mahācārya.

Beginning:

आनन्दसिन्धुमवधीरितदोषगन्ध-
मापन्नबन्धुमनुरूपदयानुबन्धम्।
आपादचूडमनुभूय तुरङ्गवक्त्र-
माकल्पवेलममृताप्लुतमस्तु चेतः॥
उत्तुङ्गमङ्गलमभङ्गमहाविभूति-
मङ्गीकृतत्रुटितसङ्गजनान्तरङ्गम्।
भृङ्गानुषङ्गरमणीयवराङ्गबन्धं
श्रीरङ्गबन्धुमुपयामि भुजंगतल्पम्॥
वरदगुरुमुदारं वागतीतप्रकारं
गुणजलधिमपारं गुप्तमाहात्म्यसारम्।
दुरितनिवहदूरं दुर्दशोद्धारधीरं
भज हृदय विचारं संपरित्यज्य घोरम्॥
मिथ्यावादिमदान्धसिन्धुरमुधासंरम्भकुम्भस्थली-
निर्भेदोद्भवकीर्तिमौक्तिकमणीशुभ्रीकृताभ्रस्थलः।

सत्तर्कस्फुरदत्युदग्रनखरो वेदान्तशैलाश्रितः
श्रीरामानुजकेसरी विजयते प्रोद्दण्डविक्रीडितः ॥
नाथार्यथामुनयतीन्द्रसुदर्शनार्य-
वेदान्तदेशिकमहार्यमुखा महान्तः ।
सम्यग्जयन्तु शरदामयुतं सहस्रं
स्वोदन्तधावितकुदृष्टिजनप्रलापाः ॥
जयति जयति कामं व्यासनामा मुनीन्द्रो
जयति जयति कामं भूतधामा यतीन्द्रः ।
जयति जयति कामं सर्वतन्त्रस्वतन्त्रो
जयति जयति कामं वादिसिंहो महार्यः ॥
कवितार्किकसिंह इति प्रथितः करुणापरिणाम इव प्रकटः ।
निखिलागमसारनिमग्नमना निगमान्तगुरुर्नितरां जयति ॥
वरदगुरुमुखानां देशिकानां प्रसादात्
करबदरसमानं प्राप्य वेदान्तसारम् ।
कथयति निगमान्ते मन्दशङ्कानिरासं
विबुधजनमुदे श्रीचम्पकेशो विपश्चित् ॥
रामानुजार्यराद्धान्तपरिष्कारहृदम्बुजाः ।
वेदान्तकण्टकोद्धारमनुगृह्णन्तु सज्जनाः ॥

अधीतसाङ्गसशिरस्कस्वाध्यायापातप्रतीतानन्तस्थिरफलकब्रह्मावबोधः कर्ममीमांसासमधिगत-कर्मफलफल्गुभावसमासादितनिर्वेदः कश्चिद्विपश्चित् ब्रह्ममीमांसायामधिकरोतीति महानयं घण्टापथः । अत्राह नवीनः—विचारितकर्मण एव ब्रह्ममीमांसायामधिकार इति न नियमः, प्रागेव स्वाध्याया-ध्ययनात् प्रव्रजितस्य कर्मविचारमन्तरेण ब्रह्मविचारोपपत्तेः ।

End:

वेदार्हतौ सत्यतया समौ मतौ प्रमाणभावोऽपि तथा समोऽनयोः ।
प्रणीतबुद्धी च समे तयोरतः स तान्त्रिकस्याजनि बुद्धसंकरः ॥

अस्माकं पुनराम्नायस्यापौरुषेवतया बोधकत्वविरोधिदोषशून्यस्य वादानपेक्षस्य बाधका-भावात् सिद्धं निर्वेशेषवस्तुनि तात्त्विकं प्रामाण्यमिति प्रत्यक्षादिविरोधोऽकिंचित्कर इति । अत्रेयं कण्टकोद्धारसरणिः ।

The date of copying of the original MS. from which this transcript was made:

श्रीशैलरङ्गवर्येण रौद्यब्दे तूत्तरायणे ।
मिथुने शुक्लषष्ठ्यां च व्यलेखि प्रेक्षतां मुदे ॥

रौद्र्यब्दे मिथुने शुक्ले पक्षे षष्ठ्यां रवौ तथा ।
कण्टकोद्धारमित्येतदलिखद्रङ्गदासकः ॥
कण्टकोद्धारमलिखद्रङ्गदासः सतां मुदे ।
कवितार्किकसिंहाय वेंकट्राघवसूरये ॥
दत्तमेतद्ग्रन्थमद्य ब्रह्मणे राक्षसाय च ।
भगवान् प्रीयतां देवः परिवारेण संवृतः ॥

481

वेदान्तकण्टकोद्धारः

This MS. contains the portion in continuation of that found in the MS. described in the last number.

Beginning:

अत्रेयं कण्टकोद्धारसरणिः—प्रत्यक्षागमयोः विरोधे तावत् प्रत्यक्षं बलीय इत्यत्र न कथंचिदपि विप्रतिपत्तिः शङ्क्यते ; अन्यथा आदित्यो यूप इत्यादावप्यागमेन आदित्ययूपाभेदप्रसङ्गाच्च ; आम्नायस्याज्ञातप्रयोजनवदर्थप्रत्यायकत्वात् ।

End:

यथा यत्रेति वक्ष्यमाणरीत्या कार्यकारणभावप्रकारस्यैव प्राथमिकयथाशब्दविवक्षितत्वात् । वस्तुतस्तु अपकर्षप्रति

482

A metrical epitome of Viśiṣṭādvaita principles. The author Bucci Veṅkaṭācārya was the third son of Aṇṇayācārya of Bukkapaṭṭaṇam family. The author's date may be fixed between the last part of the 18th century and the beginning of the 19th century A.D.

484

वेदान्तकौस्तुभः

A treatise on Viśiṣṭādvaita Vedānta, specially dealing with the superiority of Lord Nārāyaṇa. The author criticizes Appayadīkṣita's *Śivatattvaviveka* and *Śivakarṇāmṛta*.

Beginning:

इह खलु भगवान् श्रियः पतिः स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येय-कल्याणगुणः सर्वेश्वरः परमकारुणिकः अपारदुस्तरभवपयोधिनिमग्नान् पुरुषानुद्दिधीर्षुः अतिगहन-गम्भीरवेदान्तबृन्दोपदर्शितपरतत्त्वपरमहितपरमपुरुषार्थगोचरविशदप्रतिपत्तिं प्रापय्य तानुग्रहीतुकामः श्रीमतः पराशरात् कृष्णद्वैपायनरूपेणावतीर्य वेदोत्तंसेतिकर्तव्यताभूतं शारीरकं शास्त्रं निबबन्ध। तत्र च मुमुक्षुभिर्ज्ञेयस्य परस्य ब्रह्मणो लक्षणमुपदिशन्तीं यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेति श्रुतिं जन्माद्यस्येति सूत्रेण व्याचख्यौ। एवं च श्रुतिसूत्राभ्यां जगज्जन्मादिकारणं यत् तद्ब्रह्मेति विज्ञातव्यमित्येतत् सर्वसंमतम्। तच्च जगज्जन्मादिकारणं किमित्यपेक्षायां तत्प्रापकवाक्यान्तरान्वेषणेन तन्निर्धारणीयम्।

Colophon of the 1st chapter on fo. 123b:

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसंप्रदायप्रवर्तकवेंकटदेशिकसुकृत-परिपाकसर्वतन्त्रस्वतन्त्रवेदान्ताचार्यानुजश्रीमदादिवराहाचार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य तत्प्र-सादलब्धब्रह्मविद्यावैशद्यस्य निजहृदयकमलविहरमाणश्रीरङ्गराजप्रेरितस्य कोनट्यम्बागर्भसंभवस्य वेदान्ताचार्यस्य कृतिषु वेदान्तकौस्तुभे भगवत्पारम्यसाधकोपन्यासाख्यः प्रथमोऽधिकारः।

End:

यद्यपि भवे छन्दसीत्यधिकारे अग्राद्यदिति यत्प्रत्ययस्मृतिः, भवार्थश्च न जन्म; तत्र जातः, तत्र भव इति पृथगधिकारात्। नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च इत्यादौ कटादिषु परमेश्वरस्य सद्भावमात्रेण भवार्थप्रत्ययसमर्थनाच्च; तथापि नासतो विद्यते भाव इति स्मृतेः जन्मस्थले स एव कार्यस्योत्पत्तिरिति जातेऽपि भवार्थप्रत्ययो न विरुध्यते। और ऊरुज इति।

489

वेदान्तकौस्तुभः

Beginning:

अशेषचिदचिद्वस्तुशेषी तन्मूर्तिमान् परः।
स्वाभाविकानन्तगुणः शर्म निर्मातु पूरुषः॥

स्यादेतत्। अशेषविशेषप्रत्यनीकचिन्मात्रमेव परमार्थः। तदतिरेकि नानाविधज्ञातृज्ञेयतत्कृ-तज्ञानभेदादिकं सर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतम्। अत एव सदेव सोम्येदमग्र आसीदेकमेवा-द्वितीयम्, इदं सर्वं यदयमात्मा, नेह नानास्ति किंचन, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं विजानीयात्, वाचारम्भणं विकारो नामधेयम्, इत्याद्याः श्रुतयोऽप्यमुमेवार्थमुद्घोषयन्तीति न क्वापि भेदः पारमार्थिकः। सति हि तस्मिन् ऐतदात्म्यमिदं सर्वम्, यदयमात्मा, तत्त्वमसीत्यादिषु सामानाधि-

करण्यं कार्यकारणभूतद्रव्यैक्यनिबन्धनं शरीरात्मभावनिबन्धनमिति वा परिष्क्रियेत; सति हि कुड्ये चित्रारम्भ इति न्यायात्। अपितु बिम्बप्रतिबिम्बभेदवन्मायिकः।

End:

यदपि नाप्यनुमानमित्यादि, तदपि न; देवदत्तो यज्ञदत्तात्मप्रतियोगिनानौपाधिकभेदवान्, तद्रूपाननुसंधातृत्वात् संमतवदित्यनुमानसंभवात्।

Three extra leaves added at the end contain a few lines on the importance of Pañcasaṃskāra of Śrīvaiṣṇava-s.

490

वेदान्तदेशिकविजयः

This work supports the view held by Vedāntadeśika on certain points relating to the Śrīvaiṣṇava religion and Viśiṣṭādvaita Vedānta and condemns the view held by the other sects of Śrīvaiṣṇava-s. The author was the son of Raṅganāthatātācārya of the Śrīśaila family.

Beginning:

श्रीरङ्गनाथतातार्यमहागुरुपदाम्बुजम्।
नमामि शिरसा नित्यमस्माकं कुलदैवतम्॥
प्रपत्तिं तां प्रयुञ्जीत स्वाङ्गैः पञ्चभिरावृताम्।
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज॥
गच्छध्वमेनं शरणं शरण्यं पुरुषर्षभम्।
राघवं शरणं गच्छ मां च तस्मै निवेदय॥

इत्यादिप्रपत्तिविधायकवाक्यानि बहूनि परित्यज्य स्वरूपज्ञानमेवालं, प्रपत्तिरिति न किंचित् कर्तव्यमस्तीति केचिदाहुः। तत्र विचार्यते। तत् स्वरूपज्ञानं कीदृशम्? आत्मस्वरूपज्ञानं वा? ब्रह्मस्वरूपज्ञानं वा? उभयं वा?

End:

कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः।
बहु मंस्यति मां लोके दुर्वृत्तं लोकदूषणम्॥
निन्दाम्यहं कर्म कृतं पितुस्तद्यस्त्वामगृह्णाद्विषमस्थबुद्धिम्।
बुद्ध्यानयैवंविधयाचरन्तं .

Colophon:

श्रीशैलवंशकलशोदधिपूर्णचन्द्र-
श्रीरङ्गनाथगुरुवर्यसुतेन लोके ।
यः श्रीनिवासविदुषा निगमान्तसूरेः
कृतो जयत्वतितरां विजयप्रबन्धः ॥

491

वेदान्तन्यायमालिका

A brief summary of the Adhikaraṇa-s of the *Brahmasūtra-s*, according to the Viśiṣṭādvaita view.

Beginning:

त्रय्यन्तचिन्तनस्वान्तचर्यापर्यायवेधसे ।
निष्कल्मषाय शेषाय गुरवे करवै नमः ॥
कर्मब्रह्मात्मकं शास्त्रमेकं लोकहितं च यत् ।
तत्र कर्मविचारः प्राक् प्रोक्तः षोडशलक्षणः ॥
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसत्फलैः ।
अतिदेशद्वयाभ्यूहबाधतन्त्रप्रसङ्गनैः ॥
शेषसंकर्षतश्चैवं साङ्गं कर्म निरूपितम् ।
अथ तद्धेतुको ब्रह्मविचारः प्रतिपाद्यते ॥
समन्वयाविरोधाभ्यां साधनेन फलेन च ।
चतुर्लक्षणमेवैतच्छारीरकमुदीरितम् ॥

End:

जगद्व्यापाररूपत्वं षष्ठे सम्यगुदीरितम् ।
चिन्मयीशब्दितैर्न्यायैः सर्वं शास्त्रं समापितम् ॥

Colophon:

इति श्रीशैलवंश्येन श्रीनिवासविपश्चिता ।
निर्मिता विदुषां प्रीत्यै वेदान्तन्यायमालिका ॥

The scribe adds:

इति नल्लार्यवंश्येन नृकण्ठीरवयज्वना ।
लिखिता यतिराट्प्रीत्यै वेदान्तन्यायमालिका ॥

492

वेदान्तविजयमङ्गलदीपिका

Discourses on Mahācārya's *Vedāntavijaya*. Each of the discourse relating to the five Vijaya-s is mentioned with the suffix 'Upanyāsa'. It is also known as *Maṅgaladīpikā*. The author Sudarśanaguru belonged to the Vādhūlagotra and was the pupil of Mahācārya (16th century A.D.). The last two Vijaya-s are dealt with in one section.

Beginning:

वन्दे संश्रितसर्वकामफलदं सर्वापदां वारकं
सत्संत्राणविभासिताब्जनयनं संफुल्लपद्माननम् ।
जानुद्वन्द्वसमुल्लसत्करयुगं व्यत्यस्तपादद्वयं
जन्मस्थेमलयादिलीलघटिकाशैलाधिराजं प्रभुम् ॥
श्रेयो देयान्ममाचार्यो विद्याविनयवारिधिः ।
परवादिमतध्वान्तदिवाकरमहागुरुः ॥
वेदान्तानां विजयमधुना देशिकानां प्रसादा-
द्वेदान्तार्थान् परकलुषितान् क्षालयित्वा हि सर्वान् ।
सद्भिर्न्यायैर्विविधकुशलैर्व्याससूत्राधिरूढै-
र्वाधूलश्रीघनगुरुरसौ व्याकरोद्देशिकेन्द्रः ॥
वेदान्तार्थानशेषाननितरसुगमान् सम्यगालोच्य तर्कैः
सूक्ष्मैः सूत्राधिरूढैर्विभजनकुशलैर्न्यायवर्गैश्च युक्तान् ।
गम्भीरेऽस्मिन् प्रबन्धे घनगुरुरचितेऽशेषतन्त्रार्थदीप्ते
कर्तुं शक्यः प्रसङ्गो न मम चलमतेस्तत्प्रसादात्तु शक्यः ॥
विजये निगमान्तानां शुभां मङ्गलदीपिकाम् ।
तनुते तत्प्रकाशाय सुदर्शनगुरुः सुधीः ॥

अथायमात्मा वा अरे द्रष्टव्य इत्यत्र विधिविचारः प्रथमः

इह खलु श्रीवाधूलकुलतिलको महामतिरखिलशास्त्रार्थतत्त्वनिर्णायको निखिलवेदमौलि-भागार्थतत्त्वनिर्धारणसकलमीमांसान्यायसंचरणनिपुणो ब्रह्मविदग्रेसराग्रगण्यो भगवान् घनगुरुरखिल-रामानुजाचार्यमतानुसारिविद्वज्जनानुजिघृक्षया संप्रदायपरंपराप्राप्तसकलवेदान्ततात्पर्यनिर्धारकं तद्वि-रुद्धतात्पर्यापनोदकं समीचीनन्यायतर्कपरिकर्मितं गूढभावमितरराद्धान्तमर्मच्छिदं भगवद्रामानुज-राद्धान्ताद्वितीयदीपं वेदान्तविजयाख्यं प्रबन्धं प्रणिनाय । तत्र तदर्थानामत्यन्तगहनतया मन्दमति-दुरवबोधानां सकलविद्वज्जनसुबोधाय तदर्थान् प्रधानप्रतिपाद्यानखिलान् संक्षिप्य वेदान्तविजयमङ्गल-दीपिकाख्यप्रबन्धमुखेनोपन्यासः क्रियते ।

तत्र श्रोतव्य इत्यदौ संशयादिनिवृत्तये ।
श्रवणादेर्विधेयत्वनिरासः क्रियते मया ॥
वेदान्तवाक्यजातस्य श्रवणादेर्न युक्तिमत् ।
विधेयत्वं परोक्तं तु सिद्धेर्ध्यानविधानतः ॥

End of the 1st Vijaya:

तस्मात् यतो वाच इति श्रुतेरपरिच्छेद एव तात्पर्यम्, प्रकरणानुगुण्यात् । वाङ्निवृत्तिवत् मनसोऽपि निवृत्त्यभिधानात् मनोवृत्तिविषयत्वमपि ब्रह्मणो न स्यात् । मनोनिवृत्तेः परिच्छेदविषयत्वे वाङ्निवृत्तेरपि तथात्वं स्यात्, आनन्दं ब्रह्मणो विद्वानित्युत्तरवाक्यविरोधात् । वाङ्मनसयोरपि निवृत्तौ आनन्दस्वरूपब्रह्मवेदनासंभवात् । अतः सिद्धं ब्रह्मणो वाच्यत्वमिति ।

श्रवणस्याविधेयत्वं न च शाब्दापरोक्षता ।
विहिताध्ययनस्यापि फलमक्षरधारणम् ॥
साधनानां चतुष्कस्य वृत्तत्वाभाव इत्यपि ।
मीमांसायुगलस्यैक्यं जिज्ञास्यत्वं न युक्तिमत् ॥
निर्विशेषस्य वेद्यत्वं ब्रह्मणोऽस्तीति सर्वथा ।
अन्यदेवानुपास्यत्वं वाच्यत्वं परमात्मनः ॥
इत्येतानि प्रमेयाणि सम्यगालोच्य तत्त्वतः ।
निरूपितानि न्यायैस्तु संपश्यन्तु मनीषिणः ॥

Colophon:

इति श्रीवेदान्तविजयमङ्गलदीपिकायां गुरुविधिविजयोपन्यासः प्रथमः समाप्तः ।

Colophon at the end of the 2nd Vijaya:

इति श्रीवाधूलकुलतिलकश्रीमहाचार्यचरणारविन्दसेवासमधिगतसकलशास्त्रहृदयश्रीमद्वाधूलसुन्दरजामातृदेशिकसूनुना सुदर्शनगुरुणा विरचितायां वेदान्तविजयमङ्गलदीपिकायां ब्रह्मविद्याविजयोपन्यासो द्वितीयः ।

End of the 4th Vijaya (incomplete):

किंच ब्रह्मणः अहमर्थान्भेदस्तावत् परैरभ्युपगतः । अहमर्थश्च जीवात्मेति कथं जीवब्रह्मणोरभेद इति संक्षेपः ।

493

वेदान्तविजयमङ्गलदीपिका

Additional verse at the end of the 4th Vijaya:

श्रीमद्रामानुजार्यप्रमुखगुरुवरप्राप्तवेदान्तसिद्धान्
सर्वश्रुत्यन्तवाक्यानुगुणसुलभतमान् सम्यगालोच्य सर्वान् ।

अर्थानाचार्यवर्यः शुभगुणजलधिः सर्वविद्वत्प्रबुद्धयै
व्याकुर्वन् वेदमौलेर्विजयफणितिगान् वर्धते श्रीमहार्यः ॥

496

वेदान्तविजयमङ्गलदीपिका

Beginning:

ब्रह्मेतरप्रपञ्चस्य मिथ्यात्वं न तु सिध्यति ।
परिच्छेत्तुमशक्यत्वात्प्रत्यक्षादिप्रमाणतः ॥
निर्वक्तुमप्यशक्यत्वाद्व्यवहारविरोधतः ।
आत्मज्ञानेन सर्वार्थज्ञानश्रुतिविरोधतः ॥

केवलाद्वैतवादिनो वेदान्तिनः प्रवदन्ति—ब्रह्मैव परमार्थः ; तद्व्यतिरिक्तं सर्वं मिथ्येति । तदयुक्तम् ; प्रपञ्चमिथ्यात्वे प्रमाणाभावात् । न तावत् प्रत्यक्षं प्रमाणम् ; घटादिवन्मिथ्यात्वस्य प्रत्यक्षेणाग्रहणात् ।

End:

ब्रह्मविदाप्नोति परम्, परमे व्योमन्, सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चिता, इत्यादीनि विवक्षितानि । तस्मान्नारायण एव सर्वस्मात्परो जगत्कारणभूतो मोक्षप्रदो मुक्तभोग्यो जगच्छरीरको जगत्पतिश्चेति सिद्धान्तः सुप्रतिष्ठित इति ।

Colophon:

इति श्रीवाधूलकुलतिलकश्रीमहाचार्यचरणारविन्दसेवासमधिगतसकलशास्त्रहृदयेन श्रीमद्-वाधूलसुन्दरजामातृदेशिकसूनुना सुदर्शनगुरुणा विरचितायां वेदान्तविजयमङ्गलदीपिकायामद्वैतविद्या-विजयोपन्यासः संपूर्णः ।

The scribe adds:

अद्वैतविद्याविजयो लिखितो रामसूरिणा ।
कार्त्तिके पूर्वपक्षे तु शुक्लषष्ठ्यां महातिथौ ॥

497

An original treatise on Viśiṣṭādvaita Vedānta expounding the truth of the Upaniṣad-s. Śrī Rāmānuja refers to this work in the *Śrībhāṣya*.

502

वेदार्थसंग्रहव्याख्या तात्पर्यदीपिका

Reads the following additional verses at the end:

शरणागतरक्षित्री गुरुस्नेहदशां गता ।
सुदर्शनोद्भवा भाति स्थिरा तात्पर्यदीपिका ॥
बाह्यान्तरतमोहन्त्री बाह्यवाक्यविचालनी ।
अनन्यगाप्रतिहता द्योतते भावदीपिका ॥

503

वेदार्थसंग्रहव्याख्या तात्पर्यदीपिका

Post-colophon writing:

यावत्तृणवत्कारी शंकरभास्करतिरस्क्रियाकारी ।
वैदिककुलोपकारी रामावरजोऽयमधिकरणकारी ॥

504

वेदाहमितिमन्त्रार्थः

An explanation of the meaning of the Vedic passage *vedāham*, etc. (*Taitt. Ā.*, III. 12. 7).

Beginning:

कौशिकश्रीशुद्धसत्त्वदेशिकानुग्रहादहम् ।
वेदाहमितिमन्त्रार्थं वेदयामि यथाश्रुतम् ॥

वेदाहमेतमित्यादि । अस्मिन् मन्त्रत्रये ब्रह्मविदां शारीरकचतुर्थाध्यायोक्तरीत्या ब्रह्मप्राप्तिरूप-परमपुरुषार्थशालित्वममृतत्त्वं चोपेत्येत्युक्तोत्तरपूर्वाघाश्लेषविनाशरूपाभिमतफलयोगित्वं भोगमात्रसाम्य-शब्दितसायुज्यपर्यन्तफलप्राप्तिमूलसालोक्यलक्षणनिरतिशयप्रयोजनभागित्वं च प्रतिपाद्य तन्मुखेन ब्रह्म-वित्प्रशंसा प्रपञ्च्यते । तत्र प्रथममन्त्रे प्रथमेनार्धेन—

श्रीमत्पुरुषसूक्तोक्तप्राप्यसीमा प्रकाश्यते ।
शुद्धसत्त्वार्यदासेन लक्ष्मणाख्येन धीमता ॥

End:

एतदभिप्रायेणैव श्रीवत्साङ्कमिश्रैरनुगृहीतम्—परिजनपरिषदित्यादि। अस्मिन् मन्त्रत्रयेऽपि कर्त्रर्थानुसंधानविषयत्वं तेषामैहिकामृतप्रदत्वं स्वप्रीतावनपेक्षोपायत्वं तेषां . . इत्यनुसंधेयम्।

505

व्यावहारिकसत्यत्वखण्डनम्

This work refutes the Advaita view that the existence of the world is illusory and not real. The author is presumed from the initial verse.. to be Varadācārya, son of Vedāntadeśika.

Beginning:

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम्।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे॥

आकर्णयध्वमाचार्याः, वर्णयामस्तावद्वेदान्तनिर्णयमवधूतदुर्नयविप्रलापम्। भवतु च लब्धवर्णानां कर्णामृतत्वाय। अत्रानाद्यविद्यासंचयवञ्चितहृदया मृषावादिनः केचिदाहुः—सत्यं त्रिविधम्—पारमार्थिकं व्यावहारिकं प्रातिभासिकं चेति। तत्र पारमार्थिकसत्यत्वं निर्विशेषस्य परस्य ब्रह्मणः। व्यावहारिकसत्यत्वं घटपटाद्यात्मकप्रपञ्चस्य। प्रातिभासिकसत्यत्वं तु शुक्तिरूप्यादेः। अत्र प्रमाणं वेदान्तवाक्यानि—सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। नेह नानास्ति किंचनेत्यादीनीति। तदेतत् ग्राम्यजनान्धीकरणम्। परस्य ब्रह्मणो निर्विशेषत्वसिद्धौ प्रपञ्चस्य व्यावहारिकसत्यत्वसिद्धिः। निर्विशेषत्वं तावत् ब्रह्मणोऽनुपपन्नम्।

End:

ननु नेह नानास्ति किंचनेत्यभेदबोधकानां वाक्यानां का गतिरिति नाशङ्कनीयम्। उपक्रमोपसंहारानुगुण्येन शरीरशरीरिभावलक्षणार्थान्तरपरत्वेन निर्णयादिति सर्वं समञ्जसम्।

507

व्यावहारिकसत्यत्वखण्डनसारः

The author points out that there can be only one kind of reality and not more as held by the Advaitin-s. Therefore the universe is real in its essential nature.

Beginning:

जिज्ञासोर्विषयः फलं च विपुलं यस्य स्वरूपं महत्
सत्यं ज्ञानमनन्तमङ्गलगुणं नित्यानवद्योन्नति।

तद्ब्रह्मेत्यभिधीयमानमनिदंपूर्वैर्वचोभिः परं
वस्त्वाविष्कुरुतां शुभानि कमलानित्यानुषक्तं महः ॥

अथातो ब्रह्मजिज्ञासेति प्रतिज्ञातजिज्ञास्यभावस्य ब्रह्मणो लक्षणं जगज्जन्मादिकारणत्वं भगवता बादरायणेनोक्तम्—जन्माद्यस्य यत इति ।

End:

तस्मात् चिदचिद्विशेषणविशिष्टं ब्रह्मतत्त्वमबाध्यम् । तज्ज्ञानाच्च परमार्थविषयादलौकिकाभ्युदयसिद्धिरित्यस्मदाचार्याणां पराशरपाराशर्यप्रभृतीनां च सिद्धान्तरहस्यमिति ।

असितं चिकुरे सितं दृगन्ते मृदुलं वर्ष्मणि मोहनं विलासे ।
निगमस्तुतमस्तु मे पुरस्तान्मुनिगेयं मुरवैरिभागधेयम् ॥
कवितार्किककण्ठीरवचरणाब्जं बिभृत मौलिभागेषु ।
विलसतु वः सार्वज्ञ्यं किमपि जनाः सर्वमङ्गलोल्लसितम् ॥
विलासः पुण्यानां विकसनकला बोधजलधेः
विरक्तेरास्थानं विहरणपदं देशिकगिराम् ।
सुतस्तातार्यस्य श्रुतगरिमगाम्भीर्यमहिमा
सतां भूमा भूमाविह विजयते वेंकटगुरुः ॥

Colophon:

इति श्रीमच्छठमर्षणकुलतिलकश्रीमदण्णयाचार्यकृतिषु व्यावहारिकसत्यत्वखण्डनसारः संपूर्णः ।

Post-colophon writing:

संसेव्यते तटाकोऽयं विविधैः कविभिः सदा ।
रसाश्रयो रसज्ञानां रोचते हि समागमः ॥
यद्वदीश्वरसेवात्तं तटाकं मन्महेऽम्बुधिम् ।
कमलोत्पत्तिहेतुत्वाल्लसद्धंससमाश्रयात् ॥
तदनु विबुधवृन्दं तारतम्यं न मेने
तटभुवि लसितानां यत्र रामामणीनाम् ।
दिविचरसुदृशां वा बिम्बितानां मणीनां
नरहरिसरसी सा मोदपालीं विधत्ताम् ॥

509

व्यावहारिकसत्यत्वखण्डनसारः

Reads the following colophon:

इति श्रीमच्छठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिष्ठयायितहृदयकमलश्रीतातार्यनन्दनस्य श्रीवेंकटाम्बागर्भशुक्तिमौक्तिकमणेः षड्दर्शनीवल्लभसर्वतन्त्रस्वतन्त्रवाजपेययाजिस्वाग्रजवेंकटार्य-

चरणकमलपरिचरणलब्धसर्वशास्त्रस्य चतुर्विधकवितानिर्वहणशीलस्य पूर्वोत्तरमीमांसापारावारपारीणस्या-न्वीक्षकीव्याकरणशिक्षितमतेरण्णयाचार्यस्य कृतिषु व्यावहारिकसत्यत्वखण्डनसारः संपूर्णः ।

511

शंकरहृदयाविष्करणम्

This is a treatise attempting to prove that Śaṃkara's views on Vedānta are not opposed to those of Rāmānuja. The author states that the difference between the views of the two great Ācārya-s was created only by some later commentators on Śaṃkara's works. In support of his thesis the author quotes passages from Vācaspati's *Bhāmatī*. The author was the son of Jagannāthārya and pupil of both Nṛsiṃha and Raṅgarāja. Beginning:

अनेकसत्यभुवनसृष्टिस्थित्यन्तहेतवे ।
अशेषचिदचिद्वस्तुविशिष्टाय महात्मने ॥
भीष्माचार्येण महता नित्यविज्ञानसिन्धुना ।
सहस्रनामभिर्गीतवैभवायान्तरात्मने ॥
कल्याणगुणपूर्णाय ब्रह्मरुद्रादिहेतवे ।
गीतामृतप्रदानेन लोकोज्जीवनहेतवे ॥
पाञ्चरात्रोक्तविधिना पूजनीयाय विष्णवे ।
एकान्तभक्तिलभ्याय चतुर्वर्गप्रदायिने ॥
शङ्खचक्राङ्कितभुजैरूर्ध्वपुण्ड्रधरैर्द्विजैः ।
अर्चनीयाय विनतिं करोम्यनिशमादरात् ॥
वन्देऽहं वरदाचार्यपदपङ्कजषट्पदम् ।
रामानुजार्यमात्रेयवंशाम्भोधिसुधाकरम् ॥
रामानुजार्यसिद्धान्तप्रक्रिया शाङ्करैरपि ।
प्रायशः स्वीकृतेत्येवमत्रिवंश्यजगद्गुरोः ॥
पुत्रो धर्मपुरीशाख्यो व्यक्तमत्र करोत्ययम् ।

आस्तां तावत् शतदूषणीन्यायामृतोक्तमार्गानुसारेण जगत्सत्यत्वसाधनम् । शंकरव्याख्यान-प्रदर्शनेनैव जगत्सत्यत्वं साधयामः । तथाहि—नाभाव उपलब्धेः । न खल्वभावो बाह्यस्यार्थस्या-ध्यवसातुं शक्यते । कस्मात् ? उपलब्धेः । उपलभ्यते हि प्रतिप्रत्ययं बाह्योऽर्थः । स्तम्भः, कुड्यम्, घटः, पट इति । न चोपलभ्यमानस्यैवाभावो भवितुमर्हति । यथा हि कश्चित् भुञ्जनो भुजिसाध्यायां तृप्तौ स्वयमनुभूयमानायामेवं ब्रूयात्—नाहं भुञ्जे, न च तृप्यामीति, तद्वदिन्द्रियसंनिकर्षेण स्वयमुपलभमान एव बाह्यमर्थं नाहमुपलभे न च सोऽस्तीति ब्रुवन् कथमुपादेयवचनः स्यात् ।

End:

एवं चार्थवादस्थगर्भशब्दः कथं तद्धर्मविधायकोऽपि स्यादिति शिखादित्यागोऽपि विधीयेत, श्रौतत्यागतद्विधानायोगात्। यथाकथंचित् प्राप्तेरभ्युपगमे तद्दीक्षादिषूर्ध्वपुण्ड्रेरपि समानमिति दीक्षादिषूर्ध्वपुण्ड्रत्यागो न्यायाभासमूलक इति स्पष्टम्। एवं च रामानुजमतप्रक्रिया सर्वापि शांकरैरङ्गीकृता। श्रीवैष्णवाचारश्च सर्वोऽपि शंकराङ्गीकृत इति शंकरकृततत्त्वनिष्कर्षकग्रन्थप्रदर्शनेनैव मया व्याख्यातमपीति सर्वं समञ्जसम्।

कविकथकमृगेन्द्रसूक्तिगर्भा विलसति यस्य मुखे पुरो न तस्य।
प्रभवति परवादिमत्तहस्ती तिमिरमिवोदितभानुमण्डलस्य॥
रामानुजमतस्थानां पादपङ्केरुहं भजे।
तन्मतद्वेषिणां वाचं निरुन्ध्यां नृपसंसदि॥

Colophon:

इत्यात्रेयकुलतिलकवादिगजेन्द्रकेसरिजगन्नाथार्यसूनुना स्वपितृव्यश्रीनृसिंहार्यशिष्येण स्वाग्रजश्रीरङ्गराजाध्वरिलब्धात्मबोधेन श्रीधर्मपुरीशेन संगृहीतं शंकरहृदयावेदनं ताम प्रकरणं समाप्तम्।

निरालोके लोके निरुपधिपरस्नेहभरितो
यतिक्ष्माभृद्दीपो यदि किल न जाज्वल्यत इह।
अहंकारध्वान्तं विजहति कथंकारमनघाः
कुतर्कव्यालौघं कुमतिमतपातालकुहरम्॥
न खलु कवितामानः का नः क्षतिः पथि गौतमे
न च परिचयः काणादे वा कुमारिलदर्शने।
अपि गुरुमते शास्त्रेष्वन्येष्वपीह तथापि नः
फलति विजयं सर्वत्र श्रीयतीश्वरगीःश्रमः॥

512

A criticism of Śaṃkara's monism and the Bhedābhedavāda of Bhāskara and Yādavaprakāśa. Although the title indicates that 100 sections dealing with 100 topics must have existed, only 66 sections are now available. It is traditionally said that the remaining sections, which are lost, contained criticism against the Dvaita of Ānandatīrtha.

514

शतदूषणीव्याख्या

Beginning:

श्रियै सततमस्तु मे भुजगराजशैलाधिपः
श्रियं वहति वक्षसा श्रितजनैकरक्षाकरः।

दयासहचरीभवद्विहितवाजिवक्त्राकृति-
जंगज्जननरक्षणक्षपणकेलिदीक्षागुरुः ॥
ऋषीणां सतानां सुकृतपरिपाकेन महता
समाविर्भूतो यो महति घटिकाशैलशिखरे ।
महार्याद्यैरन्यैरमरगुरुकल्पैरधिगतः
स नः श्रेयो दद्यादमृतफलवल्लीसहचरः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमातिप्रचयगमनाय शिष्टाचारप्राप्तमिष्टदेवताप्रार्थनात्मकं मङ्गलं शिष्यशिक्षायै निबध्नाति—समाहार इति । हयवदनहेषाहलहलोऽन्तर्ध्वान्तं हरत्विति संबन्धः । अज्ञान-रूपस्यान्तर्ध्वान्तस्य हरणं प्रमाकरणत्वे सत्येव भवतीति प्रमाकरणत्वमाह—साम्नां समाहार इत्यादिना । ऋचां प्रतिपदं प्रतिनिधिरित्यर्थः ।

End:

नापि पूर्वोत्तरकालयोः प्रपञ्चानुपलम्भप्रसङ्ग इति शङ्कते—सैवेति । घटसंविदेवेत्यर्थः । अतश्च वेद्यमिति । घटातिरिक्तं वेद्यमित्यर्थः । तच्च वेद्यमिति । . . . . त्यर्थः । तद्वेद्यमिति क्वचित् पाठः । तत्तद्वेद्यमित्यर्थः । संविदोऽप्युत्पत्तिविनाशादिप्रत्ययो बाह्यघट . . . . न्तरसुखाद्युत्पत्ति-विनाशादिप्रत्ययवन्निर्बाध इति संविदैक्यं न युक्तमिति परिहरति—घटादेरिवेति ।

Colophon (p. 33):

इति श्रीकुशिककुलजलनिधिसुधाकरस्य वेदान्ताचार्यस्य भागिनेयेन वत्सकुलजलधिकौस्तुभ-नृसिंहगुरुसुतेन नृसिंहदेवेन कृतायां शतदूषणीटीकायां प्रथमः ।

516

शतदूषणीव्याख्या सहस्रकिरणी

An elaborate commentary on the 15th section of the *Śatadūṣaṇī* of Vedāntadeśika described above, refuting the various definitions of the term *mithyātva* as given in Advaita works like the *Citsukhī*, *Pañcapādikāvivaraṇa*, *Advaitasiddhi* and *Laghucandrikā*. The author was the son and pupil of Śrīśailadeśika of Āṇḍān Śrīśaila family. According to the introductory verse 2, the author's father Śrīśailadeśika is known to have performed many sacrifices, Vājapeya and so on, and entered the Saṃnyāsa life in old age with the name of Raṅgarāmānuja. The author was patronized by Kṛṣṇarāja of Mysore. The author's father (Śrīśailadeśika) may be conveniently identified with the author of the *Siddhāntasaṃgraha* (No. 564 below) the colophon of which also mentions that the author (Śrīśailadeśika)

performed many sacrifices like Vājapeya, etc. and as the son of Śrī Raṅgarāja of the Srirangam Āṇḍān Śrīśaila family. This Śrī Raṅgarāja is known to have had another son Śrīnivāsācārya, the author of the *Nyāsavidyāvijaya* described under No. 329 above.

Beginning:

आदौ हंसोऽथ मत्स्यस्तदुपरि समभूत् सैन्धवः कन्धरायां
भूयो नारायणात्मा पुनरपि भगवद्व्यासरूपी शठारिः ।
नाथार्यो यामुनार्यस्तत इह भगवत्संयमीन्द्रस्तदेतत्
सर्वं श्रीवेदचूडागुरुवरवपुषा सार्थयन्नः परोऽव्यात् ॥ १ ॥
व्याख्याय स्वप्रबन्धान् विशदमविकलैर्वाजपेयादियज्ञै-
रिष्ट्वा धर्मान् यतीनामनितरसुशकानप्यनुष्ठाय भूयः ।
श्रीशं संतोषयिष्यन् श्रुतिशिखरगुरुर्यन्मयः प्रादुरासी-
च्छ्रीमच्छ्रीशैलसूरिर्जयति स यतिराड् रङ्गरामानुजाख्यः ॥ २ ॥
श्रीहयवक्त्रमुपास्य श्रीमच्छ्रीशैलदेशिकाकारम् ।
अधिशतदूषणि टीकां कुर्वे दृश्यत्वहेतुभङ्गस्य ॥ ३ ॥
आत्मापि हसति नितरां किमुत परे साहसं मम त्वेतत् ।
पारं देशिकदृष्टिर्नीत्वापायात् तथापि परिपायात् ॥ ४ ॥
प्रत्यूहगिरिनिर्भेदशतधारधुरंधरः ।
श्रीमतो हयवक्त्रस्य हर्षहेषारवोऽवतु ॥ ५ ॥
श्रीमत्कृष्णक्षितीन्द्रे जगदिदमवति श्रीमहीशूरपुर्यां
विद्वद्ब्रातामराद्रौ निरुपधिकदयौदार्यचार्तुर्यसिन्धौ ।
तल्लब्धाभीष्टतुष्टाद् दशशतकिरणः श्रीनिवासोदयाद्रे-
रुद्भूतश्चन्द्रिकायाः प्रसरमभिभवन् हन्ति दुस्तर्कमोहम् ॥ ६ ॥

वादार्थं संगृह्णन् मिथ्यावादनिराकरणस्य प्रकृष्टभगवत्प्रसादसाधनत्वं दर्शयति—अबाधादिति । अध्यक्षप्रभृतिमितिवर्गेषु अवधृतमिदं जगदबाधादन्तर्यमयितुर्यस्य शरीरमित्यन्वयः ।

Colophon (p. 646):

इति श्रीमदाण्डान्श्रीशैलकुलकलशोदधिकौस्तुभायमानभगवन्निगमान्तदेशिकापरावतारश्रीशैल-देशिकतनूजस्य तदेकदैवतस्य श्रीनिवासदासस्य कृतौ सहस्रकिरणीसमाख्यायां शतदूषणीव्याख्यायां मिथ्यात्वविशेषनिर्वचनान्धकारनिर्मूलनं नाम प्रथमोल्लासः ।

End:

एवं प्रपञ्चसत्यत्वस्यापि प्रत्यक्षप्रमाणसिद्धत्वात् दृश्यत्वानुमानं वह्न्यनुष्णत्वानुमानसमशील-मिति पूर्वोक्तदोषो दुरपह्नव इति भावः ।

सिद्धिचन्द्रिकयोरुक्तो बाधोद्धारोऽपि सर्वशः ।
मूलवाक्यैः स्वरसतः प्रतिक्षिप्त इति स्फुटम् ॥

. . . . ज्ञापनायात्र तद्ग्रन्थपङ्क्तिरेव विलिख्यते । अत्रोक्तं सिद्धौ

517

शतदूषणी

A discussion on some points of differences between the two schools of Pillai Lokācārya and Vedāntadeśika on Śrīvaiṣṇavism. This work supports the former school.

Beginning:

. . . . . मूर्धस्फारकोटीरमूर्ति-
र्यतिपतिमतभाष्यक्षेमधुर्यप्रसङ्गः ।
तदहितमतसर्पाहंकृतिक्षेपताक्ष्यों
गुरुकुलनुतभूमा रम्यजामातृनामा ॥
. . . . . स्थितिध्वंसादिनर्मिणः ।
रङ्गिणो गुरुमीडेऽहं रम्यजामातरं धियै ॥
वेदान्ताख्यमहादीपस्नेहधारां जगद्धिताम् ।
आधार . . . . . गुरुपरंपराम् ॥
कण्टकोद्धारभारत्यामपर्याप्तमना अहम् ।
गीर्वाणभाषयाख्यामि टिप्पणीं शतदूषणीम् ॥
निगमान्तरहस्यार्थ . . . . . मदोत्तरान् ।
औत्तरान् दन्तिनो भेत्तुं हरिर्ग्रन्थोऽयमेधते ॥

सिद्धोपायशोधनाधिकारे

Colophon (fo. 4)

इति नदीतीरमुनिविरचितायां शतदूषण्यां प्रथमश्लोकानुपपत्तिवादः प्रथमः ।

End:

समस्तवस्तुसाक्षात्कारतन्निर्माणसमर्थदृष्टिनियतं सामान्यतो दृष्टवत् न लिङ्गमुपलभ्यत इति भाष्यम् । सिद्धान्त्येकदेशिना मीमांसकेन दंपतिगतमीश्वरत्वमिति न ज्ञायते । . . . . पदं प्रयुज्यते । ननु च जगतः कार्यत्वं तदुपादानोपकरणसंप्र

518

शरणवरणतत्त्वम्

A metrical tract explaining the truth of *śaraṇāgati* according to Pillai Lokācārya.

Beginning:

वरणोपायभावस्य वक्तुं निरवकाशताम् ।
निबिरीसौ करीशस्य निदधे चरणौ हृदि ॥ १ ॥
फलायन्त्यां प्रीतौ करिगिरिपतेर्यन्निरुपमं
निदानं सौहार्देऽपि च फलतया यत् प्रणिजगुः ।
उपासान्यासाभ्यां तदिदमनवाप्यात्मविभवं
प्रसज्ज्योपायत्वं शरणवरणं प्रापयति सः ॥ २ ॥
गौणं मुख्यमितीव यच्छ्रुतिगणैर्गूढाशयैराश्रितं
न्यासोपासननामकीर्तनमुखं नानाविधं साधनम् ।
तत्र क्वापि कदाप्यलब्धनिलयास्तत्पारतन्त्र्याश्रिताः
स्वीकर्तुं वरदं श्रियो घटकतां निश्चिन्वते भावुकाः ॥ ३ ॥

End:

परस्य स्वातन्त्र्यं मनसि परिचिन्त्याकुलमतिः
षडङ्गोपासाभ्यां शरणवरणादप्युपरतः ।
समुद्धर्तुं लोकान् सदयगुरुभावेन सुलभे
करिक्ष्माभृत्कान्ते कलयति तु कश्चिच्छरणताम् ॥ २३ ॥
अज्ञानशक्तीन् विदुषोऽतिभक्तान् प्रपत्तिरार्याङ्घ्रियुगे प्रयुक्ता ।
अङ्गाङ्गिभावेन विकल्पभाजा पुष्णाति तुल्यं भगवत्प्रपत्त्या ॥ २४ ॥
वरवरमुनिनेतुर्वाक्यतात्पर्यवेदी वरदगुरुरिमं मां वत्सलो वीक्ष्य दृष्ट्या ।
शरणवरणतत्त्वं शब्दयामास सन्तः सरसगुणनिकायाः सादरं स्वीकुरुध्वम् ॥

Colophon:

इति शरणागतितत्त्वं संपूर्णम् ।

महीसारपुराधीशो महनीयगुणाम्बुधिः ।
भक्तिसारो विजयते मुक्तिमुक्तिप्रदो नृणाम् ॥

519

शरणवरणतत्त्वं सव्याख्यानम्

Beginning:

मामेकं शरणं व्रज, चरणौ शरणं प्रपद्ये इति विध्यनुष्ठानयोः श्रूयमाणव्रज्याप्रपत्त्योर्मोक्षकामकर्तव्यताबलात् प्रतीयमानोपायभावो न साक्षात्संबन्धेन; किंतु वरणविषयचरणसंबन्धेन । नापि व्यासज्यवृत्तिः, उभयत्रैकपदद्विवचनविरोधादित्याह—वरणेति ।

वरणोपायभावस्य वक्तुं निरवकाशताम् ।
निबिरीसौ करीशस्य निदधे चरणौ हृदि ॥

End:

उक्तोऽर्थः सर्वोऽपि सत्संप्रदायागत इति वदन् इमं प्रबन्धं समापयति—

वरवरमुनिनेतुर्वाक्यतात्पर्यवेदी वरदगुरुरिमं मां वत्सलो वीक्ष्य दृष्ट्या ।
शरणवरणतत्त्वं शब्दयामास सन्तः सरसगुणनिकायाः सादरं स्वीकुरुध्वम् ॥

श्रीमद्भ्यजामातृमुनेर्वाक्यतात्पर्याभिज्ञोऽस्मदाचार्यः शिष्यवात्सल्यात् मां विशेषकटाक्षपात्रं कृत्वा इदं शरणवरणतत्त्वं शब्दयामास । अत्र मद्बुद्धिकल्पितं किंचिदपि नास्ति । सर्वं सांप्रदायिकमित्यर्थः । संप्रदायरसिकतोपयुक्तकल्याणगुणशालिनः सादरं विश्वस्य स्वीकुरुध्वमङ्गीकुरुध्वम् ।

520

शरीरवादः

This work maintains the view held by the Viśiṣṭādvaitin-s that matter and souls constitute the body of the supreme Brahman. The author gives a definition of the term *śarīra* according to Śrī Rāmānuja.

Beginning:

श्रीकान्तकान्तपदपङ्कजसौरभश्रीपारीणचित्तनिभषट्चरणः प्रवीणः ।
श्रीलक्ष्मणार्यमभिवन्द्य शरीरवादं सारार्थसंगतमनन्तसुधीर्विधत्ते ॥

इह तावच्छरीरशब्दस्य प्रवृत्तिनिमित्तं विचार्यते । शरीरपदप्रवृत्तिनिमित्तभूतं शरीरत्वं हि न जातिः; तत्साधकप्रमाणाभावात् । न चेदं शरीरमिदं शरीरमित्यनुगतप्रतीतिरेव तत्साधिका, अनुगतप्रतीतेर्बाधकविरहे जातिसाधकत्वादिति वाच्यम् ; सिद्धान्ते अनुगतप्रतीतेः संस्थानविषयकत्वेन तदतिरिक्तजातिसाधकत्वासंभवात् ।

End:

नैयायिकादिनये उत्क्रान्त्यादिकाले शरीराभावेन निष्क्रामतीत्यादिना रथो गच्छतीत्यादिवत् क्रियाश्रयत्वस्यैव बोधाव्यक्तया क्रियावत्त्वहेतोरात्मनि सिद्धेरिति सूत्राद्यभिप्रायात् । अधिकमन्यत्र विवेचितम् ।

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

522

शारीरकन्यायकलापसंग्रहः

A metrical summary of the principles taught in each Adhikaraṇa of the *Brahmasūtra-s* according to the view of the Viśiṣṭādvaita school. The work is referred to by Vedāntadeśika. (See *JSVOI*, vol. 2, pp. 125-6.)

Beginning:

रक्षाभरः सुविन्यस्तः सेनेशे यत्र विष्णुना ।
तस्यावतारमपरं सेनानाथगुरुं भजे ॥
प्रणम्य रामानुजसंयमीश्वरं प्रबोधहेतुं हृदयाम्बुजन्मनः ।
करोमि तद्दर्शनमार्गगोचरं शारीरकन्यायकलापसंग्रहम् ॥
प्रमाणता तत्प्रतियोगिभङ्गः संराधनं तस्य फलोपभोगः ।
एतानि सम्यक् परिचिन्तितानि शास्त्रे त्विहाध्यायचतुष्टयेन ॥

End:

स्वेच्छया सर्वसंभोगो मोक्षस्य च फलोदयः ।
इत्येवमर्थजातं स्यात् पादेनानेन चिन्तितम् ॥

Colophon:

इति भगवत्सेनापतिमिश्रैर्विरचितः शारीरकन्यायकलापसंग्रहः समाप्तः ।

523

शारीरकार्थसंक्षेपः

A metrical summary of the chief tenets of the Viśiṣṭādvaita school. This has been printed and published in the *ALB*, vol. 28, pp. 263 ff.

Beginning:

नत्वा शार्ङ्गधरं देवं राघवार्यविपश्चिता ।
श्रीलक्ष्मणार्यसिद्धान्तः श्लोकैः संगृह्यतेऽधुना ॥
शास्त्रस्य विषयो मुख्यः श्रीशोऽस्य चिदचिद्वपुः ।
नित्यनैमित्तिकैर्धर्मैः काम्यैश्चानुगृहीतया ॥
तदुपासनया भूयस्तन्न्यासेनैव वा सकृत् ।
तत्साम्यमेयुषः पुंसस्तद्देशावाप्तिपूर्वकम् ॥

पूर्णब्रह्मानुभूत्यात्मा मुक्तिरत्र प्रयोजनम् ।
तत्राचिच्चेतनाहीनद्रव्यं तत् त्रिविधं मतम् ॥

End:

फलं निरूपितं सम्यक् पाराशर्येण विष्णुना ।
एवं शारीरकस्यास्य सर्वस्मृत्यादिगोचरः ।
नारायणः परं ब्रह्म प्रतिपाद्यमिति स्थितम् ॥

526

शास्त्रैक्यवादः

An attempt to justify the Viśiṣṭādvaita view that the Pūrvamīmāṃsā of Jaimini and Uttaramīmāṃsā of Bādarāyaṇa constitute one single Śāstra and not two as held by Advaitin-s. According to the author the former deals with the Karman-s and the latter with the Upāsanā-s both constituting worship of the Supreme God.

Beginning:

निखिलभुवनहेतुं नित्यसेतुं भवाब्धे-
मुंररिपुमभिवन्द्य श्रीयतीन्द्रं च नत्वा ।
परिचितगुरुधारागीरनन्तार्यवर्यः
प्रथितविमलयुक्तिं वक्ति शास्त्रैक्यवादम् ॥

पूर्वोत्तरमीमांसयोरैकशास्त्र्यमिति तावत् संप्रदायः । ऐकशास्त्र्यं चैकग्रन्थत्वम् एकवाक्यतापर्यवसितम् । तच्च साकाङ्क्षत्वे सत्येकार्थप्रतिपत्तिपरत्वम् । तथा च जैमिनिसूत्रम्—अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति । तदुत्थाप्याकाङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्क्षोत्थापकत्वान्यतररूपवत्त्वमेव तत्साकाङ्क्षत्वम् । प्रकृते च मीमांसापूर्वभागोत्थाप्याया: कर्माराध्यः क इत्याकारिकायाः कर्माङ्गं किमित्याकारिकाया वा ब्रह्मविषयिण्या तज्ज्ञानविषयिण्या वा आकाङ्क्षाया विषयसिद्धिसंपादनेन निवर्तकत्वमुत्तरभागस्येति निरुक्ततत्साकाङ्क्षतानिर्वाहः ।

End:

विपरीतवासनायां तद्धर्मावच्छिन्नविशेष्यकाभावविषयकसंस्कारे बाधकज्ञानोत्पत्तिदर्शनात् तद्धर्मावच्छिन्नविशेष्यकप्रतियोगिप्रकारकज्ञानोत्पत्तिदर्शनादित्यर्थः । तस्मादुक्तरीत्या वाक्यजन्यज्ञानस्य हेतुत्वासंभवात् कर्माङ्गकस्योपासनस्यैव मोक्षहेतुत्वेन ब्रह्मकाण्डप्रतिपाद्योपासनाङ्गभूतकर्मप्रतिपादकत्वात् कर्मकाण्डस्य ब्रह्मकाण्डेनैकशास्त्र्यं सिद्धमिति दिक्

Colophon:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

528

श्रीतत्त्वदर्पणम्

A short treatise dealing with the nature and characteristics of Goddess Lakṣmī and her role in the attainment of Mokṣa. The author, Kesarabhūṣaṇa alias Vakulābharaṇa, was the son of Śaṭhakopācārya of the Ātreya family and the pupil of Varadācārya of the Śrīvatsagotra.

Beginning:

अथेदानीं श्रीमदात्रेयशठजित्सूरिसूनुश्रीमत्केसरभूषणविरचितं श्रीतत्त्वदर्पणं प्रारभ्यते ।

जयति निगममूर्धस्फारकोटीरभूषा-
यतिपतिशुभवाणीप्राणसौहार्दभूमिः ।
वकुलधरमुनीन्द्रस्वीयमालेव हृद्या
वरवरमुनिसूक्तिर्वर्धितश्रीशभक्तिः ॥ १ ॥
श्रीनाथायादिनाथाय नमः कारुण्यसिन्धवे ।
यस्य सेवासुधास्वादं वक्ति केसरभूषणः ॥ २ ॥
घटिकामादिनाथस्य वल्लभां कमलां भजे ।
यन्मुखोल्लासकामेन हरिणा सृज्यते जगत् ॥ ३ ॥
पराङ्कुशमुनिः श्रीमान् पातु मां करुणानिधिः ।
यदीयं चरणाम्भोजं गुरूणां सकलं धनम् ॥ ४ ॥
रामानुजमुनिं वन्दे वेदान्तानां तपःफलम् ।
येनात्मानं रमाकान्तः कृतकृत्यममन्यत ॥ ५ ॥
रहस्यान्धिकलानाथं प्रपद्ये लोकदेशिकम् ।
यद्गौः कुवलयामोदललिता राजतेतराम् ॥ ६ ॥
श्रीमन्तो वेदविज्ञानवदान्या गुरवोऽनघाः ।
स्वदन्तां मे रमाधीशकरुणामृतचातकाः ॥ ७ ॥
विद्यावदान्यकारुण्यवरदार्यमहं भजे ।
येन श्रीवत्सवंशोऽयं समौक्तिकमणिप्रभः ॥ ८ ॥
आत्रेयशठजित्सूरिपुत्रः केसरभूषणः ।
श्रीतत्त्वदर्पणं स्वच्छं करोति चपलाशयः ॥ ९ ॥

तत्रभगवता पर्यायभाष्यकृता सकलजगदवनचपलकमलनयननिदेशकलितानन्तावतरणेन श्रीमद्यतीन्द्रप्रवणेन देशिकभूषणेन अतिगभीरहृदयभुवनगुरुवरानुगृहीतरहस्यत्रयद्वितीयप्रकरणे "इप्पोदु इवळैच्चोल्लुकिरतु पुरुषकारमाक" इतिसूत्रव्याख्यानावसरे श्रिय उपायत्ववादिनां पक्षो निरस्त इत्यनुगृहीतम् । अत्रायमभिसंधिराचार्याणाम् ।

End:

वकुलाभरणेनेममर्पितं साधुचेतसः ।
श्रीतत्त्वदर्पणं धीराः पश्यन्तु सततं भुवि ॥
श्रीरामानुजयोगिराजचरणप्रावण्यभूमोल्लस-
च्छ्रीमद्भ्यवरार्यसूक्तिविलसच्चैतन्यविन्यासिनाम् ।
साधूनां शिशिरक्षणस्फुटमतिप्रागल्भ्यकान्तोज्ज्वल-
ज्ञं . . द्वन्द्वधनीनदातृकलितः श्रीमान् महादर्पणः ॥
धीरा वश्चरणाम्भोजं प्रणमामि कृताञ्जलिः ।
बालेनात्र मया प्रोक्तं साहसं क्षम्यतामिदम् ॥

Colophon:

इति श्रीमदात्रेयशठजित्सूरिसूनुश्रीमत्केसरभूषणविरचितं श्रीतत्त्वदर्पणं समाप्तम् ।

The scribe adds:

अब्दः शुभकृन्मासः फाल्गुननामा दलः कलापूर्णः ।
हरिदिनमिन्दोर्वारः सर्वं सुस्थं समापने समभूत् ॥

529

श्रीतत्त्वरत्नम्

This work supports Vedāntadeśika's view that Goddess Lakṣmī, like the Lord Nārāyaṇa, is the universal ruler and not of limited power as held by the school of Pillai Lokācārya. The author was the son of Veṅkaṭācārya and pupil of Pādukāsevaka Rāmānujamuni.

Beginning:

यच्छक्त्या संविशिष्टो हरिरखिलतनुर्जङ्गमाजङ्गमानां
जन्मस्थित्यन्तलीलामनुभवति दधत् सर्वभूतेश्वरत्वम् ।
शेषित्वोपायताद्यत्रियुगगुणजुषे सर्वभूतेश्वरायै
लक्ष्म्यै तद्विष्णुपत्न्यै शुभपदवपुषे कुर्महे सत्प्रणामान् ॥
जयन्ति श्रीमतो विष्णोर्जगद्रक्षणसंमुखाः ।
मूर्ता इव दयापूरा अस्मदाचार्यपङ्क्तयः ॥

स जीयात् पादुकासेविरामानुजयतीश्वरः ।
चतुस्तन्त्रेऽपि यच्छिष्यैः शास्त्रकारायितं बुधैः ॥
वाधूलवेंकटार्यस्य पौत्रो वेंकटदेशिकः ।
वरदार्यात्मजः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
स्वाम्युपाय उपेयश्च श्रीमान्नारायणः सदा ।
श्रियः सर्वेश्वरत्वादि मन्मुखाद्दर्शयिष्यति ॥

इह खलु श्रियो जीवकोटिप्रविष्टत्वमीश्वरकोटिप्रविष्टत्वमुभयबहिर्भूतत्वं वेति विचार्य सर्वेश्वरत्वादिकं स्थापयिष्यते ।

End:

तथाच उक्तरीत्या सर्वभूतेश्वरत्वादिवचनसाम्यं सुवचमित्यस्यैव पञ्चमपक्षस्य श्रीमत्त्रय्यन्तसिद्धान्ततया सर्वेश्वरयोर्लक्ष्मीनारायणयोर्नित्यव्यवस्थितपतिपत्नीभावशेषशेषिभावादिकमन्योन्येच्छाविघाताद्यनर्हनित्योभयेच्छाप्रयुक्तमेवेति सिद्धमिति सर्वं समञ्जसम् ।

निर्बाधसन्न्यायबलौघजुष्टं सर्वागमानां स्वरसैककण्ठ्यम् ।
पक्षे भवेत् पञ्चम एव सम्यगित्यार्यमुख्यैर्निपुणैरभाषि ॥
श्रीतत्त्वरत्नं श्रुतिमौलिजुष्टं सर्वागमाम्बोधिसमुद्भवं मे ।
धृत्वा हृदि श्रीहयशीर्षदेव आनन्दधाराभिरजस्रमिन्धाम् ॥
सारासारविदो मान्यास्त्रय्यन्तस्थापका हृदि ।
श्रीतत्त्वरत्नं गृह्णन्तु प्रसीदन्तु च मे सदा ॥

Colophon:

इति श्रीवाधूलकुलतिलकपदवाक्यप्रमाणपारदृश्वमूर्धन्यवेदान्तयुगलनिखिलरहस्यजालनिषद्यायितहृदयकमलश्रीमत्कन्दाडवरदाचार्यात्मजश्रीवेंकटाचार्यतनयेन श्रीमत्संयमिसार्वभौमविजयस्थानापरनामधेयश्रीयादवाद्रिनिवासिना श्रीमत्पादुकासेवकरामानुजसंयमीन्द्रकरुणाकटाक्षसमधिगतोभयवेदान्तनिखिलरहस्यहृदयेन तच्चरणनलिनविन्यस्तस्वात्मरक्षाभरेण श्रीवरददासेन विरचितं श्रीतत्त्वरत्नं संपूर्णम् ।

अहो मे सुमहाभाग्यं यद्गुरूणामनुग्रहात् ।
श्रीतत्त्वरत्नकल्याणमास्ते लब्धमयत्नतः ॥

530

श्रीब्रह्मत्वव्युदासः

This is a refutation of the view that Lakṣmī is included in the category of Brahman. The author is evidently a follower of Pillai Lokācārya.

Beginning:

राडसि बृहतीत्येतद्वाक्यं श्रीविषयमेतस्याः ।
यद्यपि सर्वेशत्वं सर्वव्याप्तिं च वक्त्यसंकोचात् ॥
तदपीदं ब्रह्मगतं सर्वव्याख्यानभाष्यरीत्या स्यात् ।
नो चेत् प्रतर्दनाद्यधिकरणविरोधादिदोषः स्यात् ॥
भूसूक्त इन्द्रपत्नीवाक्यं भूविषयमप्येवम् ।
किंच स्यात् तुल्यनयान्मानान्तरमन्यथा नेयम् ॥

End:

अविधेयमनाधेयमशेषमधिकं समम् ।
नेति वस्तुपरिच्छेदाभावः स्याद्विश्वदेहिनः ॥

इत्यानन्त्यनिष्कर्षविरोधश्च । अतो लक्ष्म्या न ब्रह्मत्वमिति तत्स्वरूपमणुपरिमाणमेवेत्यनवद्यम् ।

Colophon:

इति श्रियो ब्रह्मत्वव्युदासः ।

531

श्रीब्रह्मत्वसमर्थनम्

This work maintains that Lakṣmī is included in the category of Brahman.

Beginning:

आर्षं श्रौतब्रह्मशब्दनिरुक्तावेवकारतः ।
उपयुक्तो ह्ययं नात्मविशेषणनिवारणः ॥
तात्पर्यागोचरं यस्मात् प्रतिबन्दि न सेत्स्यति ।
अन्यथा प्रतिबन्दीतः सर्वं परिहृतं भवेत् ॥
कैंकर्यप्रतिसंबन्धिभावः पुरुषकारता ।
निरूपकं प्रधानत्वं प्रमाणाचार्यसंमतम् ॥
अन्यत्र मिथुनात् सर्वं विमतं कृतिषूत्तमैः ।
नेयं वैभववादेन प्रमाणाचार्यभावतः ॥
अणौ विभौ च निःस्पर्शे सूक्ष्मशब्दप्रयोगतः ।
प्रतिघातानर्हतैक्यान्निमित्तैक्येन शक्तता ॥

End:

तेनाणुविभुसामान्ये सूक्ष्मशब्दस्य संमतम् ।
निमित्तं प्रतिघातार्हत्वाभाव इति निश्चितम् ॥

532

श्रीमच्छब्दार्थविचारः

A discussion on the import of the word *śrīmat* in the Mantraratna according to the views of the two schools of Śrīvaiṣṇava-s.

Beginning:

श्रीमत इत्यत्र तस्मै नारायणायेत्यनुक्त्वा श्रीमते इति पुनरुक्तिबलात् चतुर्थ्यर्थे श्रियोऽप्यन्वय इत्येकः पक्षः। शेषित्वस्य व्यासक्तत्वबोधकप्रमाणबलात् तत्प्रयुक्तकिंचित्कार्यत्वस्यापि तस्या आवश्यकतया श्रियोऽपि चतुर्थ्यर्थान्वय इत्यपरः।

End:

यथा च संयोगे स्नेहजन्यतावच्छेदकवैजात्यसत्त्वेऽपि संयोगत्वेन विभागहेतुता, तद्वत् व्रीहि-यवजन्यतावच्छेदकवैजात्यसत्त्वेऽपि वैजात्यकल्पनतः प्रथमप्रतिपन्नेन यागद्वयानुस्यूतेन रूपेण द्वयोरपि प्रत्येकमुत्पत्त्यपूर्वहेतुत्वोपपत्तेः।

533

श्रुतितात्पर्यनिर्णयः

A treatise on the supremacy of Nārāyaṇa, supported by scriptural passages. The author adversely criticizes the views held by Appayadīkṣita and other Śaivites.

Beginning:

श्रीमान्नारायणोऽशेषजगज्जन्मादिकारणम्।
अन्तरात्मा शिवादीनामव्याद्व्याजवत्सलः॥
प्रमाणं लोकानां प्रणयपदमप्राकृतगिरां
परं वक्षःसीमापरिणतपयोराशिसुकृतम्।
कराङ्कूरत्तेजःकलिकमरुणाम्भोजनयनं
महो मेघश्यामं यदुशिखरिधाम प्रणमत॥
नारायणः परं ब्रह्म न ब्रह्मा न च शंकरः।
शास्ता जनानां सर्वात्मा ततो ज्यायांश्च पूरुषः॥
तथाहि तद्विज्ञानार्थमिति वाक्ये विधीयते।
गुरूपसत्तिनियमो ब्रह्मज्ञानाय तत्र हि॥
अक्षरं पुरुषं वेदेत्यत्र वेद्यस्य वस्तुनः।
नारायणत्वं पुरुषपदश्रुत्यावधारितम्॥

स्वरूपशोधके सत्यं ज्ञानमित्यादिकेऽपि च ।
वाक्येऽनन्तपदश्रुत्या प्राप्यं ब्रह्म श्रियः पतिः ॥
तथा ह्येको ह वै नारायण आसीदिति श्रुतेः ।
सर्वकारणवाक्यानां तत्परत्वमतिस्फुटम् ॥
सर्वभूतान्तरात्मापहतपाप्मेति वाक्यतः ।
नारायणस्य सार्वात्म्यं नैर्मल्यमपि निश्चितम् ॥
श्रौतान्निषेधान्न ब्रह्म नेशान इति विस्फुटात् ।
कण्ठोक्त्या ब्रह्मरुद्रादेः कारणत्वं निराकृतम् ॥
उद्घुष्यत्स्वपि वेदान्तेष्वेवमादिषु केचन ।
निबबन्धुस्ततोऽन्यत्र पारम्यमविशङ्कया ॥
प्रबन्धास्ते प्रतिपदं प्रत्याख्याताः सविस्तरम् ।
व्यासार्यवेदान्ताचार्यमहार्यार्यैर्महात्मभिः ॥
तथाप्यत्याग्रहोदीर्णशिवकर्णामृतस्य तु ।
निरासायोन्मिषत्यद्य श्रुतितात्पर्यनिर्णयः ॥

इह खलु सकलश्रुतितात्पर्यभूमिः सर्वजगज्जन्मादिकारणं परं ब्रह्म श्रीमान् नारायण एवेति वैदिकानां निर्णयः । तत्र यदुक्तं शिवकर्णामृते—

सदाशिवः परं ब्रह्म साम्बमूर्तिः सदा शिवः ।
विभूतिलेशास्तस्यैव प्रपञ्च इति वैदिकाः ॥

तथाहि—यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञास्व । तद्ब्रह्मेति । जन्माद्यस्य यतः । इति श्रुतिसूत्राभ्यां जगज्जन्मादिकारणत्वं हि ब्रह्मणो लक्षणमवधृतम् ।

End:

तस्मात् मनुव्यासप्राचेतसप्रभृतिपरमर्षिवचनशतोपबृंहितसर्वश्रुत्येककण्ठ्यात् सर्वस्मात् परं सर्वकारणं सर्वान्तर्याम्यनन्यनियम्यमपहतपाप्मत्वाद्यनन्तकल्याणगुणाकरं परं ज्योतिः परं तत्त्वं परमात्मा परं ब्रह्म श्रीमान् नारायण एवानन्तस्थिरफलप्रेप्सुभिः प्रतिबुद्धैरुपास्य इति सिद्धम् ।

535

षष्ठ्यर्थदर्पणम्

A short treatise on the import of the genitive case used in the compound words *brahmajijñāsā* in the *Brahmasūtra* (I. 1. 1) and *bhūtavrāta* in the first verse of the *Śrībhāsya*.

Beginning:

लक्ष्मीचरणलाक्षैकलक्षणं शुभलक्षणम् ।
शेषक्षितिधराध्यक्षमम्बुजाक्षमुपास्महे ॥
जिज्ञासादर्पणे चोक्तो जिज्ञास्यार्थविनिर्णयः ।
षष्ठीदर्पणमादाय कुर्वे षष्ठ्यर्थनिर्णयम् ॥

इह तावद् ब्रह्मजिज्ञासेत्यत्र ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति षष्ठीसमासः श्रीमद्भाष्ये दर्शितः । तत्र नेयं संबन्धसामान्ये षष्ठी । किंतु कर्तृकर्मणोः कृतीति कृद्योगविहितषष्ठी । न च विनिगमनाविरहः; आभिधानिककर्मत्वप्रतिपत्तिमपेक्ष्याक्षेपितकर्मत्वप्रतिपत्तेर्जघन्यत्वात् ; विशेषविधिना सामान्यविधेर्बाधाच्च । तथा च श्रीमद्भाष्यम्—ब्रह्मण इति कर्मणि षष्ठी, कर्तृकर्मणोः कृतीति विशेषविधानात् । यद्यपि संबन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः, तथाप्याक्षेपतः प्राताद्याभिधानिकस्यैव ग्राह्यत्वात् कर्मणि षष्ठी गृह्यत इति । अत्र व्यासाचार्याः—परिणा ब्रह्मसंबन्धिनामपि जिज्ञास्यत्वं सूच्यते । परितो ग्रहणेन हि परितः स्थितानामपि ग्राह्यत्वं लभ्यते । अत एव गृह्यत इत्युच्यते ; न तु परिगृह्यत इति ।

End:

अत एव छत्रिन्यायोऽपि नात्र संभवति । वस्तुतस्त्रापि छत्रिणामिवाच्छत्रिणामपि गन्तृत्वं प्रमाणान्तरेण पर्यालोचयतामेवात्र लाक्षणिकत्वप्रत्ययः । तद्वदत्रापि प्रमाणान्तरवशादेवार्थनिर्णयः । परंतु अच्छत्रिप्रतिपादकपदान्तरासमभिव्याहारात् छत्रिपदस्यैव लाक्षणिकत्वमाश्रीयते । इह तु तद्घटितसमुदायवाचकत्रातशब्देनेव भूतसंबन्धिनामभूतानां लाभान्न भूतशब्दस्य लक्षणा । राजपरिषदित्यादिदृष्टान्तवैषम्यवर्णनमपि न युक्तम् , राजपरिषदित्यादौ तादृशेऽपि तत्प्रयोगदर्शनात् । एवं प्रसिद्धार्थपरतयैव सर्वनिर्वाहसंभवेऽपि अप्रसिद्धार्थकल्पनमन्याय्यम् । रक्षायोग्यसमुदायपरत्वे संभवति तदयोग्यसमुदायपरत्वं नाश्रयितुं युक्तम् । अतो यथोक्त एवार्थो युक्त इति दिक् ।

Colophon:

इति श्रीशैलेत्यादि + श्रीनिवासाचार्यविरचितेषु षष्ठ्यर्थदर्पणं नाम प्रकरणं समाप्तम् ।

536

षष्ठ्यर्थदर्पणम्

Reads the following colophon:

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासताताचार्यनन्दनेन लक्ष्माम्बागर्भशुक्तिमुक्तामणिना कैण्डिन्यश्रीनिवासदीक्षितकरुणाकटाक्षवीक्षाशिक्षितमीमांसाद्वन्द्वमतिना निजाग्रजाण्णयाचार्यदीक्षितानुग्रहगृहीतचतुस्तन्त्रीनियन्त्रितस्वान्तेन श्रीनिवासविदुषा विरचितं षष्ठ्यर्थदर्पणं समाप्तम् ।

540

षष्ठ्यर्थविचारः

Beginning:

ब्रह्मण इति कर्मणि षष्ठीत्यादिना कृद्योगलक्षणा च षष्ठी समस्यत इति प्रतिप्रसवसद्भावादित्यन्तेन भाष्यग्रन्थेन ब्रह्मजिज्ञासेतिसमासान्तर्गता षष्ठी व्याख्याता। न च ब्रह्मण इति विग्रहवाक्यस्थषष्ठ्येव व्याख्याता, ब्रह्मण इति कर्मणि षष्ठीत्येव निर्देशादिति वाच्यम्; तस्याः समासस्यैवाप्रसक्तेः।

End:

व्याख्यानस्यार्थबोधार्थतयार्थबोधात् पूर्वं यत्र न षष्ठीस्मरणं तत्स्थलीयसामग्र्यैवार्थबोधोपपत्त्या तद्व्याख्यानस्य निरर्थकत्वादिति। अस्मिन् पक्षेऽप्रयुक्तापीत्यादिशङ्काग्रन्थे बोधिकेति व्याख्येयनिर्देशस्य स्वारस्यमस्ति। पूर्वकल्पे त्वप्रयुक्तापीत्यादिग्रन्थे। यद्यपि द्वारनिरोध एवाभिप्रेतः, तथापि फलपरतया कथंचिदुपपद्यत इति द्रष्टव्यम्।

541

संगतिसारसंग्रहः

A summary of each of the Adhikaraṇa-s of the *Śrībhāṣya*, explaining their mutual connection. The author Raghunāthācārya of the Śrīvatsa family was a resident of the village Perumbuliyur and a student of Vādhūla Varadācārya. (See MS. notes in *JSVOI*, vol. 10, pp. 30ff.)

Beginning:

नमः श्रीवरदार्याय श्रीमद्वेंकटसूरये।
तद्गुरुभ्यश्च सर्वेभ्यः श्रियै तद्वल्लभाय च ॥ १ ॥
अखिलेत्यादिभाष्यार्थान् देशिकैः समुदीरितान्।
उपदिष्टान् कृपापूर्वं स्वस्मै वरददेशिकैः ॥ २ ॥
मन्दानां सुगमैर्नित्यं समासव्यासभेदतः।
पद्यैः श्रीरघुनाथार्यः संगृह्णाति सतां मुदे ॥ ३ ॥
श्रीभाष्यादिमपद्यस्य योजना दशधा कृता।
देशिकैः कृत्स्नभाष्यार्थसारसंदर्शनक्षमा ॥ ४ ॥
विषयादेः प्रवक्तव्याद्या द्वितीया मङ्गलात्मिका।
तृतीया त्वाद्यसूत्रस्य व्याख्यारूपा चतुर्थ्यथ ॥ ५ ॥

जन्मादिसूत्रव्याकर्त्री पञ्चम्यध्यायसंहते: ।
अर्थसंग्राहिका षष्ठी परवादनिरासिनी ॥ ६ ॥
सप्तम्युभयलिङ्गाख्यपादव्याख्या ततोऽष्टमी ।
नारायणानुवाकार्थप्रतिपादनतत्परा ॥ ७ ॥
नवम्यद्वैतिनां पक्षेऽनारम्भस्य तु सूचिका ।
आरम्भणीयताहेतुं दशमी स्वमतेऽवदत् ॥ ८ ॥
. . . . . .
श्रीभाष्यदीपसारेषु सूत्रार्थो योऽनुवर्णित: ।
श्रुतप्रकाशिकायां च सारावल्यादिकेऽपि च ॥ २१ ॥
पूर्वपक्षे च सिद्धान्ते ये न्यायाश्च प्रदर्शिता: ।
अभिप्रेता: संगतयो विषयो विशयश्च ये ॥ २२ ॥
ते सर्वे सुखबोधाय संतोषार्थविमर्शने ।
महीसारपुरायातमुनिश्रेष्ठाधिवासिते ॥ २३ ॥
बृहद्व्याघ्रपुरे वासं भजता दास्यजीविना ।
यथामति विलिख्यन्ते रघुनाथेन संग्रहात् ॥ २४ ॥
शास्त्रकाण्डद्विकाध्यायपेटिकाधिक्रियाङ्घ्रिभि: ।
सूत्रभेदाच्चाष्टविधा संगति: समुदाहृता ॥ २५ ॥

End:

अयमाशय:—बहुप्रदेशेषु जीवोत्पत्तिप्रतिषेधप्रतिपादकवचनै: तदुत्पत्तिवचनस्य व्याघातात् भूयसां न्यायेन बहुसंहितावचनप्राबल्यादिदं वचनमन्यथा नेयमिति जीवाद्यधिष्ठातृदेवतावाचको जीवादिशब्द इति कुत्रापि वेदविरोधाभावात् कृत्स्नं पाञ्चरात्रं प्रमाणं वैदिकै: संगृह्यत इति । तस्मादितरमतानामसामञ्जस्यादिदोषवत्तया निर्दोषब्रह्मकारणवादो न केनाप्यविचाल्य इति सिद्धम् ।

Colophon:

इति श्रीवाधूलकुलतिलकवरदगुरुकृपालब्धवेदान्तविज्ञानेन श्रीरघुनाथाचार्येण विरचिते संगतिसारसंग्रहे द्वितीयाध्यायस्य द्वितीय: पाद: ।

542

संगतिसारसंग्रह:

Beginning:

एवं पादद्वयाभ्यां कारणविषये परोक्तदूषणपरिहारावुक्तौ स्वपक्षस्थेऽग्रे । उत्तरद्विकेन स्वपक्षे कार्यविषये शङ्कितदोषपरिहार: क्रियत इति द्विकसंगति: । तत्र तृतीये पादे कलेवरारम्भकाणां

वियदादिभूतानामात्मनश्चोत्पत्तिप्रकारो विशोध्यत इति पादसंगतिः। पूर्वाधिकरणे जीवोत्पत्तिवादो जीवाभिमानिसंकर्षणादिपरत्वादौपचरिक इत्युक्तम्। तेनैव न्यायेन वियदुत्पत्तिवादोऽप्यौपचारिक इति शङ्क्याधिकरणसंगतिः।

Colophon of the third Pāda on p. 112.

इति वाधूलकुलतिलकवरदगुरुकृपालब्धवेदान्तविज्ञानेन वात्स्यश्रीरघुनाथसूरिणा विरचिते शारीरकसंगतिसारसंग्रहे द्वितीयस्याध्यायस्य तृतीयः पादः।

End:

अतस्त्रिवृत्करणमण्डसृष्ट्यर्थमेव। तत्समानकर्तृकत्वोपदेशात् व्यष्टिसृष्टेः परमात्मकर्तृकत्वमेवेति ब्रह्मकारणत्वं न केनाप्यविचाल्यमिति सिद्धम्।

Colophon:

इति श्रीवात्स्यरघुनाथसूरिविरचिते संगतिसारसंग्रहे द्वितीयस्याध्यायस्य चतुर्थः पादः। द्वितीयाध्यायः समाप्तः।

543

संगतिसारसंग्रहः

The colophon mentions the name of the work as *Saṃgatisāra*:

इति श्रीवात्स्यरघुनाथसूरिविरचिते संगतिसारे तृतीयस्याध्यायस्य द्वितीयः पादः

544

सच्चरित्ररक्षा

This is a treatise in three chapters on some of the religious practices of the Śrīvaiṣṇava-s concerned with the Taptamudrādhāraṇa, etc.

Beginning:

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि॥
चक्रादिलाञ्छनभृतः सुभगोर्ध्वपुण्ड्रान्
न्यस्तात्मनो भगवतश्चरणारविन्दे।
तद्भुक्तभोगरसिकांस्त्रिदिवेन्द्रवन्द्यान्
पुंसः प्रमाणशरणान् शिरसोद्वहामः॥
यतिवरचरणाम्भोरुहरजःप्रभावेण संनिवृत्तरजाः।
विदधाति वेंकटेशः स्थिरामिमां सच्चरितरक्षाम्॥

सद्भिर्धृतेषु सततं विमतिं गता ये
पत्युः समस्तजगतां परमायुधेषु ।
तैरेव तान्निगमशाणनिघर्षदीप्तै-
स्तर्कात्मना परिणतैः प्रहरामि मूर्खान्

इह कतिचित् अतिचिरसमुपचितविविधदुरितावलीमलीमसमनसः परमपुरुषचरणारविन्द-वैमुख्यमुषितदर्शनाः सुदर्शनादिधारणे विमन्यन्ते ।

End:

अपिच,

भोज्याभोज्यव्यवस्थायां शास्त्रमेव निबन्धनम् ।
तच्चेद्भोज्यमिदं ब्रूते किं वयं विदधीमहि ॥
अथानुष्ठानतन्त्रत्वं नित्यकाम्याग्निहोत्रयोः ।
एवं प्राणाग्निहोत्रेऽपि नैवेद्याशनतन्त्रता ॥

इति । अतः सिद्धं भगवन्निवेदितेनैव पावनतमेनानादिकालसंचितानन्तस्वान्तध्वान्तविध्वंसिना विश्वेषां वैदिकानां वैश्वदेवप्राणाग्निहवनपूर्वकं वैश्वानरमूर्तेर्भगवतः समाराधनमनुयागाभिधानमनुदिनं कर्तव्यमिति ।

श्रीमद्वेंकटनाथेन सतामित्थं समर्थितम् ।
पावनं भगवद्भुक्तप्रापणादिनिषेवणम् ॥
शमितभवभयानां शङ्खचक्रादिचिह्नै-
र्दिविषदधिकभूम्नां दीव्यतामूर्ध्वपुण्ड्रैः ।
प्रचितगुणगणानां प्रापणप्राशनाद्यै-
रयमहमनघानामस्मि पात्रं दयायाः ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु सच्चरित्ररक्षायां भगवन्निवेदितोपयोगाधिकारस्तृतीयः । ग्रन्थश्च समाप्तः ।

The scribe adds:

संवत् १८९० आषाढवदि १२ शनिवासर २-३०. भद्र. ५५. शु. २२.

546

सच्चरित्ररक्षा

Post-colophon writing:

श्रीवत्सान्वयदुग्धाब्धिराकाचन्द्रस्य श्रीकृष्णसूरेः पुत्रेण भागवतदासेन श्रीनिवासवरदेन लिखितेयं सच्चरित्ररक्षा समग्रा ।

The former owner of the MS.:

हस्तिगिरि मुडुम्बै श्रीनिवासस्य सच्चरित्ररक्षा।

548

सत्ताविचारः

A discussion on the meaning of the term *sattā* (existence) from the Viśiṣṭādvaita point of view.

Beginning:

सत्यं ज्ञानमनन्तमित्यत्र सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माहेति भाष्यम्। सत्यशब्दस्य सच्छब्दपर्यायतया सत्तायोगिवाचित्वादुपाध्यनुक्तिबलेन निरुपाधिकसत्तायोगप्रतीतिरिति भावः। नन्वत्र सत्ता नाम किं वस्तुस्वरूपमात्रम्? उत परमार्थता? किं वा प्रमाणसंबन्धार्हत्वम्? अथवा विद्यमानत्वम्? नाद्यः, वस्तुस्वरूपस्य धर्मितया तत्र तद्वत्ताया अयोगात्। भावप्रधानतामाश्रित्य सत्तात्मकत्वमेवाभिधीयत इति यद्युच्यते, तदा सत्तायोगि ब्रह्माहेति वचनव्यक्तिर्न घटेत।

End:

ननु मुक्तानामपि स्वभावान्यथाभावप्रयुक्तबन्धकालीननामान्तरभाक्त्वसमानाधिकरणावस्थावत्त्वेनैव व्यावृत्तिसंभवेन ज्ञानपदेन मुक्तव्यावृत्तिप्रतिपादनपरभाष्यविरोध इति चेत्, न, भाविन एव नामान्तरभाक्त्वस्य तदुपयुक्तावस्थान्तरस्य च विवक्षितत्वेनादोषात्। ब्रह्मणस्तु स्वरूपस्वभावान्यथाभावयोः कदाचिदप्यसंभवेन तदन्तर्भावविरहो निर्विवाद इति नानुपपत्तिः।

549

सद्विद्याविजयः

This is the third book of the *Vedāntavijaya* dealing with the Sadvidyā taught in the sixth chapter of the *Chāndogyopaniṣad*, explaining that Brahman is qualified by the universe as an inseparable adjunct. It also points out the seven discrepancies in the Māyāvāda of the Advaitin-s.

Beginning:

वाधूलश्रीनिवासार्यतनयं विनयाधिकम्।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्॥
वेद्यता ब्रह्मविद्याभिर्हरेरिति निरूपितम्।
तेन तत्रैव जिज्ञासा सद्विद्यालक्ष्मशोधिनी॥

उक्तं भगवतः सर्वविद्यावेद्यत्वम्। अतः स एव जिज्ञास्यः। जिज्ञास्यलक्षणमुक्तम्—यतो वा इमानीति। तत्र च जगत्कारणत्वं लक्षणमभिसंहितम्। तच्च सद्विद्यया प्रतिपन्नम्। तत्र चोपाद्घातेन प्रथमखण्डेन पितृपुत्राख्याधिकया प्रतिपिपादयिषितार्थोऽवतार्यते। अनन्तरं स षड्भिः खण्डैः प्रतिपिपादयिषितार्थः प्रतिपाद्यते। अनन्तरं च नवभिः स एवार्थः स्थाप्यते।

End:

प्रतियोगिनः प्रागभावनिवृत्तिरूपत्वे प्रतियोगिध्वंसे सति प्रागभावोन्मज्जन

550

सद्विद्याविजयः

End:

यदुक्तं निवृत्तेरतिरिक्तभावविकारत्वाभावे चिरनिवृत्तेऽपि घटे निवर्तत इति व्यवहारप्रसङ्ग इति; तन्न; ध्वात्वर्थविशिष्टे कर्तरि धात्वर्थरूपफलोपहिते व्यापारे वा वर्तमानत्वाद्यन्वयादिति।

Colophon:

इति सद्विद्याविजयेऽविद्यानिवृत्तिभङ्गः

इति श्रीवाधूल्कुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये सद्विद्याविजयस्तृतीयः।

551

समासवादः

A treatise explaining the meaning of the compound word *brahmajijñāsā* found in the first Sūtra of the *Brahmasūtra-s* according to the *Śrutaprakāśikā* of Sudarśanācārya.

Beginning:

मुररिपुचरणसरोजे नत्वा स्तुत्वा च लक्ष्मणमुनीन्द्रम्।
तनुते समासवादं विशदं कुतुकादनन्तार्यः॥

इह तावदाद्यसूत्रघटकीभूतस्य ब्रह्मजिज्ञासेति समासस्य प्रतिपाद्यार्थो विशदीक्रियते। तत्र ब्रह्मजिज्ञासेतिसमासस्थले ब्रह्मपदस्य ब्रह्मविषयके लक्षणामभ्युपगम्य निर्वाहपक्ष एकः। लक्षणाया अभावेऽपि लुप्तषष्ठीविभक्तिस्मरणमभ्युपगम्य, विषयविषयिभावस्य संसर्गतया भानमभ्युपेत्य, समासे शक्तिमभ्युपेत्य वा निर्वाहपक्षास्त्रयः।

End:

पूर्वं सनर्थविशेष्यतापक्षं प्रतिपाद्य तदनन्तरं धात्वर्थविशेष्यतापक्षस्य प्रतिपादनेन प्रथमकल्प एव तेषां निर्भराङ्गीकारादिति सर्वमवदातम् ।

Colophon:

इति समासवादः ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

553

सामानाधिकरण्यवादः

A treatise discussing the nature and significance of the grammatical term *sāmānādhikaranya* as applicable to the scriptural passages, *tat tvam asi*, etc. The views of Advaitin-s are refuted.

Beginning:

श्रीमद्यादवभूधराङ्गणलसन्मन्दारमिन्दीवर-
श्रेणीकान्तिझरीपरीतवपुषं निध्याय नारायणम् ।
श्रीरामानुजसूचितश्रुतिशिखासिद्धान्तबद्धादरः
सामानाधिकरण्यसद्मनिकां ग्रथ्नात्यनन्तः सुधीः ॥

इह खलु, सर्वं खल्विदं ब्रह्म अयमात्मा ब्रह्म तत्त्वमसीत्यादिसमानाधिकरणपदघटितवाक्यार्थो विचार्यते । तत्पदप्रयोज्यविशेष्यताविशिष्टाभेदसंबन्धावच्छिन्नप्रकारताप्रयोजकत्वं तेन समं सामानाधिकरण्यम् । नीलमुत्पलमित्यादावुत्पलपदप्रयोज्यविशेष्यताविशिष्टप्रकारताप्रयोजकत्वात् नीलपदस्योत्पलपदेन सामानाधिकरण्योपपत्तिः ।

End:

अत एव टीकायां पर्यवसानवृत्तिरप्युपलक्षिता । नन्वेवं छन्दोऽभिधानादित्यत्रापि तच्छरीरकपरमात्मपरत्वेन मुख्यत्वसंभवात् गौणपरत्वाश्रयणं व्यर्थमिति चेत्; न; चतुष्पदा षड्विषेति चतुष्पात्त्वषड्विधत्वकीर्तनावैयर्थ्याय तत्सादृश्येन गौणवृत्तेरेव तत्राश्रयणादिति दिक् ।

Colophon:

इति सामानाधिकरण्यवादः

Post-colophon writing:

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

महितभूतपुरे वसतिं चिरं कृतवता शुभवत्सकुलेन्दुना ।
प्रथितभाष्यकृता लिखितो ह्ययं वितनुतां सुधियां मुदमुज्ज्वलः ॥

१८६० संवत्सरमु सेप्टम्बरु नेल २० वा तेदि

The following notes are found at the bottom of the last page:

टिप्पणी—संबोधनान्तपदप्रयोज्यविषयताव्यापकविषयताप्रयोजकत्वस्यैव युष्मच्छब्दे संबोधनान्तपदसमानार्थकत्वरूपत्वात् चेत्र त्वं पचसीत्यादौ चेत्र त्वत्पितेत्यादिसमासस्थले तत्त्वमसीत्यादौ चोक्तनियमनिर्वाहात् तत्प्रयोज्यविषयितासमनियतविषयताप्रयोजकत्वस्यैव तत्समानार्थकत्वरूपत्वे चैत्र त्वत्पितेत्यादिसमासस्थले तादृशनियमस्य व्यभिचारापत्तेः ।

555

सारनिष्कर्षटिप्पणी

A discussion on the meaning of the verse found in the beginning of the second chapter of Vedāntadeśika's *Rahasyatrayasāra*. The author supports the view of Maṇavālamāmuni regarding *kaivalyamukti*.

Beginning:

सारोक्तसारनिष्कर्षटिप्पणी रच्यते मया ।
वागाभरणमीमांसाभाष्यसिद्धाञ्जनात्मिका ॥

अथातस्तत्रभगवान् निगमान्तगुरुः सारनिष्कर्षाधिकारे पूर्वाधिकारप्रकृतं रहस्यत्रयस्य सकलनिगमान्तशब्दराशिसारतमत्वं प्रतिष्ठापयितुं तस्य रहस्यत्रयव्यतिरिक्तसर्ववेदान्तभागानामसारत्वादिसिद्धयधीनत्वेन प्रमाणमुखेन तदेतत् सर्वं व्यवस्थापयिष्यन् वक्ष्यमाणार्थं संगृह्णाति—

श्रुतिपथविपरीतं क्ष्वेलकल्पं श्रुतौ च
प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः ।
तदिह विबुधगुप्तं मृत्युभीता विचिन्व-
न्त्युपनिषदमृताब्धेरुत्तमं सारमार्याः ॥

इति । अत्रायं वक्ष्यमाणसंग्रहः—अलौकिकानां प्रत्यक्षाद्यपरिच्छेद्यत्वात् शब्दैकसमधिगम्यत्वं संप्रतिपन्नम् ।

End:

रहस्यत्रये सर्वांशावच्छेदेनाप्यत्यन्तसारात्मकत्वात् तत्र विवेचनीयासाराद्यंशो नास्तीति भावः । एवं रहस्यत्रयस्य भजनीयताप्रयोजकं सारतमत्वं साधितम् । अथ ततस्तदुपादेयतां निगमयति—आकैयालित्यादिना । स्पष्टोऽर्थ इति सर्वमवदातम् ।

Colophon:

श्रीश्रीनिवासदासेन श्रीभूतपुरवासिना ।
रचिता वर्धतामेषा सारनिष्कर्षटिप्पणी ॥

556

सिद्धान्तचन्द्रिका

A treatise in four chapters on Śrīvaiṣṇava religion supporting the practice of having the marks of Śaṅkha and Cakra branded on the arms, and refuting the criticisms of Bhāskaradīkṣita, son of Umāmaheśvara, in his *Taptamudrāvidrāvaṇa*.

Beginning:

प्रणामा मम गाहन्तां श्रीरङ्गगृहमेधिनम् ।
यन्मुदे स्युर्महात्मानश्चक्राङ्कनधरा भुवि ॥
पितामहमहं वन्दे परवस्त्वाख्यदेशिकम् ।
यत्सूक्तिकल्पलतिका पुमर्थान् प्रददात्यसौ ॥
आम्नायशिखराचार्यः कुदृष्टीन् मे जिगीषतः ।
जिह्वाभद्रासनमिदमारोहतु दयानिधिः ॥
न्यायरूपैः प्रहरणैर्भेत्स्यामि कुमतीन् परान् ।
अनुसृत्यागमान्तार्यसूक्तिं कामपि साधवः ॥

अत्र तावद्वक्ष्यमाणार्थोपयिकतया प्रथमं भगवच्छास्त्रस्य प्रमाणमूर्धन्यता प्रतिपाद्यते—भगवच्छास्त्रं च श्रुतिवत् प्रमाणम् । श्रुतिविरोधेऽपि विकल्पः, न स्मृत्यन्तरवद्बाध इत्यागमप्रामाण्यादौ सिद्धान्तितम् । तदुक्तं यामुनाचार्यपादैः आगमप्रामाण्ये—विरोधेऽपि विकल्पः स्याद्भगवच्छास्त्र-वेदयोरिति ।

End:

शार्ङ्गपाणिकृपालब्धविद्यावैशद्यशालिनः ।
वेदान्ताचार्यविदुषः कृतिरेषा विनिर्मला ॥
नृणामसूयाविलमानसानामेषा कृतिश्चित्तपदं न विन्देत् ।
तथाप्यदोषो विदुषां जनानां चित्तानि गृह्णन्ति कृतिं यदेनाम् ॥
अज्ञः क्काहं क्व च मम बलं स्थापने सत्पथस्य
क्कासौ धर्मः श्रुतिषु विहितो मोक्षमार्गैकहेतुः ।
सासूयानामपि न भविता श्रोतृभावो जनानां
वक्ता श्रोता निगमशिरसां देशिकः प्रीयतां मे ॥

Colophon:

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसंप्रदायप्रवर्तकपरवस्तुवेंकटेशदेशिक-सुकृतपरिपाकसर्वतन्त्रस्वतन्त्रमहावेदान्ताचार्यानुजश्रीमदादिवराहाचार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य कोनेट्यम्बागर्भसंभवस्य कुम्भघोणकृतनिवासस्य निजहृदयकमलविहरमाणवेदान्तदेशिकप्रेरितस्य तदेकदैवतस्य वेदान्ताचार्यस्य कृतिषु सिद्धान्तचन्द्रिकायां सुदर्शनधारणस्मृतिनिरूपणाख्यस्तुर्याधिकारः संपूर्णः ।

See for the first Adhikāra MG, R. 2194.

557

सिद्धान्तचिन्तामणिः

This work proves that Brahman is the material as well as the efficient cause of the universe and criticizes Madhva's view in this regard. The work is also called *Upādānatvasamarthana.*

Beginning:

ध्येयं सतां सर्वपदाभिधेयं मेयं श्रुतीनामपि भागधेयम् ।
सत्यक्तहेयं चिदचित्स्वकायं ब्रह्माद्वितीयं प्रणमाम्यमेयम् ॥
यतिपतिमानमामि निगमान्तगुरुं प्रणमा-
म्यहरहराश्रये मम पितामहमण्णगुरुम् ।
पितरमभिप्रणौमि मम भाष्यगुरून् कमला-
निलयमखीश्वरान् सकरुणान् शरणं कलये ॥
अग्रजचरणानुग्रहजाग्रदशेषप्रशस्तशास्त्रगतिः ।
वेदान्तस्य रहस्यं विदुषां प्रीत्यै प्रकाशये किंचित् ॥
सिद्धान्तचिन्तामनुभूय भूयः सैद्धान्तिकं वर्त्म न ये विदन्ति ।
सिद्धान्तचिन्तामणिमेनमादावादाय ते तत्त्वपदं विदन्तु ॥

End:

श्रीशैलान्वयमौलिमण्डनमणिः श्रीतातयार्याग्रणी-
र्लक्ष्माम्बा च सहाण्णयार्यमखिना प्रासूत यं सादरम् ।
तेन श्रीनिधिनामकेन विदुषा सिद्धान्तचिन्तामणिः
कल्पतो लुप्तपरोक्तयुक्तिनिकरो भूयात् सतां प्रीतये ॥

Colophon:

श्रीशठमर्षणकुलतिलकवेदान्तविद्यानिषद्यायितहृदयश्रीनिवासतातयार्यनन्दनेन लक्ष्माम्बागर्भशुक्तिमुक्ताफलेन कौण्डिन्यश्रीनिवासदीक्षितकटाक्षशिक्षितश्रीमद्भाष्यतत्त्वार्थेन निजाग्रजाण्णयार्य-

दीक्षितानुग्रहलब्धसद्बुद्धिना प्रतिदिनप्रबन्धनिर्माणधुरंधरेण श्रीनिवासार्येण विरचितं सिद्धान्त-चिन्तामणिर्नाम प्रकरणं समाप्तम् ।

558

सिद्धान्तचिन्तामणिः

Reads the following colophon:

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिष्ठयायितहृदयकमलश्रीतातयाचार्यनन्दनस्य लक्ष्माम्बागर्भशुक्तिमौक्तिकमणेः प्रतिदिनैकैकप्रबन्धनिर्माणकविताधुरंधरस्य भरतगान्धर्वकलानुबन्ध-बन्धुराष्टभाषाभूषितचतुर्विधकवितानिर्वहणशीलस्य पूर्वोत्तरमीमांसापारावारपारीणस्यान्वीक्षकी-व्याकरणशिक्षितमतेरण्णयाचार्यदीक्षितसहजन्मनः श्रीनिवासाचार्यस्य कृतौ दशप्रकरण्यां सिद्धान्त-चिन्तामणिर्नामोपादानत्वसमर्थनप्रकरणं समाप्तिमगात् ।

561

सिद्धान्तन्यायचन्द्रिका

This is on the same subject as the above. The work is called *Candrikā-khaṇḍana* in this MS. The author Devarāja was the pupil of Varadarāja. Another work of his is *Bimbatattvaprakāśikā* (MG, D. 4936).

Beginning:

नमस्ते भव्यरूपाय कल्याणगुणसिन्धवे ।
मम सर्वस्वभूताय विनताभाग्यराशये ॥
कर्मब्रह्मात्मकं शास्त्रं येन संरक्षितं कलौ ।
तं देशिकवरं मूर्ध्ना प्रणमामि पुनः पुनः ॥
वरदार्यगुरोर्लब्धवेदान्तज्ञानसंपदा ।
रच्यते देवराजेन सिद्धान्तन्यायचन्द्रिका ॥
श्रुतिस्मृतीः सूत्रवचांसि चापि यस्त्वेककण्ठानि समाततान ।
अर्थद्वयं तद्विवृणोतु कामं स भाष्यकृन्मे परमार्थवेदी ॥

तत्रभगवद्भाष्यकारैः सदेव सोम्येदमग्र आसीत् तत्त्वमसीत्यादौ श्रूयमाणं सामानाधिकरण्य-मुपादानोपादेयभावेन शरीरात्मभावेन च निर्व्यूढम् । तदुभयमपि न संभवतीति मध्वभिक्षुभिः प्रति-पादितम् । ते खल्वेवमाहुः—त्वत्सिद्धान्ते उपादानादतिरिक्तमुपादेयद्रव्यं नास्तीत्यङ्गीकारात् ब्रह्मणो वियदादिजगदुपादानत्वे तस्य वियदादिद्रव्याभेदप्रसङ्गः । न हि त्वत्सिद्धान्ते ब्रह्मस्वरूपस्य वियदादि-द्रव्यस्वरूपैक्यमङ्गीकृतम्; तयोर्विरुद्धधर्माश्रयत्वेन भेदस्यैवाङ्गीकारात् ।

End:

अपिच तव मते सर्वाण्यप्येतदधिकरणसूत्राणि मुख्यार्थत्यागादिरूपदोषग्रस्तानि भवेयुः। तत्र तावत् प्रकृतिश्चेति प्रकृतिपदस्यार्थानुशासनरूपस्य प्रधानाद्यर्थवाचकत्वेन शब्दपरत्वे मुख्यार्थत्यागः स्यात्। स्त्रीलिङ्गादीत्यादिपदान्तरोपलक्षकत्वकल्पनं च तवातिक्लिष्टम्। स्वायत्ते शब्दप्रयोग इति न्यायेन प्रकृत्यादिश्चेत्येव

562

सिद्धान्तरत्नावलिः

An original treatise in four chapters explaining the principles of Viśiṣṭādvaita Vedānta.

Beginning:

वज्रध्वजाङ्कुशरथाङ्गसरोजमुख्य-
साम्राज्यचिह्नलसिते निजहस्तपद्मे।
अध्यक्षयन् जगदधीशतामभीति-
मुद्राञ्चिते दिशतु रङ्गपतिर्मुदं नः॥
चूडालंकृतिविभ्रमं कलयते वाणी पुराणी यथा
भोग्यत्वं विबुधव्रजस्य भजति श्रीरङ्गचन्द्रो यतः।
आलोको नचिरेण मन्थरतरं यस्या निरुन्धे तमः
सा मे चन्द्रकला तनोतु कुतुकं श्रीरङ्गशृङ्गारिणी॥
श्रुतिशिखररहस्यव्याक्रियाकर्मनर्म
प्रविमलशशिबिम्बस्निग्धदिव्याङ्गकान्ति।
अखिलचिदचिदन्तर्यामि वेदैकवेद्यं
हयवदनमुदारं ब्रह्म मे संनिधत्ताम्॥
पराङ्कुशपदाम्भोजद्वन्द्वं मनसि भावये।
धत्ते यत् सुमनःश्रैष्ठ्यमपि भावयतां सताम्॥
अमृतप्रदो जगद्गुरुरामन्य मुदा वृषाद्रिगृहमेधी।
तातेत्यमृतं यस्मादर्थितवान् स गुरुचन्द्रमा जयति॥
अष्टमूर्तिमहिमाप्यणुरेव श्रीसखस्य महिमानमपेक्ष्य।
इत्यदः प्रकटयन् हृदये स्ताद्व्याक्रियाञ्चितकरेण यतीन्द्रः॥
शमितकुमतिचारः शौरिधण्टावतारः
कलिविमथनशूरः कामकोपादिदूरः।
अवतु जगदुदारोऽनन्तसूरेः कुमारः
प्रणतसुकृतसारः प्रौढविद्याविहारः॥

भाति स्मेरयशोविभाधवलितत्रैलोक्यविद्वत्सभा-
लंकारार्हविशुद्धवृत्तगुरुराण्मुक्ताफलोत्पत्तिभूः ।
विख्यातो भुवि बुक्कपट्टणमहावंशः क्षमालंकृतिः
श्लाघाखर्वसुपर्वनन्दितलसच्छाखाकृताभ्युन्नतिः ॥
तत्राभूत् कथकेन्द्रसिन्धुरघटाकण्ठीरवप्रक्रिया-
विख्याताण्णयदेशिकेन्द्रविलसद्गर्भाब्धिशीतद्युतिः ।
श्रीशैलान्वयमौलिमण्डनमणिर्यः कुण्डलिग्रामणी-
वाचस्पत्यभिनन्दनीयभणितिः श्रीतातयार्याग्रणीः ॥
तत्सूनुः पदवाक्यमानपदवीतत्त्वार्थसर्वस्ववित्
श्रीमद्वेंकटदेशिकोक्तनिगमश्रेणीशिखार्थस्थितिः ।
कुर्वे भागवताग्रगण्यहृदयालंकारसंधायिनीं
तत्कारुण्यबलेन वेंकटसुधीः सिद्धान्तरत्नावलीम् ॥

इह खलु भगवान् बादरायणः परमकारुणिकः परमपुरुषार्थिजनानुजिघृक्षया मानान्तरागोचरं वेदान्तैकवेद्यं परं ब्रह्म जन्माद्यस्य यत इति सूत्रेण यतो वा इमानीत्यादिश्रुत्यर्थाविष्करणमुखेन निर्धारयांचकार जगत्कारणं ब्रह्मेति ।

Colophon at the end of the 1st chapter (fo. 261):

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिषद्यायितहृदयकमलश्रीतातयाचार्यनन्दनस्य हयवदनकरुणाकटाक्षवीक्षालब्धपदवाक्यप्रमाणसारस्य श्रीमन्निगमशिखरगुरुचरणसरसीरुहचञ्चरीकायमाणमानसस्य श्रीवेंकटदेशिकपादसेवासमधिगतश्रीमच्छारीरकमीमांसाभाष्यहृदयस्य वेंकटाचार्यस्य कृतिषु सिद्धान्तरत्नावल्यां प्रथमः परिच्छेदः समाप्तः ।

End:

अतः परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्यत्र निर्दिष्टं परं ज्योतिः श्रीमान् नारायण इति सिध्यतीति दिक् । एवं प्रश्नोपनिषदपि भगवतो मुक्तप्राप्यत्वमाविष्करोति ।

564

सिद्धान्तसंग्रहः

A summary in 512 verses of the main principles of Viśiṣṭādvaita. The author Śrīśailadeśika was the son of Śrīraṅgarāja of Tiruvaraṅgam Āṇḍān family. This author may be identified with the father of Śrīnivāsācārya, the author of *Sahasrakiraṇī* (No. 516 above).

Beginning:

श्रीभाष्यकारसिद्धान्तरत्नाकरसुधांशवे ।
नमो वेदान्तगुरवे दुर्मतध्वान्तभानवे ॥ १ ॥
श्रीमत्सर्वार्थसिध्यादिप्रबन्धेषु प्रपञ्चितः ।
संगृह्यतेऽत्र सिद्धान्तः प्रसादाय विपश्चिताम् ॥ २ ॥
द्रव्याद्रव्यप्रभेदेन द्विधा तत्त्वमुदीरितम् ।
तत्र द्रव्यमवस्थावदन्यदद्रव्यमुच्यते ॥ ३ ॥
आगन्तुरपृथक्सिद्धो धर्मोऽवस्थेति कीर्त्यते ।
मूर्ते चलति संयोगाद्ब्रह्मणो लक्षणान्वयः ॥ ४ ॥
अचिज्जीवस्वधीद्वारा स्वरूपेण च सर्वगे ।
अवस्थाः सन्त्यदोषास्ते निर्विकारोक्तिरन्यतः ॥ ५ ॥
जडाजडविभेदेन द्रव्यं द्विविधमुच्यते ।
जडमस्वप्रकाशं स्यादजडं स्वप्रकाशकम् ॥ ६ ॥
अव्यक्तकालभेदेन जडद्रव्यं द्विधोदितम् ।
चतुर्विंशतिधाव्यक्तं महत्त्वाद्यैर्विभिद्यते ॥ ७ ॥

End:

त्रिविधानां चेतनानां साधर्म्ये श्रीशदासता ।
परिपूर्णो ब्रह्मभोगः साधर्म्ये नित्यमुक्तयोः ॥ ५०४ ॥
साधर्म्यं दिव्यदंपत्योर्नैरुपाधिकशोभिता ।
एतदेव च वैधर्म्यमितरेभ्यो विभाव्यते ॥ ५०५ ॥
सर्वप्रकारं ब्रह्मैव तत्त्वमेकं निरूपितम् ।
ईशेशितव्यभेदेन द्विधाप्येतत् समीरितम् ॥ ५०६ ॥
भोक्तृभोग्यनियन्तृत्वभेदेन त्रिविधं तथा ।
प्राप्यप्राप्तृप्राप्त्युपायतत्फलानि विरोधिना ॥ ५०७ ॥
अर्थाः पञ्चैव विज्ञेया मुमुक्षुभिरिति क्रमात् ।
धीविकासाय गुरुभिर्वर्णिता तत्त्वपद्धतिः ॥ ५०८ ॥
तथाप्युक्तेषु तत्त्वेषु न्यूनताधिकतापि वा ।
न संमतेति भगवन्निगमान्तगुरोर्मतम् ॥ ५०९ ॥
न्यायसिद्धाञ्जनन्यायपरिशुध्यादिषु स्फुटम् ।
यथोक्तमखिलं ज्ञेयं विद्वद्वेदेशिकशिक्षितैः ॥ ५१० ॥
विदुषां परितोषाय कृतः सिद्धान्तसंग्रहः ।
प्रामादिकापराधं तु क्षन्तुमर्हन्ति साधवः ॥ ५११ ॥
जयति यतिसार्वभौमः स जयति वेदान्तदेशिकः श्रीमान् ।

तदुभयहृदयतत्त्वप्रवचनधुर्या जयन्ति भुवि सन्तः ॥ ५१२ ॥

Colophon:

इति श्रीभगवद्रामानुजमतभूषणमाडपूशितिरुवरंगमाण्डान्तिरुमलैश्रीरङ्गराजमहादेशिकतनूजेन तदेकदैवतेन तत्प्रसादलब्धवाजपेयाद्यनेकक्रतुधन्यतावता श्रीशैलाचार्यदासेन विरचितः सिद्धान्तसंग्रहः संपूर्णः।

565

सिद्धान्तसिद्धाञ्जनम्

This work proves that the Tamil *Tiruvāymozhi* of Śaṭhakopa and the *Brahmasūtra-s* of Bādarāyaṇa teach the same truths and principles of the Viśiṣṭādvaita school and that the order in which the subjects are dealt with is also the same in both these works. Śrī Vedāntadeśika's works, including the *Dramiḍopaniṣattātparyaratnāvali*, have been quoted. The author's name is not known. The work contains the following five chapters: Maṅgalāñjana, Paratattvāñjana, Nyāyaratnāñjana, Sārāñjana and Sarvāñjana. It is different from Anantācārya's work of the same title.

Beginning:

स्वयं व्यक्ते रङ्गधाम्नि तल्पे वातूलतूलके।
प्रादुर्भूतौ प्रपद्येऽहं दंपती जगतां पती ॥
भूयाद्देवे शठरिपौ भाष्यकारे च तारके।
शेमुषी भक्तिपर्याया भूयसे मङ्गलाय नः ॥
कृष्णपादपदाम्भोजप्रणामादिप्रभावतः।
द्रमिडोपनिषद्भावो वाग्विधेयो ममाप्यभूत् ॥
क्रमः शारीरकार्थानां द्रमिडोपनिषत्स्वपि।
यदुपज्ञमभूत् ख्यातस्तं वेदान्तगुरुं भजे ॥
द्रमिडोपनिषत् पुण्या प्रादुरासीत् पराङ्कुशात्।
शारीरकं सविषयमत्युज्ज्वलमभूद्यया ॥

यथोक्तम्—

पुरा शोकः श्लोकोऽभवदिति नयादित्युपनिष-
न्मुनेः पुण्यश्लोकादजनि परभक्तेः परिणतिः।

इति।

भाषागीतिः प्रशस्ता भगवति वचनाद्राजवच्चोपचारात्
सा चागस्त्यप्रसूता त्विति परिजगृहे भूमिकाभेदयोग्या।

यत्तत् कृत्यं श्रुतीनां मुनिगणविहितैः सेतिहासैः पुराणै-
स्तत्रासौ सत्त्वसीम्नः शठमथनमुनेः संहितासार्वभौमी ॥

इति च ।

त्रैविद्यवृद्धसिद्धान्तं त्रय्यन्तगुरुरक्षितम् ।
द्रष्टुकामाय कुरुते सिद्धाञ्जनमयं जनः ॥
पञ्चकृत्वोऽञ्जनं धार्यं दीक्षायामिति दर्शनात् ।
पञ्चाञ्जनानि विदधे तथात्रापि भवन्त्विति ॥
मङ्गलाञ्जनमत्राद्यं परतत्त्वाञ्जनं ततः ।
न्यायरत्नाञ्जनं पश्चात् ततः साराञ्जनं भवेत् ॥
सर्वाञ्जनं तु चरममञ्जनानामयं क्रमः ।
प्रेक्षावतां प्रवृत्त्यर्थं विषयं च प्रयोजनम् ।
प्रदर्शयन् प्रबन्धादौ मङ्गलं चाचरत्यृषिः ॥

End:

श्रीदीर्घताण्डकस्याद्यगाथायां प्रभुणा स्वयम् ।
कृतानामुपकाराणां स्मरन्निरविशन्मुनिः ॥

अन्ये तु—

विश्वतः परमं नित्यं विश्वं नारायणं हरिम् ।
इति विश्वस्य विष्णोश्च भेदाभेदोभयश्रुतेः ॥
अंशांशिभावपरतां मुनिराहाद्यगाथया ।
अतोऽहिकुण्डलन्यायं विवृणोतीति चोचिरे ॥
पूर्वोत्तरग्रन्थवशादेवं व्याख्यातिशोभते ।
द्विलिङ्गाधिकृतेः सारं ह्याह श्रीखर्वताण्डके ।
तदुत्तराधिकरणसारमत्रेति संगतम् ॥

अत एव हि—

नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा ।
स ब्रह्मेत्यादिवाक्यानि व्याख्यात्युत्तरगाथया ।
करोति लिङ्गभूयस्त्वन्यायाच्चोपास्यनिर्णयम् ॥

566

The work contains three chapters: Ātmasiddhi, Īśvarasiddhi and Saṃvitsiddhi. The author was the son of Īśvaramuni and grandson of

Nāthamuni. His other works are: *Āgamaprāmāṇya*, *Puruṣanirṇaya*, *Gītārthasaṃgraha*, *Stotraratna* and *Catuḥślokī*.

567

सिद्धोपायसुदर्शनम्

The work explains that Lord Nārāyaṇa is the principal means of obtaining Mokṣa. The author Śrīnivāsadāsa was the pupil of Vādhūla Mahācārya.

Beginning:

शरणागतियाथात्म्यनिधिरोधिग्रहायिताः ।
कुदृष्टीः कुदृशां हन्यात् सिद्धोपायसुदर्शनम् ॥

तत्र तावत् निवासः शरणं सुहृत्, गतिर्नारायणः, अमृतस्यैव सेतुः, सुरेशः शरणं शर्म, धर्मो धर्मविदुत्तमः, इत्यादिभिः श्रियःपतेः मोक्षोपायत्वमुक्तम् । न चेदमुपायत्वं सोपाधिकम् ; कृष्णं धर्मं सनातनम्, स हि धर्मः सनातनः, उपायोपेयत्वे तदिह तव तत्त्वम्, इति स्वरूपान्तर्गतत्वावगमात् ।

Colophon (p. 28):

इति श्रीमद्वाधूलकुलतिलकमहाचार्यचरणयुगलभावितेन श्रीनिवासदासेन विरचिते सिद्धोपाय-सुदर्शने सिद्धोपायथाथात्म्याविर्भावः प्रथमः ।

End:

तद्वस्तु किमित्यपेक्षायां येनाश्रुतं श्रुतं भवति, सर्वं खल्विदं ब्रह्म तज्जलानित्यादिभिः सकल-जगत्कारणभूतसूक्ष्मचिदचिद्विशिष्टब्रह्मण एव तथात्वावगमेन

568

सुदर्शनमीमांसा

A tract supporting the practice of branding the marks of Sudarśana and Śaṅkha on the arms. This is apparently a reply to the criticisms made by Appayadīkṣita, Bhāskaradīkṣita, etc. Pāñcarātra works are quoted.

Beginning:

विष्णोश्चक्रमहं वन्दे विद्वज्जनविभूषणम् ।
विदारयति यन्नित्यं वैदिकानां विरोधिनः ॥

तप्तचक्रादिमुद्राणां धार्यत्वं ब्राह्मणादिभिः ।
श्रुतिस्मृतिसदाचारसिद्धं संदर्शयाम्यहम् ॥
सन्तः सन्मार्गनिरताः सत्त्वोन्मीलितचक्षुषः ।
पश्यन्त्वमत्सरधियः प्रामाणिकमिदं परम् ।
श्रुतिस्मृतिसदाचाराः प्रमाणं धर्मनिर्णये ॥

यथाह मनुः—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

इति ।

End:

तस्मात् सर्वप्रकारेणापि तस्य मनोरथावाप्तिः न स्यादेव । अनाकर्णितानि चेत् तान्यवहित-मनसा श्रोतव्यान्येव । तेषु श्रुतेषु सामान्यधर्मत्वेन श्रुतिविहितमिदं सर्वैर्वेदिकैर्यथाविधि कर्तव्य-मेवेत्ययमर्थो ज्ञात एव ।

प्रामाण्यादि परीक्ष्यैतान्यार्जवं नयवेदिनः ।
विधिवद्येऽनुतिष्ठन्ति सन्तो नित्यं जयन्तु ते ॥
इममर्थं समुद्दिश्य यद्यच्चोद्यमुदेष्यति ।
तत्र तत्रोत्तरं सम्यगत्रास्त्येवावलोक्यताम् ॥

569

A critical study trying to prove that Pūrvamīmāṃsā is not opposed to Uttaramīmāṃsā as supposed by some of the later philosophers. It is said that Jaimini was in favour of accepting the universal Lord Īśvara and that the science of Mīmāṃsā is divided into two parts, Pūrva and Uttara, which are in harmony with each other.

570

स्वरूपज्ञानादिनिरूपणम्

The work explains what a devotee should know about himself, libera-tion, the means of liberation, etc.

Beginning:

भगवच्चरणारविन्दे एव रक्षके इति स्थितवद्भिरस्मदाचार्यैरनुसंधीयमानाः द्विचतुरर्थाः सन्ति । ते क इत्यपेक्षायाम्—स्वरूपज्ञानम्, स्वरूपयाथात्म्यज्ञानम्, विरोधिज्ञानम्, विरोधियाथात्म्य-ज्ञानम्, फलज्ञानम्, फलयाथात्म्यज्ञानम्, उपायज्ञानम्, उपाययाथात्म्यज्ञानं चेति ।

End:

भोक्तृत्वे कर्तृत्वरहिता वयं तस्मै दास्यं करवामेति। तन्निवृत्तिश्च स्वीयकरेण शिरोरुह-विभागकरणमिव। कैंकर्यकरः अहमुपकारमकरवमिति यथा न जानाति, तथावयवभूतमात्मानमवय-विनमीश्वरं शेषिभूतं ज्ञातवानिति स्थितिः।

571

स्वरूपानुपपत्तिः

An attempt to prove that the very existence of Avidyā cannot be maintained by Advaitin-s.

Beginning:

किंच अविद्या सत्या? असत्या वा? नाद्यः; भेदवादापत्तेः। न द्वितीयः; असत्यत्वे दोषमूलत्वस्य प्रयोजकत्वात् दोषान्तरापेक्षायामनवस्थाप्रसङ्गात्। न चाविद्यायाः स्वसिद्धौ दोषान्तरा-पेक्षा नास्तीति वाच्यम्; अविद्यावत् प्रपञ्चस्यापि स्वसिद्धौ दोषनैरपेक्ष्यकल्पनायामविद्याकल्पन-वैयर्थ्यात्; निर्दोषत्वेनाविद्यायाः सत्यत्वप्रसङ्गाच्च।

End:

किंच न ह्यविद्यायाः पारमार्थिकत्वं सुवचम्; ज्ञाननिवर्त्यत्वानुपपत्तेः, भेदवादप्रसङ्गाच्च। नाप्यपारमार्थिकत्वम्; भ्रमोपादानत्वानुपपत्तेः। तस्मादविद्यास्वरूपमपि दुर्निरूपम्।

Colophon:

इति स्वरूपानुपपत्तिः।

572

Ānandatīrtha, (A.D. 1240) the founder of the Dvaita school, is said to have written 37 works collectively known as *Sarvamūla*. For details see *HIP*, vol. IV, pp. 54 ff. and *HDV*, vol. I, pp. 101 ff.

577

Jayatīrtha, (A.D. 1368) popularly known as Ṭīkākāra, was a pupil of Akṣobhyatīrtha and Padmanābhatīrtha. He wrote commentaries on almost all the important works of Madhva and also two independent works: *Pramāṇapaddhati* and *Vādāvalī*. For details see *HIP*, vol. IV, p. 94 and *HDV*, vol. I, pp. 322 ff.

580

This commentary is also called *Candrikā*. The commentator Vyāsatīrtha or Vyāsayati (A.D. 1539) was the pupil of Brahmaṇyatīrtha. He was the founder of the Vyāsarāyamaṭha and was patronized by Kṛṣṇadevarāya of Vijayanagar (16th cent. A.D.). For details see *HDV*, vol. II, pp. 24 ff.

582

तत्त्वप्रकाशिकाव्याख्या वाक्यार्थतत्त्वमञ्जरी

This commentator Śarkarā Śrīnivāsācārya (A.D. 1600), disciple of Yadupatyācārya (see *HDV*, vol. II, p. 295), is different from Tāmraparṇi Śrīnivāsācārya who also has written a commentary on the same text (see No. 584 below).

Beginning:

अध्यात्मेति। आत्मानं देहमधिकृत्य वर्तमानमिन्द्रियादीत्यर्थः। अन्तिमत्त्वादिति। तस्या-संनिहितत्वेन प्रथमं विचारविषयत्वेन तद्विचारः चतुर्थपाद इति भावः। उक्तेति। जगत्कारणत्वा-

दीत्यर्थः। अभ्युपगतार्थद्वय इति। श्रुत्यर्थत्वेनाभ्युपगते परापरार्थद्वयेऽन्यतरार्थे जगति श्रुतिप्रामाण्य-प्राप्तौ अन्यथा ब्रह्मणो जगत्कारणत्वादौ अनाश्वासप्रसङ्गादित्यर्थः।

End:

सामान्यत इति। कर्तृत्वकारणत्वविशेषं विहायेत्यर्थः। कारणत्वमात्रं तु कर्मणः फलं प्रति कारणत्वेऽप्युपपन्नमिति भावः। तत्सत्ता कर्मसत्ता।

Colophon:

इति श्रीमत्तत्त्वप्रकाशिकावाक्यार्थतत्वमञ्जर्यां शर्कराश्रीनिवासविरचितायां द्वितीयाध्यायस्य द्वितीयः पादः।

583

तत्त्वप्रकाशिकाव्याख्या वाक्यार्थतत्त्वमञ्जरी

Beginning:

विनाभ्य कर्मनिचयमुत्क्रम्यार्चिर्मुखात् पथः।
प्राप्तेभ्यो ह्यात्मनिकटं नमः स्वानन्ददायिने॥

फलनिरूपणस्येदानीं का संगङ्गतिरित्याह—विरक्त्यादीति।

End:

संपूर्णगुणनिर्दोषरूपिणे मुक्तिदायिने।
वेदगम्याय रामाय नमः श्रीपतये सदा॥
तत्त्वप्रकाशिकाव्याख्यां वाक्यार्थमणिमञ्जरीम्।
प्रीयतां हृदये धृत्वा सदये मध्ववल्लभः॥
तत्त्वप्रकाशिकाव्याख्यालब्धपुण्यमनुत्तमम्।
प्राप्यास्मद्गुरवः प्रीताः क्रियासुः करुणां मयि॥

Colophon:

इति श्रीतत्त्वप्रकाशिकावाक्यार्थतत्त्वमञ्जर्यां शर्कराश्रीनिवासकृतायां चतुर्थाध्यायस्य चतुर्थः पादः।

584

तत्त्वप्रकाशिकाव्याख्या वाक्यार्थमुक्तावलिः

This commentator, Tāmraparṇi Śrīnivāsācārya, was the son of Viṭṭhalācārya and pupil of Tīrthācārya.

Beginning:

वैराग्यदृढया भक्त्या समुपास्यैव यत्पदम् ।
ज्ञेयं गुरूक्तमार्गेण तमुपासे श्रियः पतिम् ॥

एतदध्यायप्रतिपाद्यमिति । समन्वयाविरोधाभ्यां ब्रह्मस्वरूपस्य निरूपितत्वात् किमनेनाध्यायेनेत्यत इति पूरणीयम् । साधनविचारस्य कस्मिन् शास्त्रे संगतिः । संगतौ विध्यविरोधानन्तर्ये किं निमित्तम् ? आदिसूत्रार्थविचारणात्मकत्वात् एतत्सूत्रस्यादिसूत्रे निखिलगुणपूर्णस्य निर्दोषस्य ब्रह्मणो वैराग्यादिसाधनज्ञेयत्वमाहात्म्यस्योक्तत्वात् अन्तर्भावलक्षणा संगतिः ।

Colophon on fo. 27a:

इति श्रीमद्विट्ठलाचार्यतनूजेन श्रीतीर्थाचार्यचरणसेविना श्रीनिवासेन रचितायां तत्त्वप्रकाशिकावाक्यार्थमुक्तावल्यां तृतीयाध्यायस्य प्रथमः पादः ।

End:

श्रौतो न स्यादिति बाधकोपन्यासाय प्रतिषेधादित्यस्य प्रवृत्तत्वादिति भावेन । अतो हि श्रुतिः प्रतिषेधति नेदं यदिदमुपासत इति न्यायविवरणं मनसि निधायाह—निर्दोषदोषरूपिणोरिति । पश्यन्ति । परमं ब्रह्मेति भाष्यस्यायमर्थः ।

585

For details of the author and his works see *HDV*, vol. II, pp. 254 ff. and also introduction to *Bhāvabodha*, MGOS 142.

588

The commentator was the pupil of Sudhīndrayati, the pupil of Vijayīndratīrtha who was the pupil of Surendratīrtha. It is well known that Vijayīndratīrtha was a contemporary of Appayadīkṣita, Kumbhakonam Tātācārya and Vādhūla Mahācārya alias Doḍḍayācārya. Therefore, Rāghavendrayati must have lived about A.D. 1620. More particulars can be had from *HDV*, vol. II, pp. 274 ff.

591

तत्त्वप्रकाशिकाव्याख्या तत्त्वमञ्जरी

The commentator Anantācārya was the son and pupil of Nṛsiṃha. His other works are *Nyāyakalpalatāvyākhyā Nyāyadīpa* and *Pramāṇapaddhativyākhyā Paddhatiprakāśikā.*

Beginning:

अनन्तदोषविधुरं कल्याणगुणविग्रहम् ।
नारायणं सदा वन्दे निःसंख्यगुणवारिधिम् ॥
मिथ्याज्ञानतमोभानुं वितुलं कमलापतिम् ।
वेदव्यासं हयग्रीवं नरसिंहं नतोऽस्म्यहम् ॥
आनन्दतीर्थभगवत्पादपद्मं नमाम्यहम् ।
यत्राशेषशिवेन्द्राद्या अमरा भ्रमरायिताः ॥
श्रीमदानन्दतीर्थीयं याचे तन्त्रार्थनामकम् ।
शास्त्रमस्मात् सदा वन्द्यः करुणाम्बुधिरङ्गसा ॥
श्रीपद्मनाभार्यमुखान् विष्णुतीर्थान् यतीनपि ।
त्रिविक्रमार्यवर्याद्यान् माध्वीयान् गृहिणो भजे ॥
आनन्दतीर्थभगवत्पादीयं शास्त्रमद्भुतम् ।
व्याकृतं यैर्जयार्थेभ्यो भवेत् तेभ्यो नमस्कृतिः ॥
येऽध्यापयित्वा वेदांश्च मध्वसिद्धान्तमादिशन् ।
नरसिंहार्यवर्यांस्तान् भूयो भूयो नमाम्यहम् ॥
येषां मुखाम्बुजाच्छ्रुत्वा यतयो गृहिणस्तथा ।
अनेकसंख्यकाश्चक्रुर्मध्वशास्त्रं नमामि तान् ॥
आनन्दतीर्थभगवत्पादशास्त्रामृतार्णवे ।
विहरन्तो नृसिंहार्याः प्रीयन्तां गुरवो मम ॥
सर्वतन्त्रस्वतन्त्राणां गुरूणां करुणाबलात् ।
तत्त्वप्रकाशिकात्यन्तगूढवाक्यार्थ उच्यते ॥

End:

श्रीमन्नृसिंहार्यवराभिधानचतुर्थपुत्रेण सतत्त्वमञ्जरी ।
कृता ह्यनन्ताभिधया युतेन प्रीत्यै हरेर्मध्वमुनेर्गुरोश्च ॥
संशयाज्ञानमोहादि यत्सङ्गान्नश्यति स्वयम् ।
तेषां गुरूणां सत्सङ्गः कालेऽनन्तेऽपि मे भवेत् ॥

Colophon:

इति श्रीमन्नृसिंहार्यवर्यसुतेनानन्ताख्येन कृतायां तत्त्वमञ्जर्यां चतुर्थाध्यायस्य चतुर्थः पादः ।
अयं ग्रन्थः परिपूर्णः ।

592

ब्रह्मसूत्रभाष्यव्याख्या भाष्यार्थमञ्जरी

Beginning:

लक्ष्मीनारायणं व्यासं पूर्णबोधं च भारतीम् ।
जयराजं व्यासतीर्थं रघुनाथगुरुं भजे ॥

टीकाकारोक्तमार्गेण स्वगुरूक्तानुसारतः ।
क्रियते तत्प्रसादेन सूत्रभाष्यार्थमञ्जरी ॥
स्ववाक्यानि प्रमाणानि भाष्यगान्यखिलान्यपि ।
सूत्रार्थत्वेन नीयन्ते योगादिबलतो मया ॥
टीकोक्तार्थानुवादेन तदनुक्तार्थपूर्वकम् ।
उपयुक्तं किंचिदेव न चोद्ग्रन्थं बहूच्यते ॥
उत्सूत्रं सूत्रभाष्ये हि परेण यदुदीरितम् ।
परिहाराय तस्याथ सफलोऽयं श्रमो मम ॥

अथ यथावत् सूत्रभावानभिज्ञैरन्यैरन्यथा व्याख्यातानि ब्रह्मसूत्राणि यथावद्व्याचिख्यासुर्भगवानानन्दतीर्थमुनिः स्वयमन्तरायविधुरोऽपि प्रारिप्सितभाष्यस्य कैवल्याद्यखिलफलसाधनतासिद्धयर्थं निर्विघ्नपरिसमाप्त्यादिप्रयोजनवत्तयावस्थितं शिष्टाचारपरंपराप्राप्तं विशिष्टाधिकृतेष्टदेवतास्तुतिरूपं मङ्गलं कृतं शिष्याननुग्राहयितुं सूत्रप्रतिपाद्यगुणविशिष्टतया नारायणनमनादिकं कुर्वन्नेव ग्रन्थनामापि सूचयन् चिकीर्षितं प्रतिजानीते—नारायणमिति ।

Colophon (on fo. 79):

इति श्रीमद्ब्रह्मसूत्रभाष्यार्थमञ्जर्यां वेदगर्भनारायणप्रतिनाम्ना पुट्टाचार्येण विरचितायां प्रथमाध्यायस्य प्रथमः पादः ।

End:

स्थानेति । स्थानादिव्यपदेशात् च इति विभागः । किंच चक्षुरन्तःस्थो विष्णुरेव कुत इति चेत्, स्थानादिव्यपदेशात् । अत्र स्थान

593

ब्रह्मसूत्रभाष्यव्याख्या भाष्यार्थमञ्जरी

Beginning:

वेदान्तश्रान्तमनसा ध्यातं यन्मुनिभिः पदम् ।
दिदृक्षुभिः स्नेहवशाद्वन्दे तद् ब्रह्म शाश्वतम् ॥

पूर्वोत्तराध्यायभेदसिद्धयर्थं स्वस्मिन्नेकवाक्यतासिद्धयर्थं चैतदध्यायार्थप्रतिपाद्यमाह—साधनेति । अथातो ब्रह्मजिज्ञासेति प्रथमसूत्रे संक्षेपेण शास्त्रार्थे सूचिते, तत्र किं तदिति जिज्ञासायां द्वितीयसूत्रेण ब्रह्मस्वरूपं निगदितम् । तत्र च प्रमाणाकाङ्क्षायां सकलवेदादि शास्त्रं प्रमाणीकृतं तृतीयसूत्रेण । तत् कथमित्यपेक्षायामध्यायशेषेण समर्थितम् । तत्र विरोधाश्च द्वितीयाध्यायेन परिहृताः । तथाच समन्वयाविरोधाभ्यां ब्रह्मरूपवस्तुनिर्णये संजाते मुमुक्षुणा मया किं कार्यमित्यपेक्षायामथ-ब्रह्मजिज्ञासापदाभ्यामध्ययनानन्तरं श्रवणमननिदिध्यासनरूपजिज्ञासादिमोक्षसाधनानि विहितानि । तेषां साधनानां विचारोऽत्र वर्तिष्यत इत्यनेन साधनान्यत्र विचार्यन्त इत्यर्थ उक्तो भवति ।

End:

तदेवं विरक्तिभक्त्युपास्तिजनितभगवत्साक्षात्कारार्थिनामशेषगुणपूर्णवत्तया निरस्ताशेषदोषतया भगवान् नारायणो जिज्ञास्य इत्यशेषमतिचतुरश्रतयातिमङ्गलम् ।

अगाधबोधैर्विततातिभाव्यभाष्यानुवादेन न मेऽस्ति दोषः ।
न हीन्दिराध्यपदो मुकुन्दो दूर्वाङ्कुरैर्मन्दधनैरपूज्यः ॥
टीकासूत्र्या भाष्यवाणीमणीं सूत्रावरोपिताम् ।
विधाय या कृता माला हरिणा हृदि धार्यताम् ॥

Colophon:

इति श्रीमद्ब्रह्मसूत्रभाष्यार्थमञ्जर्यां वेदगर्भनारायणाचार्यापरनामकपुट्टाचार्यकृतायां चतुर्थाध्यायस्य चतुर्थः पादः । चतुर्थाध्यायः संपूर्णः । संपूर्णश्चायं ग्रन्थः ।

595

The commentator was a pupil of Raghunāthayati. See *HDV*, vol. II, pp. 309 ff.

598

A short work in thirty-four Anuṣṭubh verses giving briefly the purport of the *Brahmasūtra-s*. This work is different from the author's *Anuvyākhyāna*. See *HDV*, vol. I, p. 159 f.

600

For a description of the work see *HDV*, vol. II, p. 282.

601

अणुभाष्यव्याख्या आनन्दमालिका

A summary of Rāghavendrayati's commentary *Tattvamañjarī*. The author is different from his namesake who wrote *Madhvavijaya*, *Maṇimañjarī*, etc. as he quotes Ṭīkākāra (on fo. 1).

Beginning:

समस्तगुणसंपूर्णं सर्वदोषविवर्जितम् ।
लक्ष्मीनारायणं वन्दे भक्ताभीष्टप्रदायकम् ॥

सूत्रार्थं हृदि कृत्वैव भाष्यार्थं संप्रकाशये ।
अविक्षेपेण बोधार्थं बुध्यन्तां तद्विवेकिनः ॥

इह खलु अधिकारिणामखिलक्लेशनिवृत्तिविशिष्टपरमानन्दावाप्तिनिदानभगवज्ज्ञानाय प्रवृत्तानामनन्ताम्नायानामितिकर्तव्यतारूपाणि नारायणावतारबादरायणकृतानि ब्रह्मसूत्राण्यन्यैरन्यथा व्याख्यातान्यकृतप्रायाणीति मन्यमानो भगवानानन्दतीर्थो मुनिर्यथावद्व्याचिख्यासुर्भाष्यानुभाष्ये विधाय संक्षेपभाष्यमपि विधित्सुरध्यायचतुष्टयोक्तगुणविशिष्टेष्टदेवतागुरुनतिपूर्वं चिकीर्षितं प्रतिजानीते—नारायणमिति ।

Colophon (on fo. 13):

इति श्रीमद्ब्रह्मसूत्राणुभाष्यस्य टीकायां नारायणपण्डिताचार्यकृतायामानन्दमालिकायां प्रथमाध्यायस्य चतुर्थः पादः ।

End:

अत एव जीवनमित्यपां नाम । असाधारण्येन व्यपदेशा भवन्ति । अतो न विरोध इति भावः । एवं चतुर्विधविरोधपरिहारस्य फलमाह—सर्व

602

A metrical commentary on the *Brahmasūtra-s* intended to expound the logical principles contained in the author's *Brahmasūtrabhāṣya*. See *HDV*, vol. I, pp. 160 ff.

604

For an account of the work see *HDV*, vol. I, pp. 330 ff.

612

The commentator was the pupil of Vedeśatīrtha. For details see *HDV*, vol. II, pp. 257 ff.

615

For a short description of the work see *HDV*, vol. II, p. 284.

616

The commentator was the pupil of Vedavyāsa. For details see *HDV*, vol. II, pp. 267 ff.

617

For a description of the work see *HIP*, vol. IV, p. 87 f.

620

This commentary runs only up to the middle of the 3rd Pāda of the 1st Adhyāya. For the further portion see the next number (621).

621

The author says that because Jayatīrtha had commented only up to the middle of the 3rd Pāda of the 1st Adhyāya, he was commenting on the further portion. Therefore Raghūttama's commentary extends from the middle of the 3rd Pāda of the 1st Adhyāya up to the end of the 4th Adhyāya. The commentary mentions Narahari, Akṣobhyatīrtha, Padmanābhatīrtha and Vidyādhirāja.

623

ब्रह्मसूत्रवृत्तिः

A short commentary on the *Brahmasūtra-s*.

Beginning:

प्रणम्याशेषवेदाब्धिव्यासं व्यासं जगद्गुरुम् ।
पूर्णज्ञं जयसत्यादीन् ब्रह्मसूत्रार्थमालिखे ॥

तत्रादिसूत्रेऽधिकार्यादिमद्ब्रह्मजिज्ञासाकर्तव्यताविधानेन तच्छास्त्रस्यारम्भणीयत्वं समर्थ्यते ।

ॐ अथातो ब्रह्मजिज्ञासा ॐ

अत्र ओंकाराथशब्दौ मङ्गलप्रयोजकौ विषयाधिकारानन्तर्यार्थौ च । यस्य प्रसादादिति श्रुत्युक्तप्रयोजनार्थोऽतःशब्दः । तथाच विष्णुभक्तिपूर्वकाध्ययनवैराग्यशमदमाद्यधिकारसंपत्त्यनन्तरम् अतः जिज्ञासोत्थज्ञानजन्यप्रसादसाध्यमोक्षसद्भावात् ।

End:

अनेन सर्वदोषरहितः सर्वगुणपूर्णो विरिञ्चादिदेवैः स्तुत्यो नमस्कार्यः लक्ष्मीपतिः विष्णुः स्वामीति ध्येयः इत्यादिमाहात्म्योपेतो ब्रह्ममीमांसाशास्त्रप्रतिपाद्य इति सद्भिः सदा स्तुत्यो नम्यश्चेत्युक्तं भवतीत्यशेषमतिमङ्गलम् ।

नमः पूर्णज्ञहृत्स्थाय परिपूर्णगुणात्मने ।
निर्दोषाय नृसिंहाय मीमांसाशास्त्रकारिणे ॥
आयीनृहरिनामाहं ब्रह्मसूत्रार्थसंग्रहम् ।
अलिखं भगवत्प्रीत्यै सर्वोपकरणाय च ॥

Colophon:

इति श्रीमद्ब्रह्मसूत्रार्थप्रबन्धे चतुर्थाध्यायस्य चतुर्थः पादः ।

Reads the following lines after the colophon:

शेषाद्रिस्थ हरे सुखादिगुणयुक् स्वाभिन्नवस्त्वच्युत
सर्वोत्कृष्ट सुरारिजीवनहर क्षीराब्धिकन्याप्रिय ।
आयीवंशसमुद्भवस्य नृहरेर्मे मध्वशास्त्रे स्थितिं
भक्तिज्ञतिविरक्तिपूर्वकगुणान् देहि प्रभो मुक्तये ॥
जातो ब्रह्मादिगोत्रे सुखरहितकार्यक्षकादेर्विहन्ता
यो बाल्याद्ब्रह्मचर्यप्रभृतिगुणयुतः स्वामिकार्येऽतिदक्षः ।
मह्यं वा यस्त्रिमूर्तिः स्वगुणसमगुणान् लेशतः स प्रदद्याद्
विष्णोः स्वव्याप्यभूतान्तरतमभजनं दासभावं विरागम् ॥

चतुःषट्शतसंख्यानि सूत्राणि । शरचन्द्रनयनसंख्या श्लोकप्रसंख्या, एकोत्तरशतद्वयं सूत्रार्थबन्धगणना शून्यद्विषण्नेत्रकैः ।

625

For a description of the work see *HDV*, vol. II, p. 282.

626

ब्रह्मसूत्रवृत्तिः सूत्रार्थमणिमाला

The author salutes Raghūttamayati. He also mentions Bhīmācārya and his (the author's) maternal uncle without naming him.

Beginning:

श्रीभूदुर्गादिलक्ष्मीगणगगणगणनागण्यपूर्णस्वभाव-
ज्ञानानन्दाद्युपेतं सकलमलकुलानादिमूलव्यपेतम् ।
श्रीब्रह्मप्राणमुख्यामरगणहृदयाब्जाख्यमुख्यप्रदेशे
ज्ञेयं गम्यं समीडे हयवरवदनं श्रीयुतं तं हयास्यम् ॥

श्रीमध्वहृदयाम्भोजे श्रीभूसंश्लिष्टविग्रहौ ।
नमामि संततं देवौ वेदव्यासहयाननौ ॥
श्रीमध्वादिराजाख्यगुरुपुंगवपूजितौ ।
वन्दे विज्ञानदातारौ वेदव्यासहयाननौ ॥
श्रीमज्जयार्यान् गतगर्वपूर्वान् गुरूंश्च सर्वान् जितवादिवर्यान् ।
रमेशपूर्वान् भजतः स्वपूर्वान् भीमार्यवर्यान् प्रणमामि पूर्वान् ॥
श्रीवादिराजयोगीन्द्रसुसेवासक्तसत्कलान् ।
मातुलानतुलान् वन्दे बन्दीकृतसभातलान् ॥
श्रीविष्णोरर्पणायैव सूत्रार्थमणिमालिकाम् ।
वेदव्यासस्तु तनुते बालानां तोषणच्छलात् ॥
रघूत्तमपुरार्योत्थश्रीहयास्यप्रसादतः ।
पूर्वाचार्यप्रसादाच्च कुर्वे ग्रन्थान् विचार्य तान् ॥
सूत्रार्थसुमणिस्फूर्तिसूत्रार्थस्फूर्तिसंयुताः ।
सूत्रादयस्तत्त्वदेवा दिशन्तु मम संततम् ॥

श्रीविष्ण्वाख्यस्य बिम्बभूतस्य परब्रह्मणः परानन्दप्रतिबिम्बस्वभावानन्दानुभवलक्षणाशेष-पुरुषार्थप्रवरकैवल्योपयुक्तात्यर्थप्रसादापादकस्वबिम्बभगवदपरोक्षप्रयोजकविषयविरक्तिभक्तिपूर्वकश्रुतिम-तिनियतोपास्तिविषयविष्ण्वाख्यपरममङ्गलपरत्वज्ञापनायाशेषाम्नायाः प्रावर्तन्त ।

End:

ननु कामानामल्पत्वे पुनरावृत्तिर्युक्तैवेत्यतोऽप्युक्तं शब्दादीति । शब्दादीन् सर्वान् कामानाप्त्वा अमृतः समभवत् अमृतः समभवदिति पुनरावृत्त्यापादकसंपूर्णकामावाप्तिश्रुतेरिति समस्तशास्त्रार्था-वधारणार्थकद्विरुक्तिकसमस्तसूत्रार्थ इत्यशेषमतिमङ्गलम् ।

तुरीयस्य तुरीयाङ्गैः सूत्रार्थमणिमालिका ।
संपूर्णा स्वर्पिता श्रीशव्यासरूपहयानने ॥
कलाषोडशसंयुक्तसूत्रार्थमणिमालिकाम् ।
पश्यन्तु श्रीसुधादृष्ट्या श्रीशव्यासहयाननाः ॥
श्रीसूत्रभाष्यसट्टीकापेटिकायाः समुद्धृताम् ।
श्रीहयास्यः प्रगृह्णातु सूत्रार्थमणिमालिकाम् ॥
श्रीब्रह्मप्राणमुख्यान् सकलसुरगणान् सर्वतत्त्वेशरूपान्
मध्येदेहं वसन् यो निखिलगुणमयो नित्यनिर्धूतहेयः ।
धत्ते श्रीव्यासरूपो हयवरवदनः श्रीयुतः श्रीहयास्यो
देहे मे धारयेत् तां दृढगुणमिलितां मालिकां मङ्गलाङ्गः ॥
स्वस्वारूपिकमाधुर्यं संनिधाय श्रियोऽधरे ।

यश्चुम्बति हयास्योऽयं प्रसीदतु सह श्रिया ॥
श्रीमध्ववादिराजाख्यगुरुपुंगवपूजितौ ।
प्रीयेतां सततं देवौ वेदव्यासहयाननौ ॥
श्रीमध्वपूज्यपादाख्यः प्रदद्यान्मम संततम् ।
श्रीहयास्यः श्रिया साकमशेषमतिमङ्गलम् ॥

627

ब्रह्मसूत्रवृत्तिः सूत्रार्थमञ्जरी

Beginning:

वेदव्यासमहं वन्दे वेदशाखोपबृंहितम् ।
सूत्रामृतेन ब्रह्मादींस्तोषयन्तं निरन्तरम् ॥

अथ ब्रह्मादिवन्द्यो भगवान् नारायणः व्यासरूपी सन् इष्टानिष्टप्राप्तिपरिहारसाधनभूतान् वेदान् विभज्य तदर्थनिर्णयाय ब्रह्मसूत्राणि चकार । ओं अथातो ब्रह्मजिज्ञासा ओं । अथशब्दो मङ्गलार्थः अधिकारानन्तर्यार्थश्च । अतःशब्दो हेत्वर्थः । अधिकारसंपत्त्यनन्तरम्, अतः मोक्षाख्य-प्रयोजनसद्भावात् विष्णोः प्रसादद्वारा मोक्षरूपफलसंभवाद्वा ब्रह्मजिज्ञासा ब्रह्मशब्दवाच्यविष्णुविषयक-श्रवणादिविचारः कर्तव्य इति सूत्रार्थः ।

Colophon on fo. 5:

इति श्रीमत्कृष्णद्वैपायनकृतश्रीमद्ब्रह्मसूत्रार्थमञ्जर्यां प्रथमाध्यायस्य प्रथमः पादः ।

End:

ॐ अस्यैव चोपपत्तेरूष्मा ॐ

अस्यैव किंचित्साम्यस्यैव प्रकृते ब्रह्मण उपपत्तेः प्रकृतेरूष्मवत्त्वात् ब्रह्मण एव उक्तघ्राणाद्य-विषयत्वम् । प्रकृतेर्मूर्तत्वरूपेण घ्राणाद्यविषयत्वेऽपि चित्प्रकृत्यात्मना घ्राणादिविषयत्वम् । द्विधा हीदमवद्दृश्यते । ऊष्मवदनूष्मा चेति । सौपर्णश्रुतौ तथाभिधानादिति सूत्रार्थः ।

628

ब्रह्मसूत्राधिकरणार्थसंग्रहः

The author Padmanābha is different from the Padmanābhatīrtha who was a direct disciple of Ānandatīrtha and author of the *Bhagavadgītātātparya-nirṇayavyākhyā*, as our author mentions *Sudhā*, *Candrikā*, etc.

Beginning:

कृष्णरामौ संप्रणम्य रघुनाथगुरूनपि ।
व्यासोपक्रमसूत्राणां संगत्यर्थौ वदाम्यहम् ॥
टीकासुधाचन्द्रिकासु प्रोक्तोऽर्थः संप्रकाश्यते ।
पद्मनाभेन विदुषा कृपां कुर्वन्तु सूरयः ॥

नष्टधर्मज्ञाने लोके कृपालुभिः ब्रह्मादिभिः प्रार्थितो भगवान् नारायणः वेदार्थमविदुषां सज्जनानां सम्यग्ज्ञानजननाय वेदेतिकर्तव्यतारूपब्रह्मसूत्राण्यचीक्लृपत् । तत्रादौ ओं अथातो ब्रह्मजिज्ञासेति जिज्ञासाविषयकं सूत्रम् ।

End:

जगत्कारणत्वलक्षणस्य प्रमाणयुक्तत्वेन प्रत्यनुमानेन रुद्रादिगतत्वसाधनानुपपत्तेः । किंतु यतो वा इमानि भूतानीति श्रुत्या

630

अद्वैतखण्डनम्

Beginning:

अथातो ब्रह्मजिज्ञासेत्यस्मिन्नधिकरणे वाचस्पतिना आत्मातिरिक्तब्रह्मणि मानाभावेन प्रत्यगात्मन एव ब्रह्मत्वात् तस्य चाहमिति ज्ञाने प्रकाशमानतया विषयत्वसंभवेन विषयाभावात् उक्तरीत्या आत्मनि भासमानेऽप्यविद्यानिवृत्तेरदर्शनेन तस्य प्रयोजनानुपपत्त्या प्रयोजनाभावाच्च वेदान्तविचारो नारब्धव्य इति पूर्वपक्षं प्रदर्श्य समन . . . सिद्धान्तितम् ।

End:

सर्ववेदान्तप्रत्ययन्यायेन निखिलवेदान्तवेद्यत्वं भगवति साम्बमू . . . र्तावधार्यत इति निरस्तम् ; व्यवहितान्वयापत्तेः । . . . . उपक्रमोपसंहारयोर्विरोधे सति उपक्रमस्य प्राबल्ये न्यायमेवमाहुः ।

631

आनन्दतारतम्यसमर्थनम्

This work attempts to prove that there are degrees of enjoyment in the bliss of the liberated condition. The work is a defence against the charges of Surapuram Śrīnivāsācārya's *Ānandatāratamyakhaṇḍana.*

Beginning:

समस्तगुणसंपूर्णं सर्वदोषविवर्जितम् ।
रामं व्यासं च कृष्णं च संप्रणम्य यथामति ॥

रामानुजमते वक्ष्ये साम्यश्रुत्यर्थदूषणम् ।
ऐयणाख्यो बुधस्तेन प्रीयतां गुरवो मम ॥
यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥

इति श्रुतौ प्रथमपादार्थदूषणमुच्यते ।

End:

तस्मात् विषयवाक्ये स्पष्टमेव यत् प्रतिपाद्यते तदेवाङ्गीकार्यमिति सुप्रसिद्धम् । तस्मात् मुक्तावानन्दतारतम्यं सिद्धम् ।

Colophon:

इति मुक्तावानन्दतारतम्यसमर्थनम् ।

632

For a description of the work see *HDV*, vol. I, p. 184. According to the commentary of Jayatīrtha on this text, the work is also called *Tattva-prakāśikā.*

636

For a short description of the work see *HDV*, vol. I, p. 328 f.

637

उपाधिखण्डनविवरणव्याख्या पदार्थदीपिका

The commentator was a pupil of Yadupatyācārya and known as Śrīnivāsatīrtha though he was not a Saṃnyāsin; see *HDV*, vol. II, pp. 293 ff.

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितोपाधिखण्डनापरपर्यायतत्त्वप्रकाशिकाव्याख्यानस्य श्रीमज्जयतीर्थभिक्षुविरचितस्य विवृतिः यादवाचार्यशिष्येण श्रीनिवासेन विरचिता पदार्थदीपिका समाप्ता ।

Post-colophon writing:

प्लवाब्दे पुष्यमासस्य द्वितीयागुरुवासरे ।
कवलपुर्याः क्षमायां च क्षीरनद्यास्तटे तथा ॥

श्रुतिगर्भकुलोत्पन्ननृसिंहार्यस्य सूनुना ।
वेंकण्णेन तुरीयेण प्रीत्यै माधवमध्वयोः ॥
उपाधिखण्डनव्याख्याविवृतिर्लिखिता शुभा ।
गुर्वाज्ञामविहायैव प्रीत्यै जयमुनेः सदा ॥

द्वादशीदिनप्रारम्भसितेन्दुद्वितीयागुरुवासरे समाप्तिमगमत् । उपाधिखण्डनटिप्पणी वेणुपल्लीयं समाप्तम् ।

640

उपाधिखण्डनविवरणव्याख्या मन्दारमञ्जरी

Beginning:

लक्ष्म्याः करतलाम्भोजलालनीयपदाम्बुजम् ।
प्रणमामि हयग्रीवं देवताचक्रवर्तिनम् ॥
श्रीमदानन्दतीर्थार्यचरणाब्ज . . . . . ।
जयतीर्थमुनीन् नत्वा तथा सर्वगुरूनपि ।
तत्त्वप्रकाशिकाव्याख्यां यथामति विवृण्महे ॥

प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्यादिप्रयोजनकमविगीतशिष्टाचारानुमितश्रुतिप्रमाणकं परदेवता-प्रणामलक्षणं मङ्गलमाचरन् ग्रन्थकर्ता जयतीर्थाचार्यः चिकीर्षितं निर्दिशति—रमाया इति । रमणमिति कर्तरि ल्युट् । रमारमणस्यैव नम्यत्वे हेतुमाह—गुणमाणिक्येति । गुणा एव माणिक्यानि । तेषां मण्डनमित्यर्थः । तत्त्वप्रकाशिकाव्याख्यामिति ब्रह्ममीमांसासहितवेदान्तविषयादितत्त्वप्रकाशिका-रूपामित्यर्थः । करिष्याम इति कर्त्रसमवेतक्रियाफलाभिलाषिना परस्मैपदेन शिष्यानुजिघृक्षया ग्रन्थो निर्मीयत इति सूचयति ।

End:

एवं समापिततत्त्वप्रकाशिकाव्याख्यानो भगवान् टीकाकारः टीकाकरणस्यान्ततो नारायणप्रीतिः प्रयोजनमिति विज्ञापयन् तत्प्रीतिं प्रार्थयते—सुरासुरेति ।

हयग्रीवपदाम्भोजनखदीधितिचन्द्रिकाम् ।
मनश्चकोर संसारसंतप्त सततं पिब ॥

Colophon:

इति श्रीसमस्त . . . . . कमणिकिरणारुणितपादारविन्दस्यारविन्दनेत्रस्येन्दिरारमणस्य श्रीमुख्य-प्राणहृदयारविन्दराजहंसस्य श्रीहयग्रीवस्य किंकरेण श्रीमत्परमहंसपरिव्राजकाचार्येण श्रीमद्ब्रह्मण्य-तीर्थपूज्यपादशिष्येण श्रीलक्ष्मीनारायणाख्ययतिकुलतिलकादधीतश्रीमध्वशास्त्रामृतेन व्यासयतिना विरचिता मन्दारमञ्जरीसमाख्या तत्त्वप्रकाशिकाटीकाव्याख्या समाप्ता ।

641

Twenty-five verses on the rules and regulations of Kathā (the art of debate). For a detailed account of the work see *HDV*, vol. I, p. 183 f.

643

The work explains that the names of various deities found in Vedic Mantra-s really denote only the Lord Viṣṇu. For details see *HDV*, vol. I, pp. 203 ff.

646

चन्द्रिकामण्डनम्

A refutation of objections raised against Vyāsayati's *Tātparyacandrikā*, dealing with the Śāstrayonyadhikaraṇa. The author was the son of Rāghavendrācārya and the grandson of Veṅkaṭācārya.

Beginning:

नत्वा श्रीहरिपादाब्जपरागानथ देशिकान् ।
वादिगर्वापनोदाय शास्त्रयोनिनयं ब्रुवे ॥

अत्र जगत्कारणत्वं किमन्यस्यापि, किं वा विष्णोरेवेति चिन्ता । अनुमानादिना रुद्रादीनामपि कारणतासिद्धेरतिव्याप्तिरिति पूर्वः पक्षः । सिद्धान्तस्तु—

चक्षुरादि यथाशक्तं रसगन्धादिवस्तुषु ।
अनुमापि तथाशक्ता धर्मब्रह्मादिवस्तुषु ॥

इति । अत्र वदन्ति । कथं रुद्रादेः कारणत्वमनुमानेनाशङ्क्यते । तन्मात्रवृत्तिकारणताग्राहकानुमानानुपलम्भात् ।

End:

श्येनादिशब्दानामर्थवादबलात् कर्मनामधेयत्वेन तत्परत्वेऽपि शकुन्तविशेषवाचकत्वसिद्धेरनिवारणवत् कर्मकाण्डस्थपदानां कर्मादिपरत्वेऽपि ज्योतिरुपक्रमादित्यधिकरणोक्तन्यायेन ब्रह्मवाचकत्वानिवारणाच्च । न हि गङ्गायां घोष इत्यत्र गङ्गाशब्दस्तीरपर इति प्रवाहवाचको न भवतीति संक्षेपः ।

परोक्तिचोरो ज्योत्स्नाद्विट्कक्ष्यः कारागृहोचितः ।
गतत्रपो मृषावादी वाचाटोऽत्र निराकृतः ॥
श्रीराघवेन्द्रविजयीन्द्रयतीश्वराभ्यां संदूषितानि नितरामधरीकृतानि ।
थूथूकृतान्यतितरां वनमालिमिश्रैरप्पय्यदीक्षितवचांसि गुहां गतानि ॥

तानीदानीं समालम्ब्य निबद्धानि स्ववाक्यतः ।
तेषां निराकृतिर्व्यर्थ्या न ह्यर्थो मृतमारणे ॥

Colophon:

इति श्रीयदवाक्यप्रमाणपारावारपारीणवैकटाचार्यसूरिसूनुसर्वतन्त्रप्रवचनधुरीणराघवेन्द्राचार्य-सूनुना नारायणशर्मणा विरचिते पूर्वगुरुचरणोक्त्यनुवादरूपे चन्द्रिकामण्डने शास्त्रयोनित्वाधिकरणम् ।

647

A summary in thirteen verses of the various categories of the Dvaita Vedānta school.

656

तत्त्वविवेकविवरणव्याख्या

Colophon:

इति श्रीयदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिता श्रीमदानन्दतीर्थभगवत्पादो-दाहृततत्त्वविवेकव्याख्यानविवरणं समाप्तम् ।

Post-colophon writing:

प्लवाब्दे पुष्यमासे च कृष्णपक्षे हरेर्दिने ।
भानुवारे च मध्याह्ने लिखितं श्रीशतुष्टये ॥
श्रीमत्तत्त्वविवेकस्य टीकाव्याख्यानमुत्तमम् ।
श्रुतिगर्भकुलोद्भूतनृसिंहार्यस्य सूनुना ॥
व्यंकण्णेन तुरीयेन प्रीत्यै माधवमध्वयोः ।
अनेन लेखनेनैव प्रीतो भवतु मद्गुरुः ॥

अष्टमांदेनप्रारम्भास्मद्गुर्वनुग्रहवैपुल्येन एकादश्यां समाप्तिमगात् कबलपुर्याम् ।

आर्जितं भूरिकष्टेन यत्नेन लिखितं मया ।
हर्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत् ॥

स्वार्थं परार्थं च ।

657

The work deals with the same topic as the previous one. For details see *HDV*, vol. I, pp. 186 ff.

664

तत्त्वसंख्यानविवरणव्याख्या

Beginning:

वेदेशतीर्थगुरुमानसकंजसंस्थं
हंसावतंसपुरुबोधहृदम्बरस्थम् ।
व्यासं प्रणम्य करवाणि सुतत्त्वसंख्या-
टीकाविकासमबलम्ब्य गुरुप्रसादम् ॥

इह हि परमकारुणिको श्रीमज्जयतीर्थपूज्यचरणः भगवत्पादीयातिगहनगम्भीरतत्त्वसंख्यां व्याकर्तुकामः प्रारिप्सितपरिसमाप्त्यादिप्रयोजनतया शिष्टाचारपरंपराविगीतहरिगुरुप्रणतिं विधाय शिष्यशिक्षायै ग्रन्थादौ तामुपनिबध्नन् स्वव्याख्याविद्वदुपादेयनिमित्तशब्दबाहुल्याभावं वदन् श्रोतृबुद्ध्यनुकूलनाय स्वचिकीर्षितं प्रतिजानीते—लक्ष्मीपतेरिति । नत्वेति त्वाप्रत्ययेन नमस्कारस्य ग्रन्थकरणपूर्वभावकथनात् तयोरङ्गाङ्गिभावः सूचितः ।

End:

पद्मापद्मेति । सत्तादीत्यत्रादिपदेन प्रमितिप्रवृत्त्योर्ग्रहणम् । यादृशस्य भगवतः प्रतिपादनमत्र तादृशस्यैव प्रीतिराशासनीयेति सूचनायैवमुक्तमित्यशेषमतिमङ्गलम् ।

वासवीवियति व्यक्तं वासुदेवावभासकम् ।
व्यासाभिधमहं वन्दे महामोहतमोऽपहम् ॥

Colophon:

इति श्रीमद्यदुपत्याचार्यविरचिता तत्त्वसंख्यानविवरणटिप्पणी समाप्ता ।

The scribe adds:

खरपूर्वसमोर्जमासकृष्णपक्षे द्वादशीयुक्तसौम्यवारे। लिखिता च कृता सुतत्त्वसंख्याटीकाविस्तृतिर्यादवार्यसूरिणा च । श्रुतिगर्भसुतन्तुसंभवेन नृसिंहार्यजराघवेन्द्रनामकेन ।

665

तत्त्वसंख्यानविवरणव्याख्या

Beginning:

प्रणम्य श्रीमदाचार्यहृत्पद्मस्थं रमापतिम् ।
करिष्ये तत्त्वसंख्यानव्याख्याटीकां यथामति ॥

श्रीमज्जयतीर्थमुनिरविगीतशिष्टाचारपरंपरादिप्राप्तं प्रारिप्सितग्रन्थपरिसमाप्त्यादिप्रयोजनकमिष्टदेवताचरणारविन्दयुगलनतिरूपं मङ्गलं शिष्यशिक्षायै ग्रन्थादौ निवेशयन् चिकीर्षितं प्रतिजानीते—

लक्ष्मीपतेरिति। विद्यारम्भसमये सकलविद्याभिमानिन्या रमया युतस्यैव हरेश्चरणारविन्दयुगलप्रणति-रुचिता भवति। अतो रमापतित्वेन हरेः कीर्तनं कृतम्।

End:

पद्मेति। पद्मा लक्ष्मीः। पद्मासनो ब्रह्मा। अनन्तः शेषः। त एव प्रभृतिरादिर्यस्य तत्तथा। इदं बुद्धिस्थं रमादि जगत् यदिच्छया यस्येच्छया सत्तादि सत्ता स्थितिः, आदिपदोक्तं सृष्ट्यादिकं च, ते प्राप्नोति स देवः क्रीडादिगुणविशिष्टः श्रीपतिः लक्ष्मीपतिः मे प्रीयतां प्रसीदत्वित्यर्थ इति।

Colophon:

वानिवालकुलोत्पन्नविद्वलेन विपश्चिता।
रचिता तत्वसंख्यानव्याख्याटीकार्थदीपिका॥
मत्प्रेरणेन हरिणा या सेवा स्वस्य कारिता।
तया श्रीमध्वहृत्पद्मवासी नः प्रीयतां हरिः॥

666

तत्त्वसंख्यानविवरणव्याख्या

Post-colophon writing:

इदं पुस्तकं प्रभवनामसंवत्सरे उत्तरायणे फाल्गुनमासे कृष्णपक्षे नवम्यां भौमवासरे तिण्डिवन-रामाचार्यपुत्रवेंकोबेन लिखितम्।

667

तत्त्वसंख्यानविवरणव्याख्या पञ्जिका

Beginning:

रमारमणमाचार्यान् जयार्यांश्च गुरूनपि।
. . . . . .
कुर्मोऽथ तत्त्वसंख्यानव्याख्यायाः पञ्जिकां पराम्॥
व्यक्तं त्यक्त्वा यदव्यक्तं तद्व्यक्तं क्रियते मया।
मूलमत्र समालोच्य न चोन्मूलं विलिख्यते॥

ग्रन्थादौ प्रारिप्सितपरिसमाप्त्यादिफलकमङ्गलाचरणपूर्वकं चिकीर्षितं प्रतिजानीते—लक्ष्मीपते-रिति। ग्रन्थारम्भे सकलवाङ्मनसदेवताया लक्ष्म्या अपि नम्यत्वादेवमुक्तम्। पदे अम्भोजे इव पदाम्भोजे। तयोः युगम्। शब्दमात्रस्यैवात्र प्रथमं निषिध्यते नार्थस्येति . . शब्दं प्रयुञ्जानस्य भावः।

End:

बह्वागमविरोध इति। आगमबहुत्वद्योतनाय मूले संप्रत्युपसर्गद्वयमिति भावः। बाह्येति। अज्ञानबोध . . त्यनेनान्तरतमःप्रकाशयोरुक्तत्वादिति भावः। भारूपमिति। ब्रह्मादीनां प्रकृतिबद्धत्वा-

दिति भावः । ज्ञानाभाव इति । रमायाः प्रकृतिबन्धाभावेऽपि ईश्वरे ज्ञानाभाववत्त्वादिति भावः । इति प्रतिपादितगुणवन्तं भगवन्तमन्तेऽपि स्तुवन् तत्प्रीतिं प्रार्थयते—पद्मेति ।

Colophon:

इति तत्त्वसंख्यानटिप्पणं समाप्तम् ।

668

तत्त्वसारसंग्रहः

A brief exposition of the fundamental principles of the Dvaita Vedānta. The author was the son of Tirumalācārya of the Lakkhaṇagāvi family. He mentions Jayatīrtha, Satyanāthendra, Satyābhinavatīrtha, Nṛsiṃha (son of Chalāri Nārāyaṇa) and Janārdana (pupil of Nṛsiṃha).

Beginning:

लक्ष्मीपतिं हयग्रीवं नरसिंहं गुणार्णवम् ।
वेंकटेशं जगद्वन्द्यं व्यासं कृष्णादिकान् नुमः ॥
आनन्दतीर्थं परहंसमोडे श्रीमज्जयार्यं यतिराजमद्धा ।
तद्वंशजातं परहंसराजं श्रीसत्यनाथेन्द्रमहं नमामि ॥
यः सत्यनाथस्य पदाम्बुजस्य संसेवयैवाप्तसमस्तभाग्यः ।
तत्संस्मृतिध्यानपरायणस्तं नतोऽस्मि सत्याभिनवीनतीर्थम् ॥
सत्याधीशमहं वन्दे सत्यज्ञानपरायणम् ।
वैराग्यभक्तिसंपन्नं गुरुभक्तं हरेः प्रियम् ॥
छलारिनारायणवर्यसूनुं विरक्तिभक्त्यादिगुणैरुपेतम् ।
दुर्वादिमत्तेभविदारणोद्यतं नृसिंहनामानमहं प्रपद्ये ॥
श्रीजनार्दनगुरुं प्रणमामि श्रीनृसिंहपदपङ्कजभृङ्गम् ।
भक्तिविरक्तिविदादिगुणाढ्यं सज्जनहृत्कमले विहरन्तम् ॥
प्रायेणाल्पायुषो मर्त्याः कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥
अतिभूरीणि तत्त्वानि श्रोतव्यानि विभागशः ।
सन्ति तस्मात् तत्त्वसारसंग्रहः क्रियते मया ॥
सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबोधनात् ।
मोक्षं च विष्णुतस्त्वेव ज्ञात्वा मुक्तिर्न चान्यथा ॥

End:

नमस्तस्मै भगवते व्यासायामिततेजसे ।
येन प्रवर्तितो दीपो दिव्यज्ञानमयो महान् ॥

श्रीनिवासाख्यविदुषा रचितस्तत्त्वसंग्रहः ।
मध्वादिसद्गुरूणां च प्रीत्यै भवतु सर्वदा ॥

Colophon:

इति श्रीलक्ष्मणगावितिरुमलाचार्यसुतश्रीनिवासाचार्यकृतस्तत्त्वसारसंग्रहः समाप्तः ।

The following verses are found after the colophon:

सुरनरदितिजेन्द्रैः सेव्यते योऽस्ततन्द्रै-
रुरुतरदुरितानां का कथा मानवानाम् ।
स भुवि सुकृतकर्ता वाञ्छितावाप्तिहेतु-
र्जयति विजितरागस्तीर्थराजः प्रयागः ॥
श्रुतिः प्रमाणं स्मृतयः प्रमाणं पुराणमप्यत्र परं प्रमाणम् ।
यत्रास्ति गङ्गा यमुना प्रमाणं स तीर्थराजो जयति प्रयागः ॥
न यत्र योगाचरणप्रतीक्षा न यत्र यज्ञाग्निहविःसु दीक्षा ।
न तारकज्ञानगुरोरपेक्षा स तीर्थराजो जयति प्रयागः ॥
चिरं निवासं न समीक्षते य उदारचित्तः प्रददाति कामान् ।
यः कामितार्थांश्च ददत् सकामान् स तीर्थराजो जयति प्रयागः ॥

669

A short work propounding the doctrine that even in the state of liberation, Jīva-s are different from Lord Nārāyaṇa. See *HDV*, vol. I, pp. 189 ff.

675

तत्त्वोद्द्योतविवरणव्याख्या

The author was a pupil of Raghūttamayati and Vedavyāsa. See *HDV*, vol. I, pp. 288 ff.

Colophon:

इति श्रीमद्वेदव्यासतीर्थपूज्यपादशिष्येण वेदेशभिक्षुणा विरचितं तत्त्वोद्द्योतपञ्जिकाव्याख्यानं समाप्तम् ।

The scribe adds:

सौम्ये कृष्णचतुर्दशीहरिदिने माघे महामङ्गले
भानौ मध्यगते समर्पणकृतं श्रीरामदूतस्य च ।

वेदेशाभिधभिक्षुणा विरचितं यच्छ्रीनिवासेन वै
तत्त्वोद्द्योतविवर्णमङ्घ्रिषु हरेर्माब्रह्मपूज्यस्य च ॥

677

तत्त्वोद्द्योतविवरणव्याख्या

The commentator was a pupil of Surendratīrtha. See *HDV*, vol. II, pp. 164 ff.

Beginning:

सर्वज्ञं सर्वकर्तारं सर्वजीवजडात्मकात् ।
प्रपञ्चाद्भस्तुतोऽत्यन्तभिन्नं श्रीनृहरिं भजे ॥
तं पाणिपल्लवं बाहुशाखं सद्द्विजसेवितम् ।
विद्याहासलतापुष्पं मध्वकल्पतरुं भजे ॥
ब्रह्मविन्मुखरङ्गस्थां मध्व . . . वाङ्नटीं पराम् ।
विचित्रपदविन्यासैर्मोहयन्तीं भजेऽन्वहम् ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवे तं जययोगीन्द्रं कामबाणच्छिदं सताम् ॥
यो व्यासमुनिदावाग्निः सच्छास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥
श्रीसुरेन्द्रमुनेः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यातिशोभिते ॥
सर्वतन्त्रस्वतन्त्रेण विजयीन्द्राख्यभिक्षुणा ।
तत्त्वोद्द्योतस्य विवृतेर्गूढो भावः प्रकाश्यते ॥

श्रीमज्जयतीर्थमुनिः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं शिष्यार्थदानाविच्छेदरूपप्रचयगमनार्थं च कृतमविगीतलौकिकशिष्टाचारानुमितवेदबोधितकर्तव्यताकं श्रीरमणाभिवन्दनरूपं मङ्गलं शिष्यशिक्षायै निबध्नन् तन्मनःसमाधानाय चिकीर्षितं प्रतिजानीते—विश्वोत्पत्तिस्थितिध्वंसकारणमिति ।

End:

आत्मत्वहेतुरपीति । विमता आत्मानः परमात्मनस्तत्त्वतो न भिद्यन्ते, आत्मत्वादित्यात्मत्वहेतुरपीत्यर्थः । तत् सर्वमपीति । वेदान्तानां निर्विषयत्वपरिहाराय दृश्यत्वात्, प्रमातृत्वस्य त्वयैवानङ्गीकारात्, ज्ञानज्ञेययोरभावेन प्रकाशत्वासंभवात्, तत एव स्वप्रकाशत्वासंभवात् आत्मनः प्रपञ्चविलक्षणत्वाङ्गीकाराच्च ।

678

त्रिमतैक्यप्रकाशिका

An attempt at reconciliation of the three principal schools of Vedānta.

Beginning:

जानकीवल्लभं वन्दे वल्लवीजनवल्लभम् ।
शुद्धबुद्धिप्रदातारं श्रुतिस्तोमप्रविस्तृतम् ॥
अज्ञानतिमिरादित्यं दैत्यवक्षोविदारिणम् ।
नमामि वेंकटाधीशं निखिलाभीष्टदायिनम् ॥
सज्जनजलजबन्धुं सुखतीर्थमुनिं नमामि हरिबन्धुम् ।
दुर्मतशिक्षणदीक्षं भक्तकटाक्षं जयार्यगुरुवर्यम् ॥
येन कृतः कृतिसार्थो येनैव कृतं तदुक्तयुक्तिवैपुल्यम् ।
विद्वत्कुमुदविधुं तं व्याससमुनीन्द्रं नमामि विजयीन्द्रम् ॥
दशमतिमतजलधीन्दुं प्रणमाम्यनिशं च राघवेन्द्रगुरुम् ।
प्रतिमावाहितहरिसद्रूपमभीष्टप्रदं च रामार्यम् ॥
रामपादाब्जमधुपं राघवेन्द्रकृपालयम् ।
वसुधेन्द्रमहं सेवे सदा विद्यागुरुं मम ॥
ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः ।
लक्ष्मीनारायणगुरूनग्रजार्यान् नमाम्यहम् ॥
श्रीरामाचार्यतनयगोपालाचार्यनन्दनः ।
ऐय्यणाख्यस्तनोम्येनां त्रिमतैक्यप्रकाशिकाम् ॥
श्रीमन्महानन्दतीर्थजयार्यव्यासदेशिकैः ।
संक्षिप्य तत्र तत्रोक्तं लिङ्गं संगृह्य कथ्यते ॥
श्रीरामानुजशंकरार्यमतयोर्मुख्यप्रमेयं च यत्
तत् सम्यक् सुखतीर्थदेशिकमणेः सिद्धान्तसाराभिधम् ।
यच्चान्यत् तदकिंचिदित्यनुमतन्यायैरलं साध्यते
धीराणां त्रिमतैक्यदीपनकृतौ मोदाय वादाय च ॥
विमत्सरा न्यायविदो मतसारार्थवेदिनः ।
सूरयो मत्कृतिं दृष्ट्वा दयां कुर्वन्तु मय्यलम् ॥

ननु त्रिमतैक्यप्रकाशिकां करोमीति प्रतिज्ञानुपपत्तिः, व्याहतत्वात् ; एकत्वातिरिक्तसंख्यायाः स्वसमानाधिकरणस्वाश्रयप्रतियोगिकभेदाक्षेपकत्वस्य पृथक्त्वनिवेशित्वात् ।

End:

ब्रह्मानन्दानुभवस्याप्यमुख्यवृत्त्या जीवानन्दानुभवत्वेन सुखानुभव . . . . . अस्मन्मतैक्ये न कोऽपि दोष इति . . . . . सर्वमतिमङ्गलमिति सिद्धम् ।

श्रीमदानन्दतीर्थाद्याः प्रीयन्तां गुरवश्च मे ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्वसुधेन्द्रतीर्थश्रीमच्चरणकरुणालयेन श्रीमन्महानन्दतीर्थभगवत्पादाचार्यसिद्धान्तानितरसाधारणप्रवचनादिपटुतरश्रीवाणातुरैरामाचार्यतनय - गोपालाचार्यसूनुना ऐय्यणाख्येन विरचितायां त्रिमतैक्यप्रकाशिकायां रामानुजमतैक्यप्रकाशो नाम तृतीयः परिच्छेदः ।

679

दुर्मतखण्डनम्

A metrical tract criticizing other schools of Vedānta.

Beginning:

नृसिंहमखिलागमावलिभिरप्यगण्यैर्गुणैः
सुपूर्णमजशर्वपर्वतभिदादिदेवैर्नुतम् ।
दुरागमतमिस्रसंततिनिरासभासां निधिं
नमाम्यहमभीष्टदं कमलया हृदा लालितम् ॥
दुर्मतदूषणगणनासंगतचित्तस्य मे हृदायासम् ।
परिहृत्य पावयतु मां दशधिषणाचार्यपूर्णशशी ॥
सत्यपि दुर्मतजाले दूषणभणनं न भूषणं यदपि ।
याज्ञीयोपनिषत्स्वपि मिथ्यामतिदूषणे सफलतोक्ता ॥
सुजनोद्धरणधुरीणद्वैपायनदेववचननिर्णीतात् ।
मिथ्यैवान्यत् सकलं यच्च स्वकपोलकल्पनामात्रम् ॥
यदिदं कृष्णमताख्यं तत् काष्णं नेत्यहं मन्ये ।
यत्र न जीवत्रित्वं श्रद्धात्रैविध्यतश्च कृष्णोक्तम् ॥
तदिह निबन्धे युक्त्या प्रामाण्यापन्नवचनसंदोहैः ।
यच्च विरुद्धं स्पष्टं तद्गणयितुमेव मे यतनम् ॥
यच्चोक्तं कमलायाश्चेतनगणवत् पराणुपरिमाणम् ।
तत्र विरोधं पश्यन्त्वंभ्रणिसूक्तेन मत्सरं त्यक्त्वा ॥

End:

स्यात् तद्रूपं नाङ्गीकार्यं चेत् सिंहादेः किं वा रूपम् ।
नैतज्जन्यं स्तम्भादष्टेर्नैतन्नाश्यं जन्माभावात् ।
किंचोत्पत्तौ चक्राब्जाद्यं कृष्णाकारे दृष्टं मात्रा ॥

680

दुर्मतखण्डनम्

Beginning:

प्राचामाचार्यवर्याणामनुग्रहबलादहम् ।
शर्वस्य सर्वयन्तृत्वं वाद्युक्तं खण्डये भृशम् ॥

यत्तावदाद्ये पद्ये उद्दण्डदोर्दण्डत्वेन खण्डितारातिमण्डलत्वेनापारमहिमत्वेन निरुपमचरितोत्कर्ष-विशिष्टत्वेनाञ्जनेयवर्णनं तच्छर्वसर्वोत्तमत्ववादिनामत्यन्तानिष्टम् । यतो वेति श्रुतौ जन्माद्यस्येति सूत्रे च सिद्धजगज्जन्मादिकारणत्वस्योक्तोत्कृष्टत्वातिरिक्तस्याभावेन तस्य शिवासाधारण्यस्यैव त्वयोपपादयिष्यमाणत्वेन तस्यासांगत्यापत्तेः ।

End:

यदपि वचनात्त्वियमैन्द्री स्यादिति न्यायेनैतद्विरुद्धानि नेयानीति, तस्योत्तरं दत्तमेव । यदवादि तथा हीत्यादिना शिव एवाभिधीयत इत्यन्तेन, तदप्यप्रशि

681

नारायणपदार्थनिर्वचनम्

An interpretation of the word Nārāyaṇa to mean exclusively Viṣṇu, giving 72 derivations. The author was the pupil of Yadupatyācārya.

Beginning:

प्रणम्य यादवाचार्यगुरूणां पादपङ्कजे ।
नारायणपदस्यार्थो यथामति निरूप्यते ॥

नारायणशब्दो हि देवदत्तादिशब्दवत् भगवति न सांकेतिकः । नापि घटादिशब्दवत् रूढिमात्रप्रवृत्तिकः । किंतु विशिष्टगुणानाचष्टे । तथाहि—दोषारशब्दयोः पर्यायत्वात् अराः दोषाः । नञश्च विरुद्धार्थवाचित्वात् तद्विरुद्धा गुणा नाराः । तेषामयनं नारायणः ।

End:

अत एव तैत्तिरीयश्रुतौ कामान्नी कामरूपीति मुक्तब्रह्मणः कामरूपत्वमुक्तमित्यवगन्तव्यम् ।

Colophon:

इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन कृतं द्वासप्तत्यर्थनिरूपणं समाप्तम् ।

नारायणशब्दार्थनिर्वचनं समाप्तम् ।

682

न्यायमाला

A metrical explanation of some of the logical and philosophical principles of the *Brahmasūtrabhāsya* of Ānandatīrtha.

Beginning:

लिङ्गं साधारणं शब्दौ स्थानं लिङ्गमनुग्रहः ।
पुनःशब्दालिङ्गशब्दौ विचार्या द्विःस्थिता इह ॥
बाहुल्यं लिङ्गशब्दानामनुक्तिश्च विरुद्धता ।
अदृष्टिरन्वयाभावो विपरीतश्रुतिभ्रमः ॥
लिङ्गावकाशराहित्यभ्रमस्ताद्दग्द्वयं तथा ।
बहुताद्दक्त्वमुक्तस्य विरोधोऽर्थात् तथागतिः ॥
समस्तमेतदित्यत्र पूर्वपक्षेषु युक्तयः ।
ता एव बलवत्यस्तु गत्यन्तरविवर्जिताः ॥
सिद्धान्तयुक्तयो ज्ञेया दृश्यन्ते ताश्च सर्वशः ।
इति द्युभ्वादिपादः ॥

End:

अतिक्रमोक्तिः कृतिरर्थलाभः परा गतिः पारगतिस्तदोकः ।
समस्तकार्ये वशिता च सर्वसंभावनायुक्तयस्त्वन्यपक्षे ॥
सामान्यरूपं प्रतिभानमुक्तिराश्चर्यताकृ . मितास्तदोषः ।
विशेषकृप्तिः कृतनिःश्रमश्च माहात्म्यमित्येव सुनिश्चितार्थाः ॥
इति चतुर्थे चतुर्थः पादः ।

Colophon:

इति श्रीमद्रघूत्तमतीर्थयतिकृता न्यायमाला समाता ।

683

न्यायरत्नाकरः

A refutation of the *Candrikā* of Brahmānanda. This Ānandatīrtha was the son of Śrīnivāsopādhyāya.

Beginning:

वन्दे मन्देतरगुणमणिग्रामविश्रामभूमिं
नित्यप्रत्यस्तमितनिखिलावद्यरूपान्धकारम् ।

गम्यं सम्यग्निरतिभजनध्यानविज्ञानयोगैः
श्रीशं व्यासं रघुयदुपतिं सत्यविश्वस्य हेतुम् ॥ १ ॥
छान्दोग्यादिषु देवतोत्तमतया ख्यातो जगद्देशिको
वायुर्मध्यगृहार्यविश्रुतकुले जातः स मध्वात्मना ।
गीताभाष्यमुखाः कृतीर्विरचयन् योऽद्वैतवादादिकान्
प्रत्याख्यत् तममन्दबोधभगवत्पादं प्रपद्येऽधुना ॥ २ ॥
यः श्रीतत्त्वविनिर्णयाभिधमनुव्याख्याभिधानां कृतिं
तानि त्रीणि च खण्डनानि विशदं वाक्यं गुरूक्ताध्वना ।
मायावादिमताटवीं परशुना न्यायोच्चयेनाच्छिनत्
सोऽयं श्रीजयतीर्थराड् दिशतु मे दुर्वादिभङ्गे मतिम् ॥ ३ ॥
श्रीन्यायामृततर्कताण्डवकृती तात्पर्यसच्चन्द्रिका
भेदोज्जीवनमूर्जितार्थहृदयं मन्दारमञ्जर्यपि ।
येनैताः कृतयः कुशाग्रमतिना सर्वोपजीव्याः कृता-
स्तस्मै व्यासयतीश्वराय शिरसा नम्रेण कुर्वे नतिम् ॥ ४ ॥
श्रीमद्व्यासयतीशपूज्यचरणैर्न्यायामृतं संभृतं
तल्लोकेषु तरङ्गिणीं विरचयन्नद्वैतसिद्ध्यादिकान् ।
अद्वैतप्रतिरोपितान् विषतरूनुन्मूलयामास यो
रामाचार्यमिमं स्मरामि मनसा व्यासान्वयाग्रेसरम् ॥ ५ ॥
श्रीरामार्यतरङ्गिणीनिरसनप्रव्यग्रगौडादिम-
ब्रह्मानन्दवचोविधूननकृते जग्रन्थ यः सौरभम् ।
सोऽयं श्रीवनमालिनैष्ठिकमणिर्व्यासान्ववायोद्भवः
श्रीकृष्णार्यवरानुजो विजयतां षड्दर्शनीवल्लभः ॥ ६ ॥
श्रीव्यासव्रतिसार्वभौमरचितन्यायामृतास्वादने
रामाचार्यतरङ्गिणीघनपरीवाहावगाहादिषु ।
प्रौढश्रीवनमालिमिश्ररचितश्रीसौरभाघ्राणने
त्यक्तान्योत्कलिकं मनो मम पुनर्नित्यं समुत्कण्ठते ॥ ७ ॥
श्रीन्यायामृतदूषणाय रचिता याद्वैतसिद्धिः पुरा
तद्भङ्गाय तरङ्गिणी प्रववृते या तामिलां स व्यधात् ।
ब्रह्मानन्दयतिर्मितंपचमतिस्तद्दूषणायाधुना
कुर्वेऽहं वनमालिसौरभदिशा श्रीन्यायरत्नाकरम् ॥ ८ ॥

तत्रादौ तावत् न्यायामृते,

विघ्नौघवारणं सत्याशेषविश्वस्य कारणम् ।
करुणासिन्धुमानन्दतीर्थबिन्दुं हरिं भजे ॥

इत्यनेनोपक्षिप्तविश्वसत्यत्वस्थापनोपयुक्तपरपक्षप्रतिक्षेपाय ननु मिथ्यैव विश्वमिति तदुपक्षेपः कृतः।

End:

तत्र यद्यप्येवं शङ्कितप्रामाण्यकं बाधकं संभवति, तथापि परोक्षस्य च शङ्कितप्रामाण्यकत्वेन निश्चितप्रामाण्यकं बाधकं नास्तीति आचार्याणामाशयः। अनाशङ्कितप्रामाण्यकबाधशङ्का निराकृतेति शिवम्।

Colophon:

इति श्रीकुम्भघोणनिवासिना श्रीनिवासोपाध्यायाचार्यसूनुना आनन्दतीर्थेन कृतो न्यायरत्नाकराख्यव्याख्यात्मको ग्रन्थः संपूर्णः।

684

A famous work divided into four Paricccheda-s. See *HDV*, vol. II, pp. 38 ff.

685

न्यायामृतव्याख्या आमोदः

For an account of the work see *HDV*, vol. II, p. 174 f.

Beginning:

स्तम्भाजम्भारि . . . . दिवसकरः प्राज्ञहंसस्त्रिलोकी-
. . . . . .
ग्रासव्यासक्तनक्तंचरवरतिमिरारिष्टमुष्टिंधयश्रीः।
. . . . . प्रह्लादमेव स हरतु . . . . ॥
. . . . . इष्टदैवतम्।
अर्णवं गुणरत्नानां हरिं नौमि तमीश्वरम् ॥
तं पाणिपल्लवं बाहुशाखं सद्द्विजसेवितम्।
विद्याहासलतापुष्पं मध्वकल्पद्रुमं भजे ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्छति।
सेवे तं जययोगीन्द्रं कामबाणच्छिदं सदा ॥
यो व्यासमुनिदावाग्निः सच्छास्त्रमरुता सह।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥
. . . . भ्रुजराजहंसाल्लसत्कथाश्रोत्रकला वहन्तम्।
कुवादिराट्कुञ्जरशीर्षभेदे हरिं भजे व्यासमुनिं मुनीन्द्रम् ॥

मूकोऽपि वावदूकेन्द्रो जायते यदनुग्रहात् ।
श्रीसुरेन्द्रगुरोः स्तोत्रं कारंकारं भजेऽनिशम् ॥
श्रीमन्मध्वसमाख्यदुग्धजलधेर्धीमन्दरेण श्रमै-
रामथ्योद्धृतमर्पितं च गुरुभिर्न्यायामृतं . . . ।
. . . . . ते मोदाय तस्यादरा-
दामोदं सुमनोमणिर्विजयिनाभिन्द्रः करिष्येऽधुना ॥
व्याख्यानव्याजतोऽन्योक्तदूषणानामलग्नताम् ।
प्रदर्श्य गुरूपादोक्तिमहिमात्र प्रकाश्यते ॥

प्रारिप्सितग्रन्थविघ्नविघाताद्यर्थं शिष्टाचारानुमितवेदबोधितकर्तव्यताकं विशिष्टेष्टदेवतानुतिरूपं मङ्गलमादावाचरति—निखिलगुणनिकायमिति । लक्ष्म्या अपि सकलवाङ्मयदेवतात्वेन नुतेरावश्यकत्वात् भगवत्पारतन्त्र्येणैव स्वेष्टत्वमभिप्रेत्याह—लक्ष्मीसहायमिति ।

End:

अदुःखत्वमपापत्वं चेत्युभयमपि मुक्तस्यैव ; न तु संसारिणः । कुत इत्यत आह—अपरोक्षज्ञानिनोऽपीति । अपरोक्षज्ञानमहिम्ना संचितानां पापानां नष्टत्वेनान्येषामश्लेषेण तयोरसंभवात् प्रारब्धपापेत्युक्तम् । ननु संसारिष्वपि विरक्तिकामिप्राचुर्याभावेन कामहतत्वस्य पुण्यशीलेषु प्राचुर्याभावेनापापत्वादेश्चोपचारेण संभवात् तद्विषयैवास्तु श्रुतिरित्यत आह—स चाबाध इति । मुख्यार्थः

686

न्यायामृतव्याख्या सौगन्ध्यम्

A refutation of Brahmānanda's *Laghucandrikā* on *Advaitasiddhi*. For details see *HDV*, vol. II, pp. 155 ff.

Beginning:

सकलनिगमवाच्यो हेयशून्यो गुणाब्धि-
र्भवजलधितितीर्षुर्ध्येयमूर्तिर्मुकुन्दः ।
भवमतिगतपुंभिः प्राप्यधामाखिलेशः
स्फुरतु स हृदये मे सुप्रसन्नो हयास्यः ॥
जगदुदयलयादीन् दोषहीनो विधत्ते
भ्रमति निखिलविश्वं यस्य गत्यैकदेशे ।
अणुकमिव गवाक्षेऽनन्तपारम्यविष्णोः
स कृपयतु सदा नो गोपसूनुर्मुकुन्दः ॥

कृतनिगमविभागं केशवांशं मुनीन्द्रं
यतिगुरुमरुदंशं देशिकाचार्यवर्यम् ।
कुमतवनकृशानू श्रीजयव्यासतीर्थौ
प्रणमति वनमाली तत्प्रसादैककामः ॥
श्रीमध्वशास्त्रदुग्धाब्धेर्यन्न्यायामृतमुत्थितम् ।
श्राव्यते तस्य सौगन्ध्यं स्वश्रुतस्य बुभुत्सया ॥

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ; तद्ब्रह्म ; तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्, ब्रह्मविदाप्नोति परम्,

ज्ञात्वात्मस्थं हरिं चैव न निवर्तन्ति तेऽव्ययाः ।
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ॥
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ।
ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा ॥
एकान्तभावोपगता वासुदेवं विशन्ति वै ।

इत्यादिश्रुतिस्मृतिभ्यः सगुणब्रह्म जिज्ञास्यं तज्ज्ञानादेव मुक्तिः । तदेव मुक्तानां प्राप्यमित्युक्तम् ।

End:

न तु सद्विलक्षणत्वम् ; देशकालसंबन्धित्वेनाभ्युपगते तच्छून्यत्वरूपस्यासंभवात्, सदसद्विलक्षणत्वयोरेकत्र व्याघाताच्च, सतोऽपि बाधप्रतीतिबलात् बाध्यत्वसंभवात् । तस्मात् प्रातिभासिकाभ्युपगमेऽपि सदसद्विलक्षणत्वरूपसाध्याप्रसिद्धिः । अत एव बाध्यत्वविशिष्टस्य केवलस्य वा साधनेऽपि सिद्धसाधनतोपपद्यत इति वदति । अस्यां व्याख्यायां कस्मिंश्चिदपि मते अप्रसिद्धस्य सदसद्विलक्षण

688

न्यायामृतव्याख्या

The author was the son of Koṇḍubhaṭṭa. He mentions Jayatīrtha, Vyāsatīrtha, Vijayīndratīrtha, Rāmācārya and Lakṣmīnātha who was his teacher and the author of the *Nyāyāmṛtavyākhyā Lakṣmīnāthīyā* (MG, R. 1302). For details see *HDV*, vol. II, p. 296.

Beginning:

लक्ष्मीवक्षोजकाश्मीरसुपङ्काङ्कितवक्षसे ।
नमोऽस्तु भजकानन्दमूलकन्दाय विष्णवे ॥
वेदान्तसद्दृदयगोचरमस्तदोषं
विज्ञानिसेव्यमनपायिसुखैकहेतुम् ।

पूर्णं गुणैरगणितैरनवद्यगन्धै-
लक्ष्मीलसद्वितवक्षसमाश्रयेऽहम् ॥
प्रज्ञाभानुर्भानुरन्तर्निशायाः सद्बोधाब्धेरिन्दुरानन्दसान्द्रः ।
वक्ता हृद्यानादिविद्या विधात्रे धूतावद्यः पातु मां वाजिवक्त्रः ॥
सृष्ट्वा पद्मभुवं जगज्जनिमुखव्यापारमव्याहतं
कृत्वा द्विट्कुलकर्तनं च कलयन् कल्याणपारंपरीम् ।
कावेरीसरिदन्तरे भुजगराट्पर्यङ्कशायी हरिः
श्रीमान् पश्चिमरङ्गधाम्नि तनुतां श्रेयांसि भूयांसि नः
येनाकाशि पुराणसूत्रकिरणैस्तत्त्वं परं चापरं
येनाखण्डि महत्तमो हृदयगं तापश्च सांसारिकः ।
येनामोदि सुलोककैरवचयः श्रीभारतज्योत्स्नया
विद्यारूपकलाभिपूर्णममलं तं व्यासचन्द्रं नुमः ॥
येनाबोधि कुशेशयं श्रुतिशिरस्तत्सूत्रजातं परं
तत्त्वं गोभिरकाशि गाढतिमिरं चाखण्डि हृद्देशगम् ।
लोके सज्जनचक्रवाकनिचयः प्रामोदि तेनान्वहं
पूर्णप्रज्ञदिवाकरेण जलजं मा त्याजि मे मानसम् ॥
श्रीमदानन्दतीर्थार्यसन्निबन्धनसारसम् ।
प्रबोधितं येन गोभिस्तं जयार्यगुरुं भजे ॥
श्रीमन्मध्वनिबन्धनामृतभवं सत्तर्कनालं लस-
न्मीमांसानयपत्रमब्जमहिराड्वाणीकनत्कर्णिकम् ।
वेदान्तस्मृतिसारसौरभमितं भृङ्गैः सदा सज्जनै-
र्येन व्यासयतीश्वरेण रचितं न्यायामृतं तं भजे ॥
न्यायामृतरसाभिज्ञं सर्वतन्त्रेषु कोविदम् ।
वादिकुञ्जरहर्यक्षं विजयीन्द्रगुरुं भजे ॥
विद्वन्मण्डलसंश्लाघ्यपाण्डित्यप्रतिभान्वितम् ।
रामचन्द्रगुरुं वन्दे मध्वसिद्धान्तदीक्षितम् ॥
श्रीमत्कृष्णपदाम्भोजजुषं हंसकुलोत्तमम् ।
आनन्दतीर्थरसिकं लक्ष्मीवल्लभमाश्रये ॥
दुर्वादिभीषणं शान्तं सर्वशास्त्रेषु कोविदम् ।
लक्ष्मीनाथमुनिं सेवे मम देशिकमन्वहम् ॥
वादिवारणपञ्चास्यो वैष्णवाब्धिसुधाकरः ।
वाञ्छितार्थप्रदो भूयाद् वाग्मी लक्ष्मीपतिर्गुरुः ॥
सन्तः सारविदः सदा मयि कृपां कुर्वन्तु वाचो मम
स्वीकुर्वन्तु . . . . क्षाम्यन्तु दोषान् बहून् ।

वैराग्यं वितरन्तु मे जडमतेः संभावयन्तूत्तमां
भक्तिं माधवपादपद्मयुगले नैश्रेयसीं निर्मलाम् ॥
न्यायामृतातिगम्भीरवाक्यानां सत्प्रपञ्चने ।
विबुधा विजयीन्द्राद्याः शक्ता यद्यपि नेतरे ॥
तथापि नापहास्योऽहं बालत्वान्महतामिह ।
पितरौ बालचेष्टां हि मन्वाते कौतुकावहाम् ॥
कुण्डलादिपदेनेयं कोण्डुभट्टतनूभुवा ।
न्यायामृतस्य विवृतिः क्रियते गिरिसूरिणा ॥

इह खलु पदवाक्यप्रमाणपारावारपारीणः सर्वतन्त्रस्वतन्त्रः श्रीमद्वैष्णवसिद्धान्तरति . . . . चार्यः षड्दर्शनीवल्लभः परमहंसपरिव्राजकाचार्यः सकलविद्वन्मणिचिन्तामणिः अधीताधिगताशेषब्रह्मविद्याराशिः वेदान्तविद्योतमानस्वान्तः पूर्णप्रज्ञः . . . . . स्वेष्टदेवतां प्रस्तौति—निखिलेति ।

End:

यथाकथंचित् प्रातिभासिकस्य प्रसिद्ध्यनङ्गीकारे न परस्य

689

A short work on the categories accepted in the Dvaita school. The author was the pupil of Mahābhāṣya Raghunāthasūri. MG, D. 15717 attributes the authorship to Vijayīndrabhikṣu. For further details of this work and its commentary described below, see *HDV*, vol. II, p. 356.

690

पदार्थसंग्रहव्याख्या मध्वसिद्धान्तसारः

Beginning:

कमलाकान्तमानम्य रघुनाथगुरूनपि ।
पदार्थसंग्रहव्याख्यां करिष्यामि यथामति ॥

इह खलु जगदुदयादिनिमित्तत्वेन परमात्मतत्त्वज्ञानं मोक्षसाधनमिति अवान्तरानेकभेदभिन्नपदार्थनिरूपणं कुर्वन् ग्रन्थादौ मङ्गलमाचरति—लक्ष्मीपतिमिति । ननु नैयायिकादिभिरेव पदार्थनिरूपणस्य कृतत्वात् व्यर्थ एवायं ग्रन्थ इत्यत आह—अज्ञसेति । नैयायिकादिनिरूपितपदार्थमध्ये कस्यचित् स्वरूपत एवाभावात् केषांचित् शास्त्रविरुद्धतया निरूपणादाज्ञस्यमेव नास्तीति भावः ।

End:

परमात्मनः वैषम्यनैर्घृण्यादिदोषप्रसङ्गात् । न च कर्मणां . . . एवानादित्वं कर्मणामिति टीकादिविरोधप्रसङ्गात् । गीताभाष्येऽपि यदि सादिः संसारः पूर्वकर्माभावात्

691

पदार्थसंग्रहव्याख्या मध्वसिद्धान्तसारः

This is the same commentary as the above; but with different introductory verses as given below:

लक्ष्मीनारायणं वन्दे पूर्णबोधगुरूनपि ।
जयार्यान् व्यासराजांश्च मद्गुरूनपि सादरम् ॥
वेदगर्भकुलीनेन पद्मनाभेन धीमता ।
मध्वसिद्धान्तसारोऽयं तन्यते सेव्यतां बुधैः ॥

692

परतत्त्वप्रकाशिका

An original treatise on Dvaita Vedānta proving that Lord Viṣṇu is the Supreme Reality. See *HDV*, vol. II, p. 179.

Beginning:

सर्वतन्त्रस्वतन्त्रेण विजयीन्द्राख्यभिक्षुणा ।
तन्यते तत्त्वविद्रीत्या परतत्त्वप्रकाशिका ॥

इह हि नित्यनिर्दोषतया सकलशिष्टैः स्वीकृतप्रमाणभावेषु वेदेषु सदेव सोम्येदमग्र आसीत्, ब्रह्म वा इदमग्र आसीत्, आत्मा वा इदमेक एवाग्र आसीत्, इत्यादिजगत्कारणत्वप्रतिपादनपराणि वाक्यानि तावच्छूयन्ते । तथा, यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति ।

End:

श्रुतिस्मृतिपुराणाद्युक्तकृत्स्नजगत्कारणत्वादिरूपलक्षणानुरोधेनोदाहृतानेकश्रुतिस्मृतिपुराणादिप्रमाणानुरोधेन च परतत्त्वशब्दितं परं ब्रह्म नारायणरूपमेव । न तु तदन्यब्रह्मशिवादिदेवतारूपमिति स्थिरपुरुषार्थप्रेप्सुभिः नारायणरूपमेव परं ब्रह्मोपास्यं प्राप्तव्यं च । श्रुतिवाक्येषु क्वचित् क्वचित् क्षुद्रोपद्रव उभयसमाधेयत्वाद्वोपेक्षित इति सर्वमनवद्यमिति सिद्धान्तसंक्षेप इति ।

सुरेन्द्रमुनिशिष्येण विजयीन्द्राख्यभिक्षुणा ।
नृसिंहप्रीतयेऽकारि परतत्त्वप्रकाशिका ॥
ये मीमांसकमुद्रया श्रुतिशिरस्तात्पर्यभूमिः परं
तत्त्वं श्रीहरिरेव नान्यदिति तं निश्चेतुमुद्युञ्जते ।

तत्तत्त्वे दृढभक्तिसंपदमितः प्राप्तुं च तैरन्वहं
सेव्योऽयं विजयीन्द्रसंयमिवचोगुम्भः सुधास्वादिमा ॥

Colophon:

इति श्रीमत्सर्वतन्त्रस्वतन्त्राणां श्रीमत्सुरेन्द्रतीर्थपूज्यपादानां शिष्येण विजयीन्द्रभिक्षुणा विरचिता परतत्त्वप्रकाशिका समाप्ता ।

693

परतत्त्वप्रकाशिका

The following additional stanzas are found in the beginning:

क्रोधोदग्रच्छटाग्रैः शिथिलितविगलत्तारकल्हारहारी
नक्षत्रस्वच्छमुक्तावलिवलितविधुच्छत्रसच्छायकायः ।
रक्षोवक्षोविनिर्यत्क्षतजनिधुसृणालेपजातावलेपः
सोऽव्यान्नो व्याजसिंहो मिलितजयरमो वीरशृङ्गारधारी ॥
कल्याणगुणपूर्णाय वल्लभाय श्रियः सदा ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः ॥
तं पाणिपल्लवं बाहुशाखं सद्द्विजसेवितम् ।
विद्याहासलतापुष्पं मध्वकल्पतरुं भजे ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवे तं जययोगीन्द्रं कामबाणच्छिदं सदा ॥
श्रीमन्मध्वमताब्धीन्दुं दुर्वादिफणिपक्षिपम् ।
ब्रह्मण्याख्यमुनेः शिष्यं व्यासदेशिकमाश्रये ॥
मूकोऽपि वावदूकेन्द्रो जायते यदनुग्रहात् ।
श्रीसुरेन्द्रगुरोस्तस्य पादौ नत्वा गिरं भजे ॥
विजयीन्द्रयतीन्द्रेण विद्वदानन्ददायिनी ।
तन्यते तत्त्वविद्रीत्या परतत्त्वप्रकाशिका ॥

694

A metrical work on the greatness of Praṇava and how it reveals the truth of the Dvaita system and on the method of reciting the Praṇava by Yati-s or Saṃnyāsin-s according to Mādhva custom.

695

A refutation of the inference used by Advaitin-s to prove the falsity of the world.

701

प्रपञ्चमिथ्यात्वानुमानखण्डनविवरणव्याख्या

These verses are found at the end:

प्लवाब्दे पुष्यमासे च पौर्णम्यां सौम्यवासरे ।
श्रुतिगर्भकुलोत्पन्ननृसिंहार्यस्य सूनुना ॥
व्यंकण्णेन च मध्याह्ने लिखिता श्रीशतुष्टये ।
शुभा प्रपञ्चमिथ्यात्वमानखण्डनटिप्पणी ॥
अनेन लेखनेनैव प्रीतो भवतु मद्गुरुः ।
अष्टमी प्रा० १५ दिने समापितः ॥

703

The work has many commentaries of which those of Janārdana, Rāghavendra, Vijayīndra, Vedeśa, Satyanātha, Narasiṃha, Śrīnivāsa and Viṭṭhala have been published. The work is divided into three Pariccheda-s dealing with Pratyakṣa, Anumāna and Śabda.

704

The author was the pupil of Śrīnivāsabhaṭṭa of Dakṣiṇa Madhurā. The commentary is called *Jayatīrthavijaya* in the colophons.

707

प्रमाणपद्धतिव्याख्या पञ्जिका

Beginning:

निरस्तदुर्मतध्वान्तं सत्सिद्धान्तप्रकाशकम् ।
श्रीमदानन्दतीर्थार्यसूर्यं सम्यगुपास्महे ॥

नत्वा ते चरणौ वाणि याचे त्वामहमन्वहम् ।
जयतीर्थमुनेर्वाचां भावं मे बोधयेत्यलम् ॥
जयतीर्थमुनीन्द्राणां भारतीतरिमाश्रये ।
प्रवेष्टुं मध्वसिद्धान्तसिन्धुं बुद्धिविशुद्धये ॥
रघूत्तममुनीन्द्रा ये सर्वशास्त्रविशारदाः ।
विद्यागुरून् कुलगुरून् नौमि तान् मे जगद्गुरून् ॥
प्रमाणपद्धतेर्गूढभावाया भावबुद्धये ।
पञ्जिका क्रियते रोट्टिव्यंकटाद्रिविपश्चिता ॥
व्यक्तं त्यक्त्वा यदव्यक्तं तद्व्यक्तीक्रियते मया ।
मूलान्यत्र समालोच्य न चोन्मूलं विलिख्यते ॥

इह खलु सुखमेव मे स्यात् दुःखं मनागपि मा भूदिति निखिलापेक्षितस्याशेषानिष्टनिवृत्ति-विशिष्टानन्दादिस्वरूपाविर्भावलक्षणमोक्षस्य नारायणात्यर्थप्रसादमन्तरेणायोगात्, तादृशप्रसादस्य तस्मिन् भक्त्युद्रेकं विना असंभवात्, तस्य च तत्साक्षात्काराभावेऽनुपपत्तेः, तत्साक्षात्कारस्य च तद्विषयकश्रवणमननानिदिध्यासनावृत्तिव्यतिरेकेणानुदयात्, श्रवणादेश्च वैराग्याधिकारविरहेऽनुत्पत्तेः, वैराग्यस्य च नित्यानित्यवस्तुविवेकमन्तरा अभावात्, तद्विवेकस्य च प्रमाणसाध्यत्वात्, प्रमाणानां च प्रामाण्याभासविविक्तत्वप्राबल्यादिना ज्ञातानामेवार्थावधारणहेतुत्वोपपत्तेः ।

End:

तृणादाविष्टानिष्टासाधनत्वरूपौदासीन्यानुमानं संपाद्य तदनुमितिरूपामुपेक्षाबुद्धिं प्रतिपद्यत इति व्याख्येयम् ; तासामनुमानफलत्वादित्युक्तत्वादिति बोध्यम् । विशिष्टेनेति । न निर्विकल्पकं नाप्युक्तरूपानुमितय इति भावः ।

Colophon:

इति प्रत्यक्षप्रकरणं समाप्तम् ।

711

प्रमाणलक्षणटिप्पणम्

Beginning:

वराहं वरदं नत्वा पूर्णबोधेष्टदेवतम् ।
मानानां लक्षणं साक्षाद्विवृणोमि यथामति ॥

ईशज्ञानं लक्षयति—सर्वार्थविषयमिति । अत्र सर्वे च ते अर्थाश्च सर्वार्थाः तद्विषयमिति, सर्वेण प्रकारेणार्थविषयमिति च विग्रहद्वयं तन्त्रेणोपात्तम् । तेनाशेषविशेषप्रकारेण सर्वार्थविषयमीश्वर-ज्ञानमिति लक्ष्यते । तेन सर्वत्वप्रकारेण सर्वार्थविषयत्वम् ; सर्वे सामान्यतो यस्मात् सर्वैरप्यनुभूयते

इति भगवत्पादोक्तेः सर्वपुरुषज्ञानेषु गतमिति अतिव्यापकं लक्षणमिति चोद्यानवकाशः। लक्ष्मीज्ञानं लक्षयति—ईशे सार्वत्रिकमिति।

End:

उभयविधमिति। अत्र यथार्थप्रचुरं मुक्तियोग्यबाह्यज्ञानम्, अयथार्थप्रचुरमासुरं मध्यममिति विशेषोऽवगन्तव्यः; तदिन्द्रिये तथा वक्ष्यमाणत्वादिति सर्वमतिमङ्गलम्।

Colophon:

वराहसेविना नित्यं श्रीनिवासाभिधायुजा।
मानानां केवलानां च लक्षणं विवृतं मया॥

712

This commentary mentions Jayatīrtha's commentary on the *Pramāṇa-lakṣaṇa* by the name *Pañcikā*, while Jayatīrtha himself calls it *Nyāya-kalpalatikā*.

713

प्रमाणलक्षणटीकाविवृतिः वाक्यार्थकौमुदी

The author refers to Jayatīrtha's *Pramāṇalakṣaṇaṭīkā* by the name *Pañcikā*.

Scribal remarks at the end:

नभोमासेऽसिते पक्षे चतुर्थ्यां स्थिरवासरे।
लिखितं नागपुर्यां च नृसिंहाख्येन सूनुना॥
शोभकृद्वर्षज्येष्ठस्य शुक्लपक्षे हरेर्दिने।
श्रुतिगर्भकुलोद्भूतराघवेन्द्रेण शोधिता।
यथामति गुरुप्रीत्यै मानलक्षणटिप्पणी॥

714

For an estimate of the work see *HDV*, vol. I, pp. 169 ff.

717

भागवततात्पर्यनिर्णयः सव्याख्यः

The scribe adds at the end:

श्रीमद्भागवताख्यानं द्वितीयस्कन्धपुस्तकम्।

आचार्यकृततात्पर्यसहितं पुण्यदं शिवम् ॥
गोपालरायाख्यसलेखिनां वरो दासो हरेर्ग्रन्थमिमं व्यलेलिखत् ।
स कृष्णरायात्मजधैर्यशाली वास्तव्यतज्ज्ञापुरिग्रामकेन ॥
भवाब्दे चैत्रकृष्णस्य द्वादश्यां भानुवासरे ।
ऋक्षे तु शतताराख्ये अपराह्णे समापितम् ॥
अंदल्लिग्रामवासस्य श्रीनिवासार्यसज्जने ।
तत्पादसेवार्थमिमं ग्रन्थं च लिखितं मुदा ॥
जलाद्रक्षेत् तैलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम् ॥

718

भागवततात्पर्यनिर्णयः सव्याख्यः

Beginning:

हयग्रीवस्य हन्ता यः कल्पे वागपहारिणः ।
चतुर्मुखाय शिवदं वन्दे तं हयशीर्षकम् ॥
भूतानां देवचरितं दुःखाय च सुखाय च ।
सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥
भजन्ति ये यथा देवान् देवा अपि तथैव तान् ।
छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥

इत्यत्र देवचरितं भूतानां सुखाय च दुःखाय च, साधूनां चरितं भूतानां सुखायैव इत्युक्त्या देवापेक्षया नारदादीनामेव उत्तमत्वमुच्यत इति भाति। तथा भजन्ति ये यथा देवान् देवा अपि तथैव तानित्यादौ देवानां कर्माधीनत्वमुक्त्वा, साधवो दीनवत्सला इत्युक्तत्वात् नारदादिसाधूनां देवापेक्षया अतिशयितत्वमुच्यत इति भाति ।

End:

अन्याः षण्महिष्यः अग्नौ देहं त्यक्तवत्य इति भावः । तयोः रुक्मिणीसत्यभामयोर्मङ्गलम् ।

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्भागवततात्पर्यदीपिकायामेकादशस्कन्धे एकत्रिंशोऽध्यायः ।

वरदाचार्यपुत्रेण विद्वन्नृहरिणा कृता ।
दशैकस्कन्धतात्पर्यदीपिका प्रीतये हरेः ॥

719

भागवततात्पर्यनिर्णयः सव्याख्यः

Beginning:

वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ।
आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः ॥

इत्येतदनन्वितं भातीत्यत इतिशब्दाध्याहारेणान्वयं दर्शयति—य इति । अत्र हेत्वर्थकेतिशब्दाध्याहारे पूर्वोक्तार्थे हेतुरनेनोच्यत इत्युक्तं भवति । ततश्चैवं सार्धश्लोकस्य योजना । पूर्वस्कन्धान्ते यच्छ्रोतव्यमथो जाप्यमित्यादिना यः प्रश्नः कृतः, स एष वरीयान् वरणीयतमः । लोकहितमिति क्रियाविशेषणम् । लोकहितं यथा भवति तथा कृत इत्यर्थः ।

End:

इलावृतस्थेति । जीवव्यपेक्षया चैव तथान्तर्याम्यपेक्षया । मिश्रास्तु स्तुतयो ज्ञेया इत्युक्तरीत्या इलावृतशेषस्तुतिवत् पातालस्थानन्तविषयापि स्तुतिरन्तर्याम्यपेक्षया अनन्तापेक्षया च योजनीयेत्यर्थः ।

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमद्भागवतपञ्चमस्कन्धतात्पर्यदीपिकायां त्रयोविंशोऽध्यायः ।

721

भेदोज्जीवनटिप्पणी भेदसंजीवनी

This is a commentary on Vyāsayati's *Bhedojjīvana* by Śrīnātha.

Beginning:

नुमः सत्यवतीसूनुं यत्प्रसादाच्छ्रियं धियम् ।
कीटोऽपि निश्चलां प्राप लोककौतुककारिणीम् ॥
नत्वानन्दजयव्यासमुनिप्रभृतिसद्गुरून् ।
श्रीनाथनामा तनुते भेदसंजीवनीं शुभाम् ॥
बह्व्यः सन्त्यत्र टिप्पण्यस्तथाप्येषा कृतिर्मम ।
नोपेक्ष्या तदनुक्तार्थलेशस्याप्यत्र शंसनात् ॥

ग्रन्थादौ मङ्गलं कृत्वा निबध्नाति—स्वभावत इति । जयतादित्याशीर्लोटः भाविकालसंबन्धत्वेनार्थः, भाविकालस्येदानीमसिद्धत्वात् तत्संबन्धत्वेनेच्छा युक्तैव । उक्तेच्छायास्तदकारणत्वेऽपि तादृशेच्छावत्सु भगवत्प्रीतिर्भवत्येवेति तादृशेच्छा कर्तव्यैव, राज्ञ एवमेवोत्कर्षस्तूत्तरत्रापीतीच्छावत्सु राज्ञां प्रीतिदर्शनात् । अतो भगवदुत्कर्षस्य सर्वदा सिद्धत्वात् कथमत्रेच्छेति शङ्कानवकाशः ।

End:

इदं चागन्तुकं कथमनादिरूपया श्रुत्यानूद्यत इति शङ्कानिरासाय । प्रवाहतोऽनादित्वं च यादृशरूपाश्रयाधिकरणसामान्यं यादृशरूपाश्रयप्रतियोगिकप्रागभावध्वंसवत्तादृशरूपाश्रयत्वं तेन रूपेण प्रवाहतोऽनादित्वमिति रूपघटितं निर्वाच्यम् । मन्दारमञ्जर्युक्तस्यैकप्रवाहेत्यादिलक्षणवाक्य

723

For an account of the work see *HDV*, vol. I, p. 173 ff.

730

महाभारततात्पर्यनिर्णयव्याख्या प्रमेयमणिमाला

The commentator was the younger brother and pupil of Tīrthācārya alias Ānandatīrtha, son of Viṭṭhalācārya.

Beginning:

श्रीमदानन्दतीर्थार्यहृदयाम्बुजवासिनम् ।
रमाबाहुलताश्लिष्टं नारायणमहं भजे ॥
श्रीमदानन्दतीर्थार्यतरणिर्नो हृदम्बरे ।
लसन्नज्ञानतमसं हन्याद्विज्ञानरश्मिभिः ॥
श्रीमदानन्दतीर्थार्यशास्त्राम्भोधिं विमथ्य यः ।
उद्दधार सुधां वन्दे तमहं जययोगिनम् ॥
वेदान्तभाष्यनिचयस्तथा भारतनिर्णयः ।
विवृतौ येन तं वन्दे व्यासतीर्थाभिधं गुरुम् ॥
श्रीमदानन्दतीर्थार्यकृतशास्त्रपयोनिधिम् ।
यो विचार्य ददौ ज्ञानं शुद्धं तं गुरुमाश्रये ॥
श्रीविट्ठलार्यतनुजश्रीमत्तीर्थार्यसद्गुरोः ।
स्मृत्वा पदाब्जे व्याकुर्वे महाभारतनिर्णयम् ॥

परमानन्दाद्यात्मकस्य परमात्मनः प्रतिबिम्बतया स्वतः चिदानन्दाद्यात्मकस्य जीवस्याविद्या-कामकर्मादिनिमित्तबन्धध्वंसाय निखिलजीवजडात्मकप्रपञ्चादत्यन्तविलक्षणतया निखिलगुणगणात्मकतया निरस्तसमस्तदोषतया परमपुरुषमवगमयितुं सकलसदागमानां प्रवृत्तिः ।

Colophon on p. 118:

इति श्रीविट्ठलाचार्यतनुजश्रीमत्तीर्थाचार्यानुजेन तच्चरणसेविना श्रीनिवासेन विरचितायां प्रमेय-मणिमालायां प्रथमोऽध्यायः ।

Colophon on p. 640:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमन्महाभारततात्पर्यनिर्णयस्य टीकायां श्रीविट्ठलाचार्यतनूजश्रीमत्तीर्थाचार्यचरणसंसेविना श्रीनिवासेन रचितायां प्रमेयमणिमालायामष्टाविंशोऽध्यायः।

End:

अन्येषां तु महाहानिः स्यादिति भावः। यथोक्तम्—

चन्द्रसुग्रीवयोश्चैव स्वोच्चदारपरिग्रहात्।
प्राप्तहानिरभून्नैव कृत . . . . . ॥

731

महाभारततात्पर्यनिर्णयव्याख्या

Beginning:

आनन्दतीर्थहृत्पद्मकर्णिकावासमच्युतम्।
नत्वा भारततात्पर्यनिर्णयं विवृणोम्यहम्॥

अथ श्रीमद्भारततात्पर्यनिर्णयव्याजेन सकलशास्त्रतात्पर्यं दर्शयितुकामो भगवानाचार्यः स्वयमन्तरायविधुरोऽपि निरन्तरायप्रारिप्सितपरिसमाप्त्यादिहेतुभूतमिष्टदेवतानतिरूपं मङ्गलं शिष्यान् ग्राहयितुमनुष्ठितं ग्रन्थादौ निबध्नाति—नारायणायेति।

Colophon on p. 108:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमन्महाभारततात्पर्यनिर्णयव्याख्याने वरदराजीये प्रथमोऽध्यायः।

End:

तेन विदारित इति हेतोः भृशमत्यन्तं रुषान्वितः कोपेन युक्तः सन् अमोघमव्यर्थमुग्रं प्राणापहारकं स्वयंभुवा ब्रह्मणा स्वस्य दत्तं बाणमाशु विप्रकृष्य कर्णान्तं नीत्वा अस्य लक्ष्मणस्य ललाटमध्ये प्रमुमोच अमुचत्।

736

A tract in twenty verses refuting the tenets of Advaita. See *HDV*, vol. I, p. 185 f.

747

मिथ्यात्वनिरुक्तिखण्डनम्

A refutation of the definitions of the term *mithyātva* found in the works of Madhusūdanasarasvatī, Gauḍabrahmānanda and Gokulanātha.

Beginning:

इति युक्त्या च शुद्धब्रह्मण्येव धर्मानङ्गीकार इति। तत् तुच्छम्। साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः साक्षित्वचेतृत्वनिर्गुणत्वधर्मबोधकत्वेन त्वदुक्तान्वयव्यतिरेकयोरभावात्; युक्तेस्तु प्रपञ्चेऽपि वक्तुं शक्यत्वात्।

End:

अत्राह गौडब्रह्मानन्दः—यद्यपि कल्पितचित्संबन्धः चैतन्येऽप्यस्ति। सत्यत्वादिरूपस्य तस्य स्वधर्मतास्वीकारात् . . . . . अप्रयोजकत्वात्।

748

विरोधोद्धारः

An answer to the discrepancies pointed out in the works of Ānandatīrtha. The work is divided into two parts.

Beginning:

अभ्रमं भङ्गरहितमजडं विमलं सदा।
आनन्दतीर्थमतुलं भजे तापत्रयापहम्॥

अथैव कृष्णकेशस्य कृष्णस्येत्यनुव्याख्यानस्य पूर्वेन्द्रोऽसौ यज्ञनामा रमेशः स वै कृष्ण इति निर्णयवचनस्य, पञ्चात्मकः स भगवान् द्विषडात्मकोऽभूत् पञ्चद्वयी इति तत्रैव वचनान्तरस्य,

तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषा युतः।
जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति॥

इति भागवतवचनस्य,

नरनारायणावेतौ पुराणावृषिसत्तमौ।
ताविमावभिजानीहि हृषीकेशधनंजयौ॥

इति भारतवचनस्य च विरोध इति। अत्राहुर्गुरवः।

End:

प्रलयकाले क्षणमात्रमीश्वरानुज्ञया स्वाप इति तद्विवक्षया सुषुप्तिसंस्थानब्रह्मादिवाक्यानां प्रवृत्तिरित्यविरोध इति ३४ विरोधोद्धारः।

Colophon:

इति विरोधोद्धारस्योत्तरार्धं समाप्तम्। इति विरोधोद्धारः समाप्तः।

Post-colophon writing:

इति पाण्डुरङ्गीमाधवाचार्यसुतकेशवार्येण लिखितम्।

749

This work refutes Advaitic principles and tries to prove the supremacy of Viṣṇu. See *HDV*, vol. I, pp. 194 ff.

755

विष्णुतत्त्वनिर्णयटीकाव्याख्या भावबोधः

Beginning:

नत्वा लक्ष्म्याः पतिमानन्दतीर्थं तथा जयार्यं परमं गुरुं च।
गुरुं च मे जयतीर्थार्यभावं वक्ष्ये विष्णुप्रीतयेऽहं स्वशक्त्या॥

अथ परमकारुणिकः जय(आनन्द)तीर्थाचार्यैः यथायोगमिष्टेष्टसाधनत्वाभ्यां सकलसज्जनापेक्षित-विष्णुतत्त्वनिर्णयमुद्दिश्य प्रकरणं निर्माय तस्य तादर्थ्यज्ञापनाय व्यधिकरणबहुव्रीहिसमासविवक्षया विष्णुतत्त्वनिर्णय इति नाम चास्य चकार। तथाप्यस्यातिगहनगभीरतयाचार्याभिमततच्छब्दवाच्यत्वं मन्दैर्न शक्यते ज्ञातुमिति तथा तच्छब्दवाच्यत्वज्ञापनार्थं तस्य प्रकरणस्य व्याख्यानं कर्तुकामो जयतीर्थश्रीचरणः व्याचिख्यासितप्रकरणाद्यपद्यगतान्तिमपदस्याकाङ्क्षाक्रमेण प्राथम्यात् तत्रापि भावरूपलक्षणप्रतिपादकांशस्य प्राधान्यात् तत्पद्यव्याख्यानदिक्प्रदर्शनार्थं तदुक्तलक्षणभूतगुणवत्त्वेन परदेवतायाः प्रणामरूपं मङ्गलमाचरति—विश्वस्योदयमिति।

End:

विशिष्टव्याख्यानेत्युक्तत्वात् सुरा अधिकारिण इत्युक्तं युक्तम्।

रघुवर्यगुरुप्रोक्तो भावो जयमुनेर्मया।
लिखितो मन्दबोधार्थं प्रीयतां श्रीपतिस्ततः॥

Colophon:

इति श्रीमज्जयतीर्थाचार्यविरचितश्रीविष्णुतत्त्वनिर्णयटीकाभावबोधः श्रीमद्रघुवर्यतीर्थपूज्यपाद-शिष्यरघूत्तमयतिना कृतः समाप्तः। तृतीयः परिच्छेदः समाप्तः।

756

A metrical treatise explaining the Tattva-s or categories of the Dvaita school.

757

ब्रह्मसूत्रभाष्यम्

Beginning:

विश्वं यः स्वकृतं विभज्य बहुधा जीवैरसंख्यैर्युतं
तस्मिन् साधुजनावनाय च मुहुर्धत्तेऽवतारान् बहून् ।
यद्गदाम्बुजभक्त एव लभते मुक्तिं दुरापां परै-
स्तं सर्वज्ञमहं नमामि करुणं नारायणं सद्गुणम् ॥
श्रीवेरापुरमन्दिरे निवसतः कारुण्यवारां निधे-
स्तार्क्ष्यस्थस्य मदर्थमद्भुततनोर्वेदान्तवेद्यात्मनः ।
श्रीवेरासहितस्य यस्य निगमाद्वेदान्तसूत्राण्यहं
व्याकुर्वे झषभूषणः स भगवान् कुर्याद्धरिर्मङ्गलम् ॥
श्रीमद्भागवताभिधं भगवतस्तस्यैव लीलामृतं
संसाराख्यरुगौषधं निरुपमं नारायणेन स्वयम् ।
सर्वाम्नायभुवा समुद्धृतमिदं वेदान्तदुग्धाब्धितो
वेदव्यासकृतैः सुसूत्रचषकैर्नित्यं पिबेयुर्द्विजाः ॥
श्रीमद्गोपालकृष्णाख्यान् श्रीमन्नारायणादिकान् ।
अस्मद्गुरून् प्रणम्याद्य सूत्रार्थो भाष्यते स्फुटम् ॥

श्रीभगवता नारायणेन सर्वदा चेतयमानं प्रकृतिपुरुषात्मकमिदं विश्वं तेनैवान्तर्बहिर्व्याप्तं सत् परिपाल्यते । तथा च सर्ववेदान्तसारे श्रूयते—

येन चेतयते विश्वं विश्वं चेतयते न यम् ।
यो जागर्ति शयानेऽस्मिन्नायं तं वेद वेद सः ॥

इत्यादौ । तत्र प्रकृतिस्तु स्वभावतो जडापि भगवदधिष्ठिता सती स्थूलसूक्ष्मदेहरूपेण जीवान् तत्तत्कर्मानुगुणमावार्य तत्संसृतिहेतुभूता च सती परिदृश्यमानसावरणब्रह्माण्डरूपेणावतिष्ठते । सा हि प्रधानाव्यक्तमायाजाविद्योपाधिबुद्धिशब्दैः सर्ववेदान्तेषु व्यपदिश्यते ।

End:

कस्मात् पुनरिदमवगम्यते । शब्दात् ।

मयेव ब्रह्मणा पूर्णो न बहिर्नान्तरं चरेत् ।
एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ॥
यद्गत्वा न निवर्तन्ते योगी लिङ्गविनिर्गमे ।
आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते ॥

एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते । ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते ।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥
आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥

इत्यादिश्रुतिस्मृतिभ्य इत्यर्थः । तस्मात् परमपदं प्रातानामपुनरावृत्तिरेवेत्यध्यवसीयते । सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति । तथाचैवंविधपरमपदं प्राप्तुकामैः परमकारुणिको भगवान् नारायण एव तल्लीलाकथनाभिधानश्रवणकीर्तनादिलक्षणया भक्त्यैवेहाजस्रं भजनीय इति सर्वं समञ्जसम् ।

श्रीमद्भागवताभिधं भगवतस्तस्यैव लीलामृतं
संसाराख्यरुगौषधं निरुपमं नारायणेन स्वयम् ।
सर्वाम्नायभुवा समुद्धृतमिदं वेदान्तदुग्धाब्धितो
वेदव्यासकृतैः सुसूत्रचषकैर्नित्यं पिबेयुर्द्विजाः ॥

Colophon:

इति श्रीमद्भगवद्बादरायणिशुकाचार्यापरावतारश्रीवत्सकुलतिलकाविरतबृहद्व्रतग्रथितसकलविद्यपरमहंसपरमगुरुनिर्धारितश्रीमद्भागवतराद्धान्तश्रीशुकभगवत्पादाचार्यविरचिते श्रीभगवद्बादरायणसंप्रणीतसर्ववेदान्तसारमीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः । चतुष्टयेऽप्यध्याये सूत्रम् ५५३ । अधिकरणम् १६९ ।

वेदान्तसारमीमांसाभाष्यं सर्वं संपूर्णम् ।

The date of copying:

धातृसंवत्सरं आश्विजकृष्णदशम्यां संशोधितम् ।

Pages 1 to 4 contain शान्तिपाठ.

758

शुकभाष्यार्थसंग्रहः

Beginning:

अखिलनिगमवेद्यं विश्वजन्मादिलीलं
विधिमुखसुरवन्द्यं जीवराशीशमीड्यम् ।
भजनपरवशेभ्यो भुक्तिमुक्ती दिशन्तं
सुरतरुभुवि सन्तं रामभद्रं नमामि ॥

Colophon of the first Adhyāya:

इति श्रीशुकभगवत्पादाचार्यविरचितसर्ववेदान्तसारमीमांसाभाष्यार्थसंग्रहस्तुतौ गार्ग्यकृष्णाचार्य-विरचितायां प्रथमोऽध्यायः ।

End:

आविर्भूय स्वरूपेण यद्भक्ताः परमे पदे ।
ब्रह्म संपद्य नावृत्ताः सीतारामः स मे गतिः ॥
यो नित्यं शुकभाष्यार्थसंग्रहस्तुतिमादरात् ।
अनश्नन् प्रपठेत् तस्य भाष्यपाठफलं भवेत् ॥

759

A metrical work in eleven verses exhorting the mind to be a faithful devotee at the feet of Śrī Kṛṣṇa. For details of the author's life and works see *HIP*, vol. IV, pp. 371 ff.

760

चतुःश्लोकी

Five verses on devotion to the Lord Kṛṣṇa. Although the title and the printed edition show that the work contains only four verses, this MS. contains four additional *pāda-s* inserted after the first *pāda* of the first verse.

Beginning:

सदा सर्वात्मना सेव्यो भगवान् गोकुलेश्वरः ।
स्मर्तव्यो गोपिकाबृन्दे क्रीडन् बृन्दावने स्थितः ॥ १ ॥
सर्वदा सर्वभावेन भजनीयो व्रजाधिपः ।
स्वस्यायमेव धर्मो हि नान्यः कश्चित् कदाचन ॥ २ ॥

End:

अतः सर्वात्मना शश्वद्गोकुलेश्वरपादयोः ।
स्मरणं भजनं चापि न त्याज्यमिति मे मतिः ॥ ५ ॥

Colophon:

इति श्रीवल्लभाचार्यविरचिता चतुःश्लोकी समाप्ता ।

762

Twenty-one verses describing the experience of devotion to the Lord Kṛṣṇa, classified into twenty categories, as enjoyed in different ways by different persons such as musicians, dancers and sages, just as water is held to be different in wells, rivers, ponds, etc.

763

An original and important work of the Śuddhādvaita school. For a short description of the work see *HIP*, vol. IV, p. 374.

764

A tract in nine verses emphasizing the necessity to dedicate everything to the Lord Kṛṣṇa.

766

नवरत्नव्याख्या रत्नप्रकाशः

The commentator was the son of Vallabha. For details of his works see *HIP*, vol. IV, pp 377 ff.

Beginning:

विकल्पेन बाधनमित्यर्थः। एवं सति गुर्वाज्ञाया अबाधने वा सेवैव मुख्या यतोऽतस्तथैव स्वे . . . हुरत इति। एवं सति पर्यवसितं सुखमित्याशयेन सुखमित्युक्तम्। कदाचित् पुत्रादि-वियोगजनितदुःखेन चिन्तासंभवे गतिमाहुः—चित्तोद्वेगमिति।

End:

भक्तिमार्गे प्रवृत्तस्य दार्ढ्यार्थमिदमुच्यते।
अन्धस्य सूर्य . . . स्यात्र नार्थिता॥
भक्तिमार्गसुधासिन्धोर्विचारमथनैः स्वयम्।
स्फुटीकृतानि रत्नानि श्रीमदाचार्यपण्डितैः॥
मयोज्ज्वलीकृतानीत्थं हृदि कृत्वा व्रजाधिपम्।
भजन्तु भक्तान् येनासौ न विमुञ्चति कर्हिचित्॥

Colophon:

इति श्रीविट्ठलेश्वरविरचितो रत्नप्रकाशः समाप्तः।

767

This work defines the term *nirodha* in twenty verses and enjoins devotees to withdraw the mind from wordly affairs and place it at the holy feet of the Lord Kṛṣṇa.

768

The author herein describes in five verses five kinds of devotees, Mukhya, Madhyama, Adhama, Vikala and Uttama, according to their states of mind in devotion.

769

For a short description of the work, see *HIP*, vol. IV, p. 376.

770

पुष्टिप्रवाहमर्यादाविवरणम्

This commentator is different from the famous Vallabhācārya. He might have been the son of Viṭṭhalācārya. See *HIP*, vol. IV, p. 375.

Beginning:

मार्गा इति विशेषः। विशेषेणेति। तत्र विशेषा मार्गत्रयेऽपि प्रत्येकं पुष्टिप्रवाहमर्यादाकृत-विशेषाः। तेषां सांकर्याभावाय पृथक् पृथक् निरूप्यन्ते। तत्र पूर्वं मार्गत्रयविभेदं ज्ञापयन् विशेषा-नाह—जीवदेहक्रियाभेदैः प्रवाहेण फलेन चेति। पुष्टिमार्गीया जीवाः वक्ष्यमाणमार्गद्वयजीवेभ्यो भिन्नाः। तेषां देहाः पुष्टिमार्गानुकूला भिन्ना एव। तन्मार्गदेहसंबन्धिक्रिया अपि भिन्नाः।

End:

तस्य भगवत्प्राप्तिरेव; न तु आसुरभावजनितः कोऽप्यन्तराय इति सर्वमनवद्यम्। यद्यप्यत्र ग्रन्थोपसंहारदर्शनाभावादग्रे ग्रन्थोऽस्तीति ज्ञायते, तथाप्यग्रिमग्रन्थस्याप्रसिद्धत्वात् यावत्प्रसिद्ध एव व्याख्यात इति नानुपपत्तिः काचित्।

श्रीमत्कृष्णस्य वागर्थो दुर्बोधः सर्वथा स्वतः।
तत्कृपातस्तदा यस्य बुद्धिगम्यो न चान्यथा॥
नत्वा पितृपदाम्भोजं कृपामधुसुपूरितम्।
तदालोडितबुद्धयैव श्रीमदाचार्यभाषितम्॥
पुष्टिप्रवाहमर्यादाभेदकं शास्त्रमद्भुतम्।
श्रीवल्लभेन व्याख्यातं तत्कृपातो यथामति॥
तेनाचार्याः प्रसीदन्तु मयि निःसाधने स्वतः।
तेनैव मम नैश्चिन्त्यमैहिके पारलौकिके॥

Colophon:

इति श्रीमत्पितृचरणैकतानवल्लभविरचितं पुष्टिप्रवाहमर्यादाविवरणं संपूर्णम्।

The date of copying:

1918 चैत्रवदी 7. पठनार्थं जादवजी आत्मजं

771

Nineteen *anuṣṭubh* verses explaining methods of pursuing the fourfold aims of humanity: Dharma, Artha, Kāma and Mokṣa.

772

Eleven *anuṣṭubh* verses on the means of developing Bhakti or devotion to the lotus-feet of Lord Kṛṣṇa.

773

भक्तिहंसः

On the nature and importance of Bhakti towards Lord Kṛṣṇa.

Beginning:

जयन्ति पितृपादाब्जरेणवो यत्प्रसादतः ।
भक्तिः प्राप्ता तदन्याध्वमोहाभावश्च पण्डितैः ॥
मन्त्रोपासनवैदिकतान्त्रिकदीक्षादिभिः सम्यक् ।
योऽस्पष्टो रमते निजभक्तेषु स मेऽस्तु सर्वस्वम् ॥

ननु किमिदमपूर्वतरमिहोच्यते? सत्यमपूर्वतममपि श्वभ्रपतितमेकसदृशाम् । न तु विदुषाम्; पूर्वमेवानेकप्रमाणसिद्धत्वात् । तथाहि—नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यः इति श्रुतौ यमेवेति सामान्येनोक्त्याग्रिमेण च भगवदङ्गीकारमात्रैक-लभ्यत्वोक्त्या प्रवचनादिपदान्यात्मीयत्वेन भगवदङ्गीकारातिरिक्तयावत्साधनोपलक्षकाणीति ज्ञायते ।

End:

व्रजामि चरणं हरेः शरणमैहिकामुष्मिके
निरस्तनिजसंशयो य इह भाग्यवद्भिः स्मृतः ।
व्रजेशसुतपादपङ्कजपरागरागाञ्चितं
करोति सततं हि मां निजतनूजवात्सल्यतः ॥

Colophon:

इति श्रीगोपीजनवल्लभचरणैकतानश्रीविट्ठलविरचितो भक्तिहंसः संपूर्णः ।

774

Seventeen verses on the importance of *viveka, dhairya* and *āśraya* (the object of devotion).

775

For a short description of the work see *HIP*, vol. IV, p. 374.

776

An explanation in twenty-one verses of the chief tenets of the Puṣṭimārga, which is based on the Lord's grace brought about by Bhakti.

777

सिद्धान्तमुक्तावलीटीकाव्याख्या

The MS. does not give the title of the work; however from a reference found in the work, it appears to be a commentary on a gloss of the *Siddhāntamuktāvali* of Vallabhācārya.

Beginning:

मुक्ताश्रये रत्नविशेषसेव्ये शुकादिवा . . . नोऽभिगम्ये ।
क्षणं गवेन्द्रस्य पदाम्बुजान्ते विश्रम्यतां मानसराजहंसः ॥
मायातमोनिराकर्त्रे . . . . . ।
स्वान्तस्थाय हरेर्नित्यं द्विजराजाय ते नमः ॥

स्वसिद्धान्तरूपमिति । स्वसि . . . . रूपत्वं श्रुतिसिद्धत्वादिति भावः । आवश्यकार्थेति । कृत्याश्चेति सूत्रेण

End:

एतेन भक्त्यभाव इति । भगवत्सांनिध्यदेशेऽपि स्थितौ भक्त्यभावे तथा भवतीति भावः । एतेन भक्तेरावश्यकत्वमुक्तं भवति ।

Colophon:

इति श्रीपितृपादाब्जपरागरससिक्तहृत् ।
श्रीविट्ठलस्तत्सिद्धान्तवाङ्मालां हृदये दधौ ॥

778

सिद्धान्तमुक्तावलीटीकाव्याख्या

The commentator Vallabha seems to have been the son of Viṭṭhala.

Beginning:

यद्वाञ्छयैव मोक्षान्ताः पुमर्था अधरीकृताः ।
स कोऽपि पितृपादाब्जरेणुर्मह्यं प्रसीदतु ॥

अग्रे वक्ष्यमाणैरिति । मायिकं सगुणमित्यादिभिरित्यर्थः । तत्तु परस्परविरोधमपास्य साक्षात् श्रुतिनिरूपितं वक्ष्यामीत्यर्थः । तस्यैव स्वकीयत्वज्ञापनाय स्वशब्दः । अशेषाणामिति । आसुरव्यतिरिक्तानामशेषाणामित्यर्थः ।

End:

ननु ज्ञानिभक्तयोः साम्यमेव कुतो नेति चेत्, न; ज्ञानमार्गस्याक्षरपर्यवसायित्वात् भक्तिमार्गस्य पुरुषोत्तमपर्यवसायित्वात् । तयोर्भेदस्य च गङ्गादृष्टान्तेनैव पूर्वमुक्तत्वात् तत्तारतम्येन तत्परयोरपि तारतम्यमिति स्पष्टमेव । ज्ञानभक्तिमार्गयोरिति । तदेवोक्तं गङ्गायां त्विति ।

Colophon:

इति श्रीपितृपादाब्जपरागारक्तचेतसा ।
श्रीवल्लभेन . . मुक्तावल्ल्याः प्रकाशिता ॥

The following lines are found in the beginning:

अनारब्धानामेव कर्मणां नाशकत्वात् । प्रारब्धकर्मणां नाशस्तु पुष्टयैवेति सिद्धं भक्तेरेवावश्यकत्वम् । मूले एवमिति; पूर्वोक्तप्रकारेण । स्वशास्त्रेति । स्वशास्त्रस्य सेवाप्रकाररूपः सिद्धान्तः । गुप्तं निरूपितमिति । गुप्ततया निरूपितम् । एतदिति । यन्मया गुप्तं निरूपितं एतत् बुद्ध्वा विमुच्येत सर्वसंशयात् ; एतद्ग्रन्थनिवर्त्याद्विमुक्तो भवतीत्यर्थः । पुनः कदापि संशयं न प्राप्नोतीति विशब्दार्थः ।

अस्मत्पितृचरणानां लेखः । श्रीरघुनाथकुलोद्भूतश्रीविट्ठलेशात्मजवल्लभानां लेखः ।

779

A short work of nine verses on the truth of the Śuddhādvaita doctrine. The author is said to have received God's command at midnight on the eleventh day of the bright fortnight of the Śrāvaṇa month to preach the Śuddhādvaita system to people.

781

Eight *anuṣṭubh* verses dealing with the nature of the service to be rendered to Lord Kṛṣṇa and the fruit derived therefrom.

782

अनुभवसूत्रम्

A metrical treatise divided into eight Adhikaraṇa-s. The author was the son of Saṃgameśvara, whose geneology, given in this work, is as follows: Upamanyu—Bhīmanātha—Kaleśvara—Boppanātha—Nākarāja—Saṃgameśvara. See *HIP*, vol. V, pp. 61 ff.

Colophon:

इत्यनुभवसूत्रे शिवसिद्धान्ततन्त्रे षट्स्थलनिर्णये क्रियाविश्रान्तिर्नामाष्टममधिकरणम् ।

The work contains the following chapters:

१. पारंपर्यक्रमः, २. स्थलनिर्णयः ३. लिङ्गस्थलनिरूपणम्, ४. अङ्गस्थलनिरूपणम्, ५. लिङ्गाङ्गसंयोगविधिः, ६. सर्वाङ्गलिङ्गसाहित्यम्, ७. लिङ्गार्पणसद्भावः, ८. क्रियाविश्रान्तिः ।

783

आत्मतत्त्वपरीक्षा

An original Śaivasiddhānta treatise. The author was the son of Umāmaheśvaradīkṣita, a native of Konerirājapuram in Tanjavur District.

Beginning:

स्यादेतत् । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । तद्धैक आहुः । असदेवेमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत । सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजतेत्यादि संदर्भोपगतम् । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतिर्मिथ्यात्वे न मानम् । अत्र ह्यद्वितीयमिति पदे न द्वितीयम् अद्वितीयमिति तत्पुरुषसमासाभ्युपगमे ब्रह्म न द्वितीयम् ; किंतु प्रथमं तृतीयं वैत्यर्थः स्यात् । स च न संभवति ।

Colophon on p. 334:

इति श्रीचोलमण्डलकृतनिवासहारीतान्वयप्रसूतसर्वतन्त्रस्वतन्त्रश्रीमदुमामहेश्वराचार्यतनूज-भास्करदीक्षितविरचितायामात्मतत्त्वपरीक्षायामज्ञानपरीक्षाख्यं सप्तमं प्रकरणम् ।

End:

ननु कथं तद्गुणोपासनमात्रेण तद्गुणकः स्यादिति विचिकित्सायाम् अथ खलु क्रतुमयः पुरुष इति पूर्ववाक्येन यस्मात् क्रतुशब्दितध्यानप्रधानोऽयं जीवः, न तूपायान्तरप्रधानः, अतो ध्यानमात्रेण तद्गुणकः स्यादेवेत्युपपत्तिरपि तत्र दर्शिता ।

Contains the following Prakaraṇa-s:

४. मिथ्यात्वपरीक्षा, ५. साक्षिपरीक्षा, ६. भ्रान्तिपरीक्षा, ७. अज्ञानपरीक्षा, ८. अखण्डार्थ-त्वपरीक्षा ।

784

आनन्दलहरी आनन्दचन्द्रिकाव्याख्यासहिता

A metrical work of fifty-nine verses on the Śaivasiddhānta with a commentary. The author attempts to reconcile the views of Nīlakaṇṭha and Śaṃkara regarding Vedāntic principles. To this end, the term *ānandamaya* found in the Upaniṣad-s and the *Brahmasūtra-s* is interpreted so as to indicate the Citśakti of Śiva.

End:

आनन्दलहरीं हृद्यामादधानेह चन्द्रिका ।
कुर्यात् कुवलयाभिख्यावतां सुमनसां मुदम् ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीरङ्गराजाध्वरिवरसूनोरप्पय्य-दीक्षितस्य कृतावानन्दचन्द्रिका संपूर्णा ।

785

ईशविलासः

This is an original treatise on Śaivasiddhānta trying to prove the supremacy of Sadāśiva. The author quotes passages from the Upaniṣad-s, Śaṃkarācārya, Vācaspatimiśra, Haradattācārya, Ahobaladīkṣita, Gadādharopādhyāya and Vedāntadeśika. The title page of the MS. attributes the authorship to Appayadīkṣita.

Beginning:

यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः ।
संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं नमाम्यहम् ॥

ननु कोऽयं ब्रह्मशब्दार्थः? यस्य परत्वेन नमस्यत्वमुच्यते । यद्यपि बृंहणात् बृंहकत्वाच्चात्मैव ब्रह्मेत्युच्यते । स चायमा कीटपतङ्गेभ्यः आ देवऋषिभ्यश्च प्राणभृन्मात्रस्याहमिति प्रत्यक्षसिद्धत्वेन परत्वाभावाच्च न प्रकृतनमस्कारविषयतां प्रतिपद्यते; तथापि बृंहति बृंहयति तस्मादुच्यते ब्रह्मेति ।

End:

न तस्य कश्चिज्जनिता न चाधिप इत्यतिदिष्टस्वप्रकरणपठितानेकश्रुतिसमूहैः शिवपरत्वस्य साधितत्वात् शिवात् परस्य निराकृतत्वाच्चेति सतां मनोरमम् ।

जीवेशसृष्टिविषयावथ कार्यसत्त्वं
सृष्ट्यादिपञ्चकमथास्य च कर्तृभेदः ।
तारार्थशांभवशिरोव्रतशापमोक्षाः
संशापनाहरिहरैक्ययुतास्तथोक्ताः ॥

787

गायत्र्यर्थविचारः

Appayadīkṣita, in elucidating herein the meaning of verse 55 of his *Śikhariṇīmālā*, tries to prove that the Gāyatrīmantra refers to the God Śiva. About ten lines in the beginning of the work are the same as in the author's commentary *Śivatattvaviveka* on the *Śikhariṇīmālā*, but the further portion is completely different and is in prose whereas the above is in verse. Therefore, presumably the author wanted to explain the topic in more detail in this work.

Beginning:

द्विजानां गायत्री खलु परमुपास्या नियमिता
प्रसिद्धस्तस्याश्च त्वमसि परमं दैवतमिति ।
अकुर्वाणस्यातस्तव चरणसेवां द्विजपशो-
रवस्त्रोऽलंकारः सकलमपि सत्कर्मचरितम् ॥

अयमाशयः—

"त्रैवर्णिकानां सर्वेषां गायत्री परमा गतिः।
कर्मान्तरेष्वशक्तोऽपि तयैव लभते गतिम् ॥
तां विनान्यानि कर्माणि निष्फलानि कृतान्यपि।
अस्मिन्नर्थे न कस्यापि वैदिकस्य विसंमतिः ॥
संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।
यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥
परिहाप्यापि वेदांस्त्रीन् कर्माणि विविधान्यपि।
गायत्रीमात्रमाश्रित्य द्विजो भवति निर्भयः।
गायत्रीहीनवेदास्तु साङ्गा अपि च निष्फलाः ॥"

इत्यादिस्मृतिवचनैर्द्विजशब्दवाच्यानां त्रैवर्णिकानां गायत्र्युपासनं नित्यमिति स्थितम्। गायत्र्याः प्रतिपाद्या च देवता परमशिव एव।

End:

तस्मात् गायत्रीजपस्य शिवध्यानाविनाभावेन तद्विमुखस्य गायत्रीजपाभावेन मन्त्रसाध्ये कुत्रापि कर्मणि नाधिकार इति।

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥

789

णत्वदर्पणम्

In this work, the author attempts to prove that the syllable *ṇa* in the word Nārāyaṇa is justifiable in the sense of Śiva. The author Nṛsiṃha-śāstrin was a resident of Śrīśaila.

Beginning:

नारायणं नमस्कृत्य तत्र णत्वस्य दर्पणम्।
यावद्बाधोदयं साधु करिष्यति नृकेसरी ॥

नारायणशब्दो विष्णुवाचीति निर्विवादम्। लिङ्गपुराणे—

शिवाय शिवलिङ्गाय व्यापिने व्योमव्यापिने।

जलाय जलभूताय नमस्ते जलव्यापिने ।
सर्वाय च नमस्तुभ्यं नमो नारायणाय च ॥

इति ।

End:

नकाराबाधितं तुभ्यं नारायणपदं शिव ।
नादत्तमिति वाक्येन मया दत्तं तवेप्सुना ॥

Colophon:

इति श्रीशैलनृसिंहशास्त्रिविरचितं णत्वदर्पणं समाप्तम् ।

790

तत्त्वचन्द्रिका

A short account of the Tattva-s or categories of the Śaivasiddhānta philosophy. The author was the son of Kacchapeśvarasūri of the Kāśyapa-gotra. His other works are the *Prāsādadīpikā* and the *Tattvamūrtiprabhāvadīpikā*.

Beginning:

भासेव भास्वान् कलितो यया यो
भुक्तौ च मुक्तौ क्षमते पशूनाम् ।
तया ह्यभिन्नः परया स्वशक्त्या
पाशच्छिदव्यात् परमः स शंभुः ॥

अथ तत्त्वविवरणं क्रियते—आत्मतत्त्वं विद्यातत्त्वं शिवतत्त्वं चेति त्रिविधानि तत्त्वानि । तेषु आत्मतत्त्वं यथा—पृथिव्यप्तेजोवाय्वाकाशाख्यानि भूतानि पञ्च । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि ज्ञानेन्द्रियाणि पञ्च । शब्दस्पर्शरूपरसगन्धाख्यास्तन्मात्राः पञ्च । वाक्पाणिपायूपस्थाख्यानि कर्मेन्द्रियाणि पञ्च । मनोबुद्ध्यहंकारचित्ताख्यमन्तःकरणचतुष्टयमपि । आहत्य चतुर्विंशतितत्त्वमपि आत्मतत्त्वमिति अशुद्धतत्त्वमिति भोग्यकाण्डमिति चोच्यते ।

End:

शिवयोगस्तु यथा—अखण्डपरिपूर्णशिवान्तलग्नोऽन्तर्बहिस्तन्मयः सन् यथार्थरूपं शिवं ज्ञात्वा शिव एवाहमहमेव शिव इत्यभेदेनाज्ञानरहितः सन् वर्तते । शिवानुभोगे वह्नावुष्णत्वमिव जले शैत्यमिव शिवे सम्यक् निलीनश्चेत् तदेव शिवभोग इत्युच्यते ।

Colophon:

इति काश्यपान्वयकलशकल्लोलिनीशकुमुदबान्धवायमानस्वच्छमतिकच्छपेशदेशिकतनूजमृत्युंजयसूरिविरचिता तत्त्वचन्द्रिका संपूर्णा ।

791

On the nature of the three Tattva-s or categories known in the Śaivasiddhānta as Pati, Paśu and Pāśa. The author was the pupil of Ugrajyotis. See *AG*, pp. 104-5.

792

The commentator was the son and pupil of Sarvātmaśivācārya. He belonged to the Kauṇḍinyagotra and was a native of Coladeśa. He is described as Lakṣadvayādhyāpaka. See *NCC*, vol. I, p. 48; also *AG*, pp. 107 ff.

794

An original treatise in seventy-five verses explaining the thirty-six Tattva-s or categories accepted in the Śaivasiddhānta philosophy. In the last verse the author is mentioned as Bhojadevanṛpati (King Bhojadeva). The work is referred to by Mādhava in his *Sarvadarśanasaṃgraha* and by Vedāntadeśika in his *Nyāyasiddhāñjana*. He is identical with the author of the *Śṛṅgāraprakāśa* (11th century A.D.). The colophon refers to the work as the *Tattvaprakāśasūtra*.

800

तत्त्वमूर्तिप्रभावदीपिका

This work deals with the greatness of Śiva.

Beginning:

निष्कलात् सकलो योऽभूदिन्द्रचाप इवाम्बरात् ।
पञ्चमन्त्रतनुः पायात् पाशभित् स सदाशिवः ॥

शिवः सदाशिवः महेश्वर इति त्रिविधो भवति । एतेषु शिवो निष्कलः । सदाशिवस्तु सकलनिष्कलः । महेश्वरस्तु सकल एव भवति । एवं भेदो गृह्यते । शिव एकः । सदाशिवस्तु पञ्चविधः । महेश्वरस्तु पञ्चविंशतिविधः । आहत्य एकत्रिंशद्विधो गृह्यते ।

End:

अन्तर्यागबहिर्यागयोः पृथक् पूजनं क्रियापूजेत्युच्यते । एवं निरन्तरं हृदयकमले शिवं पूजयित्वा पुरुषस्य शिवसायुज्यं भवति । एवंविधोक्तशिवपूजाविधिं गुरुमुखेन ज्ञात्वा पूजयेत् । शिवसायुज्यमाप्नोति ।

Colophon:

इति श्रीकाश्यपान्वयकलशकल्लोलिनीवल्लभसुधाकरायमाणाच्छमतिकच्छपेश्वरदेशिकतनयेन मृत्युंजयसूरिणा विरचिता तत्त्वमूर्तिप्रभावदीपिका संपूर्णा।

801

This work explains the nature of the thirty-six Tattva-s or categories of the Śaiva system of philosophy.

802

तत्त्वसंग्रहव्याख्या

End:

अथ केनेदं प्रकरणं कृतमित्यत्राह—

इत्यवदत्तत्त्वानि तु सद्योज्योतिः सुवृत्तिकृत् षष्टया।
भगवानुग्रज्योतिः सर्वज्ञोऽयमनुजग्राह ॥

सुवृत्तिः सद्वृत्तिरिति रौरववृत्तेर्नाम। तत्कर्त्रेदं निर्मितमित्यर्थः।

श्रीमत्खेटकनन्दनार्ककिरणैः सद्वृत्तिवाक्यात्मकै-
र्ध्वस्ताज्ञानतमश्चयेन गुरुणाघोरादिना शंभुना।
तत्त्वज्ञानबुभुत्सुभिर्बुधजनैः संप्रार्थितेनादरात्
तत्त्वानामिति संग्रहस्य विवृतिर्लघ्वी स्फुटा निर्मिता ॥

Colophon:

इत्यघोरशिवाचार्यविरचिता तत्त्वसंग्रहलघुटीका समाप्ता।

804

तत्त्वसिद्धान्तव्याख्या

This work explains the meaning of a verse that gives briefly the principles of Śaivasiddhānta. The author's name is mentioned as Appayadīkṣita on the title page of the manuscript.

Beginning:

तत्त्वसिद्धान्ते अप्पयदीक्षितव्याख्यानं लिख्यते—

ऊर्ध्वोऽध्वा सकलोऽपि बोधकतया शुद्धो धराग्रन्थितो
मोहः स्यादशुचिर्विपर्ययहते शुद्धोऽपि पूतात् परः।

तत्त्वान्येव सहायभूतभुवनेशानैर्युतान्यात्मनां
तिष्ठन्त्या विलयादमूनि च बहिर्भोगप्रदा . . . . . ॥

एवं शिवतत्त्वादिक्षित्यन्ततत्त्वान्युक्त्वा तेषां शुद्ध इति शुद्धाशुद्ध इति अशुद्ध इति त्रिविधत्वमस्तीत्याह—ऊर्ध्व इति। ऊर्ध्वतत्त्वान्येव मायातत्त्वोपरि वर्तमानः सकलोऽपि समस्त एवाध्वा शुद्धविद्यादिशिवतत्त्वान्तं पञ्चतत्त्वम्। बोधकतया तत्र स्थितानामात्मनां सर्वगत्वसर्वकर्तृत्वादिज्ञानोत्पादकतया शुद्धः। शुद्धतत्त्वात्मनां भोगसाधनार्थं परमशिवेन साक्षात् शुद्धाभिमतस्य बिन्दोरुपादानत्वात्। अत एव विज्ञानकेवलाः अतिक्रान्तकलादिबन्धाः प्रध्वंसीकृतकर्मपाशाः।

End:

श्रवणाङ्गुष्ठसंयोगाद्यः शब्दः संप्रवर्तते।
दीप्तवह्निशिखातुल्यो सोऽपीदं नादसंज्ञकम्॥
पशोः पाशापनोदाय प्रकाशीक्रियतेऽद्भुतम्।
एवं परशिवो ध्येयः . . . . . ॥

अष्टपुष्पम्—

अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः।
शान्तिपुष्पं दयापुष्पं ज्ञानपुष्पं परं मतम्।
तपःपुष्पं सत्यपुष्पं भावपुष्पं तथाष्टमम्॥

805

तप्तचक्राद्यङ्कनखण्डनम्

A criticism of the religious practice of the Mādhva-s and the Śrīvaiṣṇava-s who brand on their arms the figures of the Śaṅkha and the Cakra of Viṣṇu.

Beginning:

पाञ्चरात्रप्रामाण्यमङ्गीकुर्वाणास्तदुक्ततप्तचक्रधारणानुष्ठानशीलाः तप्तचक्रधारणे श्रुत्यादीन् प्रमाणयन्ति। तत्र चक्रा . . . . . श्रुतित्वाभावमाशङ्क्य प्रत्यक्षवेदपठितानां वेदपाठादेव श्रुतित्वम्, अवशिष्टानां चक्रप्रतिष्ठादिकर्मविशेषे वेदमन्त्रत्वेन पञ्चरात्रेण विनियोगात् श्रुतित्वं समर्थयन्ते। तासां चोभयविधानां श्रुतीनां पाञ्चरात्रे सौदर्शने कर्मणि मन्त्रत्वेन तन्नियोगात् . . . . सुदर्शनपरत्वमङ्गीकृत्य तदनुरोधात् मन्त्रवाक्यगतपदनिचयस्वर . . . दधानशक्त्या चक्रधारणविधिपरत्वं प्रतिपादयन्ति।

End:

तत्र ध्यानालम्बनत्वेन जगत्कारणं विधीयते। तच्च कारणं किमित्याकाङ्क्षायां शंभुरित्युच्यते। तस्य च कारणत्वनिर्वहणोपायत्वेन सर्वैश्वर्यसंपन्न इत्यादिना विशेष्यते। आकाशमध्य इति

ध्यानप्रदेशः कथ्यते। पुनर्वाक्यशेषेण तदेव कारणं स्पष्टीकृतम्। ईशो वा शिव एको ध्येयो यः शिवंकरः। सर्वमन्यत् परित्यज्येति। वाशब्द एवकारार्थः; प्रकारान्तरेणानन्वयात्। शिवंकर ईशः शिव एक एव ध्येय इत्यर्थः। एवंच विधिवाक्यशेषगतैरनेकैः शंभुः सर्वेश्वरः ईशः शिव इति महादेवनामधेयैः यौगिकैः रूढैश्च देवतान्तरपरिहारेण कारणशब्दार्थो ध्यानालम्बनतया विहितः शिव एवेति निर्णीतं भवति। अत्र च प्रश्नवाक्यानुरोधात् न ध्यानं विधीयते। किंतु ध्यानाङ्गप्रणवध्यानप्रकारध्यातृध्येयस्वरूप

807

तत्तमुद्राविद्रावणम्

This is similar to the above.

Beginning:

ब्रह्मविष्णुमहेशानां कारणं परमेश्वरम्।
साम्बं नौमि शिवादित्यं मायाकल्पितविग्रहम्॥
क्लेशकर्मविपाकाद्यैरपरामृष्टमीश्वरम्।
गुरूणां च गुरुं वन्दे विष्णुमोंकारशब्दितम्॥
उमामहेश्वरं नौमि मद्ग्रामसविधालयम्।
यत्पादाम्भोरुहस्मृत्या स्फुरन्ति सकलाः कलाः॥
उमामहेश्वराचार्यांश्चोलावनिशिखामणीन्।
तातपादानहं नौमि सर्वतन्त्रप्रवर्तकान्॥
उमामहेश्वराचार्यतनूजो भास्कराध्वरी।
अस्ति कोनेरिराजेन्द्रपुरवासी बुधोत्तमः॥
वैतानकर्मनिवहे विहितैकभावा-
मव्याजवाचमपि ये परपूरुषस्य।
तन्त्रोत्सुकां विदधते स हि तत्तमुद्रा-
विद्रावणं वितनुते विनयाय तेषाम्॥

इह खलु केचिद्विष्णुभागवता युक्त्याभाससमाश्रयाः सन्तः कानिचिद्वेदवाक्यानि तत्तमुद्राधारणविषयतया योजयन्तः प्राकृतजनान् व्यामोहयन्ति। तन्निरासप्रकारं सोपपत्तिकमिह संक्षेपेण प्रदर्शयामः

Colophon of the 1st Paricccheda on p. 206:

इति श्रीमद्वारीतकुलजलधिपूर्णचन्द्रायमाणश्रीमदुमामहेश्वराचार्यतनूजभास्करदीक्षितविरचिते तत्तमुद्राविद्रावणे प्रथमः परिच्छेदः।

End:

तथा च तत्रैव वाक्यशेषे श्रूयते—अनु ह वै स्वर्गं लोकं विन्दति। कामचारोऽस्य स्वर्गे लोके भवति। य एताभिरिष्टिभिर्यजते।

809

दशकार्यम्

This work explains the ten principles to be observed by a devotee of Śiva according to the Śaivasiddhānta school. The ten principles are: Tattvarūpa, Tattvadarśana, Tattvaśuddhi, Ātmarūpa, Ātmadarśana, Ātmaśuddhi, Śivarūpa, Śivadarśana, Śivayoga and Śivabhoga.

Beginning:

शिवं शक्तिं गणेशं च नन्दीशादिगुरूनपि ।
सत्यज्ञानमुनिं शान्तं चन्द्रशेखरनामकम् ॥
प्रणम्य परया भक्त्या शैवसिद्धान्तसागरे ।
सारात् सारं समुद्धृत्य पाशादित्रयदर्शने ॥
साधकानां हितार्थाय चतुराश्रमधर्मिणाम् ।
दशकार्यं प्रवक्ष्यामि भुक्तिमुक्तिफलोदयम् ॥

कामिके—

प्रथमं तत्त्वरूपं तु द्वितीयं तत्त्वदर्शनम् ।
तृतीयं तत्त्वशुद्ध्यर्थं चतुर्थं चात्मरूपकम् ॥
पञ्चमं चात्मदृश्यं तु षष्ठमं चात्मशोधनम् ।
सप्तमं शिवरूपं स्यादष्टमं शिवदर्शनम् ।
नवमं शिवयोगं च दशमं शिवभोगकम् ॥

इत्युद्देशः ।

End:

ईर्ष्यां पैशुन्यडम्भौ च रागं मात्सर्यमेव च ।
कामं क्रोधं भयं शोकं त्यजेत् सर्वं शनैः शनैः ॥
सर्वस्वाच्च विनिर्मुक्तः सततं जनवर्जितः ।
अनेनैव शरीरेण सर्वज्ञत्वं प्रकाशते ॥
ईदृशं ज्ञानिनं दृष्ट्वा पूजयन्ति च ये नराः ।
गन्धं पुष्पं फलं धूपं स्नानं वस्त्रं च भोजनम् ॥
निवेदयन्ति ये केचिद्वाङ्मनःकायकर्मभिः ।
तथैव देवि मुच्यन्ते मुक्तिमार्गाभिकाङ्क्षिणः ।
स्तुतिनिन्दाकरस्तस्य पुण्यपापे समाप्नुयात् ॥

Colophon:

इति दशकार्यं समाप्तम् ।

813

दुरूहशिक्षा

The author attempts to maintain the view that the Lord Maheśvara is the Universal Cause and Supreme God, in support of which he quotes the *Śivārkamaṇidīpikā* and the *Śivakarṇāmṛta* of Appayadīkṣita. The author is said to have been the seventh descendant in the family of the famous Appayadīkṣita, the genealogy being: 1. Appayadīkṣita, 2. Nīlakaṇṭhadīkṣita, 3. Siṃhappayadīkṣita, 4. Śaṃkaradīkṣita, 5. Veṅkaṭeśvaradīkṣita, 6. Veṅkaṭasubrahmaṇyadīkṣita, 7. Viśvanāthadīkṣita. He was the brother of Kuppādīkṣita.

Beginning:

एवम् अथर्वशिरसा शिवस्य विष्ण्वादिसर्वकारणत्वसिद्धिवत् यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवल इत्यादिश्वेताश्वतरमन्त्रेणापि शिवस्य तमोविशेषाङ्कितसर्गाद्यसमयवर्तित्वेन सर्वकारणत्वं ख्याप्यते। अत्राह—यदा तम इत्यनुवाद इति तस्य पुरोवादापेक्षायाम् अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देव एकीभवतीति सौबालस्यैवोपजीव्यतया तत्र नारायणस्यैव तमोऽधिष्ठातृत्वस्थितेः उपजीव्यवाक्याविरोधायात्र शिवपदस्यापि तत्परत्वेनैव नेयत्वादिति। अत्राभिधीयते—अनुवाद इति सत्यमेव। न तु सौबालमेव तस्य पुरोवादः। अन्येषामप्यनूद्यमानार्थप्रापकाणां तमो वा इदमेक आसीत्, नासदासीन्नो सदासीत्तदानीम्, तम आसीत् तमसा गूढमग्रे।

End:

अवैदिकमताभ्याससंत्यक्तश्रुतिगौरवाः।
स्वस्वबुद्ध्यनुसारेण विरोधानाकलय्य ते॥
शैवब्राह्मपुराणानां क्षमन्ते न प्रमाणताम्।
तावता व्यक्तमेतेषां वैदिकद्रोहचिन्तनम्॥
यथा सर्वप्रमाणेषु वेदेष्वज्ञानमोहिताः।
ईशमभ्युपगच्छन्ति नान्यदेते तथैव हि।
तस्मात्ते वैदिकैर्नूनं बहिष्कार्या इति स्थितम्॥

Colophon:

इति भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनधुरंधरचतुरधिकशतप्रबन्धनिर्वाहकसर्वतन्त्रस्वतन्त्रश्रीमदप्पय्यदीक्षितप्रथमतनूभवश्रीनीलकण्ठदीक्षिततृतीयनन्दनश्रीसिंहप्पय्यदीक्षितप्रथमतनूजश्रीमच्छंकरदीक्षितपुत्रश्रीवेंकटेश्वरदीक्षितपौत्रेण वेंकटसुब्रह्मण्यदीक्षितद्वितीयनन्दनेन अन्नपूर्णागर्भसंभवेन श्रीमत्कविराजकुप्पादीक्षितसोदर्येण साग्निचित्यातिरात्रयाजिना श्रीविश्वनाथयाजपेययाजिना विरचितायां दुर्दान्तध्वान्तदुरूहशिक्षायामुपबृंहणाधिकारः संपूर्णः। ग्रन्थोऽपि संपूर्णः।

The fly-leaves of the MS. contain the following remark:

fo. 1. अत्र च श्रीमत्पितृव्यपादीयदुरूहशिक्षायां अथर्वशिखाविचार आद्यभागः महोपनिषद्विचारोपरितनविचारश्च समग्र एव सोपबृंहणविचारोऽपि अत्र पुस्तके वर्तते । श्रीशैवकर्णामृतमण्डनीभूता श्रीविश्वनाथवाजपेययाजिकृता तान्त्रिकदुरूहशिक्षा अप्पादीक्षितलिखिता । तस्यैवेदम् ।

fo. 2. श्रीमत्पितृव्यपादीयदुरूहशिक्षा यदा तमोमन्त्रविचारादिमहोपनिषद्विचारपर्यन्तमस्मिन् पुस्तके वर्तते । अन्यो भागः पुस्तकान्तरे ।

814

दुरूहशिक्षा

Beginning:

एवमथर्वशिरसः परोद्भावितविष्णुपरत्वशङ्कोन्मूलनेन शिवपरत्वं प्रसाधितम् । अतः परमापाततः विष्णुपरत्वेन प्रतीयमानसुबालोपनिषदः यदा तमोमन्त्रेण मूले शिवपरत्वसमर्थनमसहमानस्य परस्य विष्णुपरत्वेन यदा तमोमन्त्रनयनप्रकारनिराकरणपूर्वकं शिवपरत्वं मूलोक्तं दृढीक्रियते ।

End:

यत्तु वैष्णवपुराणेषु विष्णोर्ध्येयत्वं तदपि कारणाभेदेन वा परमशिवशक्त्यंशत्वेन वोपपन्नम् । यदपि,

मुक्तिं प्रार्थयमानं मां पुनराह त्रिलोचनः ।
मुक्तिप्रदाता सर्वेषां विष्णुरेव सनातनः ॥

इति हरिवंशवचनं, तदपि परमशिवशक्त्यंशनारायणद्वेषस्य मुक्तिसाधकपरमशिवज्ञानकुण्ठकतया तद्द्वेषस्य प्रत्यवायप्रापकतासिद्ध्यर्थकत्वेनान्यथा सिद्धम् । तस्मात् सर्वप्रमाणसिद्धसर्वकारणत्वानन्यनियाम्यत्वादिगुणगणसहितः ब्रह्मविष्णुरुद्रादिसर्वदेवतोपास्यः सर्वजगदुपादानानन्तनारायणावतारमूलकन्दचिच्छक्तिसनाथः परमशिवः परं ब्रह्म सर्वैर्मुमुक्षुभिरुपास्यः प्रपत्तव्यश्चेति सर्वं समञ्जसमिति सिद्धम् ।

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापकसर्वतन्त्रस्वतन्त्रश्रीमदप्पय्यदीक्षितश्रीचरणानां षष्ठस्य पदवाक्यप्रमाणपारावारपारीणस्य वसुलक्ष्मीकल्याणाद्यनेकप्रबन्धनिर्मातुः श्रीमद्वेंकटसुब्रह्मण्यस्य द्वितीयनन्दनेन अन्नपूर्णागर्भसंभवेन चोलदेशालंकारभूतपण्डितमण्डलीप्ररोहस्थलायमानकवेरजादक्षिणतीरगश्रीमद्वटारण्यग्रामवास्तव्येन साग्निचित्यातिरात्रयाजिना विश्वेश्वरदीक्षितेन विरचितायां दुरूहशिक्षायां शैवककर्णामृतोपरि परोद्भावितदोषाभासनिराकरणप्रकारः संपूर्णः ।

Then the following verses are added in praise of Appayadīkṣita:

यद्यप्यप्पयदीक्षितेन्द्रवचसां सर्वप्रमाणस्पृशां
मीमांसानयजालकीलिततया दोषाः परोद्भाविताः।
संश्लेषं न भजन्ति भास्कर इव ध्वान्तप्ररोहास्तथा-
प्यस्माभिस्तु निराकृताः प्रतिपदं शङ्काविषन्यायतः ॥ १ ॥
श्रीपातञ्जलदर्शनाम्बुनि कृतस्नानाक्षपादाध्वना
गच्छन्ती परिशुद्धजैमिनिमुनिन्यायप्रदीपावृता।
दूरोत्सारितमध्वलक्ष्मणहतन्यायान्धकारा कृत-
श्रीकण्ठीयमतादराप्पयमखिप्रष्ठोक्तिरामोदते ॥ २ ॥
स्पर्धावर्धितवावदूकविमतव्रातात्मपक्षस्थिति-
श्रद्धोच्चावचवादजातकबलीकारप्रगल्भक्रमाः।
श्रीकण्ठीयमतावलम्बनकृतः श्रुत्यन्तसैद्धान्तिका
गुम्भा अप्पयदीक्षितेन्द्रवचसामातन्वते सन्मुदम् ॥ ३ ॥
श्रीमन्नप्पयदीक्षितेन्द्र भवदुद्दामप्रवादार्भटी-
धाटीतुङ्गतरङ्गमज्जनकृतो वाचंयमत्वव्रतम्।
नूनं बिभ्रति सर्वदर्शनपरिश्रान्ता अपि प्रस्फुर-
. . . पि प्रमुखाः परे प्रकलितस्पर्धा अपि प्रस्फुटम् ॥ ४ ॥

815

A short metrical work dealing with Nāda (sound-seed).

816

नारायणपदभूषणम्

A metrical work of thirty-seven verses which tries to prove that the word Nārāyaṇa means the Lord Śiva. The author Śeṣādrisūri was the son of Veṅkaṭeśa of the Ātreyagotra and the pupil of Rāmasvāmimakhin.

Beginning:

नत्वा गुरुचरणाब्जं वाग्देवीमपि सदाशिवप्रीत्यै।
नारायणपदभूषणभावलसत्तत्त्वमालिकां कुर्वे ॥ १ ॥
नाहं शिवपारम्यप्रकाशने व्याप्रिये निराबाधे।
दीक्षितहरदत्तादिमविद्वद्वाङ्मुखदिगन्तविश्रान्ते ॥ २ ॥
किं तर्हि यदा तम इति मन्त्रेण समस्तसृष्टिवाक्यानाम्।
साम्बशिवे तात्पर्यं निरणायि सुखेन दीक्षितवरेण्यैः ॥ ३ ॥

End:

अस्मत्प्रणीतसरणौ व्रजतां न पूर्वै-
व्यर्थाकर्तृभिः सति विरोध उदेति दोषः।
यत्ते परस्परविरोधकरालचित्ता
भूतेश शिष्टचरितं हि महत् प्रमाणम् ॥ ३६ ॥
एतां वसन्ततिलके कृततत्त्वमालां
नारायणीयपदभूषणमर्पयामि।
शंभो तवाङ्घ्रियुगले शिशुनिर्मितस्रग्
व्यत्यस्तविन्यसनवत्यपि तोषिका हि ॥ ३७ ॥

Colophon:

नारायणपदभूषण-
रूपासौ तत्त्वमालिका शंभोः।
शेषाद्रिणा विरचिता
. . . . . .
नारायणपदभूषणतत्त्वमाला ॥

Post-colophon writing:

आम्रावतीतीरवर्तिदेवराजपुरे शुभे।
ग्रामे वैदिकमूर्धन्यमण्डिते विबुधप्रिये ॥
श्रीनीलकण्ठयज्वाख्यकर्मठाग्रेसरात्मजः।
सीताम्बागर्भसंभूतः सच्चरित्रजनप्रियः ॥
श्रीचिन्नप्पाख्यसंख्यावान् शिवभक्तिसुधानिधिः।
श्रीमच्छेषाद्रिसंख्यावत्प्रवराननपद्मतः ॥
निरर्गलसमुद्भूततत्त्वमालाख्यसन्मधु।
सानन्दं चेतसा भृङ्ग्या पाययित्वालिखं स्वयम् ॥
अद्भुतं तत्त्वमालाख्यग्रन्थसन्मधु सादरम्।
पायं पायं मनोभृङ्गी नातृप्नोत्तच्च वर्धते।
भृशं पीतं न क्षिणोति न समं किंतु वर्धते।
किमिदं मधुमाहात्म्यमुत मन्मानसस्य वा ॥
उतास्मद्गुरुपादाब्जस्मृतिवैभवमेव वा।
उत त्रयं मिलित्वा तु वर्धयत्येव वा भृशम् ॥
इत्यालोचितमस्माभिस्ततः सिद्धान्तितं त्विति।
श्रीमद्गुरुकृपा सत्यं चित्तं विशदयत्यहो ॥
अहो गुरुर्महादेवः अहो माता गुरुः स्वयम्।
महागुरुरुपाध्यायः पिता सर्वे सुहृज्जनाः ॥

गुरुरेव गुरोरन्यत् किंचिदस्ति न चेष्टदम् ।
गुरुरेव धनं विद्या गुरुरेवेष्टकामधुक् ॥
गुरुः सत्यं गुरुर्ब्रह्म परमा मे परा गतिः ।
तस्मादजस्रं गुरुमेव नत्वा ध्यात्वा दयाब्धिं मदभीष्टसिद्धिम् ।
प्राप्नोमि सत्यं गुरुदेवतोऽहं कृतार्थतां प्राप्य सुखी भवानि ॥

817

नारायणपदभूषणव्याख्या णत्वबाधाविधूननम्

This is a commentary by Śeṣādrisūri on his own work, *Nārāyaṇapada-bhūṣana*. The commentary is called *Ṇatvabādhāvidhūnana* and is specially intended to justify the use of the syllable *ṇa* in the word Nārāyaṇa, even though it means the Lord Śiva according to the views of the Śaiva-siddhānta. The author mentions herein his *Prauḍhamanoramāvyākhyā*.

Beginning:

रामस्वामिमखीन्द्रपादयुगलीपाथोजभृङ्गायित-
स्वान्तः शेषसुधीमणिर्विरचये विद्वन्मुदे शंकरे ।
सिद्धे सर्वपुराणशास्त्रनिकरैर्नारायणाख्ये पदे
बाधां णत्वकृतां व्यपोह्य नितरां श्रीतत्त्वमालामहम् ॥ १ ॥
रामस्वामिमखीन्द्रदेशिकमुखाम्भोजस्रवद्वाङ्मयीं
शेषाद्रिर्विबुधाङ्घ्रिसंनतशिरा आस्वाद्य माध्वीझरीम् ।
दुर्वादिप्रवरेभकुम्भदलने कक्ष्यानखैः केसरी
श्रीनारायणनाम्नि शंभुवचने णत्वं चरीकर्ति च ॥ २ ॥
श्रीवेंकटेशविदुषः सूनुना शेषशास्त्रिणा ।
क्रियते वचसां शुद्धयै स्वीयानां विदुषां मुदे ॥ ३ ॥
श्रीमन्तं चन्द्रचूडं गिरिपतितनयाप्राणनाथं दयाब्धिं
नत्वा वागीश्वरीं च प्रणतजनलसद्वाग्विलासप्रदात्रीम् ।
स्वीयां बुद्धिं कुजन्तुस्तुतिमलिनतमां क्षालये तत्त्वमाला-
व्याख्यानाम्भोभिरेतां सपदि विरचयन् णत्वबाधाविधूतिम् ॥ ४ ॥
रचयामि णत्वबाधाविधूननाख्यां कृतशिवौन्मुख्याम् ।
नारायणपदभूषणभावलसत्तत्त्वमालिकाव्याख्याम् ॥ ५ ॥
मात्सर्यमुत्सार्य कृतौ ममास्यां मम प्रयासं विमृशन्तु सन्तः ।
गवेषणीयो यदि दोष एष सर्वत्र भाष्यादिषु सूपपादः ॥ ६ ॥

स प्रौढिवादो यदि भाष्यमुख्यग्रन्थे महद्भी रचितेऽर्हणीयः ।
ग्रन्थे ममासावपि बालवाद इत्येव सम्यक् स्वदयनीय एव ॥ ७ ॥

इह खलु प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं विरचितम्,

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

आचार्यवान् पुरुषो वेद इत्यादिश्रुतिनिकुरम्बैः गुरुभक्तेः सकलश्रेयःपरंपरामूर्धाभिषिक्तपरमपुरुषार्थनिःश्रेयसनिदानभूतात्मतत्त्वज्ञाननिर्वहणधुरंधरप्रकृतग्रन्थनिर्वहणपुष्कलकारणपरमशिवस्वरूपज्ञानप्रदत्वप्रतिपादनात्, देवीं वाचमजनयन्त देवाः । तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना । धेनुर्वागस्मानुपसुष्टुतैतु । इत्यादिश्रुतिभिः ऊर्जं बलप्राणनयोरिति धातुव्युत्पन्नोर्कपदाद्युपादानमहिम्ना वाग्देव्याः सकलपुरुषार्थावाप्तिहेतुभूतवाग्बलप्रदात्रीत्वप्रतिपादनाच्च गुरुवाग्देवताप्रणामात्मकं मङ्गलं शिष्टाचारपरिपालनाय ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—

नत्वा गुरुचरणाब्जं वाग्देवीमपि सदाशिवप्रीत्यै ।
नारायणपदभूषणभावलसत्तत्त्वमालिकां कुर्वे ॥

End:

अहंकारादिपृथिव्यन्ततत्त्वमूलकारणं सत्त्वा . . . . . साम्यावस्था प्रकृतिरव्यक्तं, ममेदमित्याद्यभिमानसाधनमहंकारः, अध्यवसायसाधनं बुद्धिः, स . . . . . दीनि तत्त्वानि प्रसिद्धानि । एवं शैवानां षट्त्रिंशत्संख्याकत्वेन शिवतत्त्वपृ . . . . . श्लोकाः षट्त्रिंशत्संख्याका उपनिबद्धाः । अत एव तत्त्वमालेत्यस्य . . . जस्य

Colophon:

इति श्रीमदात्रेयकुलतिलकश्रीवेंकटेश्वरसूरिमणिसूनुशेषाद्रिसूरिणा विरचिता नारायणपदभूषणतत्त्वमालाव्याख्या णत्वबाधाविधूननाख्या समाप्ता ।

819

नारायणपदसाधारण्यम्

In this work the author attempts to prove that the name Nārāyaṇa is common to Brahman (creator), Viṣṇu and Śiva.

Beginning:

नारायण इति महायोगविद्वद्भूदिभ्यां मूर्तित्रयवाचकत्वं पुराणादिषु प्रसिद्धम् । आदौ तावद्विष्णुपरत्वं निरूप्यते । नामरूपविहीनस्य प्राकृतजलशयनेन नारायणसंज्ञाभिधीयते ।

विष्णुः स्वयंभूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥

इति ।

End:

ब्राह्मणानां शिवो ध्येयः क्षत्रियाणां हरिः स्मृतः ।
हिरण्यगर्भो वैश्यानामुपास्यः सदृशः स्मृतः ॥

इत्युमासंहितायाम् । अतः सर्वेषां पुराणानां न हि निन्दान्यायेन इतरप्रशंसार्थत्वात् प्रामाण्यमिति ।

Colophon:

इयं गोविन्दनायककृतिः परिसमाप्ता ।

820

नारायणार्थलहरी

This work interprets the word Nārāyaṇa to mean Śiva. The author's other work is *Śaivārthalaharī*.

Beginning:

श्रीरामं निजभावार्थं संसक्तमकरोद्भुवि ।
यच्छ्रीकृष्णं च तं विद्मो भर्गं नारायणं मतम् ॥
यागविशेषे रूढो यथा तरुलतासु यौगिकोऽस्त्युद्भित् ।
नारायणनामेत्थं रूढमुपेन्द्रेऽस्ति यौगिकं शंभौ ॥
ईशानो यदि विष्णुर्न कथं नारायणो भवति शंभुः ।
मूर्तित्रयप्रसूतिस्त्वथर्वशिरसि श्रुतास्ति परमशिवात् ॥

End:

श्रीश्रीनिवासरचिता शिवपरनारायणार्थरसलहरी ।
उररीक्रियतां विबुधैर्मोहज्जडिमा झटित्यपह्रियताम् ॥

Colophon:

इति श्रीनिवासरचिता नारायणार्थलहरी संपूर्णा ।

821

पञ्चरत्नं सव्याख्यानम्

A collection of five stanzas with commentary on the principles of the Śaivasiddhānta. The author was the pupil of Kṛṣṇānandayogin and belonged to the Śrīvatsa family.

Beginning:

. . . . प्रणतार्तीनां हरणं शरणं भजे ।
भूरादयस्त्रयो लोका यदुपक्रमसंभवाः ॥
ब्रह्मादिभ्यः श्रीगुरुभ्यो नमोवाकमधीमहे ।
जायते यदनुस्मृत्या सद्यो विद्या विमुक्तिदा ॥
स्थूलानक्षैर्विविधविषयान् जागरे विश्वनामा
. . . . क्ष्मा विरतकरणस्तैजसो मानसेन ।
प्राज्ञः सुतावनुभवति यः स्वात्मनैव स्वसौख्यं
तिस्रोऽवस्थाः स्वयमतिपतन् सोऽस्मि सज्ज्योतिरात्मा ॥
श्रीकृष्णानन्दयोगीन्द्रचरणाम्बुजसेविना ।
पञ्चरत्नप्रकाशोऽयं सुब्रह्मण्येन तायते ॥

इह खलु तावदतीतानादिभवपरंपरासु कृतसुकृतसंपदावर्जितपरमेश्वरानुग्रहेणापवर्जितसकलहृदयकलुषतया समर्जितविवेकवैराग्यशमादिसाधनकलापस्य मनुष्यादिपितृदेवलोकसाधनभूतपुत्रकर्मवित्तेषणाभ्यो व्युत्थाय भिक्षामात्रकलितदेहयात्रस्य मोक्षमेव केवलमाकाङ्क्षतः साक्षान्मोक्षसाधनब्रह्मात्मैक्यापरोक्षसिद्धये शारीरकादिशास्त्रश्रवणादावनधिकृतस्य मन्दाधिकारिणोऽनुग्रहायोपदिष्टं पञ्चरत्नं नाम परमात्मतत्त्वोपदेशप्रकरणं विवरिष्यामः ।

तत्रादौ त्रिभिः श्लोकैरात्मनोऽनाद्यविद्यामूलदेहाद्यभिमाननिबन्धनजागराद्यवस्थादिभिः संसारोऽनुवर्ण्यते । ततो द्वाभ्यां श्लोकाभ्यां तदपवादेनाध्यात्मयोगाधिगतात्मतत्त्वापरोक्षेण मोक्षोऽनुवर्ण्यत इति विवेकः; अध्यारोपापवादाभ्यां ह्यात्मतत्त्वोपदेशोऽद्वितीयतत्त्वापरोक्षाय कल्पत इति । तत्राप्याद्यश्लोकेनात्मनो देहाद्यभिमानकृतरूपभेदान् वक्ष्यमाणयोगोपयोगितया विभज्य दर्शयति—

अध्यात्मं चाधिदैवं प्रतिनियतविधाः स्थूलसूक्ष्माङ्गमाया-
संभेदोपाधिभेदात् पुरुषमनुगतास्त्रित्रिशो रूपभेदाः ।
विश्वो वैश्वानरं च प्रथमयुगमथो तैजसात्मा च सूत्रं
प्रज्ञात्मा चेश्वरश्चेत्यपरमथ परः स्यात् तुरीयस्तु साक्षी ॥

अत्रात्मशब्देनाहमभिमानविषयव्यष्टिरुच्यते ।

End:

निर्वाणैकस्वभावे निरन्तरदुःखमयनिखिलप्रपञ्चोपशमात्मके परमानन्दपीयूषसिन्धौ निरतिशयसुखसुधा . . . . . मात्रेण बालः क्रीडनकैरिव यथोपनतविषयैः लोकयात्रामनुवर्तत इत्यर्थः । तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये . . . . . श्रुतिरिति सर्वं शिवम् ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दभगवत्पादकरुणालेशलब्धविद्यावैशद्येन श्रीवत्सवंशमुक्तामणि

822

पञ्चरत्नमालिका

This work contains five verses on the greatness of the Lord Śiva. The author is believed to have belonged to the ninth century A.D. The editor of this work opines (see No. 897 below) that the author Haradattācārya is identical with Sudarśanācārya, the author of the *Āpastambagṛhyasūtrabhāṣya.*

Beginning:

गायत्रीवल्लभत्वाद्दशरथतनयस्थापिताराधितत्वा-
च्छौरेः कैलासयात्राव्रतमुदिततयाभीष्टसंतानदानात् ।
नेत्रेण स्वेन साकं दशशतकमलैर्विष्णुना पूजितत्वात्
तस्मै चक्रप्रदानादपि च पशुपतिः सर्वदेवप्रकृष्टः ॥ १ ॥

End:

वैशिष्ट्ये योनिरूपायितनरकरिपुश्लिष्टभावेन शंभोः
स्वस्यैवार्धप्रतीकायितहरिवपुषालिङ्गितत्वेन यद्वा ।
अप्राधान्याद्विशिष्टाद्वयसमधिगमे दानवानामरातेः
शंभोरुत्कृष्टयोगादपि पशुपतिः सर्वदेवप्रकृष्टः ॥ ५ ॥

823

Five verses in praise of Śiva attempting to prove his supremacy as the primitive cause of the world. The work is attributed to the famous Appayadīkṣita. See V. Raghavan, *ALB*, vol. 11, pt. 3, pp. 218-9.

824

This is a commentary on the metrical work *Paramokṣanirāsakārikā* containing fifty-eight verses, written by Sadyojyotiśśivācārya. It refutes the views held by other philosophers regarding the nature of Mokṣa and maintains the view of the Śaivasiddhānta school.

825

पुराणसारः

An anonymous work trying to prove that the Purāṇa-s and the Itihāsa-s teach the principles accepted in the Śaivasiddhānta.

Beginning:

सर्वपुराणस्थविशेषवचनानि लिख्यन्ते—

आत्मा नाम सुरा: स्वेन भासा यो भाति संततम् ।
तमेव त्वमहंशब्दप्रत्ययाभ्यां तु जन्तव: ॥
व्यवहारे विजानन्ति न जानन्त्येव तेऽर्थत: ।
अर्थतश्चास्य वेत्तारो न विद्यन्तेऽद्य तत्त्वत: ॥
हृद्यकारं द्वादशान्त एकांशं स्थविरा विदु: ।
अकार: सर्ववर्णाग्र्य: प्रकाश: परम: शिव: ॥

End:

वैखरीं मातृकारूपां मध्यमां शब्दरूपिणीम् ।
पश्यन्तीं ध्वनिनिष्ठां च परां वन्दे मनोरमाम् ॥
ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलममलं सर्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

827

प्रासादचन्द्रिका

A compilation of passages dealing with the Prāsādamantra addressed to the Lord Śiva as found in the Śaiva Āgama-s. The compiler was Aruṇadeva, the pupil of Jñānaprakāśaśivācārya.

Beginning:

श्रीमत्प्रासादमन्त्रस्तु देवदेवेन भाषित: ।
सकृत् स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥

शुद्धाख्यायाम्—

प्राशब्द: स्याच्छिवज्ञानं साशब्दो गतिरुच्यते ।
दशब्दो मत्स्वरूप: स्यात् प्रासाद अभिधीयते ॥
प्रासादं षष्ठसंयुक्तं पुन: षष्ठान्तयोजितम् ।
शिवशक्तिसमायुक्तं मूलमन्त्रमिहोच्यते ॥

End:

श्रीमत्प्रासादमन्त्रस्तु देवदेवेन भाषित: ।
सकृत् स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥

सप्तधा वर्तते यस्तु सर्वतीर्थफलं लभेत् ।
अब्रह्मचारी ब्रह्मचार्यस्नातः स्नातको भवेत् ॥
पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
अक्षयं शिवलोकं तु यन्निशम्य प्रभावतः ॥
प्रासादं नादमुत्थाप्य जपेद्यः सततं नरः ।
अणिमादिगुणैश्वर्यं षण्मासेन न संशयः ॥

Colophon:

इति श्रीमत्प्रासादचन्द्रिका संपूर्णा ।

828

प्रासादचन्द्रिका

Reads the following colophon:

इति श्रीकमलालयदेवतीर्थस्योत्तरतटनिवासिज्येष्ठज्ञानप्रकाशवराचार्यशिष्यारुणदेवेन संगृहीतायां प्रासादचन्द्रिकायां मात्राज्योतिष्कारणेश्वरस्थानशून्याध्वसमरसीभावविषुवशब्दयोजनविधिः समाप्तः ।

829

प्रासाददीपिका

This is a tract on the Prāsādamantra of the Lord Śiva.

Beginning:

चिद्घनं नौमि तं शंभुमेकं नित्यं निरामयम् ।
येन प्रकाशितं विष्वग् जगत् सर्वं चराचरम् ॥
योऽभूद्वेदोत्तमाङ्गागमविविधपुराणार्थबोधाद्यभिज्ञः
म . . मेधाय गभीरस्वभणितिभरसंजातकीर्तिप्रभावः ।
काञ्चीपुर्यां कवीन्द्रः स खलु विजयते कच्छपेशोऽच्छबुद्धिः
शंभौ बद्धान्तरङ्गः शिवनिगमपरः काश्यपो भूसुरेन्द्रः ॥
मृत्युंजयाभिधस्तस्य पुत्रः प्रासाददीपिकाम् ।
सकृदालोकनात् कुर्वे शैवज्ञानप्रदां नृणाम् ॥

अथ शुद्धमायारूपकुण्डलिनीनिवासभूतमूलाधारपद्मोत्थितसहस्रारः सौदामिनीप्ररोहप्रकाशः शिवबीजभूतः हकारः सुषुम्नामार्गेण अङ्गुलीमुखपिहितकर्णविवरैः पुरुषैः श्रूयमाणः सन् नाभिपद्मपर्यन्तं व्याप्नोति ।

End:

शिवसादाख्यज्योतिःस्तम्भाकृतितत्त्वमूर्तिप्रभावसदाशिवः तत् जानीयात्। कर्मसादाख्यमहेश्वर-रुद्रविष्णुब्रह्मादिसकलोत्पत्तिर्भवति।

830

प्रासादषट्श्लोकी

A collection of six verses on the Prāsādamantra.

Beginning:

मूलात् कुण्डलिनीनिवासभवनात् पद्मान्मरालस्वनो
हल्मात्रः क्षणरोचिरङ्कुरनिभो नाभ्यन्तमास्ते शिवः।
ऊर्ध्वं तस्य वितस्तिलङ्घिनि पदे वेदाङ्गुलं हृत्कजं
फुल्लद्बह्निशिखाप्रभा तदुपरि व्याप्नोति मेधाप्लुता ॥ १ ॥
तत्त्वानां कमलासनस्थभगवान् नाथश्चतुर्विंशतेः
कण्ठेऽष्टाङ्गुलके हिमांशुतपनज्योतिर्द्विमात्राङ्कितः।
श्रुत्यन्तस्य च तत्त्वषट्कसहितो लक्ष्मीसहायः पुमान्
जिह्वायां चतुरङ्गुले विषकला मात्राङ्किता स्मारयेत् ॥ २ ॥

End:

षट्कोपेतशतार्धपङ्क्तिदशकद्वन्द्वावशेषांशिका
सूक्ष्माङ्गी चतुरङ्गुलेऽथ समना पाशानुषङ्गावधिः।
सा शक्तिश्चतुरङ्गुले विजयते काप्युन्मनाख्या प्रभो-
रिष्टे शक्तिचतुष्टयेऽहतशिवः कल्पार्ककोटिद्युतिः ॥ ६ ॥

834

प्रासादषट्श्लोकीव्याख्या

Beginning:

यथामति गणाधीशकृपालेशान्मयाधुना।
श्रीमत्प्रासादषट्श्लोक्या व्याख्यानं लिख्यते लघु ॥

अथ किल परमशिववाचकपञ्चाक्षरबीजभूतस्य हौंकारस्य त्रिकलपञ्चकलाष्टकलनवकलद्वादशकला-षोडशकलादिभेदेन शिवागमेषु बहुधा वर्णितत्वात् तत्र द्वादशकलाप्रासादस्य

मात्राभाकारणाख्यानस्थानशून्याङ्गुलाध्वसु।
शक्त्याकृत्योः कलाव्याप्तिं ज्ञात्वा को वा न मुच्यते ॥

End:

उन्मनापरतो देवि तत्रात्मानं नियोजयेत् ।
तस्मिन् युक्तस्तदा ह्यात्मा तन्मयस्तु प्रजायते ।
विषुवं विधिवज्ज्ञात्वा को न मुच्येत बन्धनात् ॥

इति ।

Colophon:

इति प्रासादषट्श्लोक्या व्याख्यानं लिखितं मया ।
सम्यगालोच्य विबुधः को न मुच्येत बन्धनात् ॥

836

The commentator Nīlakaṇṭha, also called Śrīkaṇṭha, was the pupil of Śvetācārya. This *bhāṣya* generally follows the views of the Viśiṣṭādvaita school of Rāmānuja and hence it is called *Śaiva-viśiṣṭādvaita-bhāṣya.*

841

A metrical work in one hundred and forty-one verses on the nature of material enjoyments and the means of attaining them.

843

The author, the famous Appayadīkṣita, gives in twenty verses, an interpretation of the *Mahābhārata* to establish the supremacy of Śiva. The work is also called the *Mahābhāratatātparyasaṃgraha* or *Bhāratatātparyasaṃgraha.*

848

महाभारतसारसंग्रहटिप्पणी भारतभावसंग्रहः

The work contains short notes on the *Mahābhāratasārasaṃgraha* of Appayadīkṣita. The colophon refers to the work as the *Bhāratabhāvasaṃgraha.*

Beginning:

अथैतद्भावसंग्रहः—व्यासो विष्णुः पार्थव्याजात् तच्चरितभारतग्रन्थे तस्यापि सदा महितं शिवमसकृच्चादितत्त्वमभिहितवान् ।

End:

अध्यात्मविदश्चेदम्; प्रतिबुद्धेत्यादिबह्वनुरोधात् ॥ १६ ॥

Colophon:

इति भारतभावसंग्रहः ।

849

महाभारतसारसंग्रहव्याख्या

This is a summarized version of the *Vivaraṇa* of Appayadīkṣita on his own *Mahābhāratasārasaṃgraha.*

Beginning:

श्रीबादरायण इति । कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् इत्यादिवचनादिह स्वयमेव विष्णुरिति । तमधिकृत्येति; पार्थं विष्णुं चेत्यर्थः ।

वासुदेवस्य माहात्म्यं पाण्डवानां च सत्यताम् ।
दुष्टतां धार्तराष्ट्राणां प्रोक्तवान् भगवानृषिः ॥

इति वचनात् । आदौ, यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमामिति सूतवचनाच्च ।

End:

अस्य स्तोत्रस्य प्रचयगमनाद्यर्थं मङ्गलादीनीत्यादिमहाभाष्यानुसारात् स्तोत्रसमाप्तौ शिवपारम्योपदेष्टृगुरुनमस्काररूपं मङ्गलमारचयति—इत्थं चक्रे भारतमित्यादिना ।

Colophon:

इति श्रीमद्दीक्षितचरणकृतौ भारततात्पर्यसंग्रहः संपूर्णः ।

850

A metrical work in one hundred and fifty-seven verses on the nature of Mokṣa according to the Śaivasiddhānta.

851

This is a metrical treatise on the three 'gem-principles', namely Bindu, Śakti and Śiva as accepted in the Śaivasiddhānta doctrine. The author was the pupil of Rāmakaṇṭha, the son of Nārāyaṇakaṇṭha.

853

रत्नत्रयपरीक्षा सव्याख्या

Eight verses with the author's own commentary explaining the nature of the three principles: Śiva, Viṣṇu and Śakti. The author refers to his other works: *Śivārkamaṇidīpikā* and *Ānandalaharī.*

Beginning:

रत्नत्रयपरीक्षेयमष्टश्लोक्यतिनिर्मला ।
श्रीमत्साम्बशिवप्रीत्यै संक्षेपेण प्रकाश्यते ॥
नित्यं निर्दोषगन्धं निरतिशयसुखब्रह्मचैतन्यमेकं
धर्मौ धर्मीति रूपद्वयमयति पृथग्भूय मायावशेन ।
धर्मस्तत्रानुभूतिः सकलविषयिणी सर्वकार्यानुकूला
शक्तिश्चेच्छादिरूपा भवति गुणगणश्चाश्रयस्यैक एव ॥

नित्यं दोषगन्धेनापि रहितं निरतिशयसुखात्मकमद्वितीयं ब्रह्मचैतन्यं मायया कल्पितभेदं सत् धर्मधर्मिभावं प्राप्नोति । जीवब्रह्मविभागवदनादिरयं धर्मधर्मिविभागोऽपि ।

End:

दिनकृत्कोटिसंकाशं स्थानमन्यदुमापतेः ।
सर्वकामसमायुक्तं विशुद्धं नित्यमक्षयम् ॥
संप्राप्य तत् पदं दिव्यं समस्तक्लेशवर्जितम् ।
सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा भवन्ति च ॥
विशुद्धकार्यकरणाः परमैश्वर्यसंपदः ।
सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः ॥
ये संप्राप्ताः परं स्थानं ज्ञानयोगरता नराः ।
न तेषां पुनरावृत्तिर्घोरे संसारमण्डले ॥

इत्यादिवचनैर्व्यर्थवस्थापित इति सर्वं समञ्जसम् ।

आमथ्य भाष्यदुग्धाब्धिमाप्तं रत्नत्रयं ततः ।
शंभुर्गौरी हरिश्चेति तच्च सम्यक् परीक्षितम् ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिसूनोरप्पयदीक्षितस्य कृतौ रत्नत्रयपरीक्षा समाप्ता ।

855

A metrical treatise which seeks to prove that the *Vālmīkirāmāyaṇa* teaches the supremacy of Śiva. The author is the famous Appayadīkṣita.

858

रामायणसारसंग्रहखण्डनम्

An unknown author's refutation of the views expressed by Appayadīkṣita in his *Rāmāyaṇasārasaṃgraha*. The work upholds the supremacy of Viṣṇu and his incarnation as Śrī Rāma.

Beginning:

श्रीमद्वामाङ्गनारीशकीर्तितानन्तकीर्तये ।
श्रीमद्देवादिदेवाय रामनाम्ने नमो नमः ॥ १ ॥
श्रीरामानुग्रहेणाद्य ग्रन्थोऽयं क्रियते मया ।
श्रीरामायणतात्पर्यसंग्रहापार्थनिग्रहः ॥ २ ॥
श्रीरामानुग्रहप्राप्तसद्गुहेण मयाग्रहः ।
रामायणीयतात्पर्यसंग्रहस्य निगृह्यते ॥ ३ ॥
नारायणाद्युपनिषद्भिरपि प्रसिद्धा
नारायणस्य विमलस्य तनुस्तुरीया ।
तस्या निराकृतिकथा कथिता भवद्भि-
स्तन्न्यायतश्च भवतां न तुरीयसिद्धिः ॥ ४ ।
प्राचेतसो मुनिवरः प्रवरः कवीनां
रामायणाख्यमुपबृंहणमुच्चकार ।
धर्मावबोधनपरत्वमवेत्य तत्त्वं
सर्वश्रुतेस्तादिह नेश्वरतारतम्यम् ॥ ५ ॥

End:

किंचात्र तस्य वचसातकलत्रमित्र-
संत्याग एव कथितोऽस्ति विमुक्तिहेतुः ।
तस्यान्यथानयनमन्यसमादरश्च
न्यायादपेत इति सन्मतयो विदन्तु ॥ ३१ ॥

859

लिङ्गधारणचन्द्रिका

A Vīraśaiva work on the importance of wearing the Śivaliṅga on the body. The author, Nandīśvara, was the son of Śarabhaṇārādhya and the brother of Īśvara Śarabheśvara. He was the pupil of Malleśvara.

Beginning:

आधारादिसमस्तचक्रनिचये यो हंसरूपः शिवो
नित्यानन्दगुरुप्रसादविभवाद्भावादिसंज्ञोऽभवत् ।
आचारादिविभेदतः पुनरसौ षड्लिङ्गरूपोऽभवत्
तस्मै श्रीगुरुरूपिणे गिरिसुतानेत्रे नमः कुर्महे ॥
मामके दहराम्भोजे शारभं पादपङ्कजम् ।
विघ्नान्धकारमार्ताण्डमण्डलं सततं भजे ॥

कर्मब्रह्मविचारशास्त्रनिचयप्रोताच्छवाग्वैभवं
लिङ्गाङ्गस्थलतत्त्वबोधकगिरामापादने षण्मुखम् ।
विद्वन्मत्तगजेन्द्रकुम्भदलने कण्ठीरवाडम्बरं
विघ्नध्वान्तरविं नमामि शिरसा मल्लेश्वराख्यं गुरुम् ॥
वेदशास्त्राण्यनालोच्य केचित् पण्डितमानिनः ।
धारणं शिवलिङ्गस्य नाङ्गीचक्रुरमर्षतः ॥
स्वयं परे वरं देहि करोमि भवदाज्ञया ।
तेषां निराससिद्ध्यर्थं लिङ्गधारणचन्द्रिकाम् ॥

ते खल्वेवमाहुः—लिङ्गधारणं तावत् न वैदिकजनपरिग्राह्यम् ; अवैदिकत्वात् । वैदिकत्वे हि वेदवेदान्तवाक्यप्रतिपाद्यत्वं नियामकम् । न हि तत्र तदन्यतरत् पश्यामः । न वा वेदमूलकस्मृत्यादिगम्यत्वम् ; मन्वादिस्मृतिषु तत्प्रापकवचनादर्शनात् । यदि मन्यते मङ्गलाद्याचारस्येवानुमेयवेदमूलकत्वम्, तदप्याशामात्रम् ।

End:

लैङ्गेऽपि—

लिङ्गाङ्गसङ्गिनि मृते निक्षिपेदुत्तरक्रियाम् ।
कुर्वीरंश्चैव तन्त्रोक्तं शिष्यपुत्रादयो गुरुं ॥

इति शंकरसंहितावचनानुरोधेन स्वगृह्योक्तप्रकारेण सर्वमप्यवसानकृत्यं कर्तव्यमिति सर्वं समञ्जसमिति ।

The following colophon is found in the MS. of the Madras Government Oriental MSS. Library, R. No. 3433.

इति श्रीमदद्वैतविद्याचार्यमञ्जनपण्डिताराध्यवंशसुधापारावाररकानिशाकरश्रीशरभनाराध्यस्य सूनोरीश्वरशरभेश्वराख्यभ्रातृकृपाकटाक्षवीक्षणपूर्वकप्रेरणालब्धग्रन्थकरणप्रवृत्तिमतो नन्दिकेश्वरस्य कृतौ लिङ्गधारचन्द्रिकायां निरूपणीयं सर्वं समञ्जसम् ।

शरभेश्वरपुत्रेण महेशाराध्यसूनुना ।
नन्दीश्वरेण रचिता लिङ्गधारणचन्द्रिका ॥
शरभेश्वरपादाब्जन्यस्तधीर्नन्दिकेश्वरः ।
शरभेशाज्ञया चक्रे लिङ्गधारणचन्द्रिकाम् ॥

860

लिङ्गार्चनचन्द्रिका

On the worship and greatness of the *liṅga* of Śiva. The author was the son of Gadādhara and the grandson of Viṣṇu of the Daśaputra family.

The work is said to have been written under the instance of the king Jayasimha.

Beginning:

उमाकटितटस्फुरत्करिवराननालोकन-
प्रसन्नहृदयं धिया सदयमिन्दुचूडं मृडम् ।
प्रणम्य गिरिजाधवं भजनमात्रदत्तेप्सितं
सिताननमनामयं प्रियमुमासहायं मुदा ॥ १ ॥
वंशेऽस्मिन् दशपुत्रनामनि महान् विष्णुर्द्विजाग्र्यस्त्वभूत्
सूनुस्तस्य सुधीर्गदाधर इति ख्यातो जगत्याख्यया ।
तत्पुत्रेण सदाशिवेन विदुषा दृष्ट्वा निबन्धान् पुरा
श्रीलिङ्गार्चनचन्द्रिका विरचिता विद्वच्चकोरेष्टदा ॥ २ ॥
विविच्य गुणगौरवं गुणविवेचका मत्सरं
विहाय कथयन्तु तद्यदिह दूषणं सज्जनाः ।
न फल्गुजनदूषणैः किमपि हीयते मामकं
दिनान्धगणगर्हणा किमु दिनेशखेदावहा ॥ ३ ॥

तत्र पूज्यस्वरूपापरिज्ञाने पूजाया अफलत्वादादौ साम्बसदाशिवस्य श्रुतिस्मृत्यादौ सर्वोत्कृष्टत्वं सर्वाभीष्टप्रदत्वं च प्रदर्श्यते—

तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् ।
पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ॥

इति ।

End:

लिङ्गान्तरमधिष्ठाप्य विशुद्धिमधिगच्छति ।
संक्रान्तौ च चतुर्दश्यावष्टम्यां पर्वणोरपि ॥
नित्यार्चनं विलुप्तं चेन्नित्यलोपाच्चतुर्गुणम् ।
प्रायश्चित्तमिदं प्रोक्तं गृहस्थानां यथाक्रमम् ॥
ब्रह्मचारी च द्विगुणं वनस्थस्त्रिगुणं चरेत् ।
चतुर्गुणं च संन्यासी प्रायश्चित्तं समाचरेत् ॥
इति शिवपूजालोपे प्रायश्चित्तम् ।
मीमांसानयमांसलातिविमला प्रज्ञा तथा भूयसी
दृष्टिः श्रौतनिबन्धना च चतुरा येषां सदाचारिणाम् ।
तेषां दृष्टिपथं प्रयातु सुहृदां संदर्भ एष स्थितः
किं वान्यैर्निजदोषदुष्टमतिभिः प्राज्ञेतरैः प्रार्थितैः ॥
राजश्रीजयसिंहनामनृपतेस्तोषाय या निर्मिता
श्रीलिङ्गार्चनचन्द्रिकातिविमला विद्वच्चकोरेष्टदा ।

तां पश्यन्तु परीक्षकाः सहृदयाः निष्पक्षपातं बुधा-
स्तेनेयं गुणवत्तरा हि भविता गौरीपतेस्तुष्टये ॥

Colophon:

इति श्रीपदवाक्यप्रमाणज्ञेन श्रीमद्दशपुत्रकुलावतंसेन सदाशिवेन विरचिता लिङ्गार्चनचन्द्रिका समाप्ता ।

Post-colophon writing:

या पुस्तक श्रीजांबवतीजीनुच्छेहस्तेभेटीयापुरुषोत्तमदासस्वयंपठनार्थं वा परोपकारार्थं लिख्यते । ग्रन्थसंख्या २७७५ ।

862

विशेषार्थप्रकाशकः

A metrical treatise on some important principles of the Vīraśaiva school. The author elucidates some points explained in his other work, *Anubhavasūtra* or *Śivānubhavasūtra*. The work is divided into five Adhikaraṇa-s called Ṣaṭsthalabrahmopadeśavidhi, Śivaliṅgārcanakrama, Prasādasadbhāva, Puraścarṇa and Dehāvasānavidhi.

Adds the following extra verse at the end:

स्वानुभूतिविभवावगाहिना मायिदेवविभुना महात्मना ।
श्रीशिवानुभवसूत्रमुत्तरं तन्त्रमुक्तमतिशोभनं परम् ॥

Colophon:

इति श्रीशिवसिद्धान्ततन्त्रे विशेषार्थप्रकाशके गुरुशिष्यसंवादे अवसानविधानं नाम पञ्चमाधिकरणम् ।

863

विष्णुतत्त्वरहस्यखण्डनम्

This is a refutation of the work *Viṣṇutattvarahasya* of Rāmasubrahmaṇyaśāstrin. The author was the son of Dharmarāja Veṅkaṭadīkṣita and grandson of Veṅkaṭasubrahmaṇyadīkṣita, who was the grandson of Bhavānīśaṃkaradīkṣita, who was the great-grandson of the famous Appayadīkṣita of the Bhāradvājagotra. The work is divided into two Pariccheda-s.

Beginning:

अवलम्ब्य शिवं साम्बमस्मद्गुरुवरानपि ।
अप्पय्ययज्वप्रमुखान् कुर्वे विमतभञ्जनम् ॥ १ ॥
क्वेमाः श्रीदीक्षितप्रोक्तशैवसिद्धान्तयुक्तयः ।
क्वायं मन्दमतिर्वादी स्वमतप्रच्युतो जडः ॥ २ ॥
तथापि जडता लोके बहुला दुर्लभा शिवे ।
भक्तिर्नास्ति कलेर्धर्ममवेक्ष्येह प्रयत्यते ॥ ३ ॥
वेदान्तकौस्तुभादिमपरकीयग्रन्थशीलनभ्रान्तः ।
तत्संग्रहं च विष्णोस्तत्त्वरहस्यं चकार बुधमानी ॥ ४ ॥
कश्चिच्छैवीर्दूषयामास युक्तीर्विद्वन्मन्यो भूषयामास कार्ष्णीः ।
तद्विज्ञायाप्पाभिधानो हि यज्वा तत्र ब्रूते दूषणं चोभयत्र ॥ ५ ॥
साध्वसाधुविवेकज्ञाः सन्तश्चैव बुधोत्तमाः ।
मदुक्तयुक्तीर्विज्ञाय रोचयन्तु गुणागुणम् ॥ ६ ॥
नत्वा सदाशिवं ब्रह्म साम्बं चन्द्रार्धशेखरम् ।
विष्णुतत्त्वरहस्यस्य भञ्जनं रचयाम्यहम् ॥ ७ ॥

तत्र परोक्तग्रन्थस्यायमादिमः श्लोकः—

स्मृत्वा स्मृत्वा रमाकान्तं तत्कृपालेशमात्रतः ।
रहस्यं विष्णुतत्त्वस्य विशदीकर्तुमीश्महे ॥

इति । अयं च श्लोकः श्रीखण्डदेवभट्टकृतभाट्टरहस्याख्यग्रन्थमङ्गलश्लोक एव यत्किंचित्पदव्यत्यासेन भवता ग्रन्थादौ निबद्ध इति विदितमेतत् सुधियाम् ।

Colophon on fo. 68 b:

इति श्रीभारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यश्रीमदप्पयदीक्षितनप्तृश्रीभवानीशंकरदीक्षितपौत्रश्रीवेंकटसुब्रह्मण्यदीक्षितपौत्रश्रीधर्मराजवेंकटदीक्षितपुत्रेण अप्पादीक्षितविद्वत्कविना कृते विमतभञ्जने संग्रहेण श्रौतशैवमतप्रतिष्ठापके प्रथमोऽशः संपूर्णः ।

End:

इत्युक्त्वा भगवान् रुद्रः संपूर्णं रूपमाविशत् ।
नापश्यंश्च ततो देवा रुद्रं विष्णुपुरोगमाः ।
अथर्वशिरसा देवमस्तुवंश्चोर्ध्वबाहवः ॥

इति । एवमन्यान्यपि रहस्योपनिषद्वाक्यानामुपबृंहणानि परःशतानि सन्ति । ग्रन्थगौरवभयादुपरम्यते । एतेषां च वचनानां तामसत्वकथनं परस्य पामरत्वापादकमेव । किं बहुना ? सर्वोपनिषदामपि परशिवपरतया उपबृंहणं सूतसंहितायां दृश्यतेतरामिति सिद्धम् ।

अथ(इति)द्वितीयपरिच्छेदः ।

864

वीरमाहेश्वराचारसारोद्धारः सव्याख्यः

An epitome of passages culled from various Vīraśaiva works dealing with the conduct and principles of Vīraśaiva-s. It is followed by a commentary by Somanātha.

Beginning:

सोमनाथभाष्यम् । इति श्रीसकलश्रुतिस्मृतिपुराणागमेतिहासप्रसिद्धत्रयःषष्टिगणत्रयोदशगण-नानापुरातनभक्तेभ्यो नमः । एवमादिश्रीमन्महाप्रमथगणेभ्यः श्रीमत्पुरातननूतनभक्तगणेभ्यो नमः । श्रीमद्योगाचार्येभ्यो नमः । श्रीमत्पूर्वाचार्येभ्यो नमः । श्रीत्रयोदशगणेभ्यो नमः । श्रीदशगणेभ्यः पुनः पुनर्नमस्कृत्य तेषामाज्ञां शिरसि वहित्वा शिवशैवाचारसंपादनसारोद्धारः प्रवक्ष्यते ।

नानावेदेषु शास्त्रेषु वेदान्तेषु बहुष्वपि ।
आगमेषु च शाखासु पुराणेष्वपि तेषु च ॥
इतिहासादिसूक्तेषु आर्षेयेष्वेवमादिषु ।
वीरमाहेश्वराचारसारोद्धारः प्रकल्प्यते ॥

तत्र श्रुतिभेदमाह श्रीरुद्रः—वाष्कलः, श्वेताश्वतरः, बृहदारण्ये माध्यंदिनः ।

Colophon on fo. 3:

इति वीरशैवाचारसारोद्धारे बसवराजीये सोमनाथभाष्ये बसवनामनिर्वचने असंख्यातमाहेश्वर-माहात्म्यप्रकरणसंख्या समाप्ता ।

Colophon on fo. 80:

इति श्रीवीरमाहेश्वराचारसारोद्धारे बसवराजीये सोमनाथभाष्ये द्वितीय(द्वा)विंशं प्रकरणम् ।
अथ गायत्रीमन्त्रप्रकरणं वक्ष्यामः ।

End:

दुःसङ्गिनं दुरुक्तिं च दुःशीलं दुर्गुणं तथा ।
दुर्वाक्यं दुश्चरित्रं च . . . गुरुनिन्दकम् ॥

गुरुस्तोत्र

865

वैदिकाचारनिर्णयः

This deals with the religious duties and customs of Vīraśaiva-s. The author was the pupil of Gīrvāṇendramuni.

Beginning:

षाड्गुण्यपरिपूर्णाय षडङ्गमहिताय च ।
नमो वेदान्तवेद्याय शिवाय परमात्मने ॥
गुरून् प्रणम्य शिरसा गीर्वाणेन्द्रमुनीश्वरान् ।
रामेन्द्रयोगी तनुते वैदिकाचारनिर्णयम् ॥
वैदिकाचारसंपन्नैरीश्वरोपासकैर्द्विजैः ।
सत्त्वशुद्धिस्ततो ज्ञानं ततो मुक्तिरवाप्यते ॥
ईश्वरोपासनं कार्यं वैदिकं वैदिकोत्तमैः ।
न तान्त्रिकमनुष्ठेयं गर्हितं वेदवादिभिः ॥
ईश्वरोपासनं कार्यं मनोवाक्कायकर्मभिः ।
मनसोपासनं कार्यं हृदये रविमण्डले ॥
गायत्र्याश्च जपश्चैव पञ्चाक्षर्यास्तथैव च ।
रुद्रसूक्तैर्महामन्त्रैः शिवनाम्नश्च कीर्तितैः ॥
वाचोपासनमीशस्य कर्तव्यं वैदिकोत्तमैः ।
वह्नौ च शिवलिङ्गे च स्थण्डिलादौ तथैव च ॥
ईश्वरोपासनं कार्यं कायिकेन च कर्मणा ।
एवं त्रिकरणैर्नित्यमीश्वरोपासनं बुधः ।
कुर्वन् मुक्तिमवाप्नोति वैदिको नात्र संशयः ॥

ननु ईश्वरस्य सद्भावे प्रमाणाभावात् तत्र बहूनां विप्रतिपत्तिदर्शनात् श्रुतिविप्रतिपत्ति-दर्शनाच्च कथमीश्वरनिर्णयः? येनेश्वरोपासनं वैदिकैः कार्यं भवेत् ।

End:

एवं सूतसंहितायां शिवतत्त्वनिर्णयः सम्यक् कृतः । तद्यथा—

परमात्मविभागत्वं ब्रह्मादीनां द्विजर्षभ ।
समानमपि रुद्रस्तु विशिष्टो नात्र संशयः ॥
ब्रह्मा विष्णुश्च रुद्रश्च स्वासाधारणरूपतः ।
स्वविभूत्यात्मना चापि कुर्यातामेव सेविनम् ॥
रुद्रः स्वेनैव रूपेण विष्णोश्च ब्रह्मणस्तथा ।
न कुर्यात् सेवनं विप्रा विभूतेर्वा तयोरपि ॥
केवलं कृपया रुद्रो लोकानां हितकाम्यया ।
स्वविभूत्यात्मना विष्णोर्ब्रह्मणश्च परस्य वा ॥
करोति सेवां हे विप्राः कदाचित् सत्यमीरितम् ।
एतावन्मात्रमालम्ब्य रुद्रं विष्णुं प्रजापतिम् ॥

मन्वते च समं मर्त्या मायया परिमोहिताः ।
हरेरजस्य चोत्कर्षं हराद्वाञ्छन्ति केचन ॥

866

वैदिकाचारसिद्धान्तः

The work refutes the charges made by Vaiṣṇava-s against the religious practices of the Śaiva-s. The author asserts that such practices are Vaidic as they are prescribed in the Purāṇa-s, Itihāsa-s and Smṛti-s.

Beginning:

वैदिकाचारसिद्धान्तः

यस्य प्रसादमवलम्ब्य विधीन्द्रमुख्याः
स्वर्गादिभोगभजनात् समवाप्तकामाः ।
तं सिद्धिजालजलधिं प्रणतेष्टदान-
चिन्तामणिं शिवतनूजमहं नमामि ॥
नमामि दक्षिणामूर्तिं तमाद्यं जगतां गुरुम् ।
यस्य संस्मरणान्मुक्ता भक्तिज्ञानसमन्विताः ॥
नत्वा मार्गसहायेशं कैवल्यपदवीसखम् ।
पूजितं विधिविष्ण्वाद्यैर्विधातृपुटभेदने ॥
अनाथार्भकरक्षार्थं साक्षान्नमितवाञ्छिरः ।
नमाम्यहं कृपासिन्धुं पदवीसखमादरात् ॥
यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः ।
संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥

इह केचिद् द्राविडदेशीयाः वेदविरुद्धस्यापि पाञ्चरात्रागमस्य प्रामाण्यं वदन्तः तदुक्ततप्तमुद्राद्यनुष्ठानपराः गौतमदधीचिनन्दिभृगुब्रह्मादिशापावेशग्रस्ताः तत एव श्रौतस्मार्तभस्मदर्शनसकलदुरितनिवर्तकमहादेवदर्शनतदभिषेकजलस्वीकारतन्नामकीर्तनादीनसहमानाः शापावेशध्वंसनभियापि तन्निरसनमन्त्ररूपाणि सकलश्रुतिस्मृतिपुराणान्यनवलोकयन्तः किंचिदेव पुराणं श्रौतस्मार्तकर्मालम्बानुकूलं पश्यन्तः असच्छूद्रसंकीर्णादिद्रव्येषु दृष्टादृष्टादिदोषाश्रयासु स्त्रीषु च विशेषेण रक्ता अपि वयं सत्यलोकपर्यन्तं विरक्ताः ।

End:

नापि नवमः ; तामसकल्पकृतत्वासिद्धेः ।

वेदो . . . शिवस्तस्य पञ्चमः परिकीर्तितः ।
अभिव्यक्तिमपेक्ष्यैव प्रणीतेत्युच्यते बुधैः ॥

इत्यादिवचनबलात् शिवस्य वेदाभिव्यञ्जकत्वसत्त्वेऽपि वेदवत् धर्मशास्त्रपुराणादीनामनादित्वेन वेदेन सहाभिव्यक्तत्वात् तथा सृष्टिपक्षे सर्वत्र पुराणेन सह वेदसृष्टिप्रतिपादनाच्च यदृचोऽधीते पयसः कुल्या अस्य पितॄन् स्वधा अभिभवन्तीत्यादिना यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशꣳसेत्यन्तेन वेदविद्विनियोगविधानाच्च अस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणीत्यनेन वेदेन सह निश्वसितपदेनानायासेन पुराणानां सृष्टेरुक्तत्वाच्च न तामसकल्पकृतत्वम् ।

यस्मिन् कल्पे तु यत् प्रोक्तं पुराणं ब्रह्मणा पुरा ।
तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ।
अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम् ॥

इत्यादिमात्स्यवचनेन शिवपुराणानां तामसत्वेन दौर्बल्यमुच्यते । ततस्तामसकल्पप्रणीतत्वरूपदशमपक्षः परिशिष्यत इति चेन्न । कल्पानामेव स्वतस्तमःकार्यप्रमा . . . . दोषाभावात्; किमुत तत्प्रचुरीकृतपुराणानाम् । तादृशवचनसद्भावेऽपि तामसप्रचुरीकृतत्वमात्रेणाप्रामाण्यस्य वक्तुमशक्यत्वात् । किंचित्तामसकल्पप्रचुरीकृतत्वं न दोषावहम्; तामसरात्रावतीर्णविष्णोरिव तामसकल्पे कृतयुगादाववतीर्णविष्णोरिव वा । तस्मादेतादृशपरं

867

A work of about sixty verses in the Śikhariṇī metre addressed to Śiva. It is followed by the author's own commentary, *Śivatattvaviveka.* The work is meant to establish the supremacy of Śiva, and refers to the *Śrutisūktimālā* of Haradattācārya.

874

A prose work on Śaivasiddhānta philosophy. The author attempts to prove the supremacy of Śiva over Viṣṇu. The work is also called *Śaivakarṇāmṛta* and is divided into two Pariccheda-s, the first being Pūrvapakṣa and the second Siddhāntasaṃkṣepa.

880

Twelve *anuṣṭubh* verses on the main principles of Śaivasiddhānta. These verses are designated as Sūtra-s because they are terse and brief. A commentary written by Jñānaprakāśācārya mentions two different versions regarding the source of the work. According to one, it is a part of the *Rauravāgama* as popularly known in the Tamil country. According to

the other, it was written by Śivajñānabodhācārya, which is the belief prevailing in the Kannada country.

885

शिवज्ञानबोधव्याख्या

Beginning:

ज्ञानानन्दमयं शुद्धं हरणोत्पत्तिकारणम् ।
पाशविच्छेदकं वन्दे पशूनां पतिमव्ययम् ॥

अथ भगवान् श्रीकण्ठपरमेश्वरः धर्मार्थकाममोक्षेषु पशूनां पुरुषार्थेषु परमप्रयोजनभूतं मोक्षं तत्साधनभूतपदार्थत्रयविवेकं च पृष्टो नन्दिकेश्वराय समस्तागमसाररौरवान्तर्गतं द्वादशसूत्रात्मकं शिवज्ञानबोधाख्यं शास्त्रमुपदिष्टवान् ।

End:

ज्ञानदेशिकान् प्राप्य गुरुत्वेन समासाद्य तेषां शैवानां संबन्धिनं वेषं

886

शिवज्ञानबोधव्याख्या

Beginning:

नीलालकश्रेणिविराजमानफालावतंसीकृतचन्द्ररेखा ।
लीलारसालंकृतमानसा मे बाला गिरि स्तम्भनमाशु हन्यात् ॥
विघातपादपोन्मूल . . नुभवलिप्सया ।
वन्दे मातङ्गभावेन क्रीडन्तं गणनायकम् ॥
स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात् ।
अस्ति कर्ता स हृत्वैतत् सृजत्यस्मात् प्रभुर्हरः ॥

इद सूत्रम् । अस्य सूत्रस्य तात्पर्यार्थः—इदं जगत् संहारपूर्वकमित्युक्तम् । तदा चार्वाकः—अस्य जगतः कर्ता न हि । जगतः कर्ता प्रत्यक्षो न ।

End:

ललाटस्थाने जाग्रदवस्थायां पूर्वोक्तपञ्चविंशतिभिः सह

887

शिवज्ञानबोधव्याख्या

Beginning:

शिवज्ञानबोधद्वादशश्लोकी प्रदर्शिता । सैवात्र पुनर्व्याख्यास्यते । तद्यथा स्त्रीपुंनपुंसकादित्वात् । अबाधकान्यपि निपातनानीति न्यायेनाचतुरादिसूत्रनिपातितस्त्रीपुंसपदमनादृत्य स्त्रीपुमिति

निर्देशः कृतः। ततश्चायमर्थः स्त्रीपुंनपुंसकपोटात्मचेतनाचेतनात्मकत्वात्। प्रपञ्चस्य कार्यदर्शनात्। भावप्रधानो निर्देशः।

End:

स्वभोग्यत्वेन तु परं नैव जानाति किंचन।
अङ्गीकृतायासतस्तु प्रस . . वेत्ति नान्यथा॥
मयेदमनुभोक्तव्यं तृप्त्यर्थमिति धीर्न हि।
तस्मात् स्वार्थानुभूतिश्च स्वार्थभुक्तिश्च नो उभे॥
प्रपञ्चविषयिण्यौ तु शिवस्य भवतः क्वचित्।
परार्थं तु भवेतां ते भक्तानुग्रहकारणात्।
यजमानानुग्रहार्थं मम वेति श्रुतिस्मृतेः॥

888

शिवदर्पणम्

An original treatise on the Śaiva Vedānta closely following the *Brahmasūtrabhāṣya* of Śrīkaṇṭha. The author affirms that the *Brahmasūtra-s* teach only the Śiva-viśiṣṭādvaita as expounded by Śrīkaṇṭhaśivācārya and not the Advaita of Śaṃkara. He refers to the *Śivārkamaṇidīpikā*, *Śivatattvaviveka* and *Caturmatasāra* of Appayadīkṣita and criticizes the *Śivādvaitanirṇaya*. He mentions two other works of his: *Sannyāyaśivastuti* and *Ṣaḍdarśanasaṃgraha*.

The author's name is not mentioned in this MS. However the MS. MG, R. 2545 mentions in one of the introductory verses, the *Rāmāyaṇavyākhyā Virodhabhañjana* as being one of his other works. Therefore, it might be presumed that the author was Brahmavidyādhvarin, who wrote *Virodhabhañjanī*. This suggestion is corroborated by the statement of S. S. Suryanarayana Sastri in *The Śivādvaita of Śrīkaṇṭha* (University of Madras, 1936, p. 17), where he speaks of this work as Brahmavidyādhvarīndra's *Vedānta-sarvasva-śivadarpaṇa*.

Beginning:

देवः को नु महान् धियं जगति कः सत्त्वात्मिकां प्रेरयेत्
को नाम्नाकृतितः शिवो भवति कश्चिच्छक्तिदेहार्धभाक्।
को वा पावकचन्द्रसूर्यनयनः कश्चाष्टमूर्तिर्भवेत्
को मृत्युंजय ईश्वरः क इति यश्चिन्त्यः शिवः सोऽवतात्॥

मुक्त्यै चिन्त्यो मुमुक्षोर्विविधनिगमतो ब्रह्मसर्वज्ञनामा
विश्वानुस्यूतकर्मा मुनिभिरवधृतोऽष्टाभिधानः षडङ्गः ।
विज्ञेयः शास्त्रमात्रान्निगमकविरयं शूलपाणिः शिवोऽव्या-
ज्ज्ञेयस्तात्पर्यलिङ्गान्वितनिगमगणैः सच्चिदानन्दरूपः ॥

इह खलु परमकारुणिकः श्रीकण्ठशिवावतारः श्रीकण्ठशिवाचार्यो भगवता बादरायणेन निर्गुणसगुणदेवताविशेषौदासीन्येनैव विरचितानि विश्वतोमुखानि वस्तुतो विशिष्टाद्वैतीयशिवैक-निष्ठानि सर्वोपनिषत्तात्पर्यनिर्णायकग्रथनरूपाणि ब्रह्मसूत्राण्यालोच्य लोकानुजिघृक्षया शिवतत्त्व-प्रकटनाय प्रसन्नगम्भीरमिताक्षरं भाष्यं निर्ममे ।

End:

एकं मन्त्रं बहूनां कथमिह कथयस्यर्थभागे समर्थे
को वा ब्रूते स एव स्वयमुपहरते बोधमेषामितीदम् ।
प्रत्येकं कारणोक्तिप्रकरणमखिलं स्वार्थसात्कर्मकामा-
स्तिष्ठन्त्यन्यान्यदर्था विधिहरिगिरिशाद्याह्वया एव तस्मिन् ॥

इति चतुर्मतसारीयश्रीकण्ठमतसंग्रहादपि भाष्यकाराणां विशिष्टाद्वैतमेव परमसिद्धान्तत्वेनाभिमतमिति ज्ञायत इति सर्वं समञ्जसम् ।

Colophon:

इति श्रीशिवदर्पणे जन्माद्यधिकरणं समाप्तम् ।

Deals with the following topics:

१. अथशब्दार्थविचारः, २. अतःशब्दार्थविचारः, ३. ब्रह्मशब्दार्थविचारः, ४. सगुणत्व-निर्णयः, ५. शापविचारः, ६. मोक्षविचारः, ७. नारायणशब्दार्थविचारः, ८. शिवोत्कर्षनिर्णयः, ९. शिवतामसत्वविचारः, १०. गीतार्थविचारः ।

889

शिवयोगसारः

A metrical treatise detailing meditation on Śiva, according to the Śaivasiddhānta. The author belonged to Tirunelveli.

Beginning:

यं ब्रह्म तारमघभूरितरङ्गसिन्धोः
पारेऽपि तस्य शिवदं प्रणवं पठन्ति ।
आस्ते शिवोक्तिरमलं गजसुन्दरास्यं
वन्दे मनःकुचलनाकुलदुःखहं तम् ॥

ध्यात्वा संपूजयेद्विद्वान्मृत्युनाशं सुरेश्वरम् ।
चतुर्मुखं चतुर्बाहुं चन्द्रमण्डलमध्यगम् ॥
कलशोद्धारकं द्वाभ्यां वरदाभयभूषितम् ।
कर्पूरक्षोददिग्धाङ्गं सितपुष्पस्रगावृतम् ॥
बद्धपद्मासनासीनं शुक्लपद्मोपरि स्थितम् ।
प्रसन्नवदनं देवमीषत्प्रहसिताननम् ॥

End:

तदुक्तं निश्वासकारिकायाम्—

पशुभावाद्यदातीत्य पतिभावेन तिष्ठति ।
तत् तस्य गमनं नाम सर्वगे गमनं कुतः ।
उन्मनत्वं शिवत्वं च प्रयातीत्युपचर्यते ॥

इति । ततः समञ्जसम् ।

Colophon:

श्रीशालिवाटीपुरनिवासिज्ञानप्रकाशाचार्यविरचितं योगोपवर्णनं समाप्तम् ।

श्रीमन्निश्वासे

आगमाद्यपशब्दानि वर्णयन्ति विदुर्बुधाः ।
संस्कृतेनापि किं तेन मृदुना ललितेन वा ॥
अविद्यारागवाक्येन संसारक्लेशहेतुना ।
यच्छ्रुत्वा जायते पुण्यं पापादीनां परिक्षयः ।
विनष्टमपि तद्वाक्यं विज्ञेयमतिशोभनम् ॥

शिवयोगः समाप्तः ।

890

This is an original treatise on the Śaiva Vedānta by the famous Appayadīkṣita, which tries to prove that there is no conflict between the views of Śrīkaṇṭha and Śaṃkara because the knowledge of Saguṇabrahman and the principles of Śiva-viśiṣṭādvaita help to know the Nirguṇabrahman.

892

शिवोत्कर्षप्रकाशः

On the superiority of Lord Śiva. The author was the son of Raṅgoji-bhaṭṭa, probably the brother of the famous Bhaṭṭojidīkṣita.

Beginning:

आम्नायसंघैरधिगम्यमूर्तिं देवैर्नृदेवैरपि दुर्विगाह्यम् ।
स्वान्ते विशुद्धे विदुषां स्फुरन्तं लक्ष्मीसहायं परिभावयामः ॥ १ ॥
यो न्यायादिसमस्तशास्त्रविषये रङ्गोजिभट्टः स्वयं
गत्वातीव परिश्रमं बुधजनैश्चक्रे विवादं सदा ।
यश्चावाप निजेप्सितं हि नितरां ब्रह्मेन्द्रविष्ण्वादित-
स्तं वन्दे जगदद्वितीयमधुना श्री . . . भट्टारकम् ॥ २ ॥
प्रणम्याहं वाणीं करकलितकीराद्भुतशिशुं
धुनानां स्वान्तस्थां प्रबलजडतां सर्वजगताम् ।
गुरूणां पादाब्जं सकलगुणसौभाग्यनिलयं
हृदि ध्यायं ध्यायं कमपि रचये ग्रन्थमधुना ॥ ३ ॥
रङ्गोजिभट्टसूनोः श्रीबालकृष्णस्य निर्मितिः ।
शिवोत्कर्षप्रकाशाख्या तुष्टयै भूयात् सतां सदा ॥ ४ ॥

इह खलु भेदाभिमानिनः केचित् पाषण्डाः परमशिवस्य जीवत्वादि विष्णोश्च तत्स्वामित्वादिरूपं परब्रह्मत्वमाहुः । तन्निरासाय श्रुतिस्मृतिपुराणतात्पर्यविषयकव्यावहारिकपरशिवोत्कर्षप्रतिपादनपूर्वक-मद्वैततत्त्वं निरूप्यते । तत्र यद्यपि, निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा ।

End:

उत्पत्तिस्थितिप्रलयप्रवेशनियमनाद्यर्थवादेभ्यः मृदादिदृष्टान्ताद्युपपत्तिभिश्चोपनिषदां ब्रह्मपरत्वं निर्णीयते । तद्ध्यानाच्चानर्थनिवृत्तिः फलमिति । एवमध्यायचतुष्टयेष्वपि अग्रिमाधिकरणेषु रचना बोध्येति दिक् ।

Colophon:

इति चतुर्थोल्लासः ।

शिवोत्कर्षप्रकाशेन जानकीशो महेश्वरः ।
भागीरथीमौलिमालस्तुष्यतां नागभूषणः ॥
श्रीलक्ष्मीरमणः साक्षात् प्रीयतां सुकवीश्वरः ।
बालकृष्णविनिर्मित्या चिन्तामणिरिवापरः ॥
शिवोत्कर्षप्रकाशाख्यममुं सुकुसुमाञ्जलिम् ।
उत्तमश्लोकपादाब्जे बालकृष्णो निवेदये ॥
स्वपितुर्लेखमाश्रित्य पितृव्यादेश्च कुत्रचित् ।
शिवोत्कर्षप्रकाशोऽयं बालकृष्णेन निर्मितः ॥

इति श्रीमदद्वैतप्रतिष्ठापककविचक्रवर्तिरङ्गोजिभट्टात्मजबालकृष्णभट्टेन विरचितः शिवोत्कर्ष-प्रकाशः समाप्तः।

शास्त्रे शास्त्रे शिव तव कथालेशचर्चाविहीने
भ्राम्यन् भ्राम्यन् भवति विफलो जन्मना पण्डितोऽपि।
ग्रन्थेऽत्रास्मिंस्तव गुणयुते चन्द्रचूडाल नित्यं
कृत्वा न्यासं भवति विजयी भक्तिभावैकनिष्ठः॥

The owner of the MS.: हर्षदेवस्येदं पुस्तकम् ७१.

893

शिवोत्कर्षरत्नाकरः

A collection of passages from various Śaiva works such as the *Saṃkara-saṃhitā* on the greatness of Śiva and his worship. The chapters deal with the greatness of Śivabhakti, Śivabhakta-s, Śivanāman-s and Vibhūti.

Beginning:

शुक्लाम्बरधरं विष्णुं+विघ्नोपशान्तये।
प्रणमामः परं ब्रह्म भवानीशंकरात्मकम्।
स्वस्ति गोब्राह्मणेभ्योऽस्तु सुप्रातर्दिनमस्तु नः॥
सदाशिवपदाम्भोजे भक्तिः परमपावनी।
पूर्वजन्मार्जितैः पुण्यैर्धन्यानामिह लभ्यते॥
अनेकजन्मशुद्धानां श्रौतस्मार्तानुवर्तिनाम्।
शिशिरांशुकलामौलौ शिवे भक्तिः प्रजायते॥

Colophon on fo. 7:

इति श्रीशिवोत्कर्षरत्नाकरे शिवभक्तिप्रशंसापद्धतिः प्रथमा।

End:

गतोपवीतैः संध्यायां कार्यः प्रतिनिधिः क्वचित्।
विभूतिधारणे त्वन्यो नास्ति प्रतिनिधिः क्वचित्॥

894

शैवपरिभाषामञ्जरी

A metrical work explaining certain technical words and expressions used in the Śaivasiddhānta works, containing ten chapters called Varga-s. The author was the pupil of Nigamajñānaśivayogin.

Beginning:

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥
वन्दे कल्पकविघ्नेशं श्रितपश्चिमगोचरम् ।
फलोपहारसंतुष्टमिष्टानां तुष्टिकारणम् ॥
श्रीमत्त्रिभुवनाधीशं शातकुम्भसभान्तरे ।
भजामि भूमिभृत्कन्यालालितानन्दनर्तनम् ॥
व्याघ्रपादं तथा शेषं स्वर्णवर्माणमेव च ।
श्रीमद्व्याघ्रपुराधीशं भक्तानेतान् भजाम्यहम् ॥
श्रीमद्व्याघ्रपुरावासं पूजितं शिवयोगिभिः ।
आगमग्रन्थरत्नौघैरापूर्णमठमन्दिरम् ॥
वेदज्ञानगुरुश्चेति विश्वविख्यातमाख्यया ।
सर्वागमरहस्यज्ञं स्मरामि शिवयोगिनम् ॥
लक्षिते शकभूपाब्दे तदाभाग्येति संख्यया ।
षष्टयन्तिमे हायने च तत्तिथौ तद्दतौ सुधीः ॥
वेदज्ञानाभिधानोऽसौ शैवशास्त्राब्धिपारगः ।
कालहस्तीश्वरेणात्र प्रतिष्ठां प्रापितः पराम् ॥
तन्ना . . . . . स्त्राब्धिपारगः ।
तन्नामधारिणा तस्य शिष्येण गुणशालिना ॥
एकद्वित्रिचतुःपञ्चषट्सप्ताष्टनवादिभिः ।
संख्याभिः कथ्यते भाषामञ्जरी मञ्जुलोक्तिना ॥
अनुगृह्णन्तु नामेतां सन्तः संश्रितवत्सलाः ।
क्वचिदुद्देशतः प्रोक्तः क्वचिल्लक्षणया सह ।
यन्न दृष्टं शिवज्ञाने तदन्यत्र न विद्यते ॥

इत्युपोद्घातः

आदिमध्यान्तनिर्मुक्तः स्वभावविमलः प्रभुः ।
सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ॥
अप्रमेयमनिर्देश्यमनौपम्यमनामयम् ।
सूक्ष्मं सर्वगतं नित्यं ध्रुवमव्ययमीश्वरम् ॥

End:

ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च ॥
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे ।

दशदीक्षाविधानेन शिष्याणां मोक्षसंभवः ॥
स्वानुभूतिप्रकाशेन साक्षान्मोक्षः प्रकाशितः ।
प्रथमं तत्त्वरूपाणि द्वितीयं तत्त्वदर्शनम् ॥
तृतीयं तत्त्वशुद्ध्यर्थं चतुर्थं त्वात्मरूपकम् ।
पञ्चमं त्वात्मसंदर्शं षष्ठं त्वात्मविशोधनम् ॥
सप्तमं शिवरूपाणि अष्टमं शिवदर्शनम् ।
नवमं शिवयोगं च दशमं शिवभोगकम् ॥

Colophon:

इति शैवपरिभाषामञ्जर्यां दशमवर्गः ।

Post-colophon writing:

इति पुण्डरीकपुरवासिनिगमज्ञानशिवयोगिशिष्यनिगमज्ञानदेवविरचितायां पर्यायमञ्जर्याख्या निघण्टुः समाप्ता ।

895

शैवसिद्धान्तसंग्रहः

A summary of the principles accepted in the Śaivasiddhānta philosophy.

Beginning:

श्रितादिपरनादातिसूक्ष्मादिपरविन्दुसहितस्थूलनाद . . . . . अपरबिन्दुशान्त्यतीतादि-निवृत्त्यन्तसदाशिवेश्वरे असाधारण . . . साधारणासाधारणकलाका . . . . . बुद्ध्यहंकारतन्मात्रपञ्चक

End:

मन्त्रात्मकप्रकरणे . . . . . शिवयोग्युच्चरितमन्त्राभिव्यक्तद्वारा शिवयोगिषु . . . . . शिवसंमेलनशक्तिरूपगुरून् ध्यायेत् ।

896

शैवार्थलहरी

An interpretation of some of the names of Viṣṇu to mean Śiva. The work is also called *Śaivārthavaikharī*. Another work of the author is the *Nārāyaṇārthalaharī*.

Beginning:

अणितेरस्ति शब्दार्थो न हि शब्दं विनास्ति वाक् ।
संलापाद्यर्थनाद्यर्थाः सिध्यन्त्याकारयोजनात् ॥

End:

केशवादिपदौघस्य तथा रामपदस्य च ।
श्रीनिवासोदिता ग्राह्या सद्भिः शैवार्थवैखरी ॥
शैवार्थवैखरीमेतां त्रिकालं यः पठेन्नरः ।
इहैश्वर्यमवाप्यासावन्ते शिवपदं व्रजेत् ॥

897

श्रुतिसूक्तिमाला

A metrical Śaivasiddhānta treatise of one hundred and fifty verses, which seeks to establish the supremacy of Śiva, quoting Śruti, etc. It is also called the *Caturvedatātparyasaṃgraha* or the *Tātparyasaṃgraha*. Appayadīkṣita, in his *Śivatattvaviveka* and *Śivakarṇāmṛta*, quotes this work as having been written by Sudarśanācārya. Therefore Haradattācārya was apparently also named Sudarśanācārya. But he should not be confounded with the author of the *Āpastambagṛhyasūtrabhāṣya Tātparyadarśana*, as there is another *bhāṣya* on the *Āpastambagṛhyasūtra* called *Anākulā*, written by Haradatta. Sri V. C. Ramalinga Pillai, who has edited the work, fixes Haradatta's date as ninth century A.D.

Beginning:

यस्मै नमो भवति यस्य गुणाः समग्रा
नारायणोपनिषदा यदुपासनोक्ता ।
यो नः प्रचोदयति बुद्धिमधिक्रतौ य-
स्तं त्वामनन्यगतिरीश्वर संश्रयामि ॥

End:

पञ्चाशदुत्तरशतश्रुतिसूक्तिमाला
भोगावली भुजगराजमनोहरा ते ।
वेदेषु सक्तिमपरागमवैदिकेषु
तन्त्रेषु भक्तिमतुलां त्वयि च प्रसूते ॥

Colophon:

इति श्रीपरमेश्वरांशावतारायमाणपदवाक्यप्रमाणज्ञश्रीहरदत्ताचार्यविरचिता श्रुतिसूक्तिमाला संपूर्णा ।

900

श्रुतिसूक्तिमालाव्याख्या तत्त्वप्रकाशिका

Beginning:

स्वं स्वं मनोरथमवाप्तुमपोढविघ्नं
यस्य प्रसादमनवाप्य न शक्नुवन्ति ।
पद्मासनप्रभृतयः प्रथमेऽपि देवा-
स्तद्वस्तु हस्तिमुखमस्तु मयि प्रसन्नम् ॥
व्यक्तप्रधानपुरुषात्मकमस्वतन्त्र-
मेतत् समस्तमधितिष्ठति यः स्वतन्त्रः ।
तस्मै शिवाय परमाय दशायुधाय
सांख्याय सादरमयं विहितः प्रणामः ॥
यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः ।
संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥
शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदवैमि दैवतम् ॥
गुरुं तमाराध्य सकृत्कृपातसर्वज्ञभावः शिवलिङ्गभूपः ।
व्याख्याति वक्ता हरदत्तसूरिकृतां गभीरां श्रुतिसूक्तिमालाम् ॥

इह खलु कलिकालकलनानन्तरमवैदिकबौद्धादिराद्धान्तानुसंधानाविशुद्धबुद्धीन् विश्वनिरीश्वरत्व-निर्वाहकवैदिकापशदमीमांसाकल्पनानल्पविकल्पजल्पश्रवणोन्मिषितकल्मषकलुषितवृषाङ्कविषयशेमुषी-कान् मनीषिणोऽनुग्रहीतुकामो महेश्वरांशावतारायमाणः पदवाक्यप्रमाणज्ञो हरदत्ताचार्यः शैववैदिक-तन्त्रविश्वासकारिणीमवैदिकमतनिराकरणीं समस्तकल्मषापहारिणीम् ।

End:

पञ्चाशदुत्तरं शतं श्लोकशतं यस्याः सा पञ्चाशदुत्तरशता श्रुतिसूक्तिमाला भोगावली स्तोत्ररूपा अत एव भुजगराजमनोहरा शेषवन्मनोहरा ते श्रुतिसूक्तिमाला वेदेषु भक्तिं सङ्गम् अवैदिकेषु तन्त्रेषु सिद्धान्तेषु अपरागमस्नेहं त्वयि अचलां दृढां भक्तिं प्रसूते जनयति ॥ १४९ ॥

शिवलिङ्गाख्यभूपेन श्रुतिसूक्तेस्तु निर्मिता ।
द्विशतोत्तरसाहस्रा व्याख्या तत्त्वप्रकाशिका ॥

Colophon:

इति प्रणतनरपतिशिरोरत्नमरीचिनिकरपरिरञ्जितचरणारविन्देन शिवलिङ्गभूपतिना रचिता तत्त्वप्रकाशिकाख्या श्रुतिसूक्तिमालाव्याख्या ।

904

सिद्धान्तप्रकाशिका

A brief survey of the principles of Śaivasiddhānta philosophy. Incidentally, summaries of the principles of other schools are given.

Beginning:

अवर्णविग्रहं देवं वर्णविग्रहवर्जितम् ।
वर्णविग्रहवक्तारं नमामि स्तौमि संश्रये ॥
चराचरात्मकं विश्वमोतप्रोते च सर्वतः ।
पशुपाशभिदा येन नमस्तस्मै पुरद्विषे ॥

इह तावज्जातिकुलाद्यभिमानास्पदस्थूलदेहः पृथिव्यप्तेजोवाय्वाकाशानां समवायः । तत्र प्राक्तन-पुण्यपापानुकूलं ब्राह्मणादिवर्णांश्च रूपश्रियाविन्द्रियपाटवमपि बिभ्रतो नियतायुषो नियतभोगाश्च भवन्ति भोक्तार आत्मानः ।

End:

एवंविधानामप्यात्मनां परमेश्वरवत् सृष्ट्यादिकर्तृत्वं नास्ति । विषयानन्दसद्भावश्च रागद्वेषादीनां विद्यमानता च सृष्ट्यादेरकर्तृतायाः कारणम् । पञ्चविधकृत्येन तु परमेश्वर एव परानुग्रहं करोति ।

Colophon:

इति सर्वमतेष्विष्टा सा सिद्धान्तप्रकाशिका ।
सर्वात्मशंभुना व्यक्ता कल्पिता शैवसंमता ॥

समाप्तश्चायं ग्रन्थः ।

906

सिद्धान्तसारावलिः

A metrical epitome of the essence of the Śaivasiddhānta philosophy. The work is divided into four Pāda-s: Jñānapāda (27 stanzas), Kriyāpāda (90 stanzas), Yogapāda (8 stanzas) and Caryāpāda (41 stanzas).

Beginning:

ओतं येन जगच्चराचरमिदं प्रोतं च सर्वं सदा
मुच्यन्ते पशवोऽपि पाशनिकराद्यस्य प्रसादेन तत् ।
ओमित्यादिमनूच्चरद्ध्वनिगतं ज्योतिष्मतां द्योतकं
व्योमव्यापि परं शिवाख्यमकलं ज्योतिः प्रपद्ये धिया ॥

End:

श्रीमच्छैवमतार्थसारखचिता सिद्धान्तसारावलिः
शैवज्ञानवता त्रिलोचनशिवाचार्येण कृप्ता शुभा ।
श्रीमच्छैवमतानुसारिविदुषामानन्दसंदायिनी
शंभोः प्रीतिकरी सदा विजयतां शक्त्या समेतस्य च ॥

Colophon:

सिद्धान्तसारावलिः समाप्ता ।

907

सिद्धान्तसारावलिः

The following additional verse is found in the beginning:

विद्रुमनिभं द्विदशहस्तं रसवक्त्रं
शशकत्रिकरखड्गमभयदं जगतां च ।
वामकरचापकुलिशादिकटकं
स्याच्छूलवरपङ्कजसुषण्मुखसुरूपम् ॥

908

सिद्धान्तसारावलिः सव्याख्या

Beginning:

श्रीमद्वैद्येशलिङ्गं परममुनिगणैः सेवितं सत्पदार्थैः
स्वस्य प्राच्यादिकाष्ठागतयुगमनुभिः संयुतं लिङ्गरूपैः ।
नत्वानन्ताख्यशंभुर्वरगुरुकरुणाम्भोधिसंसक्तचेताः
श्रीमत्सिद्धान्तसारावलिविवृतिमहं वच्मि गूढार्थसिद्धयै ॥

तत्र तावदामर्दकमठनिवासिसकलागमपारदृश्वा त्रिलोचनशिवाचार्यः स्वसंतानागमसंभूतकामिकादिसिद्धान्तं तद्भेदं मृगेन्द्राद्यागममालोच्य तत्र शब्दार्थयोः सामर्थ्येन लब्धप्रमाणैः श्लोकैरनेकैर्निर्णीतार्थं पदार्थत्रययुक्तं सपादचतुष्टयं सिद्धान्तसारावलिनामधेयं ग्रन्थं चिकीर्षुश्चिकीर्षितस्याविघ्नपरिसमाप्त्यर्थं निष्कलं मूलमन्त्रस्योच्चारभेदेन तुर्यावस्थास्वरूपं शिवमाद्येन श्लोकेन प्रणमति—ओतमिति ।

ओतं येन जगच्चराचरमिदं प्रोतं च सर्वं सदा
मुच्यन्ते पशवोऽपि पाशनिकराद्यस्य प्रसादेन तत् ।
ओमित्यादिमनूच्चरद्ध्वनिगतं ज्योतिष्मतां द्योतकं
व्योमव्यापि परं शिवाख्यमकलं ज्योतिः प्रपद्ये धिया ॥

यथा कुविन्दस्य पटकार्यं प्रति निमित्तत्वं तथैव निमित्तकारणभूतेन व्यापकशीलेन परमशिवेनेदं प्रपञ्चाकारेण दृश्यमानं चराचरम् ।

End:

श्रीमच्छैवमतार्थसारनिचिता सिद्धान्तसारावलिः
शैवज्ञानधिया त्रिलोचनशिवाचार्येण कृता शुभा ।
श्रीमच्छैवमतानुसारिविदुषामानन्दसंदायिनी
शंभोः प्रीतिकरी सदा विजयतां शक्त्या समेतस्य च ॥

Colophon:

सिद्धान्तसारावलिः संपूर्णा ।

910

सिद्धान्तसारावलिः सव्याख्या

It is mentioned in the colophon of the Jñānapāda that the author was a resident of Vyāghrapura (Chidambaram).

Beginning:

श्री . . . शं परमगुरुगणैः सेवितं भुक्तिमुक्त्यै
स्वेच्छाशक्त्यादिहस्तैः सकलजगदिदं विस्तृतं पुद्गलार्थे ।
यं नत्वा शंक . . . गुरुगणैश्चापरान्मामकांश्च
श्रीमत्सिद्धान्तसारावलिविवृतिमिमां कुर्मे(?)गूढार्थसिद्धयै ॥

तत्र तावदाचार्यः प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्त्यर्थं निष्कलं परमशिवं तत्सिद्धप्रमाणविशेषणयुतमाद्यश्लोकेन स्तौति—

ओतं येन जगच्चराचरमिदं प्रोतं च सर्वं सदा
मुच्यन्ते पशवोऽपि पाशनिकराद्यस्य प्रसादेन तत् ।
ओमित्यादिमनूच्चरद्ध्वनिगतं ज्योतिष्मतां द्योतकं
व्योमव्यापि परं शिवाख्यमकलं ज्योतिः प्रपद्ये धिया ॥

येन शिवेन जगत् विश्वमेतत् ऊर्ध्वप्रसारितं प्रोतं यः प्रसारितः ।

End:

तदुक्तं श्रीमृगेन्द्रे—

अथात्मपदतां मत्वा स्वाधिकारं सुदुष्करम् ।
यतेरन्नात्मवत्तायै देशिकाद्या जि . . क्षवः ॥

Colophon:

इति श्रीसदाशिवाचार्यकृतौ सिद्धान्तसारावलि(विवृतौ) क्रियापादः समाप्तः ।

VEDĀNTA: ANUBHAVĀDVAITA

912

अनुभवाद्वैतसिद्धान्तरहस्यम्

This is a short summary of Anubhavādvaita. The author, who lived in the second half of the last century, started his own school of Vedānta and wrote several works both in Sanskrit and Tamil, including commentaries on the one hundred and eight Upaniṣad-s. The author styles himself as Appayāryaśivayogin in one of the colophons of his *Brahmasūtrabhāṣya* (No. 932 below). For a list of his works see *NCC*, I, p. 194 f.

Beginning:

नित्यानित्य . . . . . संज्ञकमिदं यत्स्थापनं . . . . . .
नाद्यं प्राक्तनपुण्यपुञ्जजनितं तस्य . . . रन्तं जगत् ।
सर्वं नाशवदेकमद्वयपरब्रह्मैव तन्निर्गुणं
नित्यं स्यादिति चित्तवृत्तिरमला संशोभते दुर्लभा ॥

End:

चिद्रूपा सकलात्मवृत्तिरहिता या वासनाख्या मता
. . . स्तो च समाधिरुज्झति महान्निर्वासनाख्योऽन्तिमः ।
प्रारब्धक्षयकाललभ्यविलसद्द्वन्द्वैरपेत . . . क
मोक्षातीतदशागतं विजयते प्राप्तं स्वरूपं पदम् ॥

913

अनुभूतिमीमांसावृत्तिः

This is a treatise on the principles of the Anubhavādvaita school of Vedānta. The title page attributes the work to Vasiṣṭha and says that the work forms part of the *Tattvasārāyaṇa* (*Gurujñānavāsiṣṭha*).

Beginning:

दक्षिणाक्षिस्थमात्मानं प्रथमं यो गुरूत्तमः ।
दर्शयित्वाथ मां पूर्णमकार्षीस्ते नमो नमः ॥ १ ॥
स्वामिन् दयानिधे श्रीमद्वदनाम्भोरुहादहम् ।
श्रुत्वा वेदान्तसारांशान् कृतार्थोऽस्मि न संशयः ॥ २ ॥

End:

इन्द्रियाणां मनो नाड्य इति वाङ्मनसीति च ।
श्रुत्योरैक्यमनुत्क्रान्तिश्रवणाच्चात्मवेदिनः ॥
जीवद्विमुक्तस्य विदेहमुक्तिः संन्यासिनः सिध्यति दुःखनाशे ।
समाधिभिर्देहतिरस्कृतौ चेत्येवं हि शब्दादवगम्यतेऽर्थः ॥

Colophon:

इति तत्त्वसारायणे कर्मकाण्डस्य चतुर्थपादे चतुर्थोऽध्यायः ।

The title page contains the following remark:

श्रीमद्वसिष्ठमहर्षिप्रोक्तदक्षिणामूर्तिब्रह्मसंवादात्मकगुरुज्ञानवासिष्ठतत्त्वसारायणान्तर्गता अनुभूतिमीमांसावृत्तिः तदनुसृत्य श्रीमदप्पयदीक्षिताचार्यैः प्रणीतानि अनुभूतिसूत्राणि च ।

916

अनुभूतिमीमांसासूत्रम्

Beginning:

अथात आत्मदिदृक्षा ॥ १ ॥ सत्याद्यात्मक एषः ॥ २ ॥ परप्रेमास्पदत्वात् ॥ ३ ॥ प्रमाणानुसारात् ॥ ४ ॥ विज्ञाता चाकरणत्वात् ॥ ५ ॥ आश्रयत्वात्तु सूत्रवत् ॥ ६ ॥

End:

गुरुं वा ॥ १० ॥ ब्रह्मचर्याच्च ॥ ११ ॥ इन्द्रियाणां मन इत्यादिदर्शनात् ॥ १२ ॥ नोत्क्रान्तिस्तु तच्छ्रुतेः ॥ १३ ॥ अदेहमुक्तिः शब्दात् अदेहमुक्तिः शब्दात् ॥ १४ ॥

Colophon:

श्रीमद्वसिष्ठमहर्षिप्रोक्तदक्षिणामूर्तिब्रह्मसंवादात्मकगुरुज्ञानवासिष्ठतत्त्वासारायणस्य कर्मकाण्डान्तर्गतानुभूतिमीमांसावृत्तिमनुसृत्य श्रीमदप्पयदीक्षिताचार्यैः प्रणीतमिदमनुभूतिसूत्रं समाप्तम् ।

Five extra leaves in the beginning read the following:

श्रीमद्भारद्वाजकुलजलधिचन्द्रायमाणश्रीमदप्पयदीक्षितेन्द्रान्वयजानाम्, अनुभवाद्वैतप्रस्थानत्रयादिपञ्चाशदधिकशतप्रबन्धनिर्मातृणां, ताम्रपर्णीतीरवासिनाम्, अनुभवाद्वैतप्रतिष्ठापनाचार्याणां, श्रीमत् सुन्दरेश्वरतातपादशिष्याणां श्रीमदप्पयदीक्षिताचार्याणां कृतिषु इयमनुभूतिमीमांसा ।

VEDĀNTA: ANUBHAVĀDVAITA

912

अनुभवाद्वैतसिद्धान्तरहस्यम्

This is a short summary of Anubhavādvaita. The author, who lived in the second half of the last century, started his own school of Vedānta and wrote several works both in Sanskrit and Tamil, including commentaries on the one hundred and eight Upaniṣad-s. The author styles himself as Appayāryaśivayogin in one of the colophons of his *Brahmasūtrabhāṣya* (No. 932 below). For a list of his works see *NCC*, I, p. 194 f.

Beginning:

नित्यानित्य . . . . . संज्ञकमिदं यत्स्थापनं . . . . . .
नाद्यं प्राक्तनपुण्यपुञ्जजनितं तस्य . . . रन्तं जगत् ।
सर्वं नाशवदेकमद्वयपरब्रह्मैव तन्निर्गुणं
नित्यं स्यादिति चित्तवृत्तिरमला संशोभते दुर्लभा ॥

End:

चिद्रूपा सकलात्मवृत्तिरहिता या वासनाख्या मता
. . . स्तो च समाधिरुज्झति महान्निर्वासनाख्योऽन्तिमः ।
प्रारब्धक्षयकाललभ्यविलसद्द्वन्द्वैरपेत . . . क
मोक्षातीतदशागतं विजयते प्राप्तं स्वरूपं पदम् ॥

913

अनुभूतिमीमांसावृत्तिः

This is a treatise on the principles of the Anubhavādvaita school of Vedānta. The title page attributes the work to Vasiṣṭha and says that the work forms part of the *Tattvasārāyaṇa* (*Gurujñānavāsiṣṭha*).

Beginning:

दक्षिणाक्षिस्थमात्मानं प्रथमं यो गुरूत्तमः ।
दर्शयित्वाथ मां पूर्णमकार्षीस्ते नमो नमः ॥ १ ॥
स्वामिन् दयानिधे श्रीमद्वदनाम्भोरुहादहम् ।
श्रुत्वा वेदान्तसारांशान् कृतार्थोऽस्मि न संशयः ॥ २ ॥

End:

इन्द्रियाणां मनो नाड्य इति वाङ्मनसीति च ।
श्रुत्योरैक्यमनुत्क्रान्तिश्रवणाच्चात्मवेदिनः ॥
जीवद्विमुक्तस्य विदेहमुक्तिः संन्यासिनः सिध्यति दुःखनाशे ।
समाधिभिर्देहतिरस्कृतौ चेत्येवं हि शब्दादवगम्यतेऽर्थः ॥

Colophon:

इति तत्त्वसारायणे कर्मकाण्डस्य चतुर्थपादे चतुर्थोऽध्यायः ।

The title page contains the following remark:

श्रीमद्वसिष्ठमहर्षिप्रोक्तदक्षिणामूर्तिब्रह्मसंवादात्मकगुरुज्ञानवासिष्ठतत्त्वसारायणान्तर्गता अनुभूतिमीमांसावृत्तिः तदनुसृत्य श्रीमदप्पयदीक्षिताचार्यैः प्रणीतानि अनुभूतिसूत्राणि च ।

916

अनुभूतिमीमांसासूत्रम्

Beginning:

अथात आत्मदिदृक्षा ॥ १ ॥ सत्याद्यात्मक एषः ॥ २ ॥ परप्रेमास्पदत्वात् ॥ ३ ॥ प्रमाणानुसारात् ॥ ४ ॥ विज्ञाता चाकरणत्वात् ॥ ५ ॥ आश्रयत्वात्तु सूत्रवत् ॥ ६ ॥

End:

गुरुं वा ॥ १० ॥ ब्रह्मचर्याच्च ॥ ११ ॥ इन्द्रियाणां मन इत्यादिदर्शनात् ॥ १२ ॥ नोत्क्रान्तिस्तु तच्छ्रुतेः ॥ १३ ॥ अदेहमुक्तिः शब्दात् अदेहमुक्तिः शब्दात् ॥ १४ ॥

Colophon:

श्रीमद्वसिष्ठमहर्षिप्रोक्तदक्षिणामूर्तिब्रह्मसंवादात्मकगुरुज्ञानवासिष्ठतत्त्वासारायणस्य कर्मकाण्डान्तर्गतानुभूतिभीमांसावृत्तिमनुसृत्य श्रीमदप्पयदीक्षिताचार्यैः प्रणीतमिदमनुभूतिसूत्रं समाप्तम् ।

Five extra leaves in the beginning read the following:

श्रीमद्भारद्वाजकुलजलधिचन्द्रायमाणश्रीमदप्पयदीक्षितेन्द्रान्वयजानाम्, अनुभवाद्वैतप्रस्थानत्रयादिपञ्चाशदधिकशतप्रबन्धनिर्मातृणां, ताम्रपर्णीतीरवासिनाम्, अनुभवाद्वैतप्रतिष्ठापनाचार्याणां, श्रीमत् सुन्दरेश्वरतातपादशिष्याणां श्रीमदप्पयदीक्षिताचार्याणां कृतिषु इयमनुभूतिमीमांसा ।

919

अनुभूतिमीमांसासूत्रभाष्यम्

A commentary on the above work. The MS. is in four volumes.

Beginning:

ओं शं नो मित्र इति शान्तयः। ओं षोडशयुष्मदस्मत्प्रत्ययगोचराणां षोडशविषयविषयिणां शेषशेषिणां तमःप्रकाशवद्विरुद्धस्वभावानामितरेतरात्मकतामितरेतरधर्मांश्च नैसर्गिकतयाध्यस्य इतरेतरविवेकाग्रहणनिबन्धनो महान् प्रमादः पण्डितेष्वप्यवगम्यते। कोऽयं प्रमादो नाम। यदैकात्म्यवादमात्रपर्यवसन्ना मतयः सेतूल्लङ्घनेन सतां मार्गश्च दूषितः।

Colophon on p. 490:

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजस्याप्पययदीक्षितस्य कृतिष्वनुभूतिमीमांसाभाष्यस्य प्रथमाध्यायस्य चतुर्थः पादः।

End:

तस्मात् सर्ववेदान्तरहस्यार्थायतनभूतेऽस्मिन् महत्तमे शास्त्रे सर्वेऽप्यपरोक्षात्मानुभवेच्छवो निरन्तरनिष्ठां कुर्वन्तोऽत्रैव सद्यो विदेहमुक्तिं प्राप्नुयुरिति निरङ्कुशराद्धान्तः प्रतिष्ठापितोऽवगन्तव्यः। अदेहमुक्तिः शब्दादेहमुक्तिः शब्दादित्यभ्यासोऽनुभूतिमीमांसाशास्त्रपरिसमाप्तिद्योतनार्थः।

Colophon:

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजस्य श्रीमत्सुन्दरेश्वरतातपादशिष्यस्याप्पयदीक्षितस्य कृतिष्वनुभूतिमीमांसायां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः।

920

अनुभूतिमीमांसासूत्रविवरणम्

Beginning:

अथात आत्मदिदृक्षा।

इदमाम्नायते बृहदारण्यके चतुर्थाध्याये मूर्तामूर्तब्राह्मणोपसंहारे—योऽयं दक्षिणेऽक्षन् पुरुषस्तस्य ह्येष रसः तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासो यथा पाण्डाविकं यथेन्द्रगोपो यथाग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्विद्युत्तं सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेदाथात आदेशो नेति।

End:

आथर्वणवाक्ये दर्शनम्। सामवाक्ये श्रवणम्। यजुर्वाक्ये मननमिदिध्यासने। ऋग्वाक्ये निर्विकल्पनिःसंकल्पनिर्वृत्तिकनिर्वासनाख्यकसमाधिचतुष्टयमित्येवं साधनाष्टकवाक्यचतुष्टययोः समन्वयं

विदित्वा क्रमेणोपासनपर इहैव निष्प्रतियोगिकब्रह्मतामुपेत्य सद्यो विदेहमुक्तः सांख्ययोगिश्रेष्ठः सर्वैर्ब्रह्मवादिभिरपि देवैः सर्वदा पूज्य इति सिद्धम् ।

Colophon:

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजस्य श्रीसुन्दरेश्वरतातपादशिष्यस्याप्पयदीक्षितस्य कृतिषु अनुभूतिमीमांसायां चतुर्थस्याध्यायस्य तृतीयः पादः ।

921

एकश्लोकः सव्याख्यः

This is a work in one verse briefly explaining the chief principles of the Anubhavādvaita school of Vedānta. The commentary is by the author himself.

Beginning:

भ्रूमध्ये रवितुल्यमार्यवचनाद्ध्यानेन वा मुद्रया
दृष्ट्वात्मानमथाम्बरेण सदृशं श्रुत्वा महावाक्यतः ।
मत्वा साक्षिपदं प्रपद्य जगतामाद्यं समाधेस्ततः
प्राप्याखण्डपदं द्वितीयत इह स्वस्थो भवेत् किं परैः ॥

इह खल्वाध्यात्मिकादितापत्रयसंपीडितानां जन्मान्तरार्जितनिष्कामपुण्यपरिपाकोदितविवेकादिसाधनचतुष्टयवतामपि तत्त्वज्ञानसिद्ध्यर्थकवेदान्तबहुशास्त्राध्ययनाद्यवकाशरहितानामनेनैकेनैव श्लोकेन करतलामलकवदात्मापरोक्षानुभवमनायासमेवोत्पादयितुमुद्युक्तैरस्माभिर्विरचितः भ्रूमध्य इत्यादिरयं श्लोको व्याख्यायते ।

End:

एकविज्ञानेन सर्वविज्ञानादनेनैकसंख्येन श्लोकेनैव सर्वेषां शास्त्राणां चारितार्थ्यसंपादकममुं श्लोकमधीत्य सर्वेऽपि मुमुक्षव इह धन्या भवन्तु ।

Colophon:

इत्यप्पयदीक्षितकृतिषु एकश्लोकः समाप्तः ।

923

कर्मस्वरूपनिर्णयः

Beginning:

पापानि पुण्यैर्न कदापि नृणां नश्येयुरित्यस्ति हि मानमात्रम् ।
प्रत्यक्षमैश्वर्यवतोऽपि रोगो महानतः पुण्यकृतिर्वृथैव ॥ १ ॥

पापक्षयार्थानि कृतानि पूर्वं पुण्यानि नातः फलमेष रोगः।
इति भ्रमो मास्तु च भोगमात्रे ते पर्यवस्यन्त्यखिलानि तानि ॥ २ ॥

End:

श्रौताग्निहोत्र . . . . . दोऽपि न प्रत्यवैति स्मृतिवह्नियुक्तः।
एवं विमुक्तावपि पापिनां हा मुक्त्यर्ह एवास्ति न कोटिमध्ये ॥ ८ ॥
पाप . . . . . या भवन्ति यत् . . . यथाप्यनग्नौ . . . पापम्।
ज्ञाना . . वेत् पौ . . . . हानिरित्येतावता . . . . . ॥ ९ ॥

924

जीवन्मुक्तिविचारः

This work deals with Jīvanmukti (Liberation while alive), according to the Anubhavādvaita school.

Beginning:

नत्वा गुरुं महात्मानमिह प्रकरणान्तरम्।
जीवन्मुक्तलयस्थाननिर्णयार्थं विचार्यते ॥

ननु न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्त इति श्रुत्युक्तस्यात्रशब्दस्य नाडीपरत्वात् न जीवन्मुक्तस्य प्रारब्धदेहसमकालपरब्रह्मप्राप्तिरुपपद्यते। नाडीनामाश्रयः पिण्डो नाड्यः प्राणस्य चाश्रया इति श्रुत्यन्तरेण प्राणानां नाड्याश्रयत्वमेव चावगम्यते।

End:

ननु मनउपादानकत्वाभावादिन्द्रियाणां मनसि नष्टेऽपि इन्द्रियसद्भाव इति सप्रमाणमुपपादितम्। तथापि तैत्तिरीयोपनिषदुक्तप्रकारकपञ्चकोशविचारणायां तदुपपादनं न समीचीनं भवति। कुतः? अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्यपञ्चकोशानां पूर्वपूर्वाच्छादकत्वे

925

दशकोटिः

A dissertation on Anubhava Vedānta, criticizing ten points selected from the *Brahmasūtrabhāsya* of Śaṃkara.

Beginning:

. . ह्मणि उक्तपूर्वत्वेनानुक्तपूर्वस्य निर्गुणैकब्रह्मण उत्तरत्रारभ्यमाणत्वात् तच्छब्दनिर्दिष्टमवाङ्मनसगोचरं निर्गुणं ब्रह्म। एवमेव ह्यानन्दमयाधिकरणे प्रपञ्चितमिति। ननु प्राचुर्यार्थकमयडन्तानन्द-

शब्दनिर्दिष्टस्य ब्रह्मणः सप्रतियोगिकत्वेन सगुणत्वाभ्युपगम इव निर्गुणब्रह्मणोऽपि सगुणब्रह्मप्रतियोगिकत्वेन सगुणत्वापत्तिः ।

Colophon on fo. 11:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यस्य कृतौ दशकोट्यां प्रथमकोटिः समाप्ता ।

End:

उत पितृपुत्रयोरिव जन्यजनकसंबन्धः, आहोस्वित् अग्निस्फुलिङ्गयोरिवांशांशिसंबन्धः, अथवा

926

पक्षसंग्रहः सव्याख्यः

In twenty-four verses, with his own explanation, the author tries to refute the views of Śaṃkara. The work contains sixty *vāda-s* or arguments.

Beginning:

परपक्षस्थितान् दोषान् स्वपक्षस्थगुणानपि ।
बुभुत्सोः क्रियते नत्वा श्रीगुरुं पक्षसंग्रहः ॥

अत्र खलु चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमादौ श्रीगुरुवन्दनं कृत्वा करिष्यमाणप्रबन्धनामरूपे उच्येते—परेति । परपक्षस्थितान् ; परे शुद्धाद्वैतिनः, तेषां पक्षेषु स्थितान् दोषान् ; स्वपक्षस्थगुणान् ; स्वपक्षाः अनुभवाद्वैतिनामस्मदादीनामभ्युपगमाः, तेषु स्थितान् गुणानपि बुभुत्सोः बोद्धुमिच्छोः, तदर्थमित्यर्थः । उक्तलक्षणः पक्षसंग्रहाख्यः प्रबन्धः क्रियते रच्यत इति । कस्तर्हि शुद्धाद्वैतिनां दोषवान् प्राथमिकः पक्ष इत्यपेक्षायामिदमुच्यते—

अध्यासासिद्धिरद्वैताद्ब्रह्मज्ञेयमरूपतः ।
वाच्यार्थस्य त्वसंसिद्धेर्न लक्ष्यार्थश्च सिध्यति ॥

End:

आनन्दमयसाक्षिणि प्रतिष्ठाशब्दिते ब्रह्मण्येव सकलपर्यवसानेऽपि तस्यैष एव शारीर आत्मा, यः पूर्वस्य इति श्रुत्या सर्वेषां कोशिनामेवोत्तरोत्तरसंबन्धावगमात् आत्मप्राधान्यमेवावगन्तव्यम् । एवं प्रियादीनां ब्रह्मविदाप्यनुभूतिविषयत्वप्रतिपादनमुपपन्नतरमिति स्थितम् ।

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्यस्यानुभवाद्वैतप्रतिष्ठापनाचार्यस्याप्पयदीक्षितस्य कृतिषु पक्षसंग्रहः समाप्तः ।

928

पञ्चरहस्यं सव्याख्यानम्

This work deals with the following Rahasyamantra-s: Aṣṭākṣara, Ṣaḍakṣara, Praṇava, Mahāvākya and Gāyatrī, giving their meaning according to the views of Anubhavādvaita.

Beginning:

इष्टार्थप्रद उत्तमोऽखिलनृणां कष्टापहः श्रीपतिः
शिष्टाराध्यमबोधयन्निजपदं दुष्टानवाप्यं परम् ।
दृष्टात्मश्रवणादिभिर्मुनिवरैर्जुष्टान्तिकः सर्वदा
स्रष्टा यत्प्रभवोऽखिलस्य च भजाम्यष्टाक्षरं तन्मनुम् ॥ १ ॥
मुञ्चाशेषविकारसत्यधिषणां सिञ्चामि नित्यामृतैः
संचारादिविहीनयोगजनितैः शं चाधिकं त्वां नयन् ।
स्वं चारूक्तिभिरित्यवोचदिह हृन्मञ्चाधिरूढः शिवो
यं चामीकरवर्णमाह च भजे पञ्चाक्षरं तन्मनुम् ॥ २ ॥
पात्राणामिह या विमुक्तिफलदाः स्तोत्रानपक्षं सतां
धात्रा नारदबोधिताश्च निखिलश्रोत्रात्मसंदीपिकाः ।
गोत्रायामखिलाश्रमिष्वविषमा गात्रादिदोषापहा
मात्रा याः प्रणवस्य ता इह भजे यात्रां विना स्वाप्तये ॥ ३ ॥
स्वैक्यार्थं गुरुणोत्तरोत्तरविदालोक्यानुलोमाच्च मा-
ण्डूक्यादिं प्रतिलोमतः सगुणसालोक्यादिदूरस्थितम् ।
शौक्याश्चातिरहस्यमुग्रतरसा शोक्याद्विमुक्त्यै सुखा-
स्तोक्यान्तस्थितये सुदुर्लभमहावाक्याख्यमन्त्रं भजे ॥ ४ ॥
ते यस्याखिलवेदगाश्च मनवोऽमायस्य शेषाः परो-
पायस्वात्मसुखाप्तये भवति यो कायस्वरूपार्थकः ।
ध्येयब्रह्मपरो द्विजैः प्रतिदिनं भूयः समाराधितो
गायत्रीमनुमाभजे सुविहितं श्रेयस्कराणां प्रभुम् ॥ ५ ॥

वैष्णवाष्टाक्षररहस्यम्—

अत्र खलु सकलश्रुतिस्मृतीतिहासपुराणागमज्ञानां स्वयमेव बहुप्रबन्धविरचनसमर्थानां धीमदग्रेसराणामपि श्रीमन्नारायणाष्टाक्षरमहामन्त्रार्थप्रवचनतत्पराणामपि च तद्रहस्यार्थानभिज्ञतया शैवादिमतान्तरविद्वेषिणामत एव कामक्रोधादिप्राबल्येन संसारबन्धमोचनानर्हाणामपि केषांचिज्जनानां सर्वदोषनिवृत्तिद्वारा तद्रहस्यार्थावबोधं जनयितुकामेन मयाष्टाक्षररहस्याख्यं सव्याख्यं प्राथमिकं प्रकरणमारभ्यते—

नमो नारायणायेति मन्त्रः प्रणवपूर्वकः ।
यदाह सर्वगं ब्रह्म तद्ध्यायाम्यहमित्यहम् ॥

End:

यद्यप्याथर्वणमहावाक्योक्तयोरात्मब्रह्माख्ययोः कूटस्थपुरुषयोर्व्यष्टिसमष्टिभूतयोरक्ष्यादित्यायतनयोरंशांशित्वमस्ति, तथापि न तत्समष्ट्युपासनमिहांशिभूतपरब्रह्मविषयकमभिप्रेतम् ; तस्यादित्यान्तर्यामिण एव परमपुरुषस्य सवितृत्वाभिप्रायात् । तद्वरेण्यं भर्गसंज्ञकं यजुर्महावाक्योक्तं ब्रह्मैवांश्युपासनाविषयः; तत्रैव चोभयोरप्यक्ष्यादित्यायतनवतोश्च प्रलीयमानत्वात् । तदेव हि सवितृवरेण्योपासनं निरायतनं निर्विशेषब्रह्मविषयकमिति सर्वेषां वेदान्तिनां परमाशयः । अत्रैवं सति यः सूर्यः सोऽहमेव चेति असावादित्यो ब्रह्मेति च श्रूयमाणसूर्यात्मैक्यं सामान्यविशेषाभ्यां पौर्वापर्येण द्विविधमभ्युपगन्तव्यम् ।

Colophon:

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजस्याप्पयदीक्षितस्य कृतिषु पञ्चरहस्ये गायत्रीरहस्याख्यं पञ्चमं रहस्यं समाप्तम् ।

930

ब्रह्मतत्त्वबोधः सव्याख्यः

On the nature and characteristics of Brahman according to the Anubhavādvaita. One verse summarizes the principles of the school and is explained in the author's commentary.

Beginning:

नित्यं चिन्मात्रमेकं निरवधिकसुखं सत् परिच्छेदशून्यं
सत्यं निर्भेदमाद्यं गुणरहितमसत्साक्षि साक्षित्वहीनम् ।
ज्योतिस्तुर्यं स्वरूपं विमलमचलमाद्यन्तशून्यं प्रसिद्धं
शुद्धं बुद्धं विमुक्तं परमजममृतं ब्रह्म निष्कर्म वन्दे ॥

अथ खलु चिकीर्षितस्य सकृदवलोकनमात्रेण समस्तवेदान्तरहस्यार्थस्फुटीकरणचतुरस्यातिसूक्ष्ममतिग्राह्यार्थस्याप्रयत्नेनैवानिशं निर्विकल्पसमाध्यानन्दोत्पादकस्य ब्रह्मतत्त्वबोधाख्यस्यास्य प्रबन्धस्याविघ्नेन परिसमाप्तये प्रथमं मङ्गलाचरणं चिकीर्षुभिरस्माभिरादौ मङ्गलफलकोंकारसदृशं नित्यमिति पदं प्रयुक्तम् ।

End:

उपासनानुरूपं हि प्रेरणं सर्वसंमतम् ।
यावद्विकारवान् धाता तावद् ध्येयं सधर्मकम् ॥

इत्यत्राष्टादशश्लोकानुरोधेन प्राणमनइन्द्रियाणां विकाराणां संस्कारा वा यावदवतिष्ठन्ते, तावदरूप-ब्रह्मणोऽपि ध्येयत्वं सिध्यति। त्रिपाच्चिद्रूपब्रह्मण इव त्रिपादूर्ध्वोदितारूपब्रह्मणोऽपि वैविध्यस्यावधारित-त्वादनवद्यम्।

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्यस्यानुभवाद्वैतप्रतिष्ठापनाचार्यस्याप्पयदीक्षितस्य कृतिषु ब्रह्म-तत्त्वबोधः समाप्तः।

932

ब्रह्मसूत्रभाष्यम्

This is a commentary on the *Brahmasūtra-s* by Appayācārya according to the Anubhavādvaita school of Vedānta.

Beginning:

अस्मत्प्रत्ययगोचर . . . . . त्मोत्पन्नोऽहंप्रत्ययगोचरः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वा-द्यखिलसंसारधर्मोपेतश्च जीवात्मा प्रबलतरज्ञानकर्मसमुच्चयानुष्ठानसंस्कृतजीवान्तरपरिणतेश्वरसेवकत्व-मात्मनो मत्वा अहमिदं ममेदमित्यभिमानवशात् पश्चाद्यविशिष्टः श्रौतस्मार्तादिनित्यनैमित्तिककाम्य-निषिद्धकर्मसु नियुक्तः प्रवृत्तो दृश्यते। तत्रानेकजन्मोपार्जितसुकृतपुञ्जापास्तनिषिद्धकाम्यकर्मणा केनचिन्निष्कामोपासकेन चित्तशुद्धिहेतोः नित्यनैमित्तिककर्मभिः परमेश्वर उपास्यते च।

Colophon on fo. 177 (The folios bear the numbers 108 to 179):

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयशिवयोगिकृतौ ब्रह्ममीमांसाभाष्यस्य द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः।

End:

तदुपभोगक्षयदर्शनेन शोकाग्निसंपर्कात् प्रविलीयते। सवितृकिरणसंपर्कादिव

933

ब्रह्मसूत्रभाष्यम्

End:

यस्मिन्नरश्च ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि यस्मिन्नैरंमदीयं सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता पूः ब्रह्मणः यस्मिंश्च प्रभुविमितं हिरण्मयं वेश्म, यश्चानेकधा मन्त्रार्थ-वादादिप्रदेशेषु प्रपञ्च्यते, तं ते प्राप्य न पञ्चाग्न्यादिसगुणविद्यावन्त इव भुक्तभोगा आवर्तन्ते। कुतः? तथाहि शब्दः एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त इति, न च पुनरावर्तत इत्येवं-

जातीयो निर्गुणब्रह्मविदुषां पुनरावृत्तिं प्रतिषेधति। यतः सम्यग्दर्शनविध्वस्ताशेषतमसस्ते मनसा केवलेन पित्रादिकामान् रमन्तः कार्यब्रह्मलोकात्यये सति तदध्यक्षेण सह सप्रतियोगिकब्रह्मज्योतिः-प्राप्तिपूर्वकं निष्प्रतियोगिकपरब्रह्मरूपेणाभिनिष्पद्यन्त इत्यवोचाम। ततस्तेषामनावृत्तिरेवेति सिद्धम्। अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति।

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयार्यशिवयोगिविरचितब्रह्ममीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः।

वेदान्तार्थविभासकौ जनिमतां संसारदुःखापहौ
ब्रह्मध्यानपरायणौ सरसवाग्गुम्भामृतैः सर्वदा।
सिञ्चन्तावधिकारिणामिह कलौ कर्णौ स्वयं सादरं
वन्दे ब्राह्मसुसूत्रभाष्यरचनाद् व्यासाप्पयाख्यौ गुरू॥

934

ब्रह्मसूत्रभाष्यशोधिनी

Beginning:

नत्वा श्रीसुन्दरेशाख्यं सद्गुरुं करुणानिधिम्।
मुमुक्षूणां विमोक्षाय कुर्वेऽहं भाष्यशोधिनीम्॥

इह खलु शंकराचार्यविरचितशारीरकमीमांसाभाष्ये विशेषतः श्रद्धालूनामनायासेन स्वात्मावबोधमुत्पादयितुं सम्यग्दर्शनविरोधीनि शारीरकभाष्यवाक्यान्युदाहृत्य तद्दोषोपन्यासपूर्वकं वार्त्तिकैकदेशाश्रयणेनैव तदितरवाक्यसंशुद्धये दुरुक्तानि परिहियन्ते।

End:

यदुक्तं नित्यश्च मोक्षो मोक्षवादिभिरिति। तत् सत्यम्। मोक्षवादिन एव मोक्षं नित्यमभ्युपगच्छन्ति, न मुक्ताः। कुतः? मोक्षस्य बन्धप्रतियोगिकत्वेनानित्यत्वोपपत्तेः। तथाच श्रुतिः न विरोधो न चोत्पत्तिरित्याद्या बन्धमोक्ष

935

मुक्तिद्वयादर्शः सव्याख्यः

An Anubhavādvaita work explaining the nature of the twofold Mukti: Sadehamukti and Videhamukti.

Beginning:

ईशादिमुक्त्यन्तरहस्यवेदिनं श्रीसुन्दरेशाह्वयदेशिकोत्तमम् ।
प्रणम्य सव्याख्यमनुग्रहार्थं मुक्तिद्वयादर्शमिहातनोम्यहम् ॥

इह खल्वीशादिमुक्त्यन्ताष्टोत्तरशतोपनिषद्रहस्यार्थाभिव्यञ्जकस्य ससूत्रस्यास्मद्विरचितानुभूतिमीमांसाभाष्यस्य विदेहमुक्त्यन्तसर्वार्थावबोधकत्वे सत्यपि ग्रन्थविस्तरभयात् तदर्थज्ञानालसानामुत्तमाधिकारिणां तत्रोक्तसर्वार्थसिद्ध्यर्थं सर्ववेदान्तसिद्धान्तरहस्यार्थगर्भितं प्रकरणमारभमाणो नत्वेत्यादिनादौ गुरुवन्दनं करोति—

नत्वा श्रीसुन्दरेशाख्यं सद्गुरुं चिन्मयाकृतिम् ।
मुक्तिद्वयादर्शसंज्ञं कुर्वे प्रकरणोत्तमम् ॥

नत्वेति । चिन्मयाकृतिं चिन्मयी आकृतिर्यस्य तमित्यर्थः ।

End:

इदं प्रकरणं नित्यं पठन्नेकान्तनिष्ठया ।
प्राप्यं मुक्तिद्वयं प्राप्य मोक्षातीतोऽवशिष्यते ॥

उक्तविशेषमिदं प्रकरणमेकान्तनिष्ठया नित्यं पठन् पुरुषः क्रमेण दर्शनश्रवणमननिदिध्यासनादिभिः जीवन्मुक्तिविदेहमुक्तिसंज्ञकमुक्तिद्वयं प्राप्य यच्छून्यवादिनां शून्यमित्यन्नपूर्णोक्तश्रीमन्माण्डव्यमहर्षिरिव मोक्षातीतोऽवशिष्यते । जगदादिसप्रतियोगिकनिर्विशेषब्रह्मान्तनिखिलतत्त्वापवादावशिष्टनिष्प्रतियोगिकसत्तासामान्यो भवतीति फलितार्थः ।

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षितविरचितं मुक्तिद्वयादर्शव्याख्यानं प्रणवरहस्यं समाप्तम् ।

936

मुक्तिसोपाननिर्णयः

This work forms the twenty-third Adhyāya of the Yajñavaibhavakhaṇḍa of the *Sūtasaṃhitā*. The meaning of the verses is given in Malayalam. The title *Muktisopānanirṇaya* is given in the first page of the work.

Beginning:

मुक्तिसोपाननिर्णयः

नित्यकर्माद्यनुष्ठानात् पापनाशो भवत्यतः ।
चित्तशुद्धिर्भवेज्जन्तोश्चन्द्रस्यैव प्रसादतः ॥

तया संसारदोषस्य भर्जनं भवति स्वत: ।
ततो विरक्ति: संसारात् पुनस्त्यागश्च कर्मणाम् ॥

End:

शिवप्रसादेन युतस्य वैदिकं न विद्यते कर्म जनस्य सुव्रता: ।
शिवप्रसादेन युतस्य तान्त्रिकं न विद्यते कर्म तथैव किंचन ॥
शिवप्रसादेन युतस्य सुव्रता न जन्मनाशौ भवत: सदैव तु ।
शिवप्रसादेन युत: स्वयं शिव: शिवप्रसादस्तु शिवप्रसादत: ॥

Colophon:

इति यज्ञवैभवखण्डे त्रयोविंशोऽध्याय: ।

937

मोक्षसार:

On the nature and characteristics of Mokṣa according to the Anubhavādvaita school of Vedānta.

Beginning:

प्रणम्य सद्गुरुं वक्ष्ये मोक्षसाराभिधं परम् ।
किंचित् प्रकरणं यस्मादन्यद् द्रष्टव्यमेव न ॥ १ ॥
अव्यक्ताख्यस्य तुर्यस्य जगत: प्राक् समुद्भवात् ।
सदासीदद्वयं शक्तिसंयुतं चोभयात्मकम् ॥ २ ॥
साकारं च निराकारं क्षीरे सर्पिरिवापृथक् ।
प्रागभावविहीनं तदेकं स्वगतभेदवत् ॥ ३ ॥

End:

तस्मादनादिनी सान्ता शक्ति: स्यात् परमात्मन: ।
अशक्तिकस्त्वनाद्यन्त इति शास्त्रार्थनिर्णय: ॥ ३९ ॥
त्रिपान्नारायणाद्येतदव्यक्तादि च यज्जगत् ।
समष्टिव्यष्टिरूपं तु सर्वमाद्यन्तवद् ध्रुवम् ॥ ४० ॥

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्यस्यानुभवाद्वैतप्रतिष्ठापनाचार्यस्याप्पयदीक्षितस्य कृतिषु मोक्षसार: समाप्त: ।

939

मोक्षसारविवरणम्

Beginning:

ब्रह्मगीतापञ्चमाध्यायचत्वारिंशश्लोकेन शक्तिरप्यसतो नास्तीत्यसत: शक्तिमत्त्वं प्रतिषिध्य सतो बीजस्य दर्शनादिति सतस्तद्धितम्। पुन: सापि शक्ति: सती किंवासती सदसती तु वेति त्रेधा विकल्प्य परिहारेणासच्छक्ते: सिद्धिमाह ।

End:

पश्चान्न जगदुत्पत्तिशङ्कावकाश इति स्थितम्। एतेन पूर्वकल्पप्रपञ्चोक्तेति व्यासोक्तमन्नादि-सृष्टयर्थकमासीत्। आदिसृष्टिं पृच्छत: अवान्तरसृष्टिप्रतिवचनासामञ्जस्यं स्यात्।

940

योगसार:

This work gives the essence of Yoga according to the Anubhavādvaita school. The work is divided into eight Adhyaya-s: समाधिशोधनम्, सांख्ययोगशोधनम्, मतत्रयशोधनम्, प्रश्नोत्तरकथनम्, गौणमुख्ययोगकथनम्, चिज्जडविवेक:, पादचतुष्टयादिभेद:, मोक्षातीताभ्यासकथनम्।

Beginning:

संग्रहेण रहस्यार्था: सर्वे यत्र प्रपञ्चिता: ।
मुक्त्यै यदन्यो नो दृश्यो योगसारोऽयमुच्यते ॥ १ ॥
दृश्यानुविद्धे प्रथमे समाधौ ब्रह्मण: स्मृति: ।
अखण्डप्रत्यगात्मीया तत्त्यागो ह्युपबृंहणात् ॥ २ ॥
तत: शब्दानुविद्धाख्ये द्वितीये ध्यानमूर्जितम् ।
भावनं प्रोच्यते तच्च परित्याज्यं मनीषिभि: ॥ ३ ॥
निर्विकल्पसमाधिर्यस्तृतीय: स्वानुभूतिमान् ।
तूष्णीं स्थितिरिति प्रोक्त: स च त्याज्यो निरङ्कुशम् ॥ ४ ॥

End:

एतच्छास्त्रैकनिष्ठावशत इह महानेव सद्यो विदेहो
ब्रह्मात्मैक्यानुभूत्या निरतिशयसुख: सोऽतिवर्णाश्रमी च ।
सर्वस्वातन्त्र्यवानप्यखिलजनहितैषित्वतो यस्य कस्य
स्वीकुर्यादाश्रमस्य प्रबलतरमतं लिङ्गमेवाप्रमत्त: ॥

सव्याख्ये योगसारे श्रुतिशतगदिताशेषगूढार्थगर्भे
निष्ठां चित्तस्य कुर्वन्निखिलबुधवरैर्वन्दनीयो महात्मा ।
स्वात्मारामः प्रशान्तः सकलभवमहाम्भोधिपारं गतः सन्
नीरूपं ब्रह्म लब्ध्वा जयतु जयतु वै सर्वलोकोपकारी ॥

Colophon:

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजस्याप्पयदीक्षितस्य कृतिषु योगसारे मोक्षातीताभ्यासप्रदर्शनं नामाष्टमोऽध्यायः

The work is translated into Tamil by the author himself and a copy of the translation is available in the Adyar Library.

941

योगसारः सव्याख्यः

Beginning:

ओमित्यक्षरमेकमप्यतिबृहद् ब्रह्म स्वभेदं वह-
त्यष्टाविंशतिकोत्तराक्षरशतस्वान्तर्गमात्रावशात् ।
यस्मिन्निष्प्रतियोगिके परतरे सर्वाधिके लीयते
तं नित्यं प्रणतोऽस्मि सद्गुरुवरं श्रीसुन्दरेशाभिधम् ॥
अष्टोत्तरश्रुतिशतेरितसत्स्वरूपमानन्दचिद्घनमपेतविकारजातम् ।
एकं च नैकममलं तदतीतमीशं श्रीसद्गुरुं हृदि सदा परमं प्रणौमि ॥

अत्र खलु लोके द्वैतिविशिष्टाद्वैतिनां सगुणब्रह्मैकवादित्वेन तत्त्वमस्यादिमहावाक्यनिश्चित-ब्रह्मात्मैक्यवादविरोधितया तदितरेषां तदैक्यवादाविरोधिनामिव स्थितानां शुद्धाद्वैतिनां प्रबन्धानेव स्वभावादधीत्य तदर्थेषु सम्यग्विचारितेषु कर्मोपासनयोगाद्यशेषसमुच्चयं विना केवलसांख्यपर्यवसन्नतां तेषामवगम्य योगाभ्यासावकाशाभावेन वासनाक्षयमनोनाशाद्यहेतुतया नेमे प्रबन्धा मुमुक्षूणां नि-श्रेयसाख्यपरमपुरुषार्थप्रदा भवेयुरिति निश्चित्य लोकोपकारायाष्टोत्तरशतोपनिषत्प्राधान्येनादावस्माभि-रनुभूतिमीमांसादयः सांख्ययोगसमुच्चयार्थका बहवः प्रबन्धाः प्रणीताः ।

End:

अत्रोच्यते—सामान्यदृष्ट्याखण्डैकरसकेवलात्मतामनुक्त्वा विरूपब्रह्मताया उक्तत्वादिति । विशेषदृष्ट्या तु चतुर्णामपि द्वन्द्विनामन्योन्याश्रयत्वसंभवात् सर्वद्वन्द्वातीतमेवारूपं ब्रह्मेति विवक्षाभेदेन भेदव्यवहार इत्यनवद्यम् ।

एतच्छास्त्रैकनिष्ठावशत इह महानेव सद्यो विदेहो
ब्रह्मात्मैक्यानुभूत्या निरतिशयसुखः सोऽतिवर्णाश्रमी च ।

सर्वस्वातन्त्र्यवानप्यखिलजनहितैषित्वतो यस्य कस्य
स्वीकुर्यादाश्रमस्य प्रबलतरमतं लिङ्गमेवाप्रमत्तः ॥
सव्याख्ये योगसारे श्रुतिशतगदिताशेषगूढार्थगर्भे
निष्ठां चित्तस्य कुर्वन्निखिलबुधवरैर्वन्दनीयो महात्मा ।
स्वात्मारामः प्रशान्तः सकलभवमहाम्भोधिपारं गतः सन्
नीरूपं ब्रह्म लब्ध्वा जयतु जयतु वै सर्वलोकोपकारी ॥

Colophon:

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजस्याप्पयदीक्षितस्य कृतिषु योगसारे मोक्षातीताभ्यासदर्शनं नामाष्टमोऽध्यायः ।

943

श्रुतिसिद्धान्तमालिका

A short work of one hundred and one verses explaining the principles of the Anubhavādvaita Vedānta as taught in Vedic texts.

Beginning:

अद्वैताम्बुजभास्करं श्रुतिशिरःसारं जगत्कारणं
संसारार्णवतारकं प्रणमतां सच्चित्सुखं केवलम् ।
सत्यं शाश्वतमप्रमेयमखिलाचार्योत्तमं शंकरं
जाग्रत्स्वप्नसुषुप्तसाक्षिणमहंशब्दार्थमेकं भजे ॥
शैवाद्वैतमयूरनीरदमसत्संसाररोगौषधं
नित्यानन्दघनं परात् परतरं वेदान्तसारं विभुम् ।
लोकेशं परमात्मभूतमगुणं नित्यं गुरूणां गुरुं
कोशातीतमिहाप्पयाध्वरिवरं कूटस्थमेकं भजे ॥
द्वैतध्वान्तसहस्रभानुमखिलोत्पत्त्यादिहेतुं परं
वेदान्तस्वमनन्तमादिरहितं सच्चित्सुखं निष्कलम् ।
श्रीमत्सद्गुरुमद्य संसृतिजरापीयूषमेकं प्रभुं
वन्देऽखण्डरसं वपुस्त्रयपरं प्रत्यक्स्फुरत्सुन्दरम् ॥
केनैतौ चरणौ मम प्रचरतः पाणी च संगृह्णतः (?)
केनैषा वचनानि वाग्वदति वा पायुर्मलं केन च ।
कुक्षेः संत्यजतीह केन जनयत्येषोऽपि गुह्यः सुखं
लोके नैवमहोऽस्ति कश्चिदपि हि प्राणी विचारक्षमः ॥

End:

लोके मुमुक्षुमनुजा गुरुलाभहानौ
मत्वा गुरून् मनसि नः स्वयमप्पयाख्यान् ।
पश्यन्त्यमुं सकृदपीह महाप्रबन्धं
नित्यं वयं खलु विमोचनलग्नकाः स्मः ॥ १०१ ॥

Colophon:

इति श्रीमद्भरद्वाजकुलारविन्ददिनकरश्रीकण्ठमतस्थापनाचार्यार्द्वैतशिखामणिश्रीमदप्पयदीक्षितेन्द्रान्वयजेन विशालाक्षीगर्भसंभवेनाप्पयशिवयोगीन्द्रेण विरचिता श्रुतिसिद्धान्तमालिका समाप्ता ।

प्रबन्धो वयसि ह्येष षड्विंशतितमे महान् ।
रचितोऽप्पययोगीन्द्रवरेणेति विदुर्बुधाः ॥

इति श्रुतिसिद्धान्तमालिका समाप्ता ।

944

सप्तश्लोकी सव्याख्या

Seven stanzas on Anubhavādvaita with a commentary. Many leaves are missing in the MS.

Beginning:

. . . . यथा कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, एवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति । तदनुपपन्नमिति ब्रूमः । कुतः? उत्पन्नमप्यनन्यदेवेत्येवं निर्धारणे हठात्कारापत्त्या यथेच्छाचारप्रसङ्गात् । तथाहि—एवमेवान्यः कश्चनात्मनः परब्रह्मवित्त्वं मत्वा मया कृतमप्यकृतमेव भुक्तमप्यभुक्तमेवेत्यादिकं निरङ्कुशं ब्रूयात् ।

End:

यतो वा इमानीत्यादिश्रुत्युक्तं जीवस्रष्टृत्वादिधर्मकमशरीरं सर्वगतचैतन्यसत्यज्ञानानन्तरसात्मकमानन्दप्रचुरं निर्गुणं यतो वाचो निवर्तन्ते इति न निरोधो न चोत्पत्तिरिति चैवमादिश्रुत्युक्तमवाङ्मनसगोचरं बन्धमोक्षादिसर्वद्वन्द्वातीतं शरीराशरीरापेतमव्यवहार्यमतीतमिति । एवं त्रिलिङ्गकत्वस्य बहुशोऽवधारितपूर्वत्वादलमतिप्रसङ्गेन ।

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ सप्तश्लोकी सव्याख्या समाप्ता ।

945

सर्ववेदान्तस्वरसार्थदीपिका

The author after discussing the meaning of some Upaniṣadic passages concludes that the persons of all castes and groups are eligible to acquire the knowledge of Brahman through their own scriptures in whatever language these may be and get the final liberation.

Beginning:

श्रीमन्तं सद्गुरुं नत्वा सर्वतन्त्रार्थवेदिनम् ।
क्रियते सर्ववेदान्तस्वरसार्थप्रदीपिका ॥
श्रीमत्यप्पयदीक्षितोत्तमकुले जातेन भूमौ चिरा-
द्वेदान्तैककृतश्रमातमतिना ताम्रातटावासिना ।
कर्त्रा ग्रन्थचयस्य सद्विविदिषुप्रज्ञाविशेषं सुखा-
च्छान्त्योत्पादयितुं मयाप्पयसमाख्यातेन सत्यार्थिना ॥

अत्र खलु भूमण्डले वेदान्तानां सत्यार्थवादित्वं सर्वैरभ्युपगतम् । वेदास्तु द्राविडभाषायां विद्यमाना एवेति केचित् । म्लेच्छभाषायां विद्यमाना एवेत्यन्ये । हूणभाषायामेवेत्यपरे । संस्कृतभाषायामित्येके ।

End:

यच्चोक्तम्—ब्राह्मणा एव पूर्वकर्मप्रेरिता अग्निहोत्रादिनिष्ठा दृश्यन्ते, न तु शूद्रा इत्यादि, तत् प्रत्युच्यते । अद्वितीयब्रह्मात्मबोधराहित्येन भ्रान्त्यारोपितब्राह्मणत्वाद्यभिनिवेशवद्भिरग्निहोत्रादीन्यनुष्ठितानीति चेत्, तानि अभ्रान्तैरप्यात्मविद्भिरनुष्ठेयानीति को नियमः । न हि जननकालमृतिकालयोर्मध्ये अयं ब्राह्मणः, अयं शूद्रः इति स्वभावगमकानि वाक्यानि

946

साक्ष्यष्टकं सव्याख्यानम्

Eight stanzas, with the author's own commentary, on Ātman as the witness or *sākṣin* in all stages of life.

Beginning:

श्रीसद्गुरुं सकलवेदनिधिं प्रणम्य श्रुत्यन्तनिश्चितरहस्यतरार्थगर्भं ।
साक्ष्यष्टकप्रकरणेऽत्र तु वक्ष्यमाणे सव्याख्यके भवतु नित्यरतिर्मुमुक्षोः ॥ १ ॥
श्रुतिस्मृतिन्यायरहस्यभाष्यैर्मुक्त्यै मयार्था गदिताश्च सर्वे ।
तथापि तत्प्रौढतरार्थबोधे ग्रन्थोऽल्पसं रच्यत एष मुक्त्यै ॥ २ ॥

अत्र खलु निखिलवेदान्तपारावारपारीणपरमगुरुचरणकमलनित्यसेवाधुरंधरेण श्रीमदप्पयदीक्षितेन्द्रविशुद्धान्वयजेनाप्पयदीक्षिताचार्यसंज्ञकेन मयेशावास्यादिमुक्त्यन्ताष्टोत्तरशतोपनिषत्स्वपि पौर्वापर्येण पुनः पुनः पर्यालोच्यमानासु वक्ष्यमाणप्रकारकैकवाक्यतया शास्त्रार्थोऽवधार्यते ।

End:

अष्टोत्तरशतश्रौतसाक्षिजुष्टो नरः स्वयम् ।
साक्ष्यष्टकमिदं पश्येद्यदि सद्यो विमुच्यते ॥

अष्टेति । नरः ईशावास्यादिमुक्त्यन्ताष्टोत्तरशतोपनिषद एव साक्षिणः, तैः जुष्टः सन् स्वयमेकान्तत इदं साक्ष्यष्टकं पश्येद्यदि सद्य एव विमुच्यते । विदेहमुक्तेरेव मुख्यसद्योमुक्तित्वात् तां गच्छतीति स्थितम् ।

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ साक्ष्यष्टकं सव्याख्यं समाप्तम् ।

948

हरिहरब्रह्मसामरस्यं सव्याख्यानम्

The author tries to prove that Viṣṇu, Śiva and Hiraṇyagarbha have the same status, being reflections of Parameśvara or Paramaśiva. The Upaniṣad-s are quoted for authority.

Beginning:

गुणात् सत्त्वादाद्यप्रणवगमकारादपि घटात्
त्रयाणामुत्कर्षो हरिहरविधीनां क्रमगतेः ।
तथा पूरात् कृष्णादकृतित इह ध्यान उदितो
निकर्षश्चैवं सत्यभवदुचितं साम्यमवधौ ॥

गुणादिति । ध्यानबिन्दूपनिषदि—

ओमित्येकाक्षरं ब्रह्म ध्येयं सर्वमुमुक्षुभिः ।
पृथिव्यग्निश्च ऋग्वेदो भूरित्येव पितामहः ॥
अकारे तु लयं प्राप्ते प्रथमे प्रणवांशके ।
अन्तरिक्षं यजुर्वायुर्भुवो विष्णुर्जनार्दनः ॥
उकारे तु लयं प्राप्ते द्वितीये प्रणवांशके ।
द्यौः सूर्यः सामवेदश्च स्वरित्येव महेश्वरः ।
मकारे तु लयं प्राप्ते तृतीये प्रणवांशके ॥

End:

तथैवेश्वरब्रह्मणोश्च। तर्हीश्वरस्य प्रतिबिम्बत्वाविशेषाज्जीवसेव्यत्वानुपपत्तिप्रसङ्ग इति चेन्न। मायाप्रतिबिम्बितस्येश्वरस्य बिम्बभूतं ब्रह्म हि बृहत्। अविद्याप्रतिबिम्बभूतस्य जीवस्य बिम्बभूतः प्रत्यगात्मा तु न तथेति विशेषदर्शनात् तयोः सेव्यसेवकभावोपपत्तिरित्यवगन्तव्यम्।

VEDĀNTA: PRATYABHIJÑĀDVAITA

949

A commentary on Utpaladeva's *Īśvarapratyabhijñāsūtra-s*. See *AG*, p. 70.

950

A short metrical treatise in one hundred and five verses on the main principles of the Pratyabhijñā school as taught in the *Ādhārakārikā* of Śeṣa. See *AG*, pp. 63 ff.

951

Fifty verses on the supremacy of the Parā Śakti of Śiva, according to the Pratyabhijñā school. The MS. does not mention the author's name, but according to the printed edition, the author is Ādyanātha.

955

पराप्रावेशिका

The work describes the essential nature of the thirty-six Tattva-s or categories accepted in the Pratybhijñā school. According to the commentary described next, the author of the text was Nāgānanda and the work is called *Svarūpaprakāśikā*. The colophon of this MS. calls the work *Svarūpa-ṣaṭtriṃśattattvasūtrapañcāśikā* and MG, R. 2159 calls it *Svarūpaprkāśikā*, while MG, R. 5042 calls it *Ṣaṭtriṃśattattvadarpaṇa*. In the printed edition the work is called *Parāprāveśikā* and is attributed to Kṣemarāja.

Reads the following verse and colophon at the end:

दीयते शिवसद्भावः क्षीयते मलसंततिः ।
दीयते क्षीयते येन तद्दीक्षेत्यभिधीयते ॥

Colophon:

इति स्वरूपषट्त्रिंशत्तत्त्वसूत्रपञ्चाशिका ।

957

पराप्रावेशिकाव्याख्या स्वरूपविमर्शिनी

The commentator was the pupil of Viśvātmānanda. The commentary calls the text *Svarūpaprakāśikā*.

Beginning:

प्रकाशानन्दनाथा . . . . . .
. . . . . कुमतमदगजप्रौढकं वीरवाक्यै-
विंद्यासत्संप्रदायैर्निखिलयतिनुतैर्मन्त्रयन्त्रस्वतन्त्रैः ।
पूज्यः श्रीमानुतुल्यो जनकतनयया लक्ष्मणेनान्वितः सन्
व्याकुर्वन् शास्त्रजालं जयति हनुमता सेवितो राघवो नः ॥
विश्वप्रभावपटलप्रविजृम्भमाणां
विच्छेदशून्यपरमार्थचमत्कृतां ताम् ।
पूर्णोऽहमित्यहमिति प्रथनस्वभावां
स्वात्मस्थितिं स्वरसतः प्रणमामि देवीम् ॥
सर्वधात्वन्तरालीनानन्तस्तत्त्वौघनिर्भरः ।
विश्वश्चिदानन्दघनः परमाक्षरविग्रहः ॥
लोकनाथमतिरम्यममेयं देशिकेन्द्रमभिवन्द्य तनोमि ।
व्याकृतिं मृदुतरामिह नागानन्ददेशिकनिरूपितसूत्रे ॥
जीयात् प्रसन्नविश्वात्मश्रीदृक्पातसुविस्तृता ।
चिदानन्दात्मनो जाता श्रीस्वरूपविमर्शिनी ॥

अथ भगवान् नागानन्दाचार्यः संविच्छास्त्रसारभूतं स्वरूपप्रवेशिकाख्यं ग्रन्थं चिकीर्षुः तच्छास्त्रप्रतिपाद्यां परां देवतां समाविशति—

विश्वात्मिकां तदुत्तीर्णां हृदयं परमेशितुः ।
परादिशक्तिरूपेण स्फुरन्तीं संविदं नुमः ॥

विश्वात्मिकां प्रमेयत्वकार्यत्वादिना रूपेण वर्णपदमन्त्रकलातत्त्वभुवनषडध्वात्मकजगद्रूपां तदुत्तीर्णां प्रमातृत्वकर्तृत्वादिना रूपेण विश्वोत्तीर्णाम् ।

End:

अथ प्रकृतितत्त्वं लक्षयति—अहंकारादिपृथिव्यन्तानाम्

959

A Kashmir Śaiva work in Sūtra form, containing twenty Sūtra-s. In the *Śivasūtravṛtti*, Kṣemarāja speaks of himself as the pupil of Abhinavagupta. For details see *AG*, pp. 253 ff.

962

Seventy-one Prākṛta verses on the main principles of the Pratyabhijñā school. The author was also called Gorakṣa and refers to himself in the commentary of this work, as a resident of the Cola country, as the son of Mādhava and as the pupil of Mahāprakāśa. He closely follows Abhinavagupta's views found in the *Pratyabhijñāsūtravimarśinī*, etc. See *AG*, pp. 272 ff.

964

महार्थमञ्जरीव्याख्या परिमलः

The author quotes many works in the commentary including the *Lakṣmītantra*, *Cidgaganacandrikā*, *Yoginīhṛdaya*, *Śivadṛṣṭi*, *Rāmāyaṇa* and *Mahābhārata*.

Post-colophon writing:

पार्वत्याश्लिष्टदेहाय शंकराय नमो नमः ।
ईश्वरोऽहं सदा नित्यमीश एव भविष्यति ॥

तञ्जापुरीमिश्रनन्दिमङ्गलसंघावसथवासिना ईश्वरशास्त्रिणा बहुधान्यनामसंवत्सरे शुचिमासे तृतीयदिने लिखितमभूत् ।

966

महार्थमञ्जरीव्याख्या परिमलः

Reads the following verse at the end:

तीर्थैं तीर्थैं कृतवसतिभिः सेव्यमानार्थिसार्थैं-
स्तुङ्गैः शंभोः शिरसि पतिता भाति गङ्गेव यासौ ।
स्रोतोवाहक्रमपरिणता सारसालंक्रियाढ्या
शङ्कातापं शमयति सदा भट्टगोपालवाणी ॥

967

विरूपाक्षपञ्चाशिका

Fifty verses in Āryā metre on the principles of the Pratyabhijñā school, divided into four chapters or Skandha-s: Viśvaśarīravivecana, Prakāśaikātmya, Vimarśa and Vibhūti.

Reads the following colophon which is incorrect:

इति श्रीमहामाहेश्वराचार्यश्रीविद्याचक्रवर्तिनः कृतौ श्रीविरूपाक्षपञ्चाशिकायां चतुर्थः स्कन्धः ॥

969

Other works of the commentator are the *Kāvyaprakāśavyākhyā Saṃpradāyaprakāśinī* and *Alaṃkārasarvasvavyākhyā Saṃjīvinī*. He mentions the name of Govindacandra, probably his patron.

970

This work consists of seven Āhnika-s and 700 verses. Somānanda gives his genealogy as follows: Saṃgamāditya—Varṣāditya—Aruṇāditya—Ānanda—Somānada (the author). He is believed to have flourished in the last part of the 9th century A.D. See *AG*, pp. 160 ff.

972

This is the original work from which the entire philosophy of the Pratyabhijñā school sprang. These Sūtra-s are said to have been recovered by Vasugupta from an inscription found on a rock in Mahādevagiri in the 8th century A.D. The seventy-seven Sūtra-s are divided into three sections, according to the commentators: the first is Śāṃbhavopāya (22 Sūtra-s); the second Śāktopāya (10 Sūtra-s) and the third Āṇavopāya or Kaivalyopāya (45 Sūtra-s). See *AG*, pp. 154 ff.

973

शिवसूत्रवार्त्तिकम्

An anonymous metrical commentary on the *Śivasūtra* described above. This is different from Varadarāja's *Vārttika* and that of Bhāskara.

Beginning:

रुद्रक्षेत्रज्ञवर्गः समुदयति यतो यत्र विश्रान्तिमिच्छे-
द्यत्तत्त्वं यस्य विष्वक्स्फुरितमयमियद्यन्मयं विश्वमेतत् ।
स्वातन्त्र्यानन्दवृन्दोच्चलदमृतमयानुत्तरस्पन्दतत्त्वं
चैतन्यं शांकरं तज्जयति यदखिलद्वैतभासाद्वयात्म ॥

चैतन्यमात्मा ।

चैतन्यमिति विश्वस्य सर्वज्ञानक्रियात्मकम् ।
तत्स्वातन्त्र्यस्वभावोऽसौ स आत्मा परिकीर्तितः ॥

ज्ञानं बन्धः ।

ज्ञानमित्यात्मनस्तस्य किंचिज्ज्ञानक्रियात्मकम् ।
यदाणवं मलमसौ बन्धः स्वेच्छाविभावितः ॥

योनिवर्गः कलाशरीरम् ।

योनिर्मायाथ वर्गोऽस्याः कलाभिस्तत्त्वसंचयः ।
तन्मायाख्यं मलं येन भेदिता विश्ववृत्तयः ॥
कलेति व्याप्तिस्तस्य शरीरं यस्य तत् पुनः ।
मलं कार्ममथैतस्मिन् द्वयोर्बन्धोऽनुवर्तते ॥

End:

नैसर्गिकः प्राणबन्धः ।

निसर्ग इति निर्दिष्टः स्वातन्त्र्यं किं त्वतः कृतम् ।
भवेत् प्राणेन संबन्धः सोऽतिग्रहकृताश्रयः ॥

नासिकान्तर्मध्यसंयमात् किमत्र सव्यापसव्यसौषुम्नेषु ।

वामदक्षिणमध्यासीनाडीषु कुटिलात्मनः ।
हवनान्नासिकापापा शक्तिरन्तःस्थिराचरी ॥

भूयः स्यात् प्रतिमीलनमिष्यते ।

Colophon:

इति श्रीकण्ठप्रोक्ते श्रीमच्छिवसूत्रे तद्वार्त्तिके च कैवल्योपायप्रदर्शनं नाम तृतीयोल्लेखः ।

Post-colophon writing:

आनन्दानन्दनाथेन लिखितम् ।

974

This is a metrical commentary on the *Śivasūtra-s* of Vasugupta by Varadarāja also called Kṛṣṇadāsa, following the commentary of Kṣemarāja. As Kṣemarāja was a pupil of Abhinavagupta (11th century A.D.), Varadarāja must have lived later than the eleventh century A.D. The work is divided into three Unmeṣa-s: Śāṃbhavopāyaprakāśana, Śāstropāyaprakāśana and Āṇavopāyaprakāśana, containing about 380 verses in all.

I

INDEX OF WORKS

Abhayapradānasāra 130-1
Abhedakhaṇḍana 132-3
Adhikaraṇacintāmaṇi
see Adhikaraṇasārāvali-vyākhyā (100)
Adhikaraṇasārāvali 94-9
Adhikaraṇasārāvali-vyākhyā
—Adhikaraṇacintāmaṇi 100
